REPRODUCTION OF EARLIE EDITION OF THE
SABDARTHACINTAMANIH

शब्दार्थचिन्तामणिः

SABDARTHACİNTAMANIH

द्वितीय खण्ड

भाग - अ

ब्राह्मावधूत श्रीसुखानन्दनाथ

प्रिन्टवैल

जयपुर- 302 004

Published by
PRINTWELL
S-12 Shopping Complex
Tilak Nagar Jaipur 302 004

Distributed by
RUPA BOOKS PVT LTD
H O S-12 Shopping Complex Tilak Nagar Jaipur 302 004
B O 295-B Bharti Nagar P N Pudur Coimbatore 641 041

ISBN 81 7044-369 5 (Set)

SABADARTH CHINTAMANI
First Published 1860
Reprint 1992

Printed at

Efficient Offset Printers
215 Shahzada Bagh Indl Complex
Phase II Phone 533736 533762
Delhi 110035

च

च । अ । अन्वाचये ॥ यत्रैकस्य प्राधान्येना ऽपरस्य गौणत्वेनाख्यानं सो न्वाचयः । यथा । भोवटो भिक्षामट गाञ्चानयेति । अत्र भिक्षाटनं प्रधानं तत्कुर्वाणो यदि गाः पश्यसि तदा तामप्यानय नोचेत् भिक्षामेवाटेति ॥ समुच्चये । परस्परनिरपेक्षस्या नेकस्यै कस्मिन्नन्वये ॥ यथा । ईश्वरं गुरुञ्च भजस्वेति । उभयत्र न समासो ऽसामर्थ्यात् ॥ इतरेतरयोगे । अन्योन्यार्थे । मिलितानामन्वये ॥ समाहारे । समूहे ॥ पक्षान्तरे ॥ पादपूरणे ॥ अवधारणे ॥ हेतौ ॥ तुल्ययोगितायाम् ॥ विनियोगे ॥ चनति चिनोति वा । चन शब्दे चिञ् चयने वा । अन्येभ्योपीति ड ॥ द्वौ चकारावविलम्बस्य चकौ भवतः ॥ चण० यद्यर्थे णित् । समुच्चयादौत्वनन्वय ॥

च । पु । चण्डेशे ॥ कच्छपे ॥ चन्द्रे ॥ चौरे ॥ चवर्गे ॥ त्रि । दुर्जने ॥ निर्बीजे ॥

चकासत् । त्रि । प्रकाशमाने ॥ चकास्ति । चकास्दीप्तौ । लट. शत्रादेश ॥

चकितम् । न । भयसंभ्रमे ॥ त्रि । शङ्किते ॥ भीते ॥ तस्यलक्षणम् । प्रियाग्रे चकितभीते स्थानेपि भयमद्भुतम् ॥

चकिता । स्त्री । अष्टिसत्त्वकषोडशाक्षरायावृत्तौ ॥ भात् समतनगौ रष्टच्छेदेस्यादिह चकिता ॥ दुर्जयदनुजश्रेणी दुश्चेष्टाशतचकिता यद्भुजपरिघत्राता याता साध्वसविगमम् । दीव्यतिदिविपन्माला यस्त्वनन्दनविपिने गच्छत शरणं कृष्णं भोभीता भवरिपुत ॥

चकोर । पु । स्वनाम्ना प्रसिद्धे पक्षिविशेषे । कौमुदीजीविनि । चन्द्रिकापायिनि ॥ चटक शीतलं रुच्यं वृष्यं कापिञ्जलाभिधम् । तद्वच्चकोरज मांसं हृष्यञ्च बलपुष्टिदम् ॥ चकति । चकतृप्तौ । कठिचकिभ्या मोरन् ॥

चकोरक । पु । चकोरे ॥ स्वा० कन् ॥

चक्र । पु । कोके । चक्रवाके । चकवा इतिप्रसिद्धे पक्षिणि ॥ न । व्रजे । गणे ॥ सैन्ये ॥ रथाङ्गे । चक्का पैया इतिचभाषा ॥ राष्ट्रे ॥ दम्भान्तरे ॥ कुम्भकारोपकरणे । चाक इतिभा

ष। ॥ अस्त्रविशेषे । प्रहरणे ॥ पुट भेदे । जलावर्त्ते ॥ ग्रामजाले ॥ त गरपुष्पे ॥ महाभारतप्रसिद्धे व्यूह विशेषे ॥ तैलयन्त्रे ॥ मूलाधार-स्वाधिष्ठानमणिपूरानाहतविशुद्धाज्ञा ख्येषु शरीरस्थेषु षट्सु ॥ सर्वतोभ द्रादौ । देवार्चाधारयन्त्रे ॥ मन्त्रदी क्षोपयोगिष्वकडमादिषु ॥ श्रीच क्रे ॥ कौलिकानां हितार्थाय श्री सदाशिवोक्तषु महाचक्रादि पञ्चसु ॥ यथा । श्रीश्वरउवाच । चक्रं पञ्च विधप्रोक्तं श्रीतन्त्रेरुद्रयामले । विधि नापूजिते चक्रे सौख्यमोक्षफलंलभे त् ॥ महाचक्रंचक्रराजं दिव्यचक्रंत थापरम् । वीरचक्रं चतुर्थञ्चपशुच क्रञ्चपञ्चममिति ॥ पञ्च चक्रे सका मानामधिकार । यथा। राजचक्रं रा ज्यदं स्यात् महाचक्रन्तु मोक्षदम्। देवत्वदं देवचक्रं वीरचक्रन्तु सिद्धि दम् ॥ पशुचक्रन्तु दारिद्र्यदु खशो कामयप्रदम्। कापथ्येदक्षिणाचारे सर्वचक्रन्तु निष्फलमिति ॥ सकामा श्चैव निष्कामाद्विविधा भुविमानवा । बुद्धाशया कामिनोये तेषां महा धिकारिता ॥ * ॥ ब्रह्मज्ञानायतु मो क्ता भैरवीचक्रमुत्तमम् ॥ ब्रह्मज्ञान युतानान्तुतत्त्वचक्रेऽधिकारिता ॥ य

थोक्तं श्रीमहानिर्वाणे । नाचाधिका र सर्वेषां ब्रह्मज्ञान साधकान् वि ना । परब्रह्मोपासकाये ब्रह्मज्ञा ब्र ह्मतत्पराः । शुद्धान्त करणा शान्ता. सर्वप्राणिहितेरता ॥ निर्विकारा नि र्विकल्पा दयाशीला दृढव्रता । स त्यसङ्कल्पका ब्राह्मा स्तयेवात्राधि कारिणः ॥ ब्रह्मभावेन तत्त्वज्ञे ये प श्यन्ति चराचरम । तेषां तत्त्वविदां पुसांतत्त्वचक्रे ऽधिकारिता ॥ सर्व-ब्रह्ममय भावश्चक्रे ऽस्मिंस्तत्त्वसञ्ज-के । येषामुत्पद्यते देवि त एवतत्त्व चक्रिणइति ॥ छन्दोविशेषे । यथा । कुसुमलकलितनमणमिहनिहितगन्ध कुसुमरसविरचय वलयम् । चक्र मुरगपतिवरपरिगुणित षोडशक ल मतिसुललितभणितम् ॥ सुन्द रि नभसि जलदचयरुचिरे देहिन यनयुग मतिघनचिकुरे । मान मि ह हि जहि जलधरसमये किन्तव भ वति हृदय मिह मदयेइति ॥ क्रिय तेऽनेन। घञर्थेक । के कुलादीना मितिदिक्त्वम् ॥ अर्द्धर्चादि ॥

चक्रक । त्रि । तर्कविशेषे ॥ अन्यो न्याश्रयमेवावर्त्तितं चक्रकं भवति । स्वापेक्षापेक्ष्यपेक्षानिबन्धनेऽनि ष्टप्रसङ्गे । चतुष्कद्यादावपि स्वस्य

स्वापेक्षापेक्ष्यपेक्षित्त्वसत्त्वान्नाधिक्य म् ॥ अस्यात्माश्रयवत् त्रैविध्यम् ॥ अपिचास्यालक्षण यथा । स्वापेक्ष णीयापेक्षितसापेक्षितत्त्वनिबन्धनप्र सङ्गत्वमिति । अपेक्षाच प्रमावुत्प त्तौ स्थितौच ग्राह्या । तत्राद्या यथा । एतद्घटज्ञानं यद्येतद्घटज्ञानज न्यज्ञानजन्यज्ञानजन्यस्यात् तदाए तद्घटज्ञानजन्यज्ञानजन्यज्ञानभि न्नस्यात् । द्वितीया यथा । घटोय यद्येतद्घटजन्यजन्यजन्य स्यात्त दा एतद्घट जन्यजन्यभिन्न स्यात् । तृतीया यथा । घटोय यद्येतद्घ टवृत्तिवृत्ति स्यात् तथात्वेनोपलभ्ये तेति । इतितर्कशास्त्रम् ॥

चक्रकारकम् । न । व्याघ्रनखाख्यगन्ध वस्तुनि । करजे ॥ चक्रस्यकारकम्॥

चक्रकुल्या । स्त्री । पृश्निपर्ण्याम् ॥

चक्रगज । पु । चक्रमर्द्दे ॥

चक्रगण्डु । पु । वर्त्तुलाकारोपधाने । चातुरे । गालसिर्हांना गोलसिर्हा ना इतिचभाषा ॥

चक्रगदाधर । पु । परमात्मनि वासुदे वे ॥ मनस्तत्त्व ात्मक चक्र वुद्धितत्त्वा त्मिका गदाम् । धारयन् लोकर क्षार्थं गुप्तश्चक्रगदाधर ॥ चक्रगदे धरति । धृञ्० । पचाद्यच् ॥ चक्रग दयोर्धरोवा ॥

चक्रगुच्छ । पु । अशोकपादपे ॥

चक्रजीवक । पु । कुलाले । कुम्भकारे ॥ चक्र जीवनमस्य ॥

चक्रदंष्ट्र । पु । शूकरे ॥

चक्रदन्ती । स्त्री । दन्तीवृक्षे ॥

चक्रदन्तीवीजम् । न । जयपाले ॥

चक्रधर । पु । अङ्गे । विष्णौ ॥ अहौ । सर्पे ॥ त्रि । चक्रिणि ॥ ग्रामजालि नि ॥ धरति । धृञ्० । अच् । चक्र स्यधर ॥ चक्रधारयतिवा । अच् वा हुलकाणिलुक् ॥

चक्रधारणम् । न । अक्षे । रथावयवे काष्ठविशेषे ॥

चक्रधारा । स्त्री । प्रधौ ॥ चक्रस्यधारा ॥

चक्रनख । पु । व्याघ्रनखाभिधेगन्ध द्रव्ये ॥

चक्रनदी । स्त्री । गण्डक्याम् ॥

चक्रनामा । पु । माक्षिकधातौ ॥

चक्रनायक । पु । व्याघ्रनखे ॥

चक्रपन्नाट । पु । दद्रुघ्न ॥

चक्रपरिव्याध । पु । आरग्वधवृक्षे ॥

चक्रपर्णी । स्त्री । पृश्निपर्ण्याम् ॥

चक्रपाणि । पु । विष्णौ । नारायणे ॥ च क्र पाणौ यस्यस । प्रहरणार्थेभ्य परे निष्ठासप्तम्याविति सप्तम्या परत्वम् ॥

चक्रपाद । पु । रथे ॥ गजे । हस्तिनि ॥

चक्रपुष्करिणी । स्त्री । मणिकर्णिकायाम् ॥

चक्रफलम् । न । अस्त्रविशेषे । अट्टने ॥

चक्रबन्ध । पु । चित्रकाव्यविशेषे ॥

चक्रवन्धु । पु । } रवौ ॥
चक्रवान्धव । पु । }

चक्रभृत् । पु । विष्णौ ॥

चक्रभेदिनी । स्त्री । रात्रौ ॥

चक्रभ्रम । पु । } कुन्दाख्ये शिल्पियन्त्रे । चक्राकारे शस्त्रोत्तेजनयन्त्रे । शाणे ॥
चक्रभ्रमि । स्त्री । }

चक्रमण्डली । पु । अजगरसर्पे ॥

चक्रमर्द्द । पु । चकवँड इति कसौँदी इतिच भाषाप्रसिद्धे क्षुपविशेषे । दद्रुघ्ने । एडगजे ॥ चक्रमर्दो लघुस्वादू रूक्ष पित्तानिलापह । हृद्यो हिम. कफश्वासकुष्ठदद्रुकृमीन हरेत् ॥ हन्त्युष्णा तत् फल कुष्ठकण्डुदद्रुविषानिलान् । गुल्मकासकृमिश्वासनाशनकटुकस्मृतम् ॥ चक्र दद्रुम्मर्द्दनाति । मृदक्षोदे । कर्मण्यण ॥

चक्रमर्द्दक । पु । चक्रमर्द्दे ॥ स्वा० कन् ॥

चक्रयानम् । न । असाङ्ग्रामिके रथे । पुष्परथे ॥

चक्रयानकम् । न । चक्रयाने ॥

चक्ररद । पु । शूकरे ॥

चक्रलक्षणा । पु । विष्णौ ॥ रथे ॥

चक्रलक्षणा । स्त्री । गुडूच्याम् ॥

चक्रलताम्र । पु । वदरसालवृक्षे ॥

चक्रला । स्त्री । उच्चटायाम् । मुस्ताविशेषे ॥ चक्र लाति । ला० । आत इति क ॥

चक्रवर्त्ती । पु । समुद्रपरिवृतायाः सर्वभूमेरीश्वरे । सार्वभौमे ॥ चक्रे भूमण्डले राजमण्डले वर्त्तितुमक्र सैन्यंवर्त्तयितु सर्वभूमौचालयितु वाशीलमस्य । सुपीतिणिनि ॥ अवश्य वा चक्रवर्त्तयति । आवश्यके णिनि ॥ वास्तूके ॥ डगणे मध्यगुरौ । ऽ । सञ्ज्ञायाम् ॥ त्रि । चक्रवद्वर्त्तिनि ॥

चक्रवर्त्तिनी । स्त्री । जन्याम् । जतूकायाम् ॥ अलक्तके ॥ जटामांस्याम् ॥

चक्रवाक । पु । कोकपक्षिणि । चकवा इति भाषा ॥ अस्यमांस लघु स्निग्धंवलप्रदमुदाहृम् ॥ चक्रशब्देन उच्यते । वचपरिभाषणे । घञ् । न्यङ्क्वादि. ॥

चक्रवाकी । स्त्री । चक्रवाकस्य विहङ्ग्याम् । चकवा इति भाषा ॥ जातेरिति ङीष् ॥

चक्रवाटः । पु । क्रियारोहे ॥ शिखातरौ ॥ पर्यन्ते ॥ मेरोर्मस्तकसमीपे लोकपालाश्रयभूतायाम् अष्टादशसहस्रयोजनविस्तीर्णायां नेमौ ॥

चक्रवाड । पु । लोकालोकाख्यपर्वते ॥ चक्राकारेण वाडते । वाडृ आप्लाव्ये । अच् ॥ न । चक्रवाले । मण्डले ॥ चक्रं भूमण्डलं वलते । वल वेष्टने । कर्मण्यण् । डलयोरेकत्वम् ॥

चक्रवात । पु । वात्यायाम् । बवूरा इति भाषा ॥

चक्रवाल । पु । लोकालोकपर्वते ॥ न । मण्डलाकारेण परिणतसमूहे । मण्डले ॥ चक्राकारेण वलते । वल संवरणे । अच् । अन्येषामपीतिदीर्घ ॥ यद्वा । भावेघञि वाल । चक्रमिव वालोऽस्य ॥ चक्रं भूमण्डलं वलते । वल वेष्टने । कर्मण्यण् वा ॥ चक्रवालमस्याऽस्तीतिवा । अर्श आद्यच् ॥

चक्रवृद्धि । स्त्री । यत्र वृद्धिरूपधनदातुमशक्तोऽधमर्णः सवृद्धिकमिदं दास्यामीति स्वीकरोति तत्रयावृद्धि सा । सूदका सूद इति भाषा ॥ वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धि रुदाहृतेति नारद ॥

चक्रव्यूह । पु । युद्धार्थं मण्डलाकारेण सैन्यरचनायाम् ॥

चक्रशल्या । स्त्री । काकतुण्ड्याम् ॥ श्वेतगुञ्जायाम् ॥

चक्रश्रेणी । स्त्री । अजशृङ्ग्याम् ॥

चक्रसंज्ञम् । न । वङ्गे ॥

चक्रसम्बर । पु । बुद्धभेदे । वज्रटीके ॥

चक्रा । स्त्री । नागरमुस्तायाम् ॥ कर्कटशृङ्ग्याम् ॥

चक्राङ्ग । पु । श्वेतगरुति । हंसे ॥ चक्राण्यङ्गान्यस्य ॥ रथे ॥ चक्रमङ्गमस्य ॥

चक्राङ्गा । स्त्री । सुदर्शनायां लतायाम् ॥

चक्राङ्गी । स्त्री । कटुरोहिण्याम् ॥ हिलमोचिकायाम् ॥ मञ्जिष्ठायाम् ॥ वृषपर्ण्याम् ॥ कर्कटशृङ्ग्याम् ॥ चक्राकारमङ्गमस्या । गौरादित्वात् ङीष् ॥ हंस्याम् ॥

चक्राट । पु । विषवैद्ये ॥ धूर्त्ते ॥ दीनारे ॥

चक्राधिवासी । पु । नारङ्गवृक्षे । किर्मीरत्वचि ॥

चक्रावर्त्त । पु । घूर्णने ॥

चक्राह्व । पु । चक्रमर्द्दे ॥

चक्रिक । पु । घटिके । घटिकावादके ॥ चक्रं वाद्यत्वेनास्त्यस्य । ठन् ॥

चक्रिका । स्त्री । दुरुद्योगे ॥ घुण्टावर्त्ते ॥ जानुनि ॥ चक्री इतिभाषा प्रसिद्धे द्रव्यस्वरूपे ॥

चक्री । पु । जालिकभिदि ॥ कोके ॥ कुलाले ॥ अहौ ॥ सूचके ॥ वैकुण्ठे । नारायणे ॥ चक्रं मनस्तत्त्वात्मकं सुदर्शनाख्य मस्यास्ति इनि ॥ चक्रवर्त्तिनि ॥ चक्रमर्द्दे ॥ तिनिशे ॥

व्यालनखे ॥ काके ॥ खरे ॥ त्रि । च
क्रविशिष्टे ॥ चक्रमस्यास्ति । अतइ
निठनाविति इनिः ॥ चक्रयुक्तरथा
दियानारूढे ॥

चक्री । स्त्री । चक्की इतिसर्वजनप्रसि
द्धाया चूर्णपेषण्याम् । जाँता इति
भाषा ॥

चक्रीवान् । पु । गर्द्दभे ॥ चक्रवङ्क्रमणं
चक्रम् । तदस्यास्ति । मतुप् । आ
सन्दीवदितिसाधु ॥ चक्रीवान्नाम
राजापि ॥

चक्रुः । पु । कर्त्तरि ॥ करोति । डुकृ
ञ० । कुर्भ्रश्चेति चकारात्क्रु प्रत्य
योधातोर्द्वित्वञ्च ॥

चक्रेश्वरी । स्त्री । जिनानांविद्यादेवी
विशेषे ॥ इतिहेमचन्द्र ॥

चक्षणम् । न । अवदंशे । मद्यपानरो
चकभक्ष्यद्रव्ये । चखना इति भाषा ॥

चक्षा । पु । वृहस्पतैा ॥ उपाध्याये ॥

चक्षुःश्रवाः । पु । सर्पे ॥ चक्षुःश्रव क
र्णाऽस्य । सान्तः ॥

चक्षुर्वहनम् । न । मेषशृङ्गीवृक्षे ॥

चक्षुष्यः । पु । केतके ॥ पुण्डरीकवृक्षे ॥
शोभाञ्जनवृक्षे ॥ रसाञ्जने ॥ न । सौ
वीराञ्जने ॥ खर्परीतुत्थे ॥ प्रपौण्ड
रीके । स्थलपद्मे ॥ त्रि । प्रियदर्शने
॥ अक्षिहिते ॥ चक्षुषादर्शनीये ॥

चक्षुषेहितम् । शरीरावयवाद्यत् ॥

चक्षुष्या । स्त्री । कुलत्थिकायाम् ॥ सु
भगायाम् ॥ अजशृङ्ग्याम् ॥ अर
ण्यकुलत्थिकायाम् ॥ चक्षुषे हिता ।
यत् । टाप् ॥

चक्षुः । न । लोचने । नयने । नेत्रे ।
रूपग्रहणलिङ्गेन्द्रिये । रूपप्रकाशके
॥ उद्भूतरूपं नयनस्यगोचरो द्रव्या-
णि तद्वन्ति पृथक्त्वसङ्ख्ये । विभाग-
संयोगपरापरत्वस्नेहद्रवत्वं परिमाण
युतम् ॥ क्रियां जातिं योग्यवृत्ति-
समवायञ्च तादृशम् । गृह्णाति च
क्षुः संयोगादालोकोद्भूतरूपयोरि
ति कारिकावली ॥ पाणिभ्यां न स्पृशे
च्चक्षुः चक्षुषी नैकपाणिनेतिकर्मलो
चनम ॥ चष्टे पश्यत्यनेन चष्टे तेरू
पमनुभवत्यनेन वा । चक्षिङ्० ।
चक्षे शिच्चेत्युसिः । शित्वादनार्द्धधा
तुकत्वात् ख्याञ् न ॥ मेषशृङ्गी
वृक्षे ॥

चङ्कुरः । पु । स्यन्दने । रथे ॥ वृक्षे ॥
न । धोरणे । यानमात्रे ॥ चङ्कति ।
चकि. सैात्र । मन्दिवाशिमथिचति
चङ्क्यङ्किभ्यउरच् ॥

चङ्क्रमणम् । न । अतिशयभ्रमणे । इत
स्ततो भ्रमणे ॥ पुनः पुनर्भ्रमणे ॥ अ
नतिदेहपीडाकारकचङ्क्रमणस्य गु

णा'। आयुर्वलमेधाग्नीन्द्रियशुद्धिकारित्वम्॥ सदोपानद्धृतपादचङ्क्रमणगुणा। अनारोग्यत्वम्। अनायुष्यत्वम्। इन्द्रियदृष्टिनाशित्वम्॥ इति राजवल्लभ॥

चङ्ग। त्रि। शोभने॥ दक्षे॥ इति मेदिनी॥

चचेण्डा। स्त्री। फललताविशेषे। वृहत् फले॥

चञ्च। पु। पञ्चाङ्गुले॥ चञ्चति। चञ्चुगतौ। पचाद्यच्॥

चञ्चत्। त्रि। देदीप्यमाने॥

चञ्चत्पुट। पु। तालप्रभेदे॥ ताले चञ्चत्पुटेज्ञेय गुरुद्वन्द्व लघुप्लुतम्॥

चञ्चरी। स्त्री। तिन्तिडीवृते॥ भ्रमर्याम्॥

चञ्चरीक। पु। भ्रमरे। षट्पदे॥ चञ्चति। चञ्चु०। पर्फरीकादित्वात् साधु॥ चरति वा। चर०। पर्फरीकादित्वादीकन् चरेर्नुम्च॥

चञ्चल। पु। कामुके॥ अनिले॥ त्रि। अस्थिरे। सदाचलनस्वभावे। लोले। तरले॥ कदाचिन्नचञ्चलासती। चञ्चति। चञ्चु०। बाहुलकात् अलच्॥

चञ्चला। स्त्री। लक्ष्म्याम्॥ तडिति॥ पिप्पल्याम्॥ वर्णवृत्तविशेषे। यथा। तूर्यतालपञ्चिराजमेरुहारनायकेन चामरध्वजेन चापि मण्डिता सुवर्णकेन। वर्णिताऽतिसुन्दरेण पन्नगेन्द्रपिङ्गलेन चञ्चलाचकोरचारुलोचने सुमङ्गलेन॥ यथा। आलियाहि मञ्जुकुञ्जगुञ्जितालिलालितेन भास्करात्मजाविराजिरम्यतीरकाननेन। शोभिते स्थले स्थितेन सङ्गता यदूत्तमेन माधवेन भाविनी तडिल्लतेव नीरदेनेति॥ चञ्चनम्। चञ्चु०। घञ्। चञ्च लाति। ला०क॥

चञ्चा। स्त्री। नलनिर्माणे। नलनिर्मिते। चाच इतिगौडभाषा॥ तृणनिर्मितपूरुषे। वजूका इतिभाषा॥ चञ्चति। चञ्चु०। अच्। टाप्॥ चञ्चेव मनुष्य। लुम्मनुष्य इति कनोलुप्॥

चञ्चु। पु। नाडीचशाके॥ व्यडञ्चके। रक्तैरण्डे॥ एरण्डसामान्ये॥ क्षुद्रचञ्चुवृक्षे॥ स्त्री। पक्षिणामोष्ठे। त्रोट्याम्। चूच इति भाषा॥ चञ्चति। चञ्चु०। बाहुलकादु॥ चिञ्चुक्याम्। चेचूनाडीतिश्रुते॥ चञ्चु शीता सरा रुच्या स्वाद्वी दोषत्रयापहा। धातुपुष्टिकरी वल्या मेध्या पिच्छिलिका स्मृता॥ पत्रशाकविशे

स्रे। विजलायाम्। चीरपत्रिकायाम्॥

चञ्चुका। स्त्री। चञ्चौ। पक्षिणामोष्ठे॥

चञ्चुपत्र। पु। सुशाके। विजलायाम्॥

चञ्चुभृत्। पु। स्त्री। } खगे। पक्षिणि॥
चञ्चुमान्। पु। स्त्री। }

चञ्चु। पु। चञ्चुशाके॥

चञ्चुसूचि। पु। } सुगृहे। पीततुण्डे। वया इतिभाषा॥ चञ्चौ। सूचिरस्य। स्वार्थे क॥
चञ्चुसूचिक। पु। }

चञ्चू। स्त्री। चञ्चाम्। चोच्याम्॥ ऊडुत॥

चञ्चूक। पु। चेचू इतिप्रसिद्धे शाके॥

चटक। पु। कलविङ्क। गृहनीडे। चिड़ा इतिभाषा॥ चटतिभिनत्ति गृहीतधान्यादिक मुखेन। चटभेदने। पचाद्यच्। तस्मात् स्वार्थे क॥

चटकका। स्त्री। चटकायाम। चटकिकायाम्॥ उदीचामात.स्थानइति पक्षेइदादेशाभाव.॥

चटका। स्त्री। चटकस्यस्त्रियाम्॥ चटकस्य चटकाया वा स्त्र्यपत्ये। चिड़िया इतिभाषा॥ चटकस्य चटकाया वा स्त्र्यपत्यम्। चटकायाऐरक्स्त्रियामपत्येलुग्वक्तव्यः। तत्र टावन्तात् तद्धितेलुप्ते लुक्तद्धितलुकी तिटापोलुकि पुनरजादिलक्षणष्टाप् सच जातिलक्षणस्यङीषोवाधइति भाव॥ नचात्रप्रत्ययस्थादितीकारः शङ्क्य चटकायाऐरगितिलिङ्गादना दिषुनिपातनाद्दातदप्रवृत्ते। क्षिपकादित्वाश्चेत्त्वमितितुयुक्तम्। पुंयोगलक्षणो जातिलक्षणो वा ङीष् अजादिपाठाद्बाध्यते॥ श्यामाख्यपक्षिणि॥

चटकाशिर8। न। पिप्पलीमूले॥ चटकाया शिरइव॥

चटकिका। स्त्री। चटककायाम्॥ उदीचामात स्थानेयकपूर्वायाः इतिपक्षेइदादेश॥

चटु। अ। प्रियेवाक्ये॥

चटु। पुं। च.टौ। प्रियेवाक्ये॥ व्रतिनामासने॥ पिचण्डे। उदरे॥ चटति। चट०। मृगय्वादित्वात् कु॥

चटुल। त्रि। चञ्चले॥ शोभने॥ चटति। वाहुलकादुलच्॥ मत्वर्थे सिध्मादित्वाल्लच्वा॥

चटुला। स्त्री। विद्युति॥ अजा० टाप्॥

चटुलोल.। त्रि। चाटुलोले। सुचञ्चले॥ इति हारावली॥

चट्टलम्। न। सिद्धपीठविशेषे॥ यथा। चट्टले दक्षवाहुर्मे भैरवश्चन्द्रशेखरः। व्यक्तरूपा भगवती भवानी तत्रदेवता। विशेषत. कलियुगे वसामिचन्द्रशेखरे। इति॥

चणक । पु । शस्यविशेषे । हरिमन्थे ॥ चणक शीतलो रूक्ष पित्तरक्त कफापह । लघु कषायो विष्टम्भी वातलो ज्वरनाशन ॥ सचाङ्गारेणसम्भृष्ट स्तैलभृष्टस्तु तद्गुण । आर्द्रभृष्टो बलकरो रोचनश्च प्रकीर्त्तित ॥ शुष्कभृष्टोऽतिरूक्ष स्याद्वात कुष्ठप्रकोपन । स्विन्न पित्तकफ हन्यात् सूप क्षोभकरोऽहित ॥ आर्द्रातिकोमलो रुच्य' पित्तरक्तहरो-हिम' ॥ * ॥ हरितार्द्रचणकरन्धनम् । सुहरितहरिमन्थ चोद्भिन्नोनखाग्रै प्रथम मुदकसिक्तोवेसवारे णसिद्ध । लवणमरिचसङ्गाढ्य तैल हिङ्गुप्रसिक्त शिखरयति विशेषाज्जाठर मन्दवह्निम् ॥ छोलाभिधा-नकफल परिगृह्य शुद्ध तप्ते घृते सुललितक्वथितोषणाभ्याम् । ससा-धित सुरभित शुचिरामठेन जिह्वातले विशतिनित्यमतिप्रकामम् ॥

चणयते । चणदाने । क्रुन् ॥ मुनिविशेषे ॥

चणकरोटिका । स्त्री । चणकमुद्रायाम् ॥ चाणक्यरोटिका रूक्षा श्लेष्मपित्तास्रनुद्गुरु । विष्टम्भिनी न चक्षुष्या तद्गुणा तिलशष्कुली ॥

चणकशाकम् । न । स्वनाम्ना प्रसिद्धे शाके ॥ रुच्य चणकशाक स्याद् दुर्जरं कफवातकृत् । अम्ल विष्टम्भजनक पित्तनुद्दन्तशोथहृत् ॥ सुकृत चाणक शाक मल्लतक्रेण साधितम् । सहिङ्गुलवणेतप्ते भर्जितरामठान्वितम् ॥ चाराम्लभावसहजा स्वणकप्रवाला सम्मर्दितामरिचसैन्धवशृङ्गबेरै' । सन्चूर्णिता कटुकतैलयुतै सुपक्वैर्भृष्टे सुहिङ्गुचणकै परिहृत्त वासा ॥

चणकात्मज । पु । वात्स्यायनमुनौ ॥

चणकाम्लम् । न । चणकक्षारे ॥ चणकाम्लक मत्यम्ल दीपन दन्तहर्षकम् । लवणानुरस रुच्य शूलाजीर्णविबन्धनुत ॥

चणकाम्लवा, । न । चेन्नस्थफलवच्छणकपत्रशिशिरवारिणि ॥

चणद्रुम । पु । क्षुद्रगोक्षुरे ॥

चणपत्री । पु । रुदन्तीवृक्षे ॥

चणिका । स्त्री । तृणविशेषे । गोदुग्धायाम् ॥

चण्ड । पु । तिन्तिडीवृक्षे ॥ यमकिङ्करे ॥ दैत्यविशेषे ॥ न । तीक्ष्णे ॥ त्रि । अतिकोपने ॥ तीव्रे ॥ तीं, क्षावति ॥ चण्डते । चडिकोपे । पचाद्यच् ॥ चमति । चमुअदने । चणति वा । चणदाने । अमन्ताड्ड ॥

चण्डता । स्त्री । उग्रतायाम् ॥ भावे तल् ॥

चण्डनायिका । स्त्री । दुर्गायाम् ॥ अष्टनायिकान्तर्गतनायिकाविशेषे ॥

चण्डमुण्डी । स्त्री । स्थानविशेषे ॥ यथा । चण्डमुण्डी महास्थाने दण्डिनी परमेश्वरीति ॥

चण्डचन्द्रिका । स्त्री । विद्याविशेषे ॥

चण्डवती । स्त्री । चण्डीविशेषे ॥

चण्डवृष्टिप्रताप । पु । दण्डकविशेषे । यथा । यदिह नयुगलं ततः सप्त रेखा स्तदा चण्डवृष्टिप्रतापो भवेद्दण्डकः । यथा । प्रलयघनघटामहारम्भमेघावलीचण्डवृष्टिप्रतापाकुलं गोकुलम् सपदि समवलोक्य सव्येन हस्तेन गोवर्द्धनं नाम शैलं दधल्लीलया । कमलनयन इत्यर्चितिगर्ज्जत्वसन्मुग्धगोपाङ्गनालिङ्गनानन्दितो गलद्भिन्नधातुधाराविचित्राङ्गरागो मुरारातिरस्तु प्रमोदाय वहृति ॥

चण्डा । स्त्री । धनहरीद्रुमे । चोरनामगन्धद्रव्ये ॥ शङ्खपुष्प्याम् ॥ अष्टनायिकान्तर्गतनायिकाविशेषे ॥ जिनानां शासनदेवताविशेषे ॥ लिङ्गिनीलतायाम् ॥ कपिकच्छ्वाम् ॥ आखुपर्ण्याम् ॥ श्वेतदूर्वायाम् ॥ पद्मावतीनद्याम् ॥ टाप् ॥

चण्डांशु । पु । सूर्ये ॥ चण्डा अंशवो यस्य ॥

चण्डात । पु । करवीरे ॥ चण्डमतति । अत० । कर्मण्यण् ॥

चण्डातक । पु । न । अर्द्धोरुके । वरस्त्रीणामर्द्धोरुपर्य्यन्तवस्त्रे ॥ चण्डां कोपनां वरस्त्रियमतति । अत० । क्वुन् ॥

चण्डाल । पु । शूद्राद्ब्राह्मण्यामुत्पन्ने । प्लवे । मातङ्गे । दिवाकीर्त्तौ । श्वपचे । न्तरामधमे ॥ चण्डते । चण्डि० । पतिचण्डिभ्यामालञ् ॥

चण्डालकन्द । पु । कन्दविशेषे ॥

चण्डालवल्लकी । स्त्री । चण्डालवीणायाम् । चण्डोलवीणायाम । किङ्गरीतिभाषा ॥ चण्डालस्य वल्लकी ॥

चण्डालिका । स्त्री । किन्नरायाम् ॥ उमायाम् ॥ ओषधीभेदे ॥

चण्डि । स्त्री । चण्ड्याम् ॥ चण्डति । चण्डि० । सर्वधातुभ्य इन् ॥

चण्डिका । स्त्री । भवान्याम् । चण्ड्याम् ॥ अस्याः स्थानममरेशे ॥ चण्डैव । स्वार्थे कन् । टाप् ॥ चण्डी एव । इत्वम् ॥

चण्डिकेश्वर । पु । शिवे ॥

चण्डिमा । पु । चण्डत्वे ॥ चण्डस्य भाव । पृथ्० इमनिच् ॥

चण्डिल । पुं । रुद्रे ॥ वास्तूकशाके ॥ ना

पिते ॥

चण्डिला । स्त्री । नदीविशेषे ॥

चण्डी । स्त्री । कात्यायन्याम् । दुर्गायाम् ॥ हिंस्रायांनार्याम् ॥ कोपनायां योषिति ॥ मार्कण्डेयपुराणोक्ते श्रीदेवीमाहात्म्ये ॥ अतिजगती सप्तकवर्णयोदशाक्षरावृत्तिविशेषे । यथा । नयुगलसयुगलगैरिति चण्डी ॥ जयति दितिजरिपुताण्डवलीलाकुपितकवलकरकालियमौलौ । चरणकमलयुगचापलचण्डी पदनखरुचिजितभोगमणिश्री ॥ चण्डति । चडिकोपे । पचाद्यच् । वल्लादिभ्यश्चेति ङीष् ॥

चण्डीकान्त । पु । सदाशिवे ॥ चण्ड्याः कान्त ॥

चण्डीकुसुम । पु । रक्तकरवीरवृक्षे ॥

चण्डीश । पु । शिवे ॥

चण्डु । पु । उन्दुरौ ॥

चतुःपत्री । स्त्री । क्षुद्रपाषाणभेदिनि ॥

चतुःपर्णी । स्त्री । क्षुद्राम्लिकायाम् ॥

चतुःपला । स्त्री । नागबलायाम् ॥

चतुःपुण्ड्र । पु । भिण्डावृक्षे ॥

चतुःशालम् । न । सज्जवने । अन्योन्याभिमुखगेहचतुष्टयगृहे ॥ चतस्रः शालाः समाहृता । आवन्तो वेति क्लीवत्वम् ॥ पक्षे चतुःशाली ॥

चतुःषष्टि । स्त्री । कलाभेदे । कलानाम्न्युपविद्यायाम् ॥ सङ्ख्याभेदे । चौसठ इति भाषा ॥ बहुव्रीहि । तद्भेदे ॥ चतुरधिकाषष्टिः ॥

चतुःसमम् । न । मिलितचन्दनागुरुकस्तूरीकुङ्कुमरूपे ॥ औषधविशेषे ॥ यथा । लवङ्ग सैन्धव पथ्या यमानीचचतुःसमम् । आमशूलविबन्धघ्नं पाचनं भेदिशोधनम् ॥ अन्यच्च । जातीफलं चिदशपुष्पसमन्वितञ्च जीरञ्च टङ्कणयुतं चरकेण चोक्तम् । चूर्णानि माक्षिकसितासहितानि लीढ्वा आमातिसारमखिलं गुरु हन्ति शूलमिति ॥

चत्वार । त्रि । सङ्ख्याविशेषे । चार इति भाषा ॥ सङ्ख्येये ॥ यथा । चत्वारो वेदाः । चतस्रः स्त्रियः । चत्वारि फलानि ॥ चतति चत्यते वा । चतेर्याचने । चतेरुरन् ॥

चतुर । पु । चक्रगण्डौ ॥ न । हस्तिशालायाम् ॥ त्रि । नेत्रगोचरे ॥ चटुकारे ॥ कार्यकुशले । दक्षे । पटौ । निपुणे ॥ चतति चत्यते वा । चतेः । मन्दिवाशिमथिचति चङ्क्यङ्किभ्य उरच् ॥

चतुरसा । स्त्री । वर्णवृत्तप्रभेदे ॥ यथा । द्विजवरकर्णा विहरसवर्णा भ

वति यद्रासा किलचतुरसा ॥ यथा । जयजयविष्णो त्रिभुवनजिष्णो । अपनयदुःख प्रवितरसौख्यमिति ॥ यथावा । नवरतिशाली यदिवनमाली । विविधविलासे सखिकिमुदासे इति ॥

चतुरक्रम' । पु । सप्तधारूपकान्तर्गतरूपकभेदे ॥ द्रुतद्वन्द्वप्लुतद्वन्द्व तथा प्रान्तेगुरुर्भवेत् । द्वाविंशत्यक्षरैर्युक्तः शृङ्गारे चतुरक्रमइतिदामोदरोक्तेः ॥

चतुरङ्गम् । न । हस्त्यश्वरथपदातिरूपे सैन्ये ॥ यथा । चतुरङ्गद्युपिवलसुमहत प्रसहेम ह्रीतिरासायणम् ॥ * ॥ चौरङ्खेल इति सतरञ्जखेल इतिच प्रसिद्धे क्रीडाविशेषे ॥ यथा । युधिष्ठिरउवाच । अष्टकोष्ठगताञ्च या क्रीडा तां मे ब्रूहि तपोधन । प्रकर्षेणैवमेनायचतूराजीयतो भवेत् ॥ व्यासउवाच । अष्टाकोष्ठानुसमालिख्य प्रदक्षिणक्रमेणतु । अकर्णां पूर्वत. कृत्वा दक्षिणे हरितंवलम् ॥ पार्थपश्चिमत पीतमुत्तरेश्यामकं वलम् । राज्ञोवामेगज कुर्यात् तस्मादश्व तत स्तरिम् ॥ कुर्यात् कोणेयपुरतो युद्धे पत्तिचतुष्टयम् । कोणेनौका द्वितीये ऽश्वस्तृतीयेतु गजो वसेत् ॥ तुरीयेतुवसेद्राजा वटिका

पुरत. स्थिता । * । पञ्चकोन वटी राजा चतुष्कोणेव कुञ्जर ॥ त्रिकोणातुचलत्यश्व पार्थनौका द्वयेनतु । * । कोष्ठमेक विलङ्घ्याथ सर्वतो याति भूपति ॥ अग्रएव वटीयाति वलहन्त्यग्रकोणगम् । यथेष्ट कुञ्जरोयाति चतुर्दिक्षु महीपते ॥ तिर्यक्तुरङ्गमोयाति लङ्घयित्वात्रिकोष्ठकम् । कोणकोष्ठद्वय लङ्घ्य तजेन्नौकायुधिष्ठिर ॥ * ॥ सिंहासन चतराजी न्वपाकृष्टन्तुषट्पदम् । काककाष्ठ तु हन्नौका नौकाकृष्टप्रकारकम् ॥ * ॥ घालाघाते वटीनौका वल हन्ति युधिष्ठिर । राजा गजो हयश्चापि त्यक्त्वा घात निहन्तिच ॥ अन्यन्तस्ववल रक्षेत् स्वराजावलमुत्तमम् । अल्पस्यारक्षयापार्थहन्तव्य वलमुत्तमम् ॥ नौकायाश्चत्वारिपदानि अश्वस्याष्टौपदानि इत्याधिक्य मश्वस्य ॥ मतङ्गजस्य गर्वेणराजा क्रीडतिनिर्भरम् । तस्मातसर्ववल दत्त्वा रक्षेत् कौन्तेयकुञ्जरम् ॥ सिंहासन चतूराजी यदवस्थानतो भवेत । सर्वसैन्यैर्गजै र्वापि रक्षितव्यौ महीपति ॥ * ॥ अन्यद्राजपद राजा यदाक्रान्तो युधिष्ठिर । तदासिंहासनतस्य भवयते न्वपसत्तम ॥ राजाच न्वपतिहत्वा

कुर्यात् सिंहासनं यदा। द्विगुणं वाद्य येत् पणं अन्यथैकगुणं भवेत॥ द्वि गुणपणं दातव्यस्तेन प्रापयेत्॥ मि त्रसिंहासनपार्श्वे यदारोहति भूपति। तदा सिंहासन नाम सर्वं नयति त द्धनम्॥ यदासिंहासन चतुराजा-ष्टपदाश्रितः। तदाघातेपि हन्तव्यो बलेनापि सुरक्षितः॥ * ॥ विद्यमाने न्द्रपेयत्र स्वकीयेच न्द्रपत्रयम्। प्रा प्नोतिच तदातस्य चतुराजीयदाभवे त्॥ न्द्रपेणैव न्द्रपस्त्वा चतुराजीय दाभवेत्। द्विगुणंवाद्ययेत् पणं मन्य थैकगुणं भवेत्॥ स्वपदस्य यदा रा जा राजानं हन्ति पार्थिव। चतुरङ्गे तदाभूपवाद्ययेद्य चतुर्गुणम्॥ यदा सिंहासने काले चतुराजी समुत्थि ता। चतुराजीभवत्येव नतु सिंहास न न्द्रप॥ अचेद्वीजम्। उभयथाजये पिपरसिंहासनाधिकारात् परराज वधेश्चार्याधिक्यनिष्कण्टकत्वदर्शना-त् क्रीडायामपितथा कल्प्यते॥ * ॥ राजद्वय यदा हस्ते आत्मनोरा शिसस्थिते। परेणसहतत्वैको बले नाप्यपहार्यते॥ राजद्वय यदाहस्ते न स्यादन्यकरेपर। तदा राजाहि राजानं घातेपि त हनिष्यति॥ न्द्र पाकृष्टे यदा राजा गमिष्यतियुधिष्ठि

र। घाताघातेपिहन्तव्योराजात्व नरर्षभ.॥ * ॥ कोष्ठं राजपदं त्य-क्त्वा वटिकान्यदाव्रजेत्। वटीन येत् पदनामतदाकोष्ठवलं चषट्॥ यदितस्यभवेत् पार्थचतुराजीचषट् पदम्। तदापिच चतुराजीभवत्ये वनसंशय.॥ यदाते षट्पदेपि स्थि रा श्चावा हस्तिना तथा। षट्पद न भवे त् तस्य अवश्य शृणुपार्थिव॥ सप्तमे कोष्ठकेयात्वाद्वटिकादष्टकेनवै। तदा न्योन्यस्य हन्तव्यं सुखाय दुर्वलंवलम्॥ त्रिवटीकस्य कौन्तेय पुरुषस्य क-दाचन। षट्पद न भवत्येव इतिगो तमभाषितम्॥ * ॥ नौकैकावटि का यस्य विद्यते खेलनेयदि। माढाव टीतिविख्याता पदतस्यनदृश्यति॥ माढा घात्यापद राजपदं कोणपदस्य तत्। * । हस्तोरङ्गेवलनास्ति काक काष्ठतदाभवेत्॥ वदन्तिराक्षसाः सर्वेतस्य न सोजयाजयौ। * । प्रा र्थितेपश्चमेराशि स्ततवस्याश्चषट्प दे॥ अश्वोचस्यास्तदाराजन् चलित्वा चालित पदम्। द्विराहत्या गतौ त स्माद्धन्यात् परवलजयी॥ पार्थसिंहा सने काले काककाष्ठ यदाभवेत्। सिं हासन भवत्येव काककाष्ठ न भण्य ते॥ * ॥ उपविष्टस्त्वयत् स्थाने त-

स्योपरि चतुष्टये । नौकाचतुष्टयं यत्र क्रियते यस्य नौकया ॥ नौकाचतुष्टयं तच्चतुर्नौकेति भण्यते । * । नकुलोवाच । हे राजन् गजस्याभिमुखं गजम् ॥ यदि कुर्वीत धर्मज्ञ पापग्रस्तो भविष्यति । स्थानाभावे यदा पार्थे तस्मिन् हस्तिसम्मुखम् ॥ करिष्यति महाराजश्चेति गौतमभाषितम् । प्राप्ते गजद्वये राजन् हन्तव्यो वामतो गजः ॥ इति तिथ्यादितत्त्वे चतुरङ्गक्रीडनम् ॥

चतुरङ्गा । स्त्री । घोटिकावृक्षे ॥

चतुरङ्गिणी । स्त्री । सेनायाम् ॥ रथगजहयपदातयः चत्वारि अङ्गानि यस्याम् सा ॥

चतुरङ्गुलः । पु । वनवृक्षेः इति प्रसिद्धे आरग्वधवृक्षे ॥ चत्वारोऽङ्गुलयः प्रमाणमस्य पर्वणः तद्योगात् तथात्वम् ॥

चतुरब्दा । स्त्री । चतुर्वर्षवयस्कगवि ॥ चत्वारोऽब्दा वयःप्रमाणमस्याः । आर्हीयष्ठक् । अध्यर्द्धेतिलुक् ॥

चतुरम्लम् । न । कोलदाडिमवृक्षाम्लाऽम्लवेतसे ॥ अम्लवेतसवृक्षाम्लवृक्षजम्बीरनिम्बुकैः । चतुरम्लमिदंप्रोक्तम् ग्रन्थे भावप्रकाशके ॥

चतुरस्रः । त्रि । चतुष्कोणे ॥ लग्नाच्चतुर्थाऽष्टमस्थाने । लग्नाच्चतुर्थनिधने चतुरस्रसंज्ञे ॥ चतस्रोऽस्रयोऽस्य । सुप्रातसुश्वेत्यचन्तो निपातितः ॥

चतुरात्मा । पु । परमात्मनि परमेश्वरे ॥ सर्गादिषु पृथग्विभूतयश्चतस्र आत्मानः सन्त्यस्य । यथा । ब्रह्मा दक्षादयः कालस्तथैवाखिलजन्तवः । विभूतयो हरेरेता जगतः सृष्टिहेतवः ॥ विष्णुर्मन्वादयः कालः सर्वभूतानि च द्विज । स्थितेर्निमित्तभूतस्य विष्णोरेता विभूतयः ॥ रुद्रः कालोऽन्तकाद्याश्च समस्ताश्चैव जन्तवः । चतुर्द्धा प्रलयायैता जनार्दनविभूतयः ॥ इति विष्णुपुराणम् ॥ यद्वा । रागद्वेषादिरहितत्वात् चतुरं मनः आत्मा यस्य सः । मनोबुद्ध्यहङ्कारचित्तचतुष्टयात्मत्वाद्वा ॥

चतुराननः । पु । ब्रह्मणि । अजयोनौ ॥ यथा । तस्यां स चाम्भोरुहकर्णिकायामवस्थितो लोकमपश्यमानः । परिक्रमन् व्योम्नि विवृत्तनेत्रश्चत्वारि लेभेऽनुदिशं मुखानीति । श्रीभागवतम् । चत्वारि आननान्यस्य ॥

चतुरूषणम् । न । कणामूलसहिते त्र्यूषणे ॥ त्र्यूषणं सकणामूलं कथितं चतुरूषणम् । व्योषस्येव गुणाः प्रोक्ता अधिकाश्चतुरूषणे ॥

चतुर्गतिः । पु । नारायणे ॥ चतुर्गा

माश्रमाणां वर्णानाञ्च यथोक्तकारित्वा गतिराश्रय ॥ कच्छपे ॥

चतुर्ज्जातकम् । न । त्वगेलापत्रकनागकेसरेषु ॥ एतच्चरोचन रूक्ष तीक्ष्णोष्णा मुखगन्धहृत् । लघुपित्ताऽग्निकृद्वर्ण्ण्यं कफवात विषापहम् ॥

चतुर्थ । त्रि । तुरीये ॥ चतुर्णां पूरणः । तस्यपूरणेडट् तस्यथुगागम ॥

चतुर्थक । पु । चतुर्थेऽह्नि चतुर्थकइति ख्याते ज्वरविशेषे विषमज्वरविशेषे ॥ चतुर्थेऽह्निभव' । कालप्रयोजनाद्रोगइति कन् । दिनद्वयन्त्वतिक्रम्य य स्यात्तस्मिंश्चतुर्थकइत्युक्तो । चतुर्थकस्तुर्य्येऽह्नीत्यथागमदिनग्रहणात्त्वाख्येयम् ॥

चतुर्थांश । त्रि । चतुर्भागैकभागे । तुरीये । पादे ॥

चतुर्थिका । स्त्री । पलपरिमाणे ॥

चतुर्थी । स्त्री । चन्द्रस्यचतुर्थकलाक्रियारूपायांतिथौ ॥ तत्रजातस्यफल यथा । स्वपुत्रमित्रप्रमदाप्रमोदी द्यूताभिलाषी कृपया समेत । विवादशीलो विजयी विवादे भवेच्चतुर्थीप्रभव कठोर इति ॥ ङेभ्याम्भ्यसु इति चिके ॥ टिस्वान्ङीप् ॥

चतुर्द्दन्त । पु । ऐरावते । इन्द्रस्यगजे॥ चत्वारोदन्ता. अस्य ॥

चतुर्द्दश । त्रि । चतुर्द्दशानापूरणे ॥ तस्यपूरणेडट् ॥

चतुर्द्दश । त्रि । सङ्ख्याविशेषे १४ ॥ सङ्ख्येये ॥ चत्वारश्च दशच ॥ चतुरधिकादशवा ॥

चतुर्द्दशभुवनम् । न । पञ्चीकृतेभ्यो भूतेभ्योजातानि भर्भुव स्वर्म्महोजनस्तप सत्यमित्येतन्नामकानि उपर्य्युपरिविद्यमानानि सप्त । अतलवितलसुतलरसातलतलातलमहातलपातालनामकानि अधोऽधोविद्यमानानिच सप्त । मिलित्वाचतुर्द्दशभुवनानि भवन्ति ॥ चतुर्द्दशानां भुवनानांसमाहार ॥

चतुर्द्दशलोकम् । न । चतुर्द्दशभुवने ॥

चतुर्द्दशी । स्त्री । चन्द्रस्य चतुर्द्दशकलाक्रियारूपायांतिथौ ॥ तत्रोत्पन्नस्य फलम् । यथा । विरुद्धशील पुरुष सरोष श्चौर कठोर परवञ्चकश्च । पराम्नभोक्ता परदारचित्त स्तुर्द्दशीचे ज्जननस्य कालेइति ॥ टिस्वान् ङीप् ॥

चतुर्द्दोल । पु । न । चण्डोलइति च न्दोलइतिचख्याते द्विपदवाह्ये यान विशेषे ॥ यथा । राज्ञोयद् द्विपदयान विशेषाख्यमखविदु । चतुर्भिरुह्यतेयत्तुचतुर्दोलंतदुच्यते इति

॥ अन्नभोज । चतुर्भिर्वाहकैर्दं
ण्डै षड्भिः कुम्भैः सुसंस्थितैः । स्त
म्भैरष्टाभिरुदितं चतुर्दोलमनुत्तम
म् ॥ * ॥ तद्भेदा जयकल्याणवीर
सिंहा यथाक्रमम् । चतुर्विधानां भू
पानां चतुर्दोलाः प्रकीर्तिताः ॥ षि
ड्हस्तसम्मितायामो द्विहस्तपरिणाह
वान् । हस्तद्वयोन्नतः प्रोक्तश्चतुर्दो
लो जयाख्यया ॥ १ ॥ चतुर्हस्ताय
तो यस्तु सार्द्धहस्तस्तदन्यथा । चतु
र्दोलः समाख्यातः कल्याणः स्तावदुन्न
तः ॥ २ ॥ पञ्चहस्तायतो यस्तु त्रिह
स्तपरिणाहवान् । तावदेवोन्नतो वी
रश्चतुर्दोल उदाहृतः ॥ ३ ॥ आया
मपरिणाहाभ्यां चतुर्हस्तमितोच्छ्रिय
। चतुर्दोलो ह्ययं सिंहस्तदर्द्धेनोन्नतः
शुभः ॥ ४ ॥ * ॥ सर्वोऽयं द्विविधः प्रो
क्तः सच्छदिश्चापि निश्छदिः । आ
द्यः समरवर्षासु परः केलिधनात्यये
॥ * ॥ सर्वेषामेव काष्ठानां दण्डः
स्यादजवारणः । चन्दनेनैव घटना
सर्वेषामुपयुज्यते ॥ क्षौमं सर्ववस्त्रे
षु कनकं सर्वधातुषु । कुम्भश्च पद्म
कोषश्च गिरिश्चेति यथाक्रमम् ॥ वै
देश्यानां महीन्द्राणां चतुर्दोलेषु वि-
न्यसेत् ॥ हर्य्यश्चार्द्धचन्द्रश्च हंसः
केकी शुको गजः । अश्वः सिंहश्चत

स्याग्रे आदित्यादिदशोत्तरान् ॥ म
णिनियमस्तु दण्डवत् ॥ * ॥ रक्त
शुक्लश्च पीतश्च कृष्णश्चित्रस्तथारु
णः । नीलः कपिलः इत्युक्तः पता-
कानान्तु सङ्ग्रहः ॥ चतुर्दोलः सपता
कः शुभयानमिति स्मृतः ॥ * ॥ मु-
क्तास्तवकैर्दशभिर्युक्तः स्याद्राजके
शानाम् । चामरदण्डैर्दशभिर्दिग्ज
यिनां चतुर्दोलः ॥ चापपत्रस्य पुच्छ
श्चेत् सर्वोपरि परिन्यसेत् । याणासि
द्धिरयं नाम्ना चतुर्दोलो महीभुजाम्
॥ तस्माच्छादरहितो निश्छदिकश्
चतुर्दोलः । मानं पूर्ववत् ॥ * ॥
स पुनर्द्विविधः प्रोक्तः सध्वजश्चाथ
निर्ध्वजः । ध्वजानुषङ्गं यत्रास्ति
षड्गर्भविजयैषिणा ॥ तेषां मानन्तु-
चत्वारः स्वामिहस्तैः कसम्मिताः ।
कोणेषु पश्चादग्रे च हस्तद्वयमितौ
ध्वजौ ॥ सुवर्णं रजतं युग्मं विविधा
नां महीभुजाम् । मणिचामरकुम्भा
नां खड्गादीनां विनिश्चय ॥ चतुर्दो
लध्वजेऽराणां विज्ञेयो नवदण्डवत्
। निर्ध्वजेच चतुर्दोले मानमन्यत-
मश्रृणु ॥ आयामपरिणाहाभ्यां च
तुर्हस्तमितोच्छ्रियः । विजयोनाम
विख्यातश्चतुर्दोलो महीभुजाम् ॥
विजयो मङ्गलो भव्यो विलक्ष्यैकैक

चतुर्हो

हस्तिन । त्रिविधाना महीन्द्राणां या
नत्रयमुदाहृतम् ॥ * ॥ अष्टाभिरुच्छ्रि
तेयस्तु अष्टदोलमुशन्तिच । सोपा
नद्वितयश्चात्रविज्ञेयंशिल्पिनिर्मितम्
॥ * ॥ भोजस्तु । अष्टाभिर्वाहकैर्दे
ण्डे षड्भिस्तु दशभिर्घटै । स्तम्भै
स्तु दशभिर्ज्ञेय मष्टदोल महीभुजा
म् ॥ तद्भेदा जयकल्याणवीरसिंहा
यथा क्रमम् । चतुर्विधानाभूपाना
मष्टदोला प्रकीर्त्तिता ॥ षड्भिर्ह
स्तैर्मितायाम परिणाहश्चतुर्भुज ।
चतुर्हस्तोन्नतो राज्ञामष्टदोलं जय
विदु ॥ आयामपरिणाहाभ्यां पञ्चह
स्तमितोच्छ्रिय । कल्याणोऽष्टदो
लोय चतुर्हस्तमितोन्नति ॥ सप्तह
स्तायत कार्यप्रवरे पञ्चहस्तक । प
ञ्चहस्तोन्नतो वीरस्याष्टदोलो महीभुजाम् ॥ आयामपरिणाहाभ्यामष्ट
हस्तमितोच्छ्रिय । सिंहनामाष्टदो-
लोयं विज्ञेय षड्भुजोन्नत. ॥ * ॥
सर्वोप्यद्विविध प्रोक्तः सच्छदिश्चापि
निश्छदि । काष्ठवस्त्रघटादीनां म
णीनांचामरस्यच ॥ चतुर्दोलवदुन्ने
योनियमोन्योपिसूरिभि. । पूर्ववन्नि
श्छदेमीन ध्वजमानमिहोच्यते ॥
दशध्वजा स्तेषु चाष्टौ स्वामिहस्तद
योन्नता. । पञ्चा दशेध्वजैाराज्ञस्तु

चतुर्भं

र्हस्तमितौमतौ ॥ मणिचामरपञ्चा
णां निर्णयोनिष्पताकवत् । निर्ध्वज
स्याष्टदोलोय. शिविकेतिसगद्यते ॥
मणिकुम्भमुखादीनां नियमोनवद
ण्डवत् । इत्यष्टदोलकथनम् ॥ *
॥ एवद्वादशषोडशवि शतिदोलादि-
का कार्या: ॥ मानसार्द्धद्विगुणितं
सार्द्धत्रिगुणितं युक्तमेतेषाम् । विं
शतिदोलात् परतो भोजमतेसम
वेद्यानम् ॥ मानंवस्त्रनुभोज्यंबहुगु
णमेतज्जगाद वै व्यास. ॥ * ॥ भवि
ष्योत्तरेपि । यदुक्तद्वैपद यानंते
नमानेनयोन्नप । स्वयान कुरुते-
दिव्यसचिरं सुखमश्नुते ॥ स्वयोमयु
क्तयानस्थो भोममाप्नोतिमानव. ।
परयैागिकयानस्थ. क्लेशमाप्नोतिपु
ष्कलम् ॥ योदम्भादथवाऽज्ञानाद्या
न प्रकुरुते ऽन्यथा । तस्यैतानिविन
श्यन्ति आयुर्विद्यायशोधनम् ॥ प्रधा
नयानमाश्रित्यनियमोय समाश्रि
त । नाप्रधानेनिर्णयोस्ति तस्मिन्नन्तु
मनोज्ञता ॥ इतियुक्तिकल्पतरु ॥

चतुर्धा । अ । चतुष्प्रकारे ॥ यथा । च
तुर्धाविभजति । सख्याया विधार्थधा
॥ एकराशिं चतुर्धाकुरु । अत्राधि
करणविचालेचेतिधा ॥

चतुर्भद्रम् । न । सकलेषु धर्मार्थकाम

मोक्षेषु ॥ चत्वारिभद्राणिश्रेष्ठान्यच वृन्दे ॥ यद्वा । चत्वारि भद्राणि । दिक्सङ्ख्ये संज्ञायामितिसमास. ॥

चतुर्भुज. । पु । विष्णौ । माधवे ॥ त्रि । भुजचतुष्टयविशिष्टे ॥ चत्वारोभुजायस्य ॥ यद्वा । भुङ्क्ते भुनक्ति इति भुज' । चतुर्णां धर्मार्थकाममोक्षाणां भुज ॥

चतुर्मुख' । पु । ब्रह्मणि । परमेष्ठिनि ॥ औषधविषये रसविशेषे ॥ यथा । रसगन्धकलौहाभ्रं सम सूताङ्घ्रि हेमच । सर्वं खल्वतले पिष्ट्वा कन्यारसविमर्द्दितम् ॥ एरण्डपत्रै रावेष्ट्य धान्यराशौ दिनत्रयम् । संस्थाप्य ततउद्धृत्य सर्वरोगेषुयोजयेत् ॥ एतद्रसायनवरं त्रिफलामधुसंयुतम् । तत्त्वाग्निवर्द्धं खादेद्दीपनं लितनाशनम् ॥ क्षयमेकादशविधं कास पञ्चविध तथा । कुष्ठमष्टादशविध पाण्डुरोगान् प्रमेहकान् ॥ शूल श्वासञ्च हिक्काञ्च मन्दाग्निं चाम्लपित्तकम् । व्रणान सर्वा नाश्ववात विसर्पं विद्रधि तथा ॥ अपस्मारग्रहोन्मादान् सर्वाशांसित्वगामयान् । क्रमेणासेवितं हन्ति दृक्षमिन्द्राशनिर्यथा ॥ पौष्टिक वल्यमायुष्यं पुत्रप्रसवकारणम् । चतुर्मुखेणदेवे

न कृष्णात्रयेणसूचितम् ॥ इतिप्रयोगामृतम ॥ चत्वारिमुखानि अस्य ॥

चतुर्मूर्त्ति । पु । विष्णौ ॥ चतस्रोमूर्त्तयो विराट्सूत्राव्याकृततुरीयात्मानोऽस्य ॥ सिता पीता रक्ता कृष्णा चेतिचतस्रो मूर्त्तयोऽस्य वा ॥

चतुर्युगम् । न । चतुर्षु सत्यत्रेताद्वापरकलिसंज्ञकेषु ॥ चतुर्णां युगानां समाहार' । पात्रा दिस्वात् स्त्रीत्वम॥

चतुर्वक्त्र' । पु । ब्रह्मणि । वेधसि ॥

चतुर्वर्ग । पु । धर्मार्थकाममोक्षेषु मिलितेषु ॥ चतुर्णां वर्ग: समूह: ॥

चतुर्विद्य' । पुं । चातुर्वेद्ये । चतुर्वेदवेत्तरि ॥

चतुर्विधशरीरम् । न । जरायुजाण्डजस्वेदजोद्भिज्जाख्येषु ॥ चतुर्विधशरीराणि धृत्वा मुक्त्वा सहस्रश । सुकृता न्मानवो भूत्वा ज्ञानी चेन्मोक्षमाप्नुयात् ॥

चतुर्व्वीजम् । न । मेथिकादिचतुष्टये ॥ मेथिका चन्द्रसूरञ्च कलाजाजी यवानिका । एतच्चतुष्टययुक्तं चतुर्वीजमितिस्मृतम् ॥ तच्चूर्णं भक्षितं नित्यं निहन्तिपवनामयान् । अजीर्णं शूलमाध्मा न पार्श्वशूलं कटिव्यथामितिभावप्रकाश. ॥

चतुर्व्यूह. । पु । विष्णौ । नारायणे ॥

सृष्ट्यादिकार्यार्थं चत्वारो व्यूहा वि
भागा वासुदेवसङ्कर्षणप्रद्युम्नानिरु
द्धसंज्ञा मूर्त्तयो यस्य स । यथा । व्यू
ह्यात्मानं चतुर्द्धा वै वासुदेवादिमूर्त्ति
भिः । सृष्ट्यादीन् प्रकरोत्येष वि
श्रुतात्मा जनार्द्दन इति व्यासवचन
म् ॥ तथाच मार्कण्डेयपुराणे मूलका
रणं वासुदेवाख्यं व्यूहमुक्त्वोक्तम् ।
द्वितीया पृथिवीं मूर्द्ध्ना शेषाख्या धा
रयत्यधः । तामसी सा समाख्याता
तिर्य्यक्त्वं समुपाश्रिता ॥ तृतीया कर्म
कुरुते प्रजापालनतत्परा । सत्त्वोद्रि
क्ता तु सा ज्ञेया धर्मसंस्थानकारिणी ॥
चतुर्थी जलमध्यस्था शेते पन्नगतल्प
गा । रजस्तस्या गुणः सर्गं सा करोति स
दैव हीत्यादि ॥ शरीरपुरुषश्छन्द
पुरुषो वेदपुरुषो महापुरुष इति बह्वृ
चोपनिषदुक्ताश्चत्वारः पुरुषा व्यूहा
यस्येति वा ॥ न । साङ्ख्ये मोक्षशा
स्त्रे ॥ तत्र हि हेयं हानं हेयहेतुर्हा
नोपायश्चेति चत्वारो व्यूहाः प्रतिपा
द्या भवन्ति । तत्र त्रिविधं दुःखं हे
यम् । तदत्यन्तनिवृत्तिर्हानम् । प्र
कृतिपुरुषसंयोगद्वाराऽविवेको हे
यहेतु । विवेकख्यातिस्तु हानोपा
य इति ॥ ॥ चिकित्साशास्त्रे ॥ तत्र च
रोग आरोग्यं रोगनिदानं भैषज्यमि
ति चत्वारो व्यूहत्वेनोक्ताः ॥

चतुर्हायणी । स्त्री । चतुर्वर्षीयां गवि ॥
चत्वारो हायना यस्याः । दामहाय
नेति ङीप् । त्रिचतुर्भ्यां हायनस्येति
णत्वम् ॥ त्रि । अन्यत्र ॥

चतुष्कम् । न । चतुस्तम्भमण्डपे । चौख
ण्डा इति भाषा ॥ अश्वस्य गतिविशेषे ॥

चतुष्की । स्त्री । मशकहर्य्याम् । मस
हरी इति भाषा ॥ पुष्करिणी वि
शेषे ॥

चतुष्टयम् । त्रि । चतुरवयवसमुदा
ये ॥ यथा चतुष्टयी शब्दानां प्रवृत्ति
रिति । शब्दानामर्थे या प्रवृत्तिः सा
प्रवृत्तिनिमित्तभेदात् प्रकारचतु-
ष्टयवतीत्यर्थः । प्रकारभेदश्च यथा ।
जातिशब्दो गुणशब्दः क्रियाशब्दो य
दृच्छाशब्दश्चेति ॥ चत्वारोऽवयवा
यस्य । सङ्ख्याया अवयवे तयप् । रे
फस्य विसर्गः सत्वे चकृते ह्रस्वात्तादावि
ति मूर्द्धन्य ॥ केन्द्रे ॥

चतुष्पत्री । स्त्री । सुनिषण्णके । चौप
त्ती शाक इति भाषा ॥ चाङ्गेरी सदृ
श. पत्रैश्चतुर्दल इति स्मृत । शा.के।
जलाऽन्विते देशे चतुष्पत्रीति चो
च्यते ॥ क्षुद्रपाषाणभेदिनि ॥

चतुष्पथ । पु । ब्राह्मणे ॥ न । चतुर्मा
र्गसङ्गमे । शृङ्गाटके ॥ चतुर्णां पथां

समाहार । तद्धितार्थेतिसमास ।
ककुपूरितिसमासान्त । इदुदुपध
स्येतिषत्वम् । पद्य.सख्येतिक्लीवत्वम्
। चत्वार पन्थानोयत्रवा ॥

चतुष्पद । पु । गवादिपशौ ॥ करणवि
शेषे ॥ तत्रजातस्यफल यथा । चतुष्प
दभवोमर्त्यः सदाचारविवर्जित. ।
स्वल्पवित्त स्त्रीयादेश्चतुष्पादधना
न्वितइति ॥ राशिविशेषे । मेषवृष
सिंहेष । धनुषोन्त्यार्द्धं । मकरस्यपूर्वा
र्द्धं ॥ स्त्रीयांकरणभेदेचेतिहेम' ॥
चत्वारि पदानि पादा अस्य ॥

चतुष्पदी । स्त्री । पद्ये । चौपदीइतिचौ
पई इतिच भाषा ॥ चत्वारः पादा.
अस्या । सङ्ख्यासुपूर्वस्येतिपादस्या
न्तलोपे पादोन्यतरस्यामितिङीपि
भत्वात पादःपदिति पदादेश. ॥

चतुष्पर्णी । स्त्री । क्षुद्राम्लिकायाम् ॥

चतुष्पथा । स्त्री । नागबलायाम् ॥

चतुष्पाठी । स्त्री । चौपाड इति भाषा
प्रसिद्धे छात्राणामध्ययनस्थले ॥ च
तुर्णांवेदानांपाठोयस्याम् ॥

चतुष्पाणि. । पु । शतधामनि । विष्णौ
॥ चत्वार. पाणयोयस्य ॥ त्रि । चतु
र्हस्तान्विते ॥

चतुष्पात्-द् । पुं । गवादिपशौ ॥ चत्वा
र' पादाअस्य । संख्यासुपूर्वस्येतिपा
दस्यान्तलोप ॥

चतुष्पुण्ड्र । पु । भिण्डावृक्षे ॥

चतुस्समम् । न । चतु समे ॥

चतुस्त्रिंशत् । स्त्री । चतुरधिकायांत्रिं
शति । चौंतीस इति भाषा ॥

चतुस्त्रिंशज्जातक । पु । बुद्धविशेषे ॥

चतूराजी' । स्त्री । चत रङ्गक्रीडाङ्गे
तक्रीडाविशेषे ॥

चत्वरम् । न । स्थण्डिले । यागार्थसंस्कृ
तभूमौ ॥ अङ्गने ॥ नानाजनावस्था
नदेशे । चौतरा इति भाषा ॥ पथा श्ले
षे । चतसृणां रथ्यानां सम्बन्धे ॥ गृहा
दहिरङ्गने ॥ चत्यते । चते० । छमूग्रहः
अचतिभ्य.ष्वरच् ॥ चतन्त्यस्मिन्वा ॥

चत्वारिंशत् । स्त्री । चालीसइतिप्रसि
द्धे सङ्ख्याविशेषे ॥ सङ्ख्येये ॥ च
त्वारोदशतःपरिमाणमस्य । पङ्क्तिविं
शतित्रिंशच्चत्वारिंशदितिनिपातना-
त्प्रकृतेश्चत्वारिन्भावः शत्प्रत्यय' ॥

चत्वाल: । पु । होमकुण्डे ॥ दर्भे ॥ च
तति । चते० । खाचतिभ्योरितिवा
लच् ॥

चन । अ । असकलार्थे ॥ चनति । च
नशब्दे । पचाद्यच् ॥ अप्यर्थे ॥

चन८ । न । भक्ते ॥ चाय्यते । चायृपू
जानिशामनयो: । चायतेरन्नेह्रस्व
श्चेत्यसुन् प्रत्ययस्तनुट्च ॥

चन्द । पु । विधौ ॥ शशी चन्द्रो हिमद्युतिरितिशब्दार्णव. । चन्दति । चदि आह्लादे । पचाद्यच् ॥

चन्दक । पुं । चादा इति गौडेषु प्रसिद्धे मत्स्यविशेषे ॥

चन्दन. । पु । न । मलयजे । गन्धसारे ॥ चन्दनं शीतलं रूक्षं तिक्तमाह्लादनं लघु । श्रमशोषविषश्लेष्मतृष्णापित्तास्रदाहनुत् ॥ श्रेष्ठस्यास्य लक्षणं यथा । स्वादे तिक्तं कषे पीतं छेदे रक्तं तनौ सितम् । ग्रन्थिकोटरसंयुक्तं चन्दनं श्रेष्ठमुच्यते इति ॥ चन्दनानि च सर्वाणि सदृशानि रसादिभिः । गन्धेन तु विशेषोक्तिः पूर्वं श्रेष्ठतमं गुणै. ॥ रक्तचन्दने ॥ यथा । कषायपानयो र्योज्यं चन्दनं रक्तचन्दनमिति ॥ अपिच । कषायलेपयोर्ग्राह्यं चन्दनं रक्तचन्दनमिति ॥ पु । वानरप्रभेदे ॥ न । औषधीभेदे । भद्रकाल्याम् ॥ चन्दयति । चदि आह्लादने । ण्यन्त । ल्युट् । बहुलमन्यत्रापीति युच्वा ॥

चन्दनगोपी । स्त्री । शारिवाविशेषे ॥

चन्दनधेनु । स्त्री । पतिपुत्रवन्मृतनार्युद्देश्यकोत् सृष्टाया चन्दनाङ्कितसवत्साया गोर्दाने ॥ यथा । जीवद्भर्त्तृयानारी पुत्रिणी म्रियते यदि । सवत्सा मङ्कितां धेनुं साचार्याय प्रदापयेत् ॥ पतिपुत्रवती नारी निर्यते या ग्रसयो । हर्षनची तसृजेत् पुत्रपिता या लंन्द्र जीवतीति ॥

चन्दनपुष्पम् । न । लवङ्गे ॥

चन्दनशारिवा । स्त्री । शारिवाविशेषे ॥

चन्दनसार । पुं । वज्रक्षारे ॥

चन्दना । स्त्री । शारिवाविशेषे ॥

चन्दनाचल । पुं । मलयपर्वते ॥

चन्दनाद्रि । पुं । पित्तोपशमनाय चन्दनादिसलवासनद्रव्येषु ॥ यथा । चन्दनञ्च तथोशीरं कर्पूरो गन्धमाकुची । एलार्कचूर्णे गोक्षुरा सर्वैते चन्दनाद्य इति ॥

चन्दनाद्रि । पु । मलयपर्वते ॥

चन्दनी । स्त्री । नदीविशेषे ॥

चन्दनीया । स्त्री । गोरोचनायाम् ॥

चन्दिर । पुं । हस्तिनि ॥ चन्द्रे ॥ चन्दति । चदि० । इषिमदिमुदीत्यादिना किरच् ॥

चन्द्र: । पु । चाँद इति प्रसिद्धे हिमांशौ । चन्द्रमसि । सुधांशौ ॥ कर्पूरे ॥ काम्पिल्ले ॥ स्वर्णे ॥ वारिणि ॥ काम्ये । सुन्दरे ॥ मेचके । बर्हचन्द्रके ॥ रक्तरजते । शोणमुक्ताफले ॥ चि । आह्लादजनकद्रव्ये ॥ न । स्वर्णे ॥ चुक्रं ॥ वक्षवृक्षविशेषे ॥ यथा । हि

अवरगणयुग मुपधाय परिकलयक
र मधनगणयुगलमिह गन्धयुगमपि
विरर । फणिन्द्रपतिभणितमिति-
चन्द्रमिदमितिश्रृणुत सकलकविकु
लहृदयमोदकरमवतनुत ॥ यथा
। अनुपहतकुसुमरसतुल्यमिदमधर
दल ममतमयवचन मिदमाखिवि
फलयसिचल । यदपि यदुरमणपद-
मीशमुनिहृदिलुठति तदपि समरति
वलितमेत्यवनतटमटसीति ॥ च
न्द्रमाचस्य दशम॥ ऽ ॥प्रभेदे ॥ च
न्दयति आह्लादयति सकलं जगत्
। चदि० । स्फायितञ्चीतिरक् ॥पु।
द्वीपविशेषे ॥ चीरके ॥ मृगशिरो
नक्षत्रे ॥

चन्द्रक. । पु । मेचके । बर्हचन्द्रके ।
मयूरपिच्छस्थचन्द्राकृतौ ॥ चन्द्र इव
प्रतिकृति । इवे प्रतिकृताविति कन्
॥ नखे ॥ चाँदामाच् इतिगौडेषु
प्रसिद्धे मत्स्ये ॥ न । सितमरिचे ।
शिग्रुबीजे ॥

चन्द्रकला । स्त्री । चन्द्रस्यषोडशे भा
गे ॥ छगणकाख्ये ॥ वाचामत्स्ये ॥

चन्द्रकान्त । पु । चन्द्रमणौ । चन्द्रोप
ले ॥ कैरवे ॥ न । कैरवे ॥ श्रीख
ण्डचन्दने ॥ चन्द्र. कान्तो यस्य ॥

चन्द्रकान्ता । स्त्री । निशायाम् ॥ ज्यो

त्स्नायाम् ॥ चन्द्रयोषायाम् ॥ चन्द्रः
कान्तो यस्या ॥

चन्द्रकान्ति । न । रजते । रूप्ये ॥

चन्द्रकालानलम् । न । मैाकुर्निकानां
चक्रविशेषे ॥

चन्द्रकावान् । पुं । } मयूरे ॥ मतुप् ॥
चन्द्रकी । पु । } इन् ॥

चन्द्रकुण्डः । पु । कामरूपस्थेसरोवि
शेषे ॥

चन्द्रकूट । पुं । कामरूपस्थे पर्वतवि
शेषे ॥

चन्द्रक्षय । पुं । अमायाम् ॥

चन्द्रगुप्तः । पु । श्रीभागवत प्रसिद्धे नृपे ॥

चन्द्रगृहम । न । कर्कराशौ ॥

चन्द्रगोलस्था. । पु । भूम्नि । दिव्यपितृ
षु । स्वधाभुक्षु ॥ चन्द्रगोलेतिष्ठन्ति
। सुपिस्थ इतिक ॥

चन्द्रगोलिका । स्त्री । ज्योत्स्नायाम् ॥

चन्द्रचञ्चल । पु । खलेशमत्स्ये ॥

चन्द्रचञ्चला । स्त्री । चन्द्रकमत्स्ये ॥

चन्द्रचार । पु । चन्द्रविषयकज्ञाने ॥
तत्रादौ येरवेरुपरि चन्द्रमसमिच्छ
न्ति तान् प्रत्याह । निश्यमधस्थस्ये
न्दोर्भाभि र्भानो' सितभवत्यर्द्धम् ।
। स्वच्छायया न्यदसित कुम्भस्येवात
पस्थस्य ॥ अस्यप्रत्यवबाधां मन्यमा
नआह । सलिलमयेशशिनि रवेर्दी

थितयोर्मूर्च्छितासमेतानैशम् । च
पयन्ति दर्पणोदरविहिताइव मन्दि
रस्यान्त. ॥ शशिनः पश्चिमदिग्भागा
त् सितवृद्धि किमित्युपलभ्यते इ
त्याह । त्यजतोर्कतलंशशिन पश्चा
दवलम्बते यथाशेक्तारम् । दिनकर
वशात्तथेन्दो प्रकाशतेध प्रभृत्युद
य ॥ प्रतिदिन कथंचन्द्रगोलशुक्लव
द्धिर्भवति तदर्थमाह । प्रतिदिवसमे
वमर्कात् स्थानविशेषेण शैक्लय परि
वृद्धि । भवति शशिनोऽपराह्णेप
श्चाद्भागे घटस्येव ॥ चन्द्रस्य नक्षत्र
गमनेन शुभाशुभत्वमाह । ऐन्द्रस्य
शीतकिरणो मूलाषाढाद्वयस्यचाया
त । याम्येनवीजजलचरकाननघ्ना
वह्निभयदश्च ॥ दक्षिणपार्श्वेनगत
शशी विशाखानुराधयो पापः । म
ध्येनतु प्रशस्त पितृदेवविशाखयो
श्चापि ॥ चन्द्रस्यनक्षत्रयोगमाह । ष
डनागतानिपौष्णात् द्वादशरौद्राश्च
मध्ययोगीनि । ज्येष्ठाद्यानि नवर्क्षा
ण्युडुपतिनातीत्ययुज्यन्ते ॥ चन्द्रम
स संस्थानानि दश भवन्ति । यथा ।
नौ लाङ्गल दुष्टलाङ्गलं समो दण्ड
कार्मुक युग पार्श्वशय्याऽऽवर्जितंकु
ण्डाख्यमिति । अथैषां संस्थाना
नां लक्षण फलञ्च क्रमेणाह । उन्न

त मीषच्छृङ्गं तस्मैस्थानेविशाल
ता चोक्ता । नाविकपीडातस्मिन्
भवति शिवंसर्वलोकस्य ॥ १ ॥ अ
र्द्धोन्नतेचलाङ्गलमितिपीडातदुप-
जीविनां तस्मिन । प्रीतिश्च निर्नि
मित्तं मनुजपतीनां सुभिक्षञ्च ॥ २
॥ दक्षिणविषाणमर्द्धोन्नतंयदादुष्ट
लाङ्गलाख्यंतत् । पाण्ड्यनरेश्वरनि-
धनकृदुद्योगकरंबलानाञ्च ॥ ३ ॥ स
मशशिनि सुभिक्षक्षेमवृष्टय. प्रथम
दिवससदृशा स्युः । ४ । दण्डवदुदि
तेपीडा गवान्नृपश्चोग्रदण्डोत्र ॥ ५
॥ कार्मुकरूपे युद्धानियन्तुज्यातते
जयस्तेषाम् । ६ । स्थानंयुगमितिया
म्योत्तरायतंभूमिकम्पाय ॥ १२ ॥
७ ॥ युगमेवयाम्यकोट्यांकिञ्चित्तुङ्ग
स पार्श्वशायीत । विनिहन्तिस र्थ
वाहान् वृष्टेश्चविनिग्रहं कुर्यात् ॥ ८
॥ अभ्युच्छ्रायादेकयदिशशिनोऽवा
क्शृङ्गमवेच्छृङ्गम् । आवर्जितमित्य
सुभिक्षकारितद्गोधनस्यापि ॥ ९ ॥
अव्युच्छिन्नारेख समन्ततोमण्डलेच
कुण्डाख्यम् । अस्मिन्माण्डलिका
नां स्थानत्यागोनरपतीनाम् ॥ १५
। १० ॥ साकान्यलक्षणमाह । प्रो
न्नतस्थान भावा दुदगुच्च क्षेमवृद्धि
ष्टिकार । दक्षिणतुङ्गश्चन्द्रो दुर्भिक्ष

भयायमिर्दिष्टं ॥ शृङ्गेणैकेनेन्दु वि
लीनमथवाप्यवाङ्मुखंशृङ्गम् । सम्पू
र्णञ्चाभिनवदृष्टेको जीवितात्भ्र
श्येत् ॥ १७॥ चन्द्रमसोरूपाणिसफ
लान्याह । सस्थानविधि कथिता रू
पाण्यथाङ्गवन्तिचन्द्रमसः । स्वल्पो
दुर्भिक्षकरो महान् सुभिक्षावह
प्रोक्तः ॥ मध्यतनु वंज्राख्यं शृङ्ग
यद् सम्भमायराज्ञाञ्च । चन्द्रोमृदङ्ग
रूप क्षेमसुभिक्षावह्नोभवति ॥
ज्ञेयोविशालमूर्त्तिर्नरपतिलक्ष्मीवि
वृद्धयेचन्द्र । स्थूल सुभिक्षकारीप्रिय
धान्यकरस्तुतनुमूर्त्तिः ॥ २० ॥ अथ
चन्द्रस्य कुजादिभिस्ताराग्रहैः शृङ्गे-
भिन्नेफलमाह । प्रत्यन्तान्कुन्नृपा
श्चहन्त्युडुपति शृङ्गेकुजेनाहते शस्त्रं
क्षुद्भयकृद्यमेन शशिजेनावृष्टिदुर्भि
क्षकृत् । श्रेष्ठान्हन्तिनृपान्महेन्द्र
गुरुणा शुक्रेणचाल्पान्नृपान् शुक्ले
याप्यमिदम्फलं ग्रहकृतकृष्णेयथोक्ता
गमम् ॥ शुक्रभिन्नविम्बस्यचन्द्रमस
फलमाह । भिन्न सितेन मगधान्
यवनान्पुलिन्दान् नेपालभृङ्गिमरुक
च्छसुराष्ट्रमद्रान् । पाञ्चालकैकय
कुलूतकपौरुषादान् हन्यादुशीनर
जनानपिसप्तमासान् ॥ जीवभिन्न-
स्याह । गान्धारसौवीरकसिन्धुकीरा

न् धान्यानि शैलान्द्रविडाधिपांश्च
। द्विजांश्च मासान्दश शीतरश्मिः
सन्तापयेद्वाक्पतिनाविभिन्न ॥ भौ
मभिन्नस्याह । उद्युक्तान्सहवाहनैर्न
रपतीस्त्रैगर्त्तकान्मालवान् कौलि
न्दान् गणपुङ्गवानथशिवीनायोध्य
कान्पार्थिवान् । हन्यात कौरव
मत्स्यशुक्त्यधिपतीन्राजन्यमुख्या-
नपि मालेयांशुरसृग्महेतनुगतेषण्
मासमर्यादया ॥ शनिभिन्नस्याह ।
यौधेयान् सचिवान् सकौरवान् प्रा
गीशा नथ चार्जुनायनान् । हन्या-
दर्कजभिन्नमण्डलः शीतांशु र्दशमा
सपीडया ॥ बुधभिन्नस्याह । मगधा
न्मथुरांश्चपीडयेत वेण्णायाश्चतट
शशाङ्कज । अपरत्रकृतयुगं वदे च-
द्रिभिन्नःशशिनन्निर्गतः ॥ केतुना
भिन्नस्याह । क्षेमारोग्यसुभिक्षविना
शी शीतांशु शिखिनायदिभिन्नः ।
कुर्यादायुधजीविविनाशं चौराणा-
मधिकेनचपीडाम् ॥ २७ ॥ ग्रहण
कालेउल्काहतस्य चन्द्रस्य फलमाह ।
उल्कयायदाशशी ग्रस्तएवहन्यते ॥
हन्यतेतदान्नृपो यस्यजन्मनिस्थितः
॥ चन्द्रमसोवर्णलक्षणमाह । भस्म
निभःपरुषो ऽरुणमूर्त्तिःशीतकर -
किरणैःपरिहीनः । श्यामतनुःस्फुटि

श्चन्द्रमायस्मात् तस्मिन् पर्वतसत्त मे। अतोदेवाश्चन्द्रभागं नामाचक्रु पुरागिरिमितिकालिकापुराणम् ॥

चन्द्रभागा । स्त्री । कश्मीरदेशप्रसिद्धे नदीविशेषे ॥ चन्द्रभागयो पर्वतयो रियम् । तत्प्रभवत्वात् । तस्येद मित्यण् । टिड्ढेतिङीपप्राप्त च न्द्रभागाद्वानद्यामिति वह्वादिगणसू त्रात्नभवति । संज्ञापूर्वकत्वाद्वृद्ध्य- भाव' ॥

चन्द्रभागी । स्त्री । चन्द्रभागायाम् ॥ वह्वादिभ्यश्चेतिङीष ॥

चन्द्रभूति । न । रूप्ये ॥

चन्द्रमणि । पु । चन्द्रकान्तमणौ ॥

चन्द्रमण्डलम् । न । चन्द्रबिम्बे ॥ चन्द्र परिवेशे ॥

चन्द्रमल्ली । स्त्री । अष्टापदाम् ॥

चन्द्रमाः । पु । विधौ । चन्द्रे ॥ चन्द्रं कर्पूर साद्दृश्येन माति तुलयति । मा ङ्माने । चन्द्रेमोडिद्वेस्यसि ॥ च न्द्रमाह्लादंमिमीते निर्मिमीतेवाति वा ॥ यद्वा । चन्द्रंरजतमस्तत्वत- दिव मीयते । चन्द्रइतिवामीयते इति दासीभारादिव्युत्पादने वर रुचः ॥

चन्द्रमौलि । पु । रैरिशावे । शिवे ॥

चन्द्ररेणु, । पु । काव्यचौरे ॥

चन्द्रर्चम् । न । मृगशिरायाम् ॥

चन्द्रला । स्त्री । कर्णाटदेशप्रसिद्धा यामम्बायाम् ॥ तत्स्थाने ॥

चन्द्रलेखा । स्त्री । वाकुच्याम् ॥ शशि कलायाम् ॥ अतिशक्करीसंज्ञकेप ञ्चदशाक्षरावृत्तिविशेषे ॥ यथा । स्रौ स्रोयौचेद्वेता ससाष्टकैश्चन्द्रलेखा ॥ यथा । विच्छेदे ते मुरारे पाण्डु प्रकाशाक्रान्ता श्यामच्छायंदुकूलं- मम्लानतेबिभ्रतोसा । राधाक्रोद श्यागर्भंनीनायथाचन्द्रलेखा किन्त्वा सा त्वां स्मरन्ती धत्तेध्रुवं जीवयोम मिति ॥

चन्द्रलोहकम् । न । रूप्ये ॥

चन्द्रवंश' । पु । चन्द्रसन्ताने ॥

चन्द्रवर्त्म । न । जगतीसञ्ज्ञकेद्वादशा क्षरावृत्तिविशेषे ॥ यथा । चन्द्रवर्त्म निगदन्ति रनभसै' ॥ यथा । चन्द्र वर्त्मपिहित घनतिमिरै' राजवर्त्म रहित जनगमने । इष्टवर्त्मतदल कुरु सरसे कुञ्जवर्त्मनि हरिरनवकुतु कीर्ति ॥

चन्द्रवल्लरी । स्त्री । सोमवल्ल्याम् ॥

चन्द्रवल्ली । स्त्री । प्रसारण्याम् ॥ माध वीलतायाम् ॥

चन्द्रवशा । स्त्री । भारतवर्षस्य नदीवि शेषे ॥

चन्द्रवाला । स्त्री । स्थूलैलायाम् । बहु लायाम् ॥ चन्द्रस्यकर्पूरस्य वालेव कर्पूरगन्धित्वात् ॥

चन्द्रविहङ्गम । पुं । बकपक्षिणि ॥

चन्द्रव्रतम् । न । चान्द्रायणे ॥

चन्द्रशाला । स्त्री । } ज्योत्स्नायाम्
चन्द्रशालिका । स्त्री । } ॥ गृहोपरिगृहे । शिरोगृहे ॥

चन्द्रशुक्ल । पु । अम्लवेतसपद्मौषधिविशेषे ॥

चन्द्रशूरम् । न । चंद्रसुर हालौं इति ख्यातौषधौ । चर्मकृन्त्याम् । पशुमेहनकारिकायाम् । चन्द्रह्रे ॥

चन्द्रशेखर । पु । ईश्वरे । शिवे ॥ गिरिविशेषे । यथा । विशेषत कलि युगे दृश्यामि चन्द्रशेखरे । इतिशिववाक्यम् ॥ चन्द्रशेखरोऽस्य ॥ पौष्य राज पुत्रे करवीरपुरन्पे ॥ षोडशभुवनकान्तर्गते नवमभुवके ॥ चष्ट सप्तभैरवविशेषे ॥

चन्द्रसक्ष । पु । कर्पूरे ॥ चन्द्रस्य सखा यस्य ॥

चन्द्रसम्भव । पु । बुधे ॥ चन्द्रात्सम्भवो यस्य ॥

चन्द्रसम्भवा । स्त्री । क्षुद्रैलायाम् ॥ चन्द्रात् सम्भवोयस्या ॥

चन्द्रह्रम् । न । चन्द्रशूरे । चंदसुर इति भाषा ॥ चन्द्रह्रं हितं हिक्का वातश्लेष्मातिसारिणाम् । असृग्वातगदद्वेषि बलपुष्टिविवर्द्धनम् ॥

चन्द्रहास । पु । असिमात्रे ॥ दशग्रीवकरवाले ॥ चन्द्रइवहास प्रभाऽस्य ॥ चन्द्रहसतिवा द्युतिमत्त्वात् । हसेरुसने । कर्मण्यण् ॥ न । रौप्ये ॥

चन्द्रहासा । स्त्री । गुडूच्याम् ॥ वस्तिकाण्डभेदे ॥

चन्द्रा । स्त्री । एलायाम् ॥ विताने ॥

चन्द्रातप । पु । विताने । उल्लोचे । चंदोवा इतिभाषा ॥ ज्योत्स्नायाम् ॥

चन्द्रापीड । पु । शिवे ॥ चन्द्र आपीड शिरोभूषणमस्य ॥

चन्द्रावली । स्त्री । गोपीविशेषे ॥ यथा । राधाचन्द्रावलीमुख्या प्रोक्तानित्यप्रियाव्रजे । कृष्णवन्नित्यसौन्दर्यवैदग्ध्यादिगुणाश्रया इत्युज्वलनीलमणि ॥

चन्द्रिका । स्त्री । कौमुद्याम् । ज्योत्स्नायाम् ॥ चन्द्रोऽस्त्यस्या । ठन् ॥ ॥ चन्द्रकायतीतितुन इस्वाभावस्सञ्ज्ञात् ॥ चन्द्रमाचष्टे चन्द्रयति । तत्करोतीतिण्यन्ताण्वुल् वा ॥ स्थूलैलायाम् ॥ चन्द्रकमत्स्ये ॥ कर्णस्फोटायाम् ॥ मल्लिकायाम् ॥ श्वेतकण्टकार्याम् ॥ मेथिकायाम् ॥ इत्त्वो-

चायाम् ॥ चन्द्रशूरे ॥ अतिजगती संज्ञकेचयोदशाक्षरावृत्तिविशेषे ॥ यथा । ननततगुरुभिश्चन्द्रिकाश्वर्त्तुभिः । यथा । शरदमलतरचन्द्रिकाचालिते दिनकरतनयातीरदेशे हरिः । विहरति रभसाद्बल्लवीभिः समं त्रिदिवयुवतिभिः कोपिदेवो यथा ॥ हरिश्चन्द्रपुरवासिन्यामप्सरायाम् ॥

चन्द्रिकाम्बुजम् । न । सितोत्पले ॥

चन्द्रिकाद्राव । पु । चन्द्रकान्तमणौ ॥

चन्द्रिकापायी । पु । चकोरपक्षिणि ॥

चन्द्री । स्त्री । वाकुच्याम् ॥

चन्द्रेष्टा । स्त्री । उत्पलिन्याम् ॥

चन्द्रोदयः । पुं । शशिप्रकाशे ॥ उल्लोचे ॥ मकरध्वजाख्येरससिन्दूरे ॥ यथा च । पलं मृदुस्वर्णदलं रसेन्द्र पलाष्टकं षोडशगन्धकस्य । शोणैः सुकार्पासभवैः प्रसूनैः सर्वं विमर्द्याथकुमारिकाद्भिः ॥ तत्काचकुम्भे निहितं सुगाढे मृत्कर्पटैस्तद्दिवसत्रयञ्च । पचेत् क्रमाग्नौ सिकताख्ययन्त्रे ततो रजः पल्लवरागरम्यम् ॥ निगृह्य चैतस्य पलं पलानि चत्वारि कर्पूररजस्तथैव । जातीफलं शोषणमिन्द्रपुष्पं कस्तूरिकाया इह शाणएकः ॥ *॥ चन्द्रोदयोऽयंकथितस्तु भाषो भुक्तो हि वल्लीदलमध्यवर्त्ती । मदोन्मदानां प्रमदाशतानां गर्वाधिकत्वं श्लथयत्यकाण्डे ॥ घृतं घनीभूतमतीव दुग्धं मृदूनि मांसानि समस्तकानि । माषान्नपिष्टानि भवन्ति पथ्यान्यानन्ददायीन्यपराणि चात्र ॥ ॥ वलीपलितनाशनस्तनुभृतां वयःस्तम्भनः समस्तगदखण्डनः प्रचुररोगपञ्चाननः । गृहेषु रसराजयं भवति यस्य चन्द्रोदयः स पञ्चशरदर्पितो मृगदृशां भवेद् दुर्लभः ॥ इति सारकौमुदी सुखबोधश्चेतिराधाकान्त ॥ चन्द्रस्य चन्द्रइववा उदयो यस्य ॥

चन्द्रोदया । स्त्री । नेत्ररोगस्यौषधविशेषे ॥ यथा । हरीतकी वचा कुष्ठ पिप्पली मरिचानिच । विभीतकस्यमज्जा च शङ्खनाभि र्मनःशिला ॥ सर्वमेतत्समं कृत्वा छागीक्षीरेणपेषयेत् । * । नाशयेत् तिमिरं कण्डु पटलान्यर्बुदानिच ॥ अधिकानिच मांसानि यश्चरात्रौ न पश्यति । अपि द्विवार्षिकं पुष्पं मासेनैकेन साधयेत ॥ वर्त्तिश्चन्द्रोदयानाम्ना तथा दृष्टि प्रसादनी ॥ इतिचक्रपाणिदत्त ॥

चन्द्रोपलः । पु । चन्द्रकान्तमणौ ॥

चपलः । पु । पारदे ॥ मीने ॥ चोर

के ॥ प्रस्तरविशेषे ॥ स्तबे ॥ राजमाषे ॥ चपनम् । चपसान्त्वने । ल्युट् । एरच् । चपंल्लाति । ला० । क ॥ न । मीघ्रे ॥ क्रियाविशेषणात्वादद्रव्ये वर्त्तमानक्लीबम् ॥ त्रि । तरले ॥ चले । क्षणिके ॥ विकले ॥ दुर्विनीते ॥ चपति । चप० । इषा० कल ॥ चोपति । चुपमन्दायांगतौ । चुपे रत्वोपधाया इति कलमत्यय ॥ दोषमनिश्चित्यवधबन्धनादे कर्त्तरि । चिकुरे ॥

चपला । स्त्री । कमलायाम् । श्रियि ॥ विद्युति ॥ पुंश्चल्याम् ॥ पिप्पल्याम् ॥ विजयायाम् ॥ मदिरायाम् ॥ जिह्वायाम् ॥ आर्याप्रभेदे ॥ यथा । दलयो र्द्वितीयतुर्य्यांगणौ जकारौ तु चपलासा । यथा । चपलानचेत् कदाचि न्नृणांभवे डुक्तिभावना कृष्णे । धर्मार्थकाममोक्षा स्तदाकरस्थान सन्देह ॥ चपलाद्टाप् ॥

चपेट । पु । विस्तृताङ्गुलिपाणौ । प्रतले । टाप् चपेटा इतिच भाषा ॥ चपति । चप० । अच । एटति । इट गतौ । अच् । चपश्चासौ इटश्च ॥

चपेटा । स्त्री । चपेटे । प्रहस्ते ॥ खण्डकोपाध्याय शिष्याय चपेटां ददातीतिभाष्यम् ॥ टाप् ॥

चपेटिका । स्त्री । चपेटायाम् ॥ चपेटैव । स्वा० क । प्रत्ययस्था दितीत्वम् ॥

चपेटी । स्त्री । भाद्रशुक्लषष्ठ्याम् ॥ भाद्रे चपेटीविख्यातेतिस्कन्दपुराणम् ॥

चमत्कार । पु । विस्मये । चित्तविस्ताररूपे । डमरौ ॥ लोकातीतार्थीकलनेन किमेतदितिज्ञानधाराजननेन चित्तस्य दीर्घप्रायत्वचित्तविस्तार इत्यर्थं । दृष्टहेतुभ्यो ऽसम्भविज्ञानेन हेत्वन्तरानुसन्धाने मनोव्यापार एवचित्तविस्तार इत्यपरे ॥ अपामार्गे ॥ चमत् करणम् । कृञ्० । घञ् ॥

चमर । पु । मृगविशेषे । व्यजन्याम् ॥ यस्यश्वेतवालैर्देवराजादिव्यजनक्रियते सचमरद्विपाकृतिर्भवति ॥ दैत्यविशेषे ॥ न । चामरे ॥ चमति चम्यते वा अनेन वा । चमुअदने । अश्लिकमिभ्रमिचमीत्यरश्चित् ॥

चमरपुच्छ । पु । कोकडे ॥ न । चामरे ॥

चमरिक । पु । कोविदारवृक्षे । रक्तकाञ्चनारे ॥ चमरमस्यास्ति । ठन् ॥

चमरी । स्त्री । मञ्जर्याम् ॥ मृगीभेदे । दीर्घलतायाम् । गिरिप्रियायाम् ॥

चमस । पु । न । दारुजेयज्ञपात्रवि-

शेषे ॥ सोमपानपात्रे ॥ पु । पर्पटे ॥ पिष्टविशेषे ॥ लड्डुके ॥ चमन्त्यस्मिन् । चम्यते भक्ष्यते सोमोऽस्मिन्वा । चमु० । अत्यविचमीत्यसच् ॥

चमसी । स्त्री । मुद्गमसूरादिपिष्टे ॥ चूर्णयच्छ्क्ष्णमाषाणां चमसी साऽभिधीयते ॥ चम्यते । चमु० । असच् । गौरादित्वात् ङीष् ॥

चमीकर । पु । कृतस्वराख्य आकरविशेषे ॥

चमू । स्त्री । सेनामात्रे ॥ सेनाविशेषे । तत्र इभा ७२९ । रथा ७२९ । अश्वा २१८७ । पदातय ३६४५ । समस्तसङ्ख्यया ७२९० नवत्यधिकशतद्वयाधिकसप्तसहस्रम्भवति ॥ चमति अश्नून् परैश्चम्यते वा । चमु अदने । कृषिचमितनिधनिसर्जिखर्जिभ्यऊरिति ऊ ॥

चमूचर । पु । सैनिके ॥ चरेष्ट ॥

चमूजघनम् । न । सेनापश्चाद्भागे ॥

चमूरु । पु । मृगविशेषे ॥ चमति । चमु० । खर्जादित्वादूर । पृ० अस्त उत्वम् ॥ यद्वा । चमूजरुयस्य ॥

चम्प । न । कोविदारवृक्षे ॥

चम्पक । पु । चम्पा इति प्रसिद्धे वृक्षे । हेमपुष्पके । दीपपुष्पे ॥ चम्पक कटुकस्तिक्त कषायो मधुरो हिम । विषकृमिहर कृच्छ्रकफवातास्रपित्तजित ॥ चम्पयति चम्प्यते वा । चपिगत्याम् । क्वुन् ॥ पनसकोषगाग्रके ॥ न । चाँपाकला इति गौडभाषाप्रसिद्धे कदलीफले ॥ चम्पक वातपित्तघ्न गुरुवीर्यकर तथा । अतिशीत रसे पाके मधुरं कथित बुधैरित्यस्यगुणा ॥ चम्पकस्यपुष्पे ॥ सुहृतप्राप्तिसिद्धौ ॥ सायथा । न्यायेन स्वयपरीक्षितमप्यर्थं तावन्नश्रद्धते यावद्गुरुशिष्यसब्रह्मचारिभि सह न सवाद्यते अत सुहृद्गुरुशिष्यसब्रह्मचारिणा सवादकाना प्राप्ति सुहृत्प्राप्ति सासिद्धिस्तुर्याचम्पकमुच्यते इति साङ्ख्यविद ॥

चम्पककलिका । स्त्री । चम्पककोरके । गन्धमोदिन्याम् ॥

चम्पकमाला । स्त्री । चम्पकपुष्पैर्निर्मितायां मालायाम् ॥ चम्पकली इति प्रसिद्धे स्त्रीणां कण्ठाभरणे ॥ वर्णवृत्तेषु पङ्क्तिच्छन्दोविभेदे ॥ यथा । पादविराजन्नूपुरयुग्मा कुण्डलशोभासङ्गिसुवर्णा । शङ्खवतीशारदयपूर्णा चम्पकमालाभातिसुवर्णा ॥ यथा । आलिकुलभ्रष्टाहमधन्या ह न्तभवद्धन्यारविकन्या । नन्दकुमारो निर्गतशङ्क सम्प्रतिभावी कोपि-

कलङ्क इति ॥

चम्पकचतुर्द्दशी । स्त्री । ज्येष्ठशुक्लचतुर्द्दश्याम् ॥

चम्पकरम्भा । स्त्री । सुवर्णकदल्याम् ॥

चम्पकारण्यम् । न । तीर्थविशेषे ॥

चम्पकुन्द । पु । चापकुडा इतिगौडे सुप्रसिद्धे मत्स्यविशेषे ॥

चम्पकोष । पु । पनसे ॥

चम्पा । स्त्री । कर्णराजस्य भार्यायाम् ॥ तस्यैवपुर्याम् । अधुना भागलपुर इति यस्याप्रसिद्धिरितिराधाकान्त ॥ तीर्थविशेषे ॥

चम्पाधिप । पु । कर्णभूपे ॥

चम्पापुरी । स्त्री । चम्पायां नगर्याम् ॥

चम्पारण्यम् । न । विदेहदेशसमीपस्थे विपिने ॥

चम्पालु । पु । पनसे ॥

चम्पावती । स्त्री । कर्णपुर्याम् ॥

चम्पूः । स्त्री । काव्यविशेषे ॥ तल्लक्षणं यथा । गद्यपद्यमयीवाणीचम्पूरित्यभिधीयते । इत्यलङ्कारचा ॥

चम्पेश । पु । कर्णाख्यन्टपे ॥

चम्पोपलक्षित । पु । अङ्गदेशे ॥ तद्देशस्थे पुम्भूम्नि ॥

चम्बेली । स्त्री । स्वनाम्ना प्रसिद्धे पुष्पविशेषे । सुमनायाम् ॥

चय । पु । समूहे ॥ वप्रे । प्राकारमूलबन्धने ॥ यदुपरिप्राकारो निरूप्यते प्राकाराधारवेदिकेतियावत् । तथा चार्थशास्त्रम् । खातमुद्धृतमृद्दावप्रकारयेत् तस्योपरिप्राकारमिति । पगार इतिगौडभाषा ॥ समाहृतौ ॥ परिखोद्धृतमृत्स्तूपे ॥ चीयते । चिञ्चयने । कर्मण्येरच् ॥ प्राकारे ॥ पीठे ॥ इतिहेमचन्द्र ॥

चयनम् । न । चिननाइतिख्याते रचनाविशेषे । इष्टकादीनामूर्द्ध्वाधोदेशनिवेशने ॥ चिञो ल्युट् ॥

चर । पु । अक्षद्यूतप्रभेदे ॥ भौमे ॥ जङ्गमे । चसे ॥ चले ॥ चारे । गोपनेन राष्ट्रादे शुभाशुभादिज्ञानार्थं राज्ञा नियुक्त पुरुषे । परतत्त्वज्ञानार्थं भ्रमणकर्त्तरि । यथार्हवर्णो । प्रणिधौ ॥ चरति । चरगतौ । पचाद्यच् ॥ कपर्द्दके ॥ मेषकर्कटतुलामकरलग्नेषु ॥ न । नक्षत्रविशेषे । वातादितिहरित्रीणि चन्द्राह्वश्च चरचलम् ॥

चरक । पु । चारे ॥ पर्पटे ॥ चक्रकरे । भिक्षौ ॥ मुनिग्रन्थविशेषयो । वैद्यशास्त्रप्रवर्त्तकेमुनौ ॥ तत्कृतेतन्नामके ग्रन्थे ॥ चरति । चर० । शिल्पिसच्चयोरपूर्वस्या पीति वुन् ॥

चरट । पु । खञ्जनपक्षिणि ॥

चरण । पु । न । बह्वृचादौ । वेदैकदेशे ॥ शाखाध्येतरि ॥ मूले ॥ गोत्रे ॥ पदे । पादे ॥ न । भ्रमण ॥ भक्षणे ॥ शीले । आचारे ॥ चरन्त्यनेन । चर० । करणेतिल्युट् ॥

चरणगत । त्रि । प्रणते ॥

चरणग्रन्थि । पु । गुल्फे ॥

चरणयोधी । पु । कुक्कुटे ॥

चरणव्यूह । पु । वेदव्यासकृते चतुर्वेदविवरणग्रन्थे ॥

चरणामिषम् । न । चरणमांसे ॥ चरणानामामिषम् । मुण्डस्य विधिना पाच्यं चरणन्तुप्रलेपितम् । चरण वा तद्वल्ल्य हृद्यं पित्तकरं गुरु ॥

चरणायुध । पु । कुक्कुटे ॥ चरणमायुधमस्य ॥

चरम । त्रि । अन्ते । अवसाने । प्रान्ते ॥ पश्चिमे ॥ चरति । चर० । चरेश्चेत्यमच् । प्रथमचरमेतिसर्वनामत्वात् पञ्चेजसशी । चरमे चरमा ॥

चरमक्ष्माभृत् । पु । अस्ताचले ॥ चरमश्चासौक्ष्माभृच्च ॥

चरमतीर्थकृत् । पु । वर्द्धमानाख्यार्हदिन्द्रे ॥

चरमाचल । पु । अस्ताचले ॥ चरमश्चासावचलश्च ॥

चरमाद्रि । पु । अस्ताचले ॥

चराचरम् । न । विष्टपे । जगति ॥ त्रि । इङ्गे ॥ जङ्गमाजङ्गमे ॥ इष्टे ॥ पु । कपर्दके ॥ चरति । चर० । चरिचलीतिद्वित्वादि ॥

चरि । पु । पशौ ॥ चरति । चर० । खनिकष्यज्यसीत्यादिना इप्रत्यय ॥

चरितम् । न । अनुष्ठिते ॥ चरित्रे ॥ सञ्चारे ॥ व्रतकर्मणि ॥

चरितार्थ । त्रि । प्राप्तप्रयोजने ॥

चरित्रम् । न । स्वभावे ॥ चेष्टिते ॥ चर्यतेऽनेन । चर० । अर्त्तिलूधूसूखनसहचरइत्र ॥

चरिष्णु । त्रि । जङ्गमे ॥ चरणशील । चरगतौ । अलङ्कृञितीष्णुच् ॥

चरु । पु । हव्यान्ने । हव्यपाके ॥ टीकायामितिख्याते भाण्डे ॥ चर्यते भक्ष्यतेदेवै । चरन्तिभक्षयन्तिदेवाइममिति वा । चरगतौ भक्षणेच । भृमृशीतृचरीत्सु ॥ अनवस्रावितान्तरूष्मपाक ओदनश्चरुरितियाज्ञिका ॥ मीमांसकैरपि त्रिवृच्चरुर्वैधिकरणे ओदनपरत्वमेवचरुशब्दस्याभ्युपगतम् ॥ उगणादिभ्योयदितिसूत्रेकैयटस्तु स्थालीवाची चरुशब्दः तात्स्थ्या दोदने भाक्तइत्याह । बिम्बप्रकाशेतु चरुर्भाण्डेचहव्यान्ने दृश्यते ० कार्थतोक्ता ॥

चच्चरा । पु । चित्रापूपे ॥

चर्च्चरी । स्त्री । गीतभेदे ॥ अन्तजुके शे ॥ चर्च्चरीगीतभेदे चर्केशभित् करशब्दयोरितिरुद्र ॥ हर्षक्रीडायामितिसुभूति । कापटिकानासादरवचने तौर्य्यत्रिके चेत्यन्ये । वसन्तसमयक्रीडायामित्यके ॥ चर्म्मख्याम् । साटोपवाक्ये ॥ वर्णवृत्तविशेषे ॥ यथा । हारयुक्तसुवर्णकङ्कणपाणिशङ्खविराजिता पादनूपुरसङ्गता सुपयोधरद्वयभूषिता । शोभिता वलयेन पिङ्गलपन्नगाधिपवर्णिता चर्चरी लतणीव चेतसि चाकसीतिसुसङ्गता ॥ यथा । कोकिलाकलकूजितन शृणोसि सम्प्रतिसादरम् मन्यसे तिमिरापहारि सुधाकरं नसुधाकरम् । दूरमुज्झसि भूषणं विकलासि चन्दनमारुते कस्य पुण्यफलेन सुन्दरि मन्दिरं न सुखायते इति ॥ चर्च्यते । चर्चपरिभाषणाभर्त्सनयोः । बाहुलकात् अरन् । गौ० ङीष् ॥

चर्च्चरीक । पु । महाकाले ॥ केशविन्यासे ॥ शाके ॥ चर्च्यते चर्च अध्ययने । पर्फ० इकन्प्रत्ययान्तोनिपातित ॥

चर्च्चा । स्त्री । चिन्तायाम् ॥ विचारणायाम् ॥ स्थासके । चार्चिक्ये । चन्दनादिनादेहविलेपने । चर्चना इति भाषा ॥ चर्च्चिकायाम् । दुर्गायाम् ॥ चर्चयनम् । चर्च अध्ययने । चुरादिण्यन्ताद्भावे चिन्तिपूजिकथिकुम्बिचर्च्चश्चेत्यङ् । चर्चन वा ॥

चर्च्चिका । स्त्री । दुर्गायाम् ॥ चर्च्चायाम् ॥ चर्च्चैव । स्वा० क ॥

चर्च्चित । त्रि । दिग्धे । लिप्ते । चन्दनादिनाकृतलेपने । चर्चा चर्चलिया इतिच भाषा ॥ चर्चासञ्जाताऽस्य । तारकादित्वादितच् ॥

चर्प्पट । पु । चपेटे ॥ पर्पटे ॥ स्फारविपुले । चिपिटे । चिपटा इति भाषा ॥

चर्प्पटा । स्त्री । भाद्रशुक्लषष्ठ्याम् । चपेट्याम् ॥

चर्प्पटी । स्त्री । पिष्टकविशेषे । पोल्याम् ॥

चर्भट । पु । इर्वारौ ॥

चर्भटी । स्त्री । चर्चर्याम् । हर्षक्रीडावाचि । साटोपवाक्ये ॥

चर्म्मकषा । स्त्री । गन्धद्रव्यविशेषे । सप्तलायाम् । अरिफेनायाम् ॥ मांसरोहिण्याम् ॥ चर्म्मण कषा ॥

चर्म्मकार । पु । चमार इतिभाषाप्रसिद्धे कारावरे । पादूकृति । चण्डाल्यां तीवराज्जाते । इतिपराशरपद्धति ॥ चर्मकरोति । डुकृञ्० ।

कर्मण्यण् ॥

चर्म्मकारी । स्त्री । चर्मकषायामोषधौ ॥

चर्म्मकीलम् । न । अर्श प्रभेदे ॥ व्याने गृहीत्वा श्लेष्माणं करोत्यर्शस्त्वचोवहि । कीलोपमस्थिरखर चर्म कीलन्तु तद्विदु ॥

चर्म्मकृत् । पु । चर्मकारे ॥

चर्म्मचटका । स्त्री । अजिनपत्रायाम् । जतुकायाम् । चाम्चिरैया इति भाषा ॥

चर्म्मचटी । स्त्री । गृहमाचिकायाम् । चर्मचटकायाम् ॥

चर्म्मचित्रकम् । न । श्वेतकुष्ठे ॥

चर्म्मजम् । न । रुधिरे ॥ रोमणि ॥

चर्म्मण्वती । स्त्री । चम्बल इतिभाषा प्रसिद्धे नदीविशेषे ॥ चर्माण्यस्याम् । मतुप् । आसन्दीवदिति चर्मणो नलोपाभावोणत्वञ्च निपात्यते ॥

चर्म्मतरङ्ग । पु । वलौ । जरयाश्लथचर्मणि ॥

चर्म्मदण्ड । पु । कशायाम् । कोरडा इति भाषा ॥

चर्म्मदूषिका । स्त्री । कोठरोगे ॥

चर्म्मद्रुम । पु । भूर्जवृक्षे ॥

चर्म्म । न । चामइति प्रसिद्धे त्वगिन्द्रिये । अस्रग्धरायाम् । कृत्तौ । अजिने । रोमभूमौ ॥ ढालफरी इतिचम-सिद्धे फलके ॥ अस्यलक्षणं यथा । शरीरावरक शस्त्र चर्मइत्यभिधीयते । तत् पुनर्द्विविध काष्ठचर्म सम्भवभेदत ॥ शरीरावरकत्वञ्च लघुता दृढता तथा । दुर्भेद्यतेतिकथितश्चर्मणां गुणसङ्ग्रह ॥ स्वल्पता गुरुता चैवमृदुता सुखभेद्यता । विरुद्धवर्णताचेति चर्मणा दोषसङ्ग्रह ॥ सितोरक्तस्तथापीत कृष्णइत्यभिलक्षित । ब्रह्मादिजातिभेदेन चर्मणां वर्णनिर्णय ॥ चित्रवर्णस्तु सर्वेषां सर्वदैवोपपद्यते इतिभोज ॥ चरति चर्यते वाऽनेनवा ॥ चर० । मनिन् ॥

चर्म्मनासिका । स्त्री । ताडन्याम् ॥

चर्म्मपत्रा । स्त्री । चर्मचट्याम ॥

चर्म्मपादुका । स्त्री । उपानहि ॥

चर्म्मपुट । पु । } इतिसञ्ज्ञके चर्मपात्रविशेषे ॥
चर्म्मपुटक । पु । }

चर्म्मप्रभेदिका । स्त्री । आरायाम् । चर्मवेधास्त्रप्रभेदे ॥ चर्मणा प्रभेदिका ॥

चर्म्मप्रसेविका । स्त्री । भस्त्रायाम् । अग्निसन्दीपनार्थं चर्मनिर्मिते यन्त्रे । भाती इतिभाषा ॥ चर्मणा प्रसीव्यते । षिवुतन्तुसन्ताने । कृ० वुन् ॥ सञ्ज्ञायामितिण्वुल् वा ॥

चर्म्ममुण्डा । स्त्री । दुर्गायाम् ॥

चर्म्ममुण्डिका । स्त्री । कात्यायन्याम् । चण्डिकायाम् ॥

चर्म्मयष्टि । स्त्री । अश्वताडन्याम् । कशायाम् ॥ चर्म्मणो यष्टि ॥

चर्म्मरङ्गा । स्त्री । आवर्त्तकीलतायाम् । विभाण्ड्याम् ॥

चर्म्मक । पु । चर्म्मकारे ॥ इतित्रिकाण्डशेष ॥

चर्म्मसम्भवा । स्त्री । एलायाम् ॥

चर्म्मसार । पुं । } रसे ॥ इतिरा
चर्म्माम्भ' । न । } जनिर्घण्ट ॥

चर्म्मार' । पुं । चर्म्मकारे ॥ चर्म्मक्रियाम् ऋच्छति । ऋच्छे कर्म्मण्यण ॥ त्रिकुलप्रभेदे ॥ चर्म्मार शुक्लवर्ण्ण स्यात् ॥

चर्म्मी । पु । फलकपाणौ । ढलैत इति भाषा ॥ भूर्ज्जवृक्षे ॥ भृङ्गरीटे ॥ कदल्याम् ॥ चर्म्मास्यास्ति । व्रीह्यदि' ॥

चर्य्या । स्त्री । ईर्य्यायाम् । नियमाख्यागे । ध्यानमौनादिकस्य भिक्षुव्रतस्यानुष्ठाने । ईर्य्यापथस्थितौ ॥ ईर्य्यतेऽनुरां शास्त्रोपासनया ज्ञायते इति ईर्य्या । ईर्य्याया पन्था । ऋक्पूरित्य' । ईर्य्यापथे ध्यानाद्युपाये परिव्राजकादीनांस्थिति तस्यामित्यर्थे ॥ आचरणे ॥ चरणम् । चर० । गदमदचरयमश्चानुपसर्गेइतियत् ॥ यद्वा । परिचर्य्यापरिसर्य्येत्यत्र परीत्यस्या

विवक्षणात् चर्य्येतिसाधु' ॥

चर्व्वणम् । न । दन्तैश्चूर्णने । चवावना इतिभाषा ॥ चर्व्वअदने । ल्युट् ॥

चर्व्वा । पु । तलप्रहारे ॥

चर्व्वित' । त्रि । भक्षिते । कृतचर्व्वणे ॥ चर्व्व्यते स्म । चर्व० । क्त' ॥

चर्व्वितपात्रकम् । न । चर्व्विततांबूलादित्यागपात्रे । कटकोले । पतद्ग्रहे ॥

चर्व्व्यम् । त्रि । चर्व्वणीये ॥

चर्षणि । पु । जने ॥ कर्षति । कृष० । कृषेरादेश्चचइत्यनि ॥

चर्षणी । स्त्री । पुंश्चल्याम् ॥ कर्षति मन । कृषविलेखने । कृषेरित्यनि' । कृदिकारादितिङीष ॥

चल । पु । कम्पे ॥ न । चञ्चले । लोले । तरले ॥ अल्पकालस्थायिनि । शरीरे जगतिच ॥ प्रतिक्षणमन्यथाभावात् ॥ नक्षत्रविशेषे । स्वात्यादित्येश्रुतेस्त्रीणिचन्द्रश्चापिचरचलम् ॥ त्रि । कम्पयुक्ते । चञ्चले ॥ चलति चलगतौ । पचाद्यच् ॥

चलचञ्चु' । पु । } चकोरपक्षि-
चलच्चञ्चु । पु । } णि ॥

चलत्पूर्णिमा । स्त्री । चन्द्रकमत्स्ये ॥

चलदङ्ग' । पु । } चेङ्गामाछ इ-
चलदङ्गक । पु । } तगौड भाषा

प्रसिद्धे मत्स्ये ॥

चलद्दल । पु । अश्वत्थवृक्षे ॥ चलानि दलान्यस्य ॥

चलन । पु । पादे ॥ हरिणे ॥ न । भ्रमणे ॥ कम्पे ॥ स्थिरत्वप्रच्युतौ ॥ देशान्तरप्राप्तिहेतुभूते क्रियाविशेषे ॥

चलनशीलम् । चल० चलनशब्दे तियुच् ॥ त्रि । कम्पे । कम्पयुक्ते ॥

चलनकम् । न । चण्डातके ॥

चलनी । स्त्री । वारीभेदे । गजबन्धन्याम् ॥ वस्त्रघर्घर्याम् । वस्त्रवेधिन्याम् ॥

चलपत्र । पुं । पिप्पलवृक्षे ॥ चलानि पत्राण्यस्य ॥

चलसङ्क्रम । पुं । ईश्वरेच्छालोकादृष्टवशात्सूर्याद्यादिभागस्य सूर्यतेजस्सम्पर्के ॥

चला । स्त्री । लक्ष्म्याम् ॥ चञ्चलाच्चला त्वत्वैव सर्वथैव नसंशय ॥ सिल्हके ॥ टाप् ॥

चलाचल । त्रि । चञ्चले ॥ चलति । चल० । चरिचलि ति दित्वादि ॥ पु । काके ॥

चलातङ्क । पु । वातरोगे ॥

चलाभास । पु । मायामयस्य रज्जुसर्पोद्गमने ॥ चलमिवआभासतेइति तथा ॥

चलित । त्रि । कम्पिते ॥ उच्छलिते । तरलिते ॥ प्रचके ॥ गते ॥ चल्यते स्म । चलकम्पने । क्त ॥

चलु । पु । गण्डूषे ॥ इतिहेमचन्द्र ॥

चलुक । पु । प्रसृतौ ॥ भाण्डप्रभेदे ॥

चवर्ग । पु । चादिपञ्चवर्णेषु ॥

चवर्गीय । पु । चवर्गभवेवर्णे ॥ वर्गान्ताच्चेतिछ ॥

चवल । पु । राजमाषे । चौला इति भाषा ॥

चवि । स्त्री । चविकायाम् ॥

चविकम् । न । चव्ये ॥ चर्व्यते । चर्व० । क्कुन् । पृषोदरादि ॥

चविका । स्त्री । चइ इतिगौडभाषाप्रसिद्धे वृक्षे । चव्ये ॥ चविकाट्टाप् ॥

चव्यम् । न । चविकायाम् ॥ कलामूलभव चव्य विशेषाद्गजपिप्पलम् ॥ चर्व्यते । चर्व । यत् । पृ० ॥

चव्यकम् । न । चव्ये ॥

चव्यजा । स्त्री । } गजपिप्पल्याम् ॥
चव्यफलम् । न । }

चव्या । स्त्री । वचायाम् ॥ कार्पास्याम् ॥

चषक । पु न । सुरापानपात्रे । गल्वर्के । सरके ॥ अथचषकोद्देश । यत्पानपात्र भूपानां तज्ज्ञेय चषकं बुधैः । कानकं राजतञ्चैव स्फाटिकं काचमेवच ॥ वृक्त स्वराष्टदिक्कों वा चतुर्णांपृथिवीभुजाम् । दृश्यन्य

सम्मतं तेषां निर्णय पाठसम्मत ॥ स्वमुष्टिसम्मित रत्नैश्चतुर्वर्गैः समन्वितम्। मार्त्तिकवाऽथफाखवा सर्वेषामुपयुज्यते। काष्ठज धातुजश्चैवं जाङ्गलादिमहीभुजाम्। यद्यत्तोयपानादिपात्रं पृथ्वीभुजा भवेत् ॥ तत्रतत्रापिनियमइतिभोजस्य निश्चय ॥ * ॥ मधुनि। मद्ये ॥ मद्यभेदे ॥ मद्यभाजने ॥ चष्यतेऽनेन। चषभक्षणे। क्रुन् ॥

चषति। पु। भक्षणे ॥ वधे ॥

चषाल। पु। यूपकटके ॥ यज्ञसमाप्तिसूचकं पशुबन्धनार्थं यज्ञभूमौ यत्काष्ठमारोप्यते सयूप तच्छिरसि वलयाकृति उमरुकाकृति वाय काष्ठविकार. सचषाल। यपमस्तेविह्नितलोहवलयश्च ॥ चषति चष्यते वा। चष॰। सानसिवर्णसिपर्णसीतिचषेराल ॥

चाकचक्यम्। न। } उज्ज्वलतायाम् ॥ नह्निलो
चाकचिक्यम्। न। }

कसिद्धसामग्री प्रातिभासिकरजतोत्पादिका किन्तु विलक्षणैव। तथाहि। काचादिदोषदूषितलोचनस्य पुरोवर्त्तिद्रव्यसंयोगादिदमाकाराचाकचक्याकाराच काचिदन्त करणवृत्तिरुदेतीति वेदान्तपरिभाषा ॥

चाकचिक्या। स्त्री। स्वतवक्रायाम् ॥

चाक्रायण। पु। ऋषस्याख्यर्षौ ॥ चक्रस्य गोत्रापत्यम्। अ॰ फञ् ॥

चाक्रिक। पु। वहुभिर्मिलित्वास्तुतिकारे। घाण्टिके ॥ चक्रेण समूहेन चरति। चरतीति ठक् ॥ शाकटिके ॥ तैलकारे ॥

चाक्षुष। पु। षष्ठमनौ ॥ न। रूपे ॥ चक्षुषा गृह्यते। अण् ॥ चक्षुरेऽवा। स्वार्थिक प्रज्ञाद्यण् ॥ प्रत्यक्षविशेषे ॥ तत्तु चक्षुरिन्द्रियजन्यज्ञानम्। द्रव्यचाक्षुषप्रति चक्षु संयोग कारणम्। द्रव्यसमवेतचाक्षुषं प्रति चक्षु:संयुक्तसमवाय। द्रव्यसमवेतसमवेतचाक्षुषंप्रति चक्षु सयुक्तसमवेतसमवाय। तथाच भा॰ प॰। द्रव्यग्रहस्तु सयोगात् सयुक्तसमवायत। द्रव्येषु समवेतानां तथातत्समवायत ॥ तत्रापिसमवेतानां शब्दस्य समवायत। तद्वृत्तीनांसमवेतसमवायेनतुग्रह इति ॥ त्रि। चक्षुर्ग्राह्ये ॥

चाङ्गम्। न। दन्तपटुत्वे ॥

चाङ्गेरी। स्त्री। अम्ललोणिकायाम् ॥ चाङ्गेरीदीपनीकच्या लघूष्णाकफवातनुत्। पित्तलाम्लाग्रहण्यर्शः कुष्ठातीसारनाशिनी ॥ चाङ्गम् ईरयति

। ईरग्रेरणे। कर्मख्यण् ॥

चाञ्चल्यम् । न । चञ्चलतायाम् ॥

चाट । पु । चौरे॥ आर्यमर्यादां प्र स्व मर्यादां वा भिन्दाने ॥ प्रतारके ॥ आदौ विश्वासमुत्पाद्य पश्चात् परधनापहर्त्तरि। प्रच्छन्नापहारिणि तस्करे॥ योहरि कलहप्रिये ॥ चटनम् चाटनम्। चटभेदने। भावे घञ् ॥

चाटकैर । पु । चटकापत्ये॥ चटकाया चटकस्य वा पुमपत्यम्। चटकायाएरक्। चटकस्येति वाच्यम् ॥

चाटु । पु । न । प्रियेवाक्ये । प्रियप्राये । चटौ ॥ चकरच बहुचाटून् प्रौढयोषिद्वदस्योत । क्लीवमपि । चाटु चाऽकृतकसंभ्रम मासां कार्मणत्त्वमगमद्रमणेप्स्वितिच माघ ॥ चटति। चटभेदने । हृसनिजनीतिञुण् ॥ मिथ्याप्रियवाक्ये ॥

चाटुपटु । पु । भण्ड । भाँड इति भाषा ॥

चाटुलोल । वि । चटुलोले । सुचञ्चले ॥

चाटुवटु । पु । भण्डे । विदूषके। क्रीडनीयकप.चे ॥

चाटूक्ति । स्त्री । सेवायाम् ॥ प्रियवाक्यायाम् ॥

चाणकीनम । न । चणकोत्पत्तियोग्य

क्षेत्रे ॥ चणकानाम् भवन क्षेत्रम् । धान्यानामितिखञ् ॥

चाणक्य । पु । मुनिविशेषे । द्रौमिणे ॥ चणकस्य गोत्रापत्यम् । गर्गादिभ्यो यञ् ॥ न । तन्निर्मिते राजनीतिशास्त्रे॥

चाणक्यमूलकम् । न । मूलकप्रभेदे । वालेये । विष्णुगुप्तके ॥

चाणूर । पु । कंसासुरस्य प्रधानमल्ले ॥

चाणूरसूदन । पु । श्रीकृष्णे ॥ चाणूर सूदितवान् । सूदयतेर्नन्द्यादिभ्यो ल्युः ॥

चाण्डाल । पु । चण्डाले । श्वपचे । अन्त्यजे ॥ चण्डालएव । कुलालवरुड निषादचण्डालमित्रामित्रेभ्य श्छन्दस्युपसङ्ख्यानमितिछन्दस्यण् ॥ प्रमाण्णि लोकेपीतिकेचित् ॥

चाण्डालकि । पु । चण्डालापत्ये ॥

चण्डालवल्लकी । स्त्री। कण्डोलवीणायाम् ॥ चाण्डालस्यवीणा ॥

चाण्डालिका । स्त्री । कण्डोलवीणायाम् ॥ चण्डालिका शब्दार्थे ॥ चण्डालस्यवम् । तस्येदमित्यण् । टिड्ढेतिङीप् । स्वार्थे कन् ॥ चण्डालेनकृता वा । कुलालादिभ्योवुञ् ॥

चाण्डाली । स्त्री । चण्डालयोषायाम् ॥ लिङ्गिन्याम् ॥

चातक । पु । स्तोकके । सारङ्गे। पक्षी

का इतिभाषा ॥ यथा । सर्वसहापतितमम्बु न चातकानामिति ॥ चतति । चते० । ण्वुल् ॥

चातकानन्दन । पु । वर्षाकाले ॥

चातुक । पु । शरवीजे ॥ चातुको मधुरोष्णो रक्तपित्तकफप्रद । शीतो लघु रुच्यश्च कषायो वातकोपन ॥

चातुर । पु । चक्रगण्डौ ॥ त्रि । नेत्रगोचरे ॥ चाटुकारे ॥ नियन्तरि ॥ चतुर एव । स्वार्थेऽण् ॥ न । शकटे ॥ चतुर्भिरुह्यते । शेषइत्यण् ॥

चातुरक: । त्रि । चतुरार्थे ॥

चातुराश्रम्यम् । न । ब्रह्मचारिगृहस्थवानप्रस्थसन्यासिषु ॥ चत्वार आश्रमा एव । चतु० स्वार्थेष्यञ् ॥ चतुर्णामाश्रमाणांधर्मे ॥

चातुरी । स्त्री । दाक्ष्ये । चतुरतायाम् ॥ यालोकद्वयसाधनीन्वनुभृतासा चातुरी चतुरी ॥ चतुरस्येयम् । तस्येदमित्यण् । ङीप् ॥

चातुर्जातकम् । न । चतुर्जातके ॥ स्वार्थे अण् ॥

चातुर्द्दशिक । त्रि । भूताध्ययनकर्त्तरि ॥ चतुर्द्दश्यामधीते । अध्यायिन्यदेशकालादितिठक् ॥

चातुर्भद्रम् । न । नागरातिविषामुस्तागुडूचीतिचतुष्टये ॥

चातुर्मासी । स्त्री । पूर्णिमाविशेषे ॥ चतुर्षुमासेषुभवा । सज्ञायामित्यण् । ङीप् ॥

चातुर्मास्यम् । न । यागविशेषे ॥ चातुर्मास्ययागस्य चत्वारि पर्वाणि । वैश्वदेवो वरुणप्रघास शाकमेध, शुनासीरीयश्चेति । चतुर्षुमासेषु भवन्ति चातुर्मास्यानियज्ञानि । चतुर्मासाण्ण्योयज्ञइति ण्य ॥ आषाढशुक्लद्वादश्यादिचतुर्मासकर्त्तव्ये व्रते ॥यथा । आषाढशुक्लद्वादश्यां पौर्णमास्यामथापिवा । चातुर्मास्यव्रतारम्भं कुर्यात् कर्कटसङ्क्रमे ॥ अभावेतु तुलार्केपिमन्त्रेण नियम व्रती । कार्त्तिके शुक्लद्वादश्यां विधिवत् तत् समापयेत् ॥ चतुर्ष्वपिहि तच्चीर्णं चातुर्मास्य व्रत नर । कार्त्तिक्यां शुक्लपक्षेतु द्वादश्यांतत् समापयेदिति वाराह ॥

चतुर्मास्यद्वितीया । स्त्री । आषाढफाल्गुनोर्जेषे या द्वितीया विधुक्षये । चातुर्मास्यद्वितीया सा प्रवदन्ति महर्षय ॥

चातुर्वर्ण्यम् । न । यज्ञसाधनेषु ब्राह्मणक्षत्रियविट्शूद्रेषु ॥ चत्वारोवर्णाएव । चतुर्वर्णादीनांस्वार्थे उपसङ्ख्यान

मितिष्यञ् ॥ देवेषु चत्वारो वर्णा यथा। आदित्या क्षत्रियास्तेषां विशश्च मरुतस्तथा। अश्विनौ च स्मृतौ शूद्रौ तपस्युग्रे समाश्रितौ ॥ स्मृता स्त्वाङ्गिरसो देवा ब्राह्मणा इति निश्चय इति ॥

चातुर्वैद्य । पु । चतुर्वेदे ॥ चतुरो वेदानधीते चतुर्वेद । सएव । चतुर्वेदस्योभयपदवृद्धिश्चेति ब्राह्मणादिगणे पाठत् ष्यञ् ॥

चात्वाल । पु । याज्ञिकानां गर्त्तविशेषे ॥ चत्वालएव । स्वार्थे अण् ॥

चानूर । पु । कंसमल्ले । चाणूरे ॥

चानूरसूदन । पु । श्रीकृष्णे ॥ चानूरस्सूदितवान् सूदयतिवा । सूदक्षरणे । ल्यु ॥

चान्द्र । पु । चन्द्रकान्तमणौ ॥ शुक्लाद्यमान्ते मासे ॥ कृष्णादिपूर्णिमान्ते च मासे ॥ न । चान्द्रायणे ॥ चन्द्रस्यायम् अण् ॥

चान्द्रकम् । न । शुण्ठ्याम् ॥ इति राजनिर्घण्ट ॥

चान्द्रभागा । स्त्री ।
चान्द्रभागी । स्त्री । } चन्द्रभागायाम् ॥

चान्द्रमस । पु । इन्दुजे ॥ भारतवर्षीयो पक्षीपविशेषे ॥ न । मृगशिरोनक्षत्रे ॥ त्रि । चन्द्रमससम्बन्धिनि ॥ चन्द्रमसोऽपत्यम् इदंवा । अण् ॥

चान्द्रमसायन । पु । बुधे । सौम्ये ॥

चान्द्रमास । पु । चन्द्रसम्बन्धिमासे ॥ सतु गौणमुख्यभेदेन द्विविध । तत्राद्य कृष्णप्रतिपदादिपौर्णमास्यन्त । द्वितीय शुक्लप्रतिपदादिदर्शान्त । चान्द्रोपिशुक्लपक्षादिः कृष्णादिर्वेतिच द्विधेत्युक्ते ॥ तत्र मुख्यचान्द्रे कर्म्माणि । आब्दिकश्राद्धादि सपिण्डीकरणान्तश्राद्धानि चान्द्रायणप्राजापत्यादिव्रतानि दानकर्म नित्यस्नान गृहपुष्करिण्यादिप्रतिष्ठा साधारणतिथिविहितकर्माणिचेति॥ गौणचान्द्रेकर्माणि । अष्टकादिपार्वणश्राद्ध वारुणीस्नान जन्मतिथिकृत्यं जन्माष्टम्याद्युपवासो दुर्गोत्सवादितिथिनियतपूजाचेति ॥ चान्द्रश्चासौमासश्च ॥

चान्द्रव्रतम । न । रूपतेर्व्रतविशेषे ॥ यथा ॥ परिपूर्णं यथाचन्द्र दृष्ट्वा हृष्यन्ति मानवा । तथा प्रकृतयो यस्मिन् सचान्द्रव्रतिकोन्नपइतिमनु ॥

चान्द्राख्यम । न । आर्द्रके ॥

चान्द्रायणम् । न । व्रतविशेषे । इन्दुव्रते ॥ तच्चतुर्विध भवति । पिपीलिकामध्याख्ययवमध्याख्ययतिचान्द्रायणशिशुचान्द्रायणभेदात् । तथाहि ।

एकैकह्रासयेत् पिण्ड कृष्णेशुक्लेचव
र्द्धयेत्। उपस्पृशंस्त्रिषवणमेतच्चान्द्रा
यणस्मृतम् ॥ त्रिषवण स्नानं कुर्वाण
पौर्णमास्यां पञ्चदशग्रासानश्नित्वात
त कृष्णप्रतिपत्क्रमेण एकैकग्रासंह्रा
सयेत्। तथाच चतुर्दश्यामेकोग्रा
स सम्पद्यते । ततोऽमायामुपोष्य
शुक्लप्रतिपत्प्रभृतिभिरेकैक वृद्धि-
नयेत् एव पौर्णमास्यां पञ्चदशग्रा
सा सम्पद्यन्ते । एतत्पिपीलिकाम
ध्याख्य चान्द्रायणम् ॥ १ ॥ एतमेववि
धिकृत्स्न माचरेद्यवमध्यमे । शुक्ल
पक्षादिनियतश्चरंश्चान्द्रायणव्रतम् ॥
एवमेवपिण्डह्रासवृद्धित्रिषवणस्नाना
त्मकविधान यवमध्याख्ये चान्द्रायणे
शुक्लपक्षमादित कृत्वा सयतेन्द्रिय
श्चान्द्रायणमनुतिष्ठन् आचरेत् ।
ततश्च शुक्लप्रतिपदमारभ्य एकैकपि
ण्डवर्द्धयेत् । यथापौर्णमास्यां पञ्चद
शग्रासा सम्पद्यन्ते। तत कृष्णप्रतिपद
मारभ्य एकैकपिण्डह्रासयेत् । यथा
अमावास्यायामुपवासोभवति ॥ २ ॥
अष्टावष्टौसमश्नीयात् पिण्डान्मध्य
दिनेस्थिते । नियतात्मा हविष्याशी
यतिचान्द्रायणंचरन् ॥ ३ ॥ चतुर
प्रातरश्नीयात्पिण्डान्विप्र समाहि
त. । चतुरोस्तमितेसूर्ये शिशुचान्द्रा
यण स्मृतमितिमनु ॥ ४ ॥

चान्द्रायणिक । पु । तपस्विविशेषे ॥
चान्द्रायण वर्त्तयति । पारायणतुरा
यणचान्द्रायणं वर्त्तयतीतिठञ् ॥

चान्द्री । स्त्री । श्वेतकण्टकार्याम् ॥ ज्यो
त्स्नायाम् ॥

चाप । पु । धनुषि । शरासने ॥ धनू
राशौ ॥ पञ्चकलस्य ॥ ऽतृतीयप्रभे
दे ॥ चापस्य व प्रभेदस्य विकार'। अ
वयवेचप्राण्योषधिवृक्षेभ्यइत्यण् ॥

चापपट । पु । पियालवृक्षे ॥

चापलम् । न । अनवस्थितौ ॥ तल्लक्षण
यथा । मात्सर्यद्वेषरागादेश्चापल
न्त्वनवस्थितिरिति ॥ अविनीतत्वे ।
प्रयोजन विनापि वाक्पारुष्यादिव्या
पारयितृत्वे । अविमृश्यकारित्वरूपे
चपलकर्मणि ॥ लघ्वारिभावे ॥ आ
त्मप्रकाशिनीचेष्टारागा देश्चापलम
तमितिलक्षणात् ॥ चपलस्यकर्मभा
वो वा । यु० अण् ॥

चापल्यम् । न । चपलतायाम् ॥ चाञ्च
ल्ये । चापले ॥ चपलस्यकर्मभावो
वा । गुणवचनत्वात् प्राप्तस्य ष्यञो
युवादिपाठप्राप्तेनाणा वाधप्रसङ्गेपि
ब्रा० ष्यञ् ॥

चामर । पु । न । चमरीपुच्छनिर्मि
ते वालव्यजने । प्रकीर्णके । चौंर

। गौर्य्याम् ॥ मोक्षकारणीभूतनि-
र्विकल्पकवृत्तिविशेष अमूसेनां वि
यदादिसमूहरूपांडाति खण्डयोरैक्या
त्माति आदत्ते स्वात्मसाक्षात्कारेण
नाशयति इतिव्युत्पत्ते । पृषोदरा-
दित्वात् सर्वंसुस्थमित्याहु. ॥ मया
तवाग्रोपहृतौ चण्डमुण्डौ मत्वाप
शू इत्यत्रपशुपदद्विवचनयो स्वार
स्येन तूलमूलभेदेनाज्ञानद्वयकथने
न यस्माद्वयहृत्वमुण्डत्वगृहीत्वात्व
मुपागता । चामुण्डेति ततोलोके
ख्यातादेवी भविष्यसीत्यत्रापितूल
मूलाविद्ययोरादानमेव गृहीत्वेति
पदेनानूद्य निर्वचनकथनादखण्डब्र
ह्मविद्यैवचामुण्डापदस्यार्थोवर्णि
त इतिरहस्यार्थनिर्णयम् ॥ यद्वा ।
चमति । चमुअदने । वा० उण् ।
चामुरदनीय पदार्थ. । सच ब्रह्मा
तिरिक्त सर्वोऽपि । अत्ताचराचरग्र
हणादित्यधिकरणे तथानिर्णयात् ।
तडापयति उद्‌डापयति नविषयी
कुरुते ब्रह्ममात्रविषयिणीतियावत्
॥ अथवा चकार एकाक्षरनिघण्टुरी
त्या चन्द्रवाचक आह्लादप्रकाशगु
णयोगादित्यज्ञानघर आनन्दपरोवा
तत्परब्रह्मैवचक्रि तदासमन्तान्मुण्डय
तीति चामुण्डा । मुण्डन नामाधा

रापेक्षयान्यूनसत्ताकवस्तुनिरास ।
शिरस्थमांसापेक्षयान्यूनतादात्म्यवता
मेवकेशानावपने प्रयोगात् ॥ अथ
वा चाना वृद्धीना मुखाना वा मुण्ड
मिवशीर्षमिवस्थिता सर्वोत्तमा च
रमवृत्तिरूपा ब्रह्मविद्येतियावदिति
गौडपादटीकानुवादीभास्करराय ॥
चाम्पिला । स्त्री । नद्याम् । निर्झरि-
ण्याम् ॥
चाम्पेय । पुं । चम्पके ॥ स्वर्णे ॥ कि
ञ्जल्के ॥ नागकेसरे ॥ चम्पाया अप
त्यम् । स्त्रीभ्योढक् ॥
चाम्पेयकम् । न । किञ्जल्के ॥
चायनीय । त्रि । पूजनीये ॥
चार । पु । पियालवृक्षे । चिरौंजी इ
ति प्रसिद्धे ॥ चार पित्तकफास्रघ्न
स्तत्फलं मधुरं गुरु । स्निग्ध सर मरु
त् पित्तदाहज्वरतृषापहम् ॥ पिया
लमज्जा मधुरो वृष्य पित्तानिला-
पह । हृद्योऽतिदुर्जर स्निग्धो वि
ष्टम्भी चामवर्द्धन ॥ गतौ ॥ बन्धे ॥
अवसर्पे । चरे । प्रणिधौ ॥ चाराञ्च
विचारयेत् तीर्थे ष्वात्मनश्चपरस्य च
। पाषण्डादीनऽविज्ञातानन्योन्यमपि
तरेपिच ॥ * ॥ अमात्य समान्य म
नुष्या भाषित्वमधूकचन्द्रोतचार
गुणा इतिनीति वाक्यमृतम् ॥ * ॥

तल्लक्षण यथा । विवस्वानिव तेजो भिर्नभस्वानिव वेगत । राजा चरेज्जगत्सर्वं प्राप्नुयाल्लोकसम्मतै ॥ तर्केङ्गितज्ञ स्मृतिमान् स्वीयभावाप्रकाशक । क्लेशायाससहोदक्ष सर्वच भयवर्जित ॥ सुभक्तोराजसुतथा कार्याणा प्रतिपत्तिमान् । न्द्रपोनिद्दन्याच्चारेणपरराष्ट्र विचक्षण ॥ कालज्ञोमन्त्रकुशलान् सांवत्सरचिकित्सकान् । तथान्यानपियुञ्जीत समर्थान् शुद्धचेतस ॥ अक्रुद्धांश्चतथा ऽलुब्धान दृष्टार्थानतत्त्वभाषिण. । पाषण्डिनस्तापसादीन परराष्ट्रेनियोजयेत् ॥ स्वदेशपरदेशज्ञान् सुशीलान् सुविचक्षणान । वार्त्तार्थान् वहूंश्चैव चाराणाविनियोजयेत् ॥ नैकस्यवचने राजा चारस्य प्रत्ययं वहेत् । द्वयो सम्बन्धमाज्ञायतद्युक्त कार्यमाचरेत् ॥ तस्माद्राजाप्रयुञ्जीतचारान् वहुमुखान् वहून् । नीरेतो वामना कुब्जास्तद्विधायेचकारव ॥ भिक्षुकश्चारणादासीमालाकार्यं कलाविद. । अन्त पुरगता वार्त्ता निर्हरेयुरलक्षिताम् ॥ प्रकाशश्चा ऽप्रकाशश्चचारस्तुद्विविधोमत । अप्रकाशोयमुद्दिष्ट प्रकाशोदूतसञ्ज्ञक ॥ इतियुक्तिकल्पतरु ॥ कारागारे ॥ न । कृत्रिमविषे ॥ चरणम् । चरगतौ । घञ् ॥ चरति वा । पचाद्यच् । चरएव । प्रज्ञाद्यण् ॥

चारक । पु । अश्वादे पालके ॥ सञ्चारके ॥ वन्धे ॥ पियालद्रुमे ॥ चारे ॥ स्वार्थे क ॥

चारचक्षु । पु । राजनि ॥ चाराश्चक्षूंषियस्य । गाव. पश्यन्ति गन्धेन वेदै पश्यन्ति वै द्विजा । चारै पश्यन्ति राजान चक्षुर्भ्यामितरेजना ॥ स्वपरमण्डलकार्याकार्यविलोकने चाराश्चक्षूंषि चिति पार्थानामिति नीतिवाक्यामृतम् ॥

चारचुञ्चु । त्रि । गतिविशेषे वित्ते ॥ चुञ्चुप् ॥

चारटिका । स्त्री । नलीनामगन्धद्रव्ये ॥

चारटो । स्त्री । पद्मचारिण्यामोषधौ ॥ भूम्यामलक्याम् ॥ चारयति । चरेर्ण्यन्तात् शकादिभ्यो ऽटन् । ङीप् ॥

चारण । पु । कीर्त्तिसञ्चारकनटे । कुशीलवे ॥ चारयति कीर्त्तिम् । चर० । णिजन्त । नं० ल्यु ॥ देवानां स्तुतिपाठके ॥

चारपथ । पु । राजपथे ॥

चारभट । पु । वीरे ॥

चारवायु । पु । निदाघजे वायौ ॥

चारिणी । स्त्री । करुणीवृक्षे ॥

चारित्रम् । न । स्वभावे । चरित्रे ॥ कुलक्रमागताचारे ॥ चरित्रमेव । स्वार्थेऽण् ॥ चरित्रितेन । चर० । चरेर्इत्रः इति णित्रच् वा । स्वरभेद ॥

चारित्रा । स्त्री । तिन्तिडीवृक्षे

चारी । स्त्री । नृत्याङ्गविशेषे ॥ विवरणान्तसङ्गीतदामोदरे ॥

चारु । पु । वृहस्पतौ ॥ त्रि । शोभने । रम्ये । मनोज्ञे ॥ चरति चित्ते । चर० । दृसनिजनिचरिचटिभ्यो ञुण् ॥ न । कुङ्कुमे ॥

चारुक । पु । शरबीजे ॥

चारुकेशरा । स्त्री । तरुणीपुष्पे ॥ नागरमुस्तायाम् ॥

चारुगर्भ । पु । } श्रीकृष्णपुत्रे ॥
चारुगुप्त । पु । }

चारुदेष्ण । पु । रुक्मिण्यांश्रीकृष्णतनये ॥

चारुधारा । स्त्री । इन्द्राण्याम् ॥ स्यादिंद्राणी शतावरी चारुधारेति रभस ।

चारुनालकम् । न । रक्तपद्मे ॥

चारुपर्णी । स्त्री । प्रसारण्याम् । गन्धभादालिया इति गौडभाषा ॥

चारुफला । स्त्री । द्राक्षायाम् ॥ चारूणिफलान्यस्याः ॥

चारुमती । स्त्री । रुक्मिण्यां श्रीकृष्णकन्यायाम् ॥

चारुलोचन । पु । हरिणे ॥ त्रि । सुलोचने ॥

चारुवर्द्धना । स्त्री । नार्य्याम् ॥

चारुवाहु । पु । } श्रीकृष्णात्मजे॥
चारुविन्द । पु । }

चारुव्रता । स्त्री । मासोपवासिन्याम् ॥

चारुशिला । स्त्री । मणौ ॥

चार्च्चिक । त्रि । चर्चाभिज्ञे ॥ उक्थादित्वाट् ठक् ॥

चार्च्चिक्यम् । न । चन्दनादिना देहविलेपने । चर्चायाम् । स्थासके ॥ चर्चैअध्ययने । धात्वर्थनिर्देशे ण्वुल् । चर्च्चिकैव । स्वार्थेष्यञ् ॥

चार्म्म । पु । चर्मावृतरथे ॥ चर्मणापरिवृत । परिवृतोरथः इत्यण् ॥

चार्म्मणम् । न । चर्मसमूहे ॥ चर्मणां समूह । भिक्षादिभ्योऽण् ॥

चार्वाक । पु । बौद्धैकदेशिनि । आकाशभिन्नभूतचतुष्टयवादिनि तार्किकविशेषे । नास्तिके । बार्हस्पत्ये । लौकायतिके ॥ तस्येदंमतम् । शरीरमेवात्मा । प्रज्वलितगृहात् स्वपुत्रपरित्यज्यापि स्वस्य निर्गमदर्शनात् । स्थूलोहंकृशोहमित्यनुभवाच्च ॥ प्रत्यक्षमेकचार्वाका प्रमाणं मन्यन्ते ॥ अपिच । सर्वथालोकायतमेवशा

लम् । यत्प्रत्यक्षमेवप्रमाणम् । पृथिव्यापस्तेजोवायवस्तत्त्वानि चत्वार्येव । अर्थकामौच पुरुषार्थौ । भूतान्येवचेतयन्ते नास्ति परलोक. । मृत्युरेवापवर्ग इति ॥ दुर्योधनसखे राक्षसविशेषे ॥

चार्वी । स्त्री शोभनायाम् ॥ बुद्धौ ॥ ज्योत्स्नायाम् ॥ धनदभार्यायाम् ॥ दीप्तौ ॥

चाल: । पु । छप्पर इतिख्यात इतिच ख्याते पटले । पिटे । छदिषि ॥ चलति । चलगतौ । ज्वलितिकसन्तेभ्यो ण' । वृद्धि: ॥

चालक' । पु । गम्भीरवेदिनि । अङ्कुशदुर्धरे हस्तिनि ॥ इतित्रिकाण्डशेष' ॥

चालनम् । न । चालन्याम् । सूक्ष्मच्छिद्रसमोपेत चालनंतितउःस्मृतमिति काश्य' ॥ चाल्यतेऽनेनवा । चल० । णिच् । ल्युट् ॥ धूनने ॥

चालनी । स्त्री । तितऊ । वह्वच्छिद्रायाम् । चलनी इतिभाषा ॥ चाल्यतेऽनयावा । चलेर्ण्यन्ताल्ल्युट् । ङीप् ॥

चाष' । पुं । स्वर्णचूडे । किकीदिवौ । नीलाङ्गे । पुण्यदर्शने ॥ अशोकश्च विशोकश्च नन्दन पुष्टिवर्द्धन. । हेमतुण्डो मणिग्रीव' स्वस्तिक श्चापराजित ॥ अष्टौ चाषस्यनामानि चाषदृष्ट्वातुय पठेत् । अर्थसिद्धिर्भवेत्तस्य मिष्टमन्न वराङ्गनेतिपठन्ति । नीलकण्ठइत्यस्यप्रसिद्धिर्लोके ॥ चाषयति । चषहिंसायाम् । स्वार्थण्यन्तात् अच् । चषभक्षणे । हेतुमण्यन्ताद्वाऽच् ॥

चास' । पुं । इक्षुप्रभेदे ॥ पक्षिविशेषे । चाषे ॥

चिक । पु । गन्धमूषिके ॥

चिकर्त्तिषु । त्रि । कर्त्तुमिच्छौ ॥ कृतीछेदने । सन्नन्तादुप्रत्यय' ॥

चिकित्सक' । पु । वैद्ये । चिकित्साजीविनि ॥ आयुर्वेदकृताभ्यास: सर्वेषांप्रियदर्शन । आर्यशीलगुणोपेत एषवैद्योविधीयते ॥ चिकित्सति । कितेर्व्याधिप्रतीकारे इतिसन्नन्तात् ण्वुल् ॥

चिकित्सा । स्त्री । रोगवारणे । रुक्प्रतिक्रियायाम् । क्रियायाम् ॥ आसुर्यादिभेदात्सा त्रिधा । यथा । आसुरी मानुषी दैवी चिकित्सा त्रिविधामता । शस्त्रप्रधानादैवीस्याच्छेदभेदात्मिकासुरी ॥ मानुषी पञ्चसाध्याजपहोमादिसस्कृता । कलौचाल्पवलेलोके मानुषीतत्पूजिता ॥ तस्यालक्षणं यथा । याभि'

क्रियाभि र्जायन्ते शरीरे धातवः समा । साचिकित्सा विकाराणां कर्म तद्भिषजांमतम् ॥ याह्युदीर्णं शमयति नान्य व्याधिं करोतिच । साक्रिया नतु या व्याधिं हरत्यन्य मुदीरयेत् ॥ अस्याः फलम् । क्वचिदर्थं क्वचिन्मैत्री क्वचिद्धर्मः क्वचिद्यशः । कर्माभ्यासः क्वचिच्चेति चिकित्सानास्ति निष्फला ॥ अस्याङ्गानियथा । रोगी दूतो भिषग्दीर्घमायुर्द्रव्याश्च सेवकः । सदौषधं चिकित्सायामित्यङ्गानि बुधाजगुरिति ॥ गुप्तिज्किद्भ्य इतिकितेर्व्याधिप्रतीकारे निग्रहे अपनयने नाशने संशयेचसन् । चिकित्सनम् । अप्रत्ययात् ॥

चिकित्सित । त्रि । प्रतिकृतामये । कृतप्रतीकारे ॥ न । चिकित्सायाम् ॥ भेषजे ॥ चिकित्सा सञ्जाताऽस्य । तारकादित्वादितच् ॥

चिकित्स्य । त्रि । रोगान्नाशयितव्ये ॥ चिकित्सितुयोग्य । रोगे ॥ यथा । जातमात्र श्चिकित्स्य स्यान्नोपेक्ष्योऽल्पतयागदः । वह्निशत्रुविषैस्तुल्य स्वल्पोपिविकरोत्यसौ ॥ रोगमादौ परीक्षेत तदनन्तरमौषधम् । ततः कर्मभिषक्पश्चाद् ज्ञानपूर्वंसमाचरे दिति ॥

चिकिन । त्रि । चिपिटे । चिक्के ॥ नासिकायानतम् । इनच्पिटच् चिकचिचेति नेरिनच् प्रकृतेश्चिकादेशश्च । तद्योगान्नासिका चिकिना । पुरुषश्चिकिनः ॥

चिकिल । पु । पङ्के । चीकड्इतिभाषा ॥

चिकीर्षा । स्त्री । कर्तुमिच्छायाम् ॥ कृञ्० । अप्रत्ययादित्य । टाप् ॥

चिकीर्षितम् । न । अभिप्राये ॥ कर्तुमीप्सिते ॥

चिकीर्षु । त्रि । कर्तुमिच्छौ । करणेच्छाविशिष्टे ॥ कर्तुमिच्छति चिकीर्षति । तच्छील । सनाशसभिक्षउ ॥

चिकुर । पु । कुन्तले । वाले ॥ इत्यमरः । भेदे ॥ पक्षिविशेषे ॥ शैले । पर्वते ॥ गृहबभ्रौ ॥ सरीसृपे ॥ त्रि । तरले । चञ्चले ॥ चपले । दोषमनिश्चित्यवधबन्धनादे कर्तरि ॥ सत्ये ॥ यथा । तावीक्ष्यलीलाचिकुरा मनङ्ग' स्वचापसौन्दर्यमदं मुमोचेति ॥ चिरूत्यथकश्शब्द कुरति । कुर शब्दे । इगुपधेतिक ॥

चिकुरपक्ष । पुं ।
चिकुरपाश । पु । } केशसमूहे ॥
चिकुरहस्त । पु ।

चिकूर । पु । चिकुरे ॥ इतिशब्दभेदः ॥

प्रकाश. ॥

चिक्क । पु । छुच्छुन्दर्याम् ॥ त्रि । नतनासिके । चिपिटने ॥ नासिकायाम् नतम् । कप्रत्ययेनेश्चिकादेशश्च ॥

चिक्कण । पु । पूगवृक्षे ॥ न । पूगफले ॥ त्रि । मसृणे । स्निग्धे । चिकणा इति भाषा ॥ चिक्कगमम् । चिक्कगतौ । सं॰क्लिप् । चिक्क कणति । कणशब्दे । मु॰क ॥ यद्वा । चिक्कणम् । घञ् । चिक्कस्य कणम् । कणशब्दे । अच् । शकन्ध्वादि ॥ यद्वा । चेतति । चितीसंज्ञाने । चितेः कण कश्च । बाहुलकादगुण. ॥

चिक्कणा । स्त्री । उत्तमायाकृषि । नैचिक्याम् ॥ पूगफले ॥

चिक्कणी । स्त्री । पूगफले ॥

चिक्कस । पुं । यवचूर्णे ॥ इति हेम ॥

चिक्का । स्त्री । पूगफले ॥ इतिराजनिर्घण्टः ॥

चिक्रंसा । स्त्री । क्रमितुमिच्छायाम् । जिहच्छायाम् ॥ क्रमेः सन्नन्तात् प्रत्ययादित्यकारप्रत्यये टाप् । स्नुक्रमोरनात्मनेपदनिमित्ते इतीडागमो न भवति । अपक्रमेर्वृत्त्यादित्यति-रिक्तार्थेऽप्यनुपसर्गादिति वैकल्पिकस्यात्मनेपदनिमित्तस्यानुपसर्गस्य-स्यैवैषविकल्पस्य सम्भवात् ॥

चिङ्गट । पु । गर्ची चिङ्गडा इति भाषा चिङ्गडी इतिच गौड भाषा प्रसिद्धे मत्स्ये । महाशल्के ॥

चिङ्गटी । स्त्री । घुषाचिङ्गडी इति गौड प्रसिद्धे मत्स्ये ॥

चिङ्गड । पुं । चिङ्गटमत्स्ये ॥

चिचिण्डः । पु । चिचिण्डे । सुदीर्घ-फले ॥

चिचीषा । स्त्री । चेतुमिच्छायाम् ॥ चिनोतेः सन्नन्तादप्रत्ययादिति स्त्रियामकार प्रत्ययः । विभाषाचेरिति विकल्पात् कुत्वाभावः ॥

चिच्छक्ति । स्त्री । चैतन्ये ॥ यथोक्तं स कृत्स्नोपशारीरके । चिच्छक्तिः परमेश्वरस्य विमला चैतन्यमेवोच्यत इति । यथोक्तं श्रीदेवीभागवते ५ स्कन्धे १९ ऽध्याये । चिच्छक्तिरस्ति परमात्मनि तेन सोपि व्यक्तो जगत्सु विदितो भवकृत्यकर्त्ता । कोऽन्यस्त्वया विरहितः प्रभवत्यमुष्मिन् कर्तुं विच-र्तुमपि सञ्चलितुं स्वशक्त्येति ॥ २८ ॥ हेमात सा चिच्छक्ति. परमात्मन्यस्ति तेन हेतुना सोपि परमात्माव्यक्तो नामरूपात्मको भवति तथाजगत्सुविदितः प्रसिद्धः तथा भवकृत्यकर्त्ता प्रपञ्चसृष्टिस्थितिसंहृतिकर्त्ता भवति । क पुरुषोऽस्मात् परमात्म

नोऽन्यस्तद्विरहितः स्वशक्त्यैवामुष्मिन् प्रपञ्चे कर्त्तुं विहर्त्तुं तथासञ्चलितु प्रभवति नकोपीत्यर्थः । यच्छिन्तहिंतचापि त्वशक्तिरूपा भवत्येव । एतादृशीञ्चसकलकारणा मननीयेति भावः । तदुक्तंदक्षिणामूर्त्तिसंहितायाम् । शक्त्याविना शिवेसूक्ष्मे नाम धाम न विद्यते इति ॥

चिञ्चा । स्त्री । अम्लिकाऽगमे ॥ चिमिच्यव्यक्तं शब्दं चिनोति ॥ चिञ्० । अन्येभ्योपीतिडः ॥ फले ॥ चिञ्चाया फलम् । हरीतक्यादित्वात्फलप्रत्ययस्यलुप् ॥

चिञ्चाम्लम् । न । }
चिञ्चासारः । पु । } अम्लशाके ॥

चिञ्चिका । स्त्री । अम्लिकायाम् । अमली इति इमली इतिचभाषा ॥

चिञ्चिड । पु । सुदीर्घफले । चचैंडा इति भाषा ॥ चिञ्चडो वातपित्तघ्नो बल्यः पथ्यो रुचिप्रदः । शोषघ्नोतिचित किञ्चिद्गुणैर्न्यून पटोलतः ॥

चिञ्चुकी । स्त्री । चञ्च्वाम् । दीर्घपत्रायाम् । चेंचू नाडीशाके ॥

चिञ्चोटकः । पुं । अङ्कोलाख्ये । चेंचको इतिचेंचुड । इतिचगौडप्रसिद्धे तृणे ॥

चित् । अ । असाकल्ये । असकलार्थे ॥ यथा । किञ्चित ॥ चेतति । चितीसंज्ञाने । क्विप् ॥

चित् । स्त्री । शक्तौ । बुद्धौ ॥ अजडे । निर्विशेषस्फुरणमात्रे चेतने । स्वत एव प्रकाशमाने ब्रह्मणि ॥ निर्विकल्पकं सर्वावभासकं ज्ञानं प्रत्यगात्मस्वरूपं चिदितिव्याख्यातारः ॥ चिदिहास्तीतिचिन्मात्रमिदंचिन्मयमेव च । चित्त्वं चिदहमेतेच लोकाश्चिदितिभावयेत्युपदेशः ॥ चिती० । सं० क्विप् ॥

चितः । त्रि । कृते ॥ चीयतेस्म । चिञ्० । क्तः ॥

चिता । स्त्री । चित्यायाम् । मृतार्थे दारुषु । प्रेतदाहार्थेऽग्न्याधाने ॥ शवदाहार्थे रचनायुक्तकाष्ठेषु ॥ संहतौ ॥ चीयतेस्म । चिञ्चयने । क्तः । टाप् ॥

चिताचूडकम् । न । चितायाम् ॥

चितिः । स्त्री । चितायाम् ॥ समूहे । वृन्दे ॥ निर्विषयकसंविदि ॥ बौधादिप्रसिद्धकासङ्ख्यानार्थाङ्कविशेषे ॥ अग्निस्थानविशेषे ॥ चीयते । चिञ्० । स्त्रियां मधिकरणेवा क्तिन् ॥

चितिका । स्त्री । कटिशृङ्खलायाम् ॥

चित्तम् । न । चेतसि । अनुसन्धानात्मिकायामन्तःकरणवृत्तौ ॥ चित्त एव बुद्धावन्तर्भावः विषयपरिच्छित्ति

रूपत्वाविशेषात् । वृद्धेष्वपूर्वविषय. चित्तस्य पूर्वानुभूत इतिविषयभेदात चित्तस्यक्वचित् पृथङ्निर्देशोप्यस्ति ॥ चैतन्ये ॥ यथा । एवनजायतेचित्तमिति ॥ विज्ञानस्कन्धे ॥ चितौ० । भावे क्त. । स्त्रीदितइतीकुनिषेध. ॥ चितायाम् ॥ चिताकाष्ठमठीचैत्यंचिताचूडकमिष्यते । चित्यचितिचिकायाश्चभेषात् ॥

चित्तकाल' । पु । चित्तपरिच्छेदे ॥ मान्यश्चित्तकालव्यतिरेकेण परिच्छेदक कालोयस्य तथा ॥

चित्तजन्मा । पु । कामदेवे ॥

चित्तदोष । पु । शून्यतायाम् ॥

चित्तनदी । स्त्री । उभयतोवाहिन्याम् ॥ इयं ह्युभयतोवहति कल्याणाय वहति पापायच । तत्र या कैवल्यप्राग्भारा विवेकनिम्ना साकल्याणवहा । याचाविवेकनिम्ना संसार प्राग्भारा सापापवहा ॥

चित्तप्रसन्नता । स्त्री । हर्षे ॥

चित्तबन्धनम् । न । चित्तबन्धकारके । मूलाज्ञाने ॥ चित्तस्यबन्धनम् ॥

चित्तमज्जनम् । न । रूपक्रियानुसन्धानराहित्ये ॥

चित्तमोदक: । पु । लड्डुकविशेषे ॥

चित्तल' । पु । मृगविशेषे ॥ कसितति सोऽङ्गवतैलविपक्व सवययुतं भवति कुरसाख्यम् । त्रिकटुकयुक्तनिम्बार्द्रकमिश्र बहुगुणचित्तलमांसमनर्घ्यम् ॥ रसे पाकेच मधुरं रक्तपित्तविनाशनम् ॥

चित्तविक्षेप. । पु । योगप्रतिपक्षेषु व्याधिस्त्यानादिषु ॥ चित्तं विक्षिपन्ति योगादपनयन्तीति चित्तविक्षेपा: योगप्रतिपक्षा । तेच नव योगसूत्रेणोक्ता । यथा । व्याधिस्त्यान संशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेन्तरायाइति ३० । तत्रसंशयभ्रान्तिदर्शने तावद्वृत्तिरूपतया वृत्तिनिरोधरूपस्य समाधे. साक्षात्प्रतिपक्षौ । व्याध्यादयस्तु सप्त वृत्तिसहचरिततया तत्प्रतिपक्षाभवन्ति ॥

चित्तवित् । पुं । विज्ञानात्मवादिनिबौद्धविशेषे ॥ चित्तमेव बाह्याकारशून्य विज्ञानं तदेवात्मेतिविज्ञानवादिनो भ्रान्तिरेव । सुषुप्ते अभिधारात् वेद्यस्यच घटादेश्च इतिरिक्तवेद्यत्वात् ॥

चित्तविप्लव. । पुं । उन्मादे ॥

चित्तविभ्रम: । पु । उन्मादे ॥ चित्तस्य विभ्रमो ऽनवस्थानम् ॥

चित्तसमुन्नति । स्त्री । माने ॥ चित्तस्य सम्यगुन्नति ॥

चित्तहारी । त्रि । मनोरमे ॥

चित्ताभोग । पु । एकस्मिन्विषये मनसो भूयोभूय प्रवृत्तौ । एकस्मिन्विषयेचित्तस्थैर्ये । मनस्कारे ॥ आभोजनम् आभोग । भुजेर्भावे घञ् । चित्तस्य आभोगस्तदेकप्रवणता आभोगपरत्वमितियावत् ॥

चित्ति । स्त्री । प्रज्ञायाम् ॥

चित्तैकाग्र्यम् । न । अन्यार्थनिवृत्तौ ॥

चित्तोक्ति । स्त्री । दैवप्रश्ने ॥

चित्तोत्थम् । न । सप्तमगृहे ॥

चित्तोन्नति । स्त्री । गर्व्वे ॥

चित्प्रतिविम्ब । पु । जीवे ॥ चित' प्रतिविम्ब ॥

चित्य । पु । अग्नौ ॥ चीयतेऽसाविच्यर्थे चित्याग्निचित्येचेति चिनोते' कर्मणि यप्रत्ययस्तु गागमश्च निपात्यते ॥ न । चितायाम् । मृतकचैत्ये ॥ जिनौकसि ॥

चित्या । स्त्री । मृतचितौ । चितायाम् ॥ टाप् ॥

चित्र । पु । यमविशेषे ॥ यथा । वृकोदराय चित्रायेति ॥ कर्व्वुरवर्णे ॥ अशोकवृक्षे ॥ चित्रकवृक्षे ॥ एरण्डवृक्षे ॥ न । तिलके ॥ आलेख्ये । मूरत इतिभाषा ॥ अद्भुते ॥ कर्व्वुरे । नानावर्णे ॥ आकाशे ॥ न । अलङ्कारविशेषे ॥ यथा । तच्चित्र यत्रवर्णानां खड्गाद्याकृतिहेतुता । सन्निवेशविशेषेण यत्र न्यस्ता वर्णा खड्गमुरजपद्माद्याकारमुल्लासयन्ति तच्चित्रकाव्यम् ॥ कष्टकाव्यमेतत् ॥ * ॥ अष्टिसप्तकषोडशाद्यक्षरायावृत्तौ ॥ यथा । चित्रसप्तमीरितसमानिकापदद्वयन्तु । यथा । विद्रुमारुणाधरोष्ठशोभिवेणुवाद्यहृष्टवल्लवीजनाङ्गसङ्गजातमुग्धकण्टकाङ्ग । त्वासदैववासुदेवपुण्यलभ्यपादसेववन्यपुष्यचित्रकेश त्वाश्वरामिगोपवेशइति ॥ चित्तचायते दुःखविस्मारकत्वात् । चैङ् पालने । आतोऽनुपसर्गेक ॥ चित्रयति वा चित्रचित्री करणे । ण्यन्तात् पचाद्यच् ॥ चिनोति चीयते वा । अमिचमीतिक्त ॥ त्रि । कर्व्वुराद्भुतयुक्ते ॥

चित्रक । पु । पाठिनि । वह्निसंज्ञके ओषधौ । चीता इति भाषा ॥ चित्रक' कटुक पाके वह्निकृत् पाचनो लघु. । रूक्षोष्णो ग्रहणी कुष्ठशोथार्श. कृमिकासनुत् ॥ वातश्लेष्महरो ग्राही वातार्श श्लेष्मपित्तहृत् ॥ विचित्रं चैत्रक शाक कासमर्दविमर्दितम् । तप्ततैले सवाह्लीके प्राचित

तक्रसम्भूतम् ॥ चीता इतिभाषा प्र सिद्वे व्याघ्रविशेषे । शूरे । मृगान्तके ॥ एरण्डवृक्षे ॥ न । तिलके ॥ चित्रयति । चित्र० । कुन्शिल्पिसंज्ञयो ॥ यथा । चित्रंबुद्धिर्भायते । चैत्र० । कालात् स्वार्थेकन् ॥ चित्र करोतिवा । अन्येभ्यो ऽपीतिडः ॥

चित्रकण्ठः । पुं । कपोते ॥ ॥

चित्रकम्बलः । पुं । गलीचा इति दुली चा इतिचभाषा प्रसिद्धे कम्बल विशेषे ॥

चित्रकारः । पुं । शूद्रागर्भे विश्वकर्मैरसजाते चितेरा इतिख्याते वर्णसङ्करजातिविशेषे । चित्रकारे । रङ्गाजीवे ॥ इतिब्रह्मवैवर्त्त पुराणम्॥ चित्रकरोति । डुकृञ्० । दिवाविभा निशेतिट ॥

चित्रकर्मा । पुं । तिनिशद्रुमे ॥ त्रि । विचित्राङ्कुलकर्मणि ॥

चित्रकाय । पुं । व्याघ्रे । बाघ इतिभाषाप्रसिद्धे ॥ चीता इति भाषा प्रसिद्धे चित्रव्याघ्रे ॥ चित्रः कायो ऽस्य ॥

चित्रकारः । पुं । चित्रकरे ॥ स्थपतेरपि गान्धिर्वा चित्रकारोव्यजायतेति प्र०प्र० ॥ चित्र करोति । डुकृञ्० कर्मण्यण् ॥

चित्रकूटः । पुं । स्वनाम्ना प्रसिद्वे पर्वतविशेषे ॥

चित्रकृत् । पु । तिनिशद्रुमे ॥ चित्रकारे ॥ चित्रंकरोति । क्विप् ॥

चित्रकोल. । पुं । वाम्हनीतिख्यातेजन्तौ । ज्येष्ठ्याम् । अञ्जने । वज्रपक्षे ॥

चित्रगन्धम् । न । हरिताले ॥

चित्रगुप्त । पु । चतुर्दशयमान्तर्गतयमे ॥ यथा । वृकोदराय चित्राय चित्रगुप्ताय वैनमः इति ॥ ब्रह्मपादजे यमस्यलेखके ॥ अस्योत्पत्त्यादिरावार निर्णयसन्धादवधार्या ॥

चित्रजल्प । पुं । वाक्यविशेषे ॥ यथा । प्रेष्ठस्यसुहृदालोके गूढरोषाभिजृम्भितः । भूरिभावनयो जल्पोयस्तीव्रोत्कण्ठितान्तिमः ॥ चित्रजल्पोदशाङ्गोऽयं प्रजल्पंपरिजल्पितम् । विजल्पो ज्जल्पसंजल्पा अवजल्पो ऽभिजल्पितम् ॥ आजल्पः प्रतिजल्पश्च सुजल्पश्चेति कीर्त्तितः इत्युज्ज्वलनीलमणिः ॥

चित्रतण्डुला । स्त्री । विडङ्गे ॥ चित्रास्तण्डुलाअस्या ॥

चित्रत्वक् । पु । भूर्जवृक्षे ॥

चित्रदण्डक । पु । ओलवृक्षे ॥

चित्रदर्शनम् । न । स्मारके ॥ स्मारकं चित्रदर्शनम् ॥

चित्रदेवी । स्त्री । महेन्द्रवारुण्याम् ॥

चित्रनेत्रा । स्त्री । सारिकाविहगे ॥

चित्रपक्षः । पु । तित्तिरिपक्षिणि ॥ चित्तिरोषाइतिख्याते पाण्डुसंज्ञकेखगे ॥ चित्रपक्ष.कफहरो वातघ्नो ग्रहणीप्रणुत् ॥

चित्रपट' । पु । छींट इति प्रसिद्धे वस्त्रे ॥

चित्रपत्रिका । स्त्री । द्रोणपुष्प्याम् ॥ कपित्थपर्ण्याम् ॥

चित्रपत्री । स्त्री । जलपिप्पल्याम् ॥

चित्रपदा । स्त्री । गोधापदीलतायाम् ॥ अनुष्टुप्सप्ताष्टाक्षरादृत्तिविशेषे ॥ यथा । चित्रपदा यदि भौगौ । यथा । यामुनसैकतदेशे गोपवधूजलकेलौ । कंसरिपो र्गतिलीला चित्रपदाजगदव्यात् ॥ सवैया ल्लगौ तायामपिहन्तौ । यथा । समयदा भगणा' परतो गुरुरन्तगतो लघुको जितदेश चित्रपदेति तदा युधि विविक्रमतो धृतवैरिधराधिपकेश । साकथिता धिक्रमकृष्णपिङ्गलनागवरेण्याभिनिवेश गौडकुलोज्ज्वलधारयधारय चेतसि हैयग्रवल्लभरेखेति ॥

चित्रपर्णिका । स्त्री । चित्रपर्णीप्रभेदे । त्रिपर्ण्याम् । दीर्घपत्रायाम् ॥

चित्रपर्णी । स्त्री । पृश्निपर्ण्याम् ॥ चित्रपर्णीभल्ला: । फाकफोतिगौडीय ॥ कर्णस्फोटालतायाम् ॥ जलपिप्पल्याम् ॥ द्रोणपुष्प्याम् ॥ मञ्जिष्ठायाम् ॥

चित्रपादा । स्त्री । सारिकापक्षिणि ॥

चित्रपिच्छक । पु । मयूरे ॥

चित्रपुङ्ख. । पु । शरे ॥

चित्रपुष्पी । स्त्री । अम्बष्ठायाम् ॥

चित्रपृष्ठ' । पु । कलविङ्के । चटके ॥

चित्रफल । पु । चितल इति गौडप्रसिद्धे मत्स्ये ॥

चित्रफला । स्त्री । चिर्भिटायाम् ॥ मृगेर्वारौ ॥ लिङ्गिन्याम् ॥ वार्त्ताक्याम् ॥ कण्टकार्याम् ॥ फलइमाच इतिगौड प्रसिद्धे मत्स्ये । राजग्रीवे । फलक्याम् ॥ वृहदिन्द्रवारुण्याम् ॥

चित्रभानु' । पुं । अग्नौ । वैश्वानरे ॥ सूर्ये ॥ चित्रकवृक्षे ॥ भैरवे ॥ चित्रा भानवोऽस्य । वुभ्वादित्वात् पूर्वपदादितिणत्वम् ॥ षोडशेवत्सरे ॥ अस्यफलम् । वयकामुकमाधास्वजन्यविदर्भप्रिये । मद्यार्घेजायतेवर्वे चित्रभानौ वरानने ॥

चित्रभेषजा । स्त्री । काकोदुम्बरिकायाम् ॥

चित्रमृग । पु । पृषताख्येमृगे ॥

चित्रमेखल. । पु । मयूरे ॥

चित्रयोधी । पु । अर्जुनवृक्षे ॥

चित्ररथः । पु । सूर्ये ॥ गन्धर्वविशेषे ॥

विद्याधरे ॥

चित्रलः । पु । कर्बुरवर्णे । किर्मीरे ॥ त्रि । तद्युक्ते ॥

चित्रलता । स्त्री । मञ्जिष्ठायाम् ॥

चित्रला । स्त्री । गोरक्षीवृक्षे ॥

चित्रलेखा । स्त्री । अप्सरोविशेषे । वाणासुरसुताया उषायाः सख्याम् । कुम्भाण्डतनयायाम् ॥ धृतिसप्तका ष्टादशाक्षरावृत्तिविशेषे ॥ यथा । मन्दाक्रान्ता नयरलघुयुता कीर्त्तिता चित्रलेखा ॥ यथा । अङ्केऽमुष्मिन् भ्रमति मृगदृशां सारूप्यं यदासीदाकूपेद्रजयुवतिसभा वेधसा सा व्यधायि । नैतादृक्‌चेत् कथमुदधिसुता मन्तरेणाच्युतस्य प्रीतस्थानं नयनयुगलं भूमिचित्रलेखाङ्कितायामिति ॥

चित्रलोचना । स्त्री । सारिकायाम् ॥

चित्रवल्कः । पु । पाठीनमत्स्ये ॥

चित्रवल्लिकः । पु । वदालमत्स्ये ॥

चित्रवल्ली । स्त्री । मृगेर्वारौ ॥ महेन्द्रवारुण्याम् ॥

चित्रवीर्य्यः । पु । रक्तैरण्डे ॥

चित्रशिखण्डिजः । पुं । बृहस्पतौ ॥ चित्रशिखण्डी अङ्गिराः ततो जातः । जनी॰ । पञ्चम्यामिति डः ॥

चित्रशिखण्डी । पु । सप्तर्षिषु ॥ यथा ॥ मरीचि रङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः । वसिष्ठश्चेति सप्तैते ज्ञेया श्चित्रशिखण्डिनः ॥ चित्रशिखण्डस्य चूडा विशेषोऽस्त्येषामिति व्युत्पत्त्या प्रत्येकं सप्तापि मरीच्यादय श्चित्रशिखण्डिनः ॥

चित्रशिखण्डिप्रसूतः । पु । बृहस्पतौ ॥

चित्रसर्पः । पु । मालुधाने ॥

चित्रसेनः । पुं । ब्रह्मपादजमसीशाख्य कायस्थस्य चित्रगुप्तादिपितयागणित मूर्त्तिविशेषे ॥ अयञ्च मनुष्यलोकस्य विवेचकः । यथा । चित्रसेने सखा पिता भगवेतिगुरोर्मयम् । अस्मात् सन्तोष्य पुत्रादीन् याचित्वा प्राप्य मर्त्त्यं स ॥ राज्यं चकार हृष्टचित्तः त्वाक्रान्दमधोगयः ॥ इत्याचारनिर्णय तन्त्रम् ॥

चित्रा । स्त्री । आखुपर्ण्याम् ॥ गोडुम्बायाम् ॥ सुभद्रायाम् ॥ दन्तिकायाम् ॥ मायायाम् ॥ सर्पविशेषे ॥ नदीविशेषे ॥ अप्सरोविशेषे ॥ मृगेर्वारौ ॥ मत्कुणायाम् ॥ मूषिकपर्ण्याम् ॥ मञ्जिष्ठायाम् ॥ वैदिककर्मविशेषे ॥ चतुर्दशे नक्षत्रे ॥ अथ जातफलम् । यथा । प्रतापसन्तापितशत्रुपक्षो दक्षो नये चापि विचित्रवासाः । प्रसूतिकाले यदि यस्य चित्रा बुद्धिर्विचित्रा खलु तस्य भाषे ॥

था तथा । चिदाकाशस्य नोदानिमेवाकाश इतिस्थितिः ॥ चित्ताकाश चिदाकाश माकाशञ्च तृतीयकम् । द्वाभ्यां शून्यतरं विद्धिचिदाकाशं महामुने ॥

चिदात्मक. । चि । निर्विशेषस्फुरणमात्रस्वरूपे चिदद्वैते ॥ बाध्यते जाग्रति स्वप्नः सुप्ते जाग्रच्च बाध्यते । चिदद्वैतन्तु न क्वापि बाध्यते वास्तवत्वतः ॥ चितो न बाधकं द्वैत चित्प्रसादेन भासनात् । अबाध्यत्वाद्वास्तवत्व चिदद्वैतस्य सुस्थितम् ॥

चिदाभासः । पुं । बुद्ध्यावात्मप्रतिबिम्बे । जीवे ॥ येोहिचराचरात्मकेषु शरीरजातेषु निष्यसन्निहित । चिदाभाससेस ॥

चिद्रसपूर्णः । चि । स्फुरत्सुखपूरिते ॥

चिद्रूप' । चि । ज्ञानमये ॥ हृदयालौ ॥

चिन्तनम् । न । कर्त्तव्याकर्त्तव्यचिन्तायाम् ॥ विचारे ॥ चितिसंमृत्याम् । ल्युट् । अन् ॥ स्मरणे ॥

चिन्तयन् । चि । ध्यायति ॥

चिन्ता । स्त्री । आध्याने । चिन्तने । स्मृत्याम् ॥ आत्मीययोगक्षेमापायालोचनात्मिकायांवृत्ती ॥ दर्शनसम्भोगयोः प्रकारभावनायाम् ॥ चिताचिन्तादृयोर्मध्ये चिन्तानामगरी यसि । चिताद्हति निर्जीवसजीवो दह्यतेऽनया ॥ चिन्तनम् । चिति० । चितिपूजीत्यङ् ॥ चिन्त्यतेऽनया वा ॥ कुतआगत्य घटते विघ्न ऋप्र दातिच । इतिचिन्ता न कर्त्तव्या धनस्य च धनस्य च ॥

चिन्तामणि' । पु । वाञ्छितप्रदे मणिविशेषे ॥ तस्मिन् यद्यच्चिन्त्यते तत्तच्चिन्तोपाधिकमेवावभासते न स्वरूपतस्तथा ॥ स्यमन्तको ॥ यथाचिन्तामणि स्पृष्ट्वा लोकं काम्यमतां भजेत् ॥ ब्रह्मणि ॥ आयुरारोग्यमैश्वर्यभोगांश्चैवानुषङ्गिकान् । ददाति ध्यायतां नित्यसर्वकामप्रदो हरिः ॥ मन्त्रविशेषे ॥ यात्रायोगान्तरे ॥ सहजस्थानगोभौमो भाग्यस्थश्चगुरुश्च स्मृति' । चिन्तामणि समाख्योयं त्वासु सङ्कल्पपूरक ॥ बुद्धविशेषे ॥

चिन्तावेश्म । न । मन्त्रणागृहे । दा-वेंटे ॥

चिन्तित । चि । कृतचिन्तने । मनसा विचारिते ॥ यथा । यच्चिन्तितं तदिह दूरतरं प्रयाति यच्चेतसानगणितं तदिहाभ्युपैति । प्रातर्भवामि वसुधाधिपचक्रवर्त्ती सोऽहव्रजामि-विपिने जटिलस्तपस्वीति ॥

चिन्तिया । स्त्री । चिन्तायाम् ॥

चिन्तोक्ति । स्त्री । चिन्तावचने ॥

चिन्त्य । त्रि । निरूपणीये । चिन्तितु मर्ह्य । विचारणीये ॥

चिन्त्यमान । त्रि । विचार्यमाणे ॥

चिन्न । पु । चीणाद्दृतिख्याते ऽन्नविशेषे ॥ इतिशब्दचन्द्रिका ॥

चिन्मय । त्रि । चैतन्यरूपे ॥ चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः । उपासकानां कार्यार्थं ब्रह्मणोरूपकल्पना । रूपस्थानां देवतानां स्त्री पुंसादिककल्पना ॥

चिपिट । पु । चिउरा इति प्रसिद्धे-खाद्यभेदे । पृथुके । धान्यचमसे ॥ शालय सतुषा आर्द्रा भृष्टा अस्फुटिता स्तत' । कुट्टिता श्चिपिटा प्रोक्तास्तेस्मृता पृथुका अपि ॥ शालयोयावनालाद्याश्चिपिटा पुष्टिवर्द्धना इतिच ॥ अशुभचयविधिनिषेधौ यथा । द्वि' स्विन्नमन्नं पृथुकं गुडं देशविशेषके । नात्यन्तमस्त विप्राणां भक्षणे च निवेदने ॥ अभक्ष्य तदतीनाञ्च विधवाब्रह्मचारिणामिति ब्रह्मवैवर्त्तपुराणम् ॥ आर्द्रसत्याम्यौषे ॥ त्रि । पिट्टितविस्तृते ॥ पिच्चटे ॥ नासिकायानते ॥ इनच्पिटच् चिकचिचेति पिटच् प्रत्यय प्रकृतेश्चिरादेश' ॥

चिपिटक' । पु । चिपिटे । पृथुके ॥

चिपिटमिव । सज्ञायाम् इवेतिवा कन् ॥

चिपिटा । स्त्री । गुण्डासिनीतृणे ॥

चिप्प । पुं । क्षुद्ररोगविशेषे ॥ यथा । नखमांस मधिष्ठाय वात.पित्तञ्च देहिनाम् । कुर्वीत दाहपाकौ च तत व्याधिं चिप्प मादिशेदिति ॥

चिमि । पु । शुकखगे ॥ पट्टवृक्षे ॥

चिमिक । पु । शुकपक्षिणि ॥

चिमिचिम । पु । अशोऽव्यथाविशेषे ॥ कण्डूविशेषे । स्पर्शप्रियतायाम् ॥

चिरम् । न । स्वरादि (। ऽ)चिकले ॥ दीर्घकाले ॥ त्रि । तद्वति ॥

चिरकारी । त्रि । चिरक्रिये ॥

चिरकाल । पु । दीर्घकाले । दीर्घराघे ॥

चिरक्रिय । त्रि । दीर्घसूत्रे । अतिविलम्बेन क्रियासम्पादके ॥ चिराक्रिया यस्य ॥

चिरजीवक । पु । जीवकद्रुमे ॥

चिरजीवी । पु । काके ॥ विष्णौ ॥ जीवकवृक्षे ॥ शाल्मलितरौ ॥ अश्वत्थामादिषु ॥ अश्वत्थामा बलि र्व्यासो हनूमांश्च विभीषण. । कृप परशुरामश्च सप्तैते चिरजीविन ॥ त्रि । बहुकालजीविनि ॥

चिरञ्जीवी । पु । विष्णौ ॥ काके ॥ जी

वर्ष इ० ॥ प्राप्तमिश्र० ॥ त्रि । चि
रजीविनि ॥

चिरण्टः । पु । यौवने ॥

चिरण्टी । स्त्री । प्राप्तयौवनायांपितृगे
हस्थायाम् । सुवासिन्याम् ॥ चिरे
ण अटति पितृगेहाद्भर्तृगेहम् । अट
गतौ । अच् । पृषोदरादि । वयस्य
चरमइतिङीप् ॥ तरुण्याम् । त्रि
तीयवयःस्थायाम् ॥

चिरतिक्तः । पुं । चिरायता इतिप्रसि
द्धे भूनिम्बे । किराततिक्ते ॥

चिरन्तनः । त्रि । पुरातने । चिरन्तने ॥
चिरेभवः । चिरशब्दात्परात्त्निप्रत्ययो
वक्तव्य ॥

चिरन्तनः । त्रि । पुरातने ॥ चिरेभवे
। सायंचिरमितिट्युट्युलौ । निपात
नान्मान्तत्वम् ॥

चिरपाकी । पु । कपित्थे ॥

चिरपुष्प । पु । वकुलाऽऽगमे ॥

चिरप्रसूता । स्त्री । बष्कयिण्याम् ॥ चि
रप्रसूता । सुप्सुपेतिसमास ॥

चिरम् । अ । बहुकालार्थे । चिराय ॥

चिरमेही । पु । गर्दभे ॥

चिरमेधः । पु । चिह्ने ॥

चिररात्रम् । न । दीर्घकाले ॥

चिररात्राय । अ । दीर्घकाले ॥ चिरा
रात्राय । अव्ययप्रत्ययमेतत्यमाजिति

योगविभागादच् । चिररात्रात्प्रथ
ते । अय० । कर्मव्ययम् ॥

चिरलोकपितर । पुं भूम्नि । अग्निष्वात्ता
दिषु ॥ अग्निष्वात्तादयोलोकेपितर
श्चिरवासिन' ॥

चिरविल्वः । पु । करञ्जवृक्षे ॥ चिरं
विलति । विलभेदने । बाहुलका
द्व. ॥

चिरसूता । स्त्री । बष्कयिण्याम् ॥

चिरसूतिका । स्त्री । बष्कयिण्याम् ॥

चिरस्य । अ । दीर्घकाले ॥ चिरमस्य
ति । असु० । ण्यत् । संज्ञापूर्वकत्वा
द्वृद्ध्यभावः । श० ॥

चिरा । स्त्री । बहुकालसाध्यायाम् ॥

चिराटिका । स्त्री । श्वेतपुनर्नवायाम् ॥
पातासी इतिगौडभाषाप्रसिद्धघटि
कायाम् ॥

चिरात् । अ । दीर्घकाले ॥

चिरात् । पु । गरुडे ॥

चिरातिक्त' । पु । चिरतिक्ते ॥

चिराय । अ । दीर्घकाले ॥ चिरमय
ते । अय० । कर्मव्ययम् ॥

चिरायुः । पु । विबुधे । देवतायाम् ॥
त्रि । चिरजीविनि ॥ चिरमायुर्यस्य
॥ भवति यदि मनुष्यो गुर्वधीनश्चिर
रायुरित्यागम ॥

चिरायय । पुं । खड्गादि (।ऽ) त्रिकर्षे ॥

चिरिः । पु । तोता इतिप्रसिद्धे शुक पक्षिणि ॥

चिरेण । अ । चिरमित्यर्थे ॥

चिर्भटी । स्त्री । कर्कट्याम् ॥

चिर्भिट । पु । न । कर्कटी सदृशे । चेलसेंध इतिसैंधकाचरी इतिचभाषा प्रसिद्धाया सुचिभायाम् ॥ चिर्भिटम धुरं रूक्षगुरु पित्तकफापहम् अनुष्णा ग्राहि विष्टम्भि पक्वतूष्णम्पित्तलम् ॥

चिर्भिटा । स्त्री । चिभड इति भाषा प्रसिद्धे चिर्भिटे ॥

चिलमिलिका । स्त्री । कण्ठीभेदे ॥ खद्योते ॥ विद्युति ॥

चिलमीलिका । स्त्री । चिलमिलिकार्थे ॥

चिलिचिमः । पु । वालियामछक इति गौडभाषाप्रसिद्धे मत्स्ये । नलमीने ॥ चिलविलसने । इगुपधात् कि दिति कः । वीप्सायाद्वित्वम् । चिलिचिलि विलास मिमीते । माङ्माने । आतइतिकः । पृषोदरादि ॥ चिलिविलासचिनोतिवा । चिञ्० । वाहुलकान् मक् ॥ चेल्ली इतिगौडप्रसिद्धे मत्स्ये ॥

चिलिचिलि । पु । विलासे ॥

चिलिचीम । पु । } वालियामछक

चिलिचीमि । पु । } इतिगौडप्रसिद्धे चिलिचिमे ॥

चिलिमिलिका । स्त्री । चिलमिलिकार्थे ॥

चिलिमीनक । पु । चिलिचिमेमत्स्ये ॥

चिलिमीलिका । स्त्री । चिलमिलिकार्थे ॥

चिलीचिम । पु । } नलमीने । चि

चिलीचिमि । पु । } लिचिमे ॥

चिलीम । पु । }

चिल्ल । पु । आतायिनि । खभ्रान्तौ । चील इति भाषा ॥ चिल्लति । चिल्ल शैथिल्ये भावकरणेच । अच् ॥ क्लि न्नेचे ॥ चि । क्लिन्नेत्रवति ॥ क्लि न्नेचक्षुषी अस्य । क्लिन्नस्य चिल्पि ल् लश्चास्य चक्षुषीति चिलादेशो लश्च प्रत्यय । चक्षुर्गत क्लेदरोग चिल्लशब्दवाच्य । तद्योगाच्चक्षुस्तद्यो गात् पुरुषोपीतिव्याख्यातार ॥

चिल्लक । पु । लोध्रे ॥

चिल्लभक्ष्या । स्त्री । कट्टविलासिन्याम् ॥

चिल्लाभ । पु । प्रसह्यचौरे । गाठकटा लुटेरा पिंडार जूवाचोर इत्यादि भाषा ॥

चिल्लि । पु । भ्रूमध्ये ॥

चिल्ली । स्त्री । क्षुद्रवास्तुकशाके । गौ डवास्तुके । बथुआ इति प्रसिद्धे शा के ॥ लोध्रे ॥ झिल्ल्याम् ॥ चिल्लति । चिल्लशैथिल्ये । अच् । गौ० ङीष ॥

चिविल्लिका । स्त्री । क्षुद्रक्षुपविशेषे । रक्तदलायाम् ॥

चिबु । पु । चिबुके । ओष्ठाधोभागे । ठोडि इति भाषा ॥ चीवति । चीव्यते वा । चीवआदानसंवरणयोः । मृगय्वादित्वात् कु ॥ चिनोतिशोभां वा । प्राग्वत् ॥

चिबुकम् । न । चिबौ ॥ स्वार्थेकन् ॥ पु । मुचुकुन्दवृक्षे ॥

चिह्नम् । न । लाञ्छने । लक्ष्मणि ॥ पताकायाम् ॥ चह्यतेऽनेन । चहपरिकल्कने । बा०नक् उपधाया इत्त्वञ्च ॥ लघ्वादि (।ऽ) त्रिकले ॥

चिह्नकारी । त्रि । घोरदर्शने ॥ विघातिनि ॥

चिह्नधारिणी । स्त्री । श्यामालतायाम् ॥

चिह्नित. । त्रि । अङ्किते । चिह्नविशिष्टे ॥

चिल्ल. । पु । }
चिल्लक । पु । } गंधारी इति पर्वतप्रसिद्धे वृक्षे ॥ चिल्लकोवातनिर्हारी श्लेष्मशोथातुष्टिकृत् । आग्नेयो विषवक्त्रफलमत्स्यनिषूदनम् ॥

चीडा । स्त्री । चीडागन्ध इति गौडप्रसिद्धगन्धद्रव्ये । दारुगन्धायाम् ॥

चीत्कार । पु । भयध्वनौ ॥

चीनः । पुं । देशविशेषे ॥ यथा । काश्मीरन्तु समारभ्य कामरूपात्तु पश्चिमे । भोटान्तदेशो देवेशि मानसेशाद्दक्षिणे ॥ मानसेशादुत्तरपूर्वे चीनदेशः प्रकीर्त्तित इति तन्त्रशास्त्रम् ॥ तद्देशजे मनुष्ये । चीनदेशोद्भवे पूर्वं क्षत्रिये पश्चाच्छिन्नक्रियालोपादिना शूद्रत्वमापन्ने दस्युपदवाच्ये ॥ आगमोक्ते सम्प्रदायविशेषे ॥ अंशुकविशेषे । मखमल इत्याधुनिकभाषाप्रसिद्धे बहुविधाङ्कितवस्त्रे ॥ चीणा इतिप्रसिद्धे व्रीहिविशेषे ॥ चीनकः कङ्गुभेदोऽस्ति स ज्ञेयः कङ्गुवद्गुणे ॥ तन्तौ ॥ मृगविशेषे ॥ न । पताकायाम् ॥ सीसके ॥ चिनोति । चिञ्० । बाहुलकान्नक् दीर्घश्च ॥

चीनक । पुं । चीणा इति प्रसिद्धधान्ये । काककङ्गौ ॥ कङ्गुन्याम् ॥ चीनकर्पूरे ॥

चीनकर्पूरः । पुं । चीनाकपूर इति भाषाप्रसिद्धे कर्पूरविशेषे । कृत्रिमे । मेघसारे । धवले ॥

चीनजम् । न । तीक्ष्णलौहे ॥

चीनपिष्टम । न । सिन्दूरे ॥ चीनस्य पिष्टम् ॥ सीसके ॥

चीनवङ्गम् । न । सीसके ॥

चीनाक । पुं । चीनिआकपूर इति प्रसिद्धे कर्पूरविशेषे ॥ चीनाकसंज्ञ

कर्पूर कफक्षयकर स्मृत । कुष्ठक
ण्डूविषहर स्तथा तिक्तरसस्मृत ॥

चीनाकर्कटी । स्त्री । चित्रकूटदेशप्र-
सिद्धायां कर्कव्याम् । राजकर्कव्याम् ॥

चीरम् । न । गोस्तने ॥ वस्त्रविशेषे ॥
रेखाभेदे ॥ लेखनभेदे ॥ चूडायाम्
॥ सीसके ॥ जीर्णवस्त्रखण्डे ॥ ची
राणि किं पथि न सन्ति दिशन्ति
भिक्षामिति भागवतम् ॥ इत्यस्य
चि ॥ चिनोति । चिञ्० । शुसिचि
मीनां दीर्घश्चेतिक्रन् ॥

चीरक । पु । विक्रियालेखे । विकार
लेखने ॥

चीरपत्रिका । स्त्री । चञ्चुशाके ॥

चीरपर्ण । पु । शालवृक्षे ॥

चीरभृत् । पु । तापसे ॥

चीरि । स्त्री । नेत्राशुके ॥ इतिशब्द
रत्नावली ॥

चीरिका । स्त्री । झिल्ल्याम् । कच्छा
याम् ॥

चीरितच्छदा । स्त्री । पालङ्क्यशाके ॥

चीरी । स्त्री । झिल्ल्याम् ॥ कच्छाटि
कायाम् ॥ नेत्राशुके ॥ गौ० ङीष् ॥

चीरुकम् । क्ली । चेंउर इति गौड प्र-
सिद्धे फले ॥

चीरुका । स्त्री । झिल्ल्याम् ॥ चीति
रौति । रुशब्दे । बाहुलकात् कक ॥

चीर्ण । त्रि । शीलिते ॥ सञ्चिते ॥

चीर्णपर्ण । पु । निम्बागमे ॥ खर्जूरी
भूरुहे ॥

चीलिका । स्त्री । झिल्ल्याम् । चीर्याम्
। चीलिकायाम् । चील्याम् ॥

चीवरम् । न । भिक्षोर्वस्त्रे ॥ चिनोति
। चिञ् चयने । छित्वरच्छत्वरधीव
रेत्यादिनाष्वरच् धातोर्दीर्घश्च ॥

चीवरी । पु । बुद्धभिक्षुके ॥ मत्वर्थी
यइनि ॥

चुक्कार । पु । सिंहनादे ॥

चुक्र । पु । अम्ले ॥ अम्लवेतसे ॥ न ।
चूकइति प्रसिद्धे अम्लद्रव्यविशेषे ।
तिन्तिडीके । वृक्षाम्ले ॥ चूका इति
प्रसिद्धे पत्रशाके । अम्लवास्तुके । वृ
क्षाम्ले ॥ चुक्र मत्यम्ल मुष्णञ्च दी
पनपाचनं परम् । शूलगुल्मविबन्धा
मवातश्लेष्महरम् परम् ॥ वमितृष्णा
स्यवैरस्यहृत् पीडावह्निमान्द्यहृत् ॥
काञ्जिकप्रभेदे । रसाम्ले । सहस्रवे
धे ॥ सन्धानविशेषे ॥ यथा । यन्म
स्त्वादिशुचौ भाण्डे सगुडक्षौद्रका
ञ्जिकम् । धान्यराशौ त्रिरात्रस्थशु
क्तं चुक्रं तदुच्यते ॥ द्विगुणं गुडमध्वा
रनालमस्तुक्रमाद्बहेति परिभाषा
॥ चकतेऽनेन चक्यतेवा । चक
तृप्तौ प्रतिघातेच । चक्रिरम्योरुच्चो

पधाया इतिरक् ॥

चुक्रकम् । न । चूका इतिप्रसिद्धे शाके ॥

चुक्रफलम् । न । वृक्षाम्ले ॥

चुक्रवास्तूकम् । न । चुक्रे । चूका इति भाषा ॥

चुक्रशाकम् । न । शाकविशेषे ॥ चुक्रशाकमतिकोमलशिलापेषित कटुकतैल सयुतम् । सैन्धवैलमरिचान्वित पुनर्मोक्तुरेव रसनारसमयेत् ॥ चुक्रां चुक्रतरं स्वादु वातघ्न पित्तकृत् सरम् । रुच्यं लघुतरं पाकेसद्दन्ताक सुरोचकम् ॥

चुक्रा । स्त्री । चाङ्गेर्याम् । अम्लोणी इति भाषा ॥

चुक्राम्लम् । न । वृक्षाम्ले ॥

चुक्राम्ला । स्त्री । चाङ्गेर्याम् ॥ चिञ्चायाम् ॥ काञ्जिकप्रभेदे ॥

चुक्रिका । स्त्री । चाङ्गेर्याम् ॥ तिन्तिड्याम् ॥ चकयति । चकव्यथने । चकिद्म्योरुच्चोपधाया इति रक् । चुक्रमिव । इवेप्रतिकृता विति कन् ॥ क्षुचाङ्गेर्याम् ॥

चुक्री । स्त्री । चाङ्गेर्याम् ॥ चुक्रिकायाम् । चूका इतिभाषा ॥ चुक्रीत्वम्लतरा स्वाद्वी वातघ्नी कफपित्तकृत । रुच्या लघुतरापाकेदन्ताके नातिरोचनी ॥ गौरादित्वान्ङीष् ॥

चुचुक । पु । न । चूचुके । कुचानने ॥

चुचू । पु । सुनिषण्णकशाके ॥

चुञ्चु । पु । ब्राह्मणेन वैदेह्ययोषाया मुत्पादिते सङ्करजातौ ॥ मेदान्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनम् ॥ छुच्छुन्दर्याम् ॥

चुञ्चुरी । स्त्री । तिन्तिडीबीजैर्द्युते ॥

चुञ्चुली । स्त्री । चुञ्चुरीक्रीडायाम् । तिन्तिडीकास्थिभिर्द्यूतक्रीडायाम् ॥

चुटा । स्त्री । } कूपे ॥ कूपसमीपाऽ
चुटी । स्त्री । } ल्पजलाशये ॥

चुत । पु । } गुदद्वारे ॥
चुति । स्त्री । }

चुन्दी । स्त्री । कुट्टन्याम् ॥

चुप्प । त्रि । मन्दगमनकर्त्तरि ॥ चोपति । चुपमन्दायांगतौ । चुप. क्विवेतिदृशपादौस्यपाठात् प ॥

चुबम् । न । मुखे ॥ चुम्बति । चुविवक्त्रसंयोगे । स्फायितञ्चीतिरक् ॥

चुम्बक । पु । स्वनत प्रसिद्धे अयस्कान्ते । लोहकर्षके । कान्तपाषाणे ॥ चुम्बको लेखन शीतो मेदोविषगरापह ॥ घटस्योद्वीवलम्बने ॥ त्रि । बहुग्रन्थैकदेशज्ञे ॥ कामुके । चुम्बनपरे ॥ धूर्ते ॥

चुम्बनम् । न । चूबना इतिप्रसिद्धे मुखसंयोगे ॥ तस्य स्थानानि यथा ।

मुखे स्तने ललाटे च कण्ठे च नेत्रयो रपि । गण्डेष कर्णयोश्चैव कक्षोरु भगमूर्द्धसु ॥ चुम्बनस्थान मित्युक्त विज्ञेय कामुकैरिहेतिकामशास्त्रम्॥

चुरा । स्त्री । चौर्य्ये ॥

चुरी । स्त्री । उपकूपे । कूपसमीपस्था ल्पजलाधारे । खेल इति भाषा ॥

चुलिआला । स्त्री । मात्रावृत्तप्रभेदे ॥ दोहादलशेषे यदा पञ्चकलो वि भवोपिविराजति । फणिपतिजल्पति किलतदा चुलिआलामिह ता मनुगायति ॥ यथा । स्मितपटुकपटविलोकितै रपहृतमानसपङ्कजलोचन । दृष्टिपथेभवितासिमम गोपवधूजनशोकविमोचनेति ॥

चुलुक । पु । घनपङ्के ॥प्रसृतौ ॥ भाण्डप्रभेदे ॥ न । मात्रमज्जनजले ॥

चुलुकी । पु । शिशुमाराकृतिमत्स्ये ॥

चुलुम्प । पु । बाललालने ॥

चुलुम्पा । स्त्री । छाग्याम् ॥

चुलुम्पी । स्त्री । शिशुमाराकृति मत्स्ये ॥

चुल्ल । पु । क्लिन्ननेत्रे ॥ त्रि । तद्युक्ते॥ क्लिन्ने चक्षुषी अस्य । चुल्चेति क्लिन्नस्य चुलादेशो लश्च प्रत्ययः । चक्षुर्गत क्लेदरोगश्चुल्लशब्दवाच्यः । तद्योगाच्चक्षुस्तद्योगात् पुरुषोपीति

व्याख्यातारः ॥

चुल्लकी । स्त्री । शिशुमारे ॥ कुण्डीभेदे ॥ कुलान्तरे ॥

चुल्लि । स्त्री । चल्हा इति प्रसिद्ध पाकार्थमग्निस्थाने । अग्निमन्थे । उद्ध्माने ॥ चितायाम् ॥ चुल्यते ऽत्र । चुल्ल भावकरणे । इन् ॥ चुग्रते ऽग्निर्वा । चुदप्रेरणे। वाहुलकात् लिक्॥

चुल्ली । स्त्री । चितायाम् ॥ उद्ध्माने । चल्हा इतिभाषा । कृदिकारादिति ङीष् ॥

चुस्त । पु । न । वृक्षे । मांसपिण्डकविशेषे ॥ स्थालीभृष्टमांसे ॥ पनसादिफलस्यासारभागे ॥

चूचुकम् । न । कुचाग्र । कुचानने । स्तनवृन्ते ॥ चूष्यते । चूषपाने । बाहुलकादुक । पृषोदरादित्वात् षस्य च । चूचुइत्यव्यक्त कायति पीयमानम् । अन्येभ्योपीतिड ॥

चूडक । पु । कूपे ॥ इति त्रिकाण्डशेष ॥

चूडा । स्त्री । बडभ्याम् ॥ शिखायाम् । जुटिकायाम् ॥ बाहुभूषणे ॥ अग्रे ॥ भूषणमात्रे । शिर शिख भूषणेषु चूडेतियादव ॥ मयूरशिखायाम् ॥ कूपे ॥ दशसंस्कारान्तर्गतसस्कारविशेषे ॥ लभ्वादि (।ऽ) चिकले ॥ चू

श्यते। चुडसमुच्छ्राये। भिदादित्वा दङ्दीर्घश्च॥ यद्वा। चुयते। चुट॰ । भिदादित्वादङ् डत्वदीर्घत्वञ्च निपातनात्॥

चूडाकर्म्म। पु। दशसंस्कारान्तर्गतसंस्कारविशेषे। चौले। चूडाकरणे॥

चूडामणि। पु। शिरोरत्ने॥ काकचिञ्चाफले॥ चूडायामणि॥ उपरागविशेषे॥ यथा। सूर्य्यवारे रवेर्ग्रासः सोमवारे विधोर्ग्रहः। चूडामणिरिति ख्यातस्तत्रानन्तफलं लभेदिति॥

चूडाम्लम्। न। इत्वाम्ले॥

चूडालम्। न। मस्तके॥ त्रि। चूडायुक्ते॥ चूडाऽस्यास्ति। प्राणिस्थाद्वातोलजन्यतरस्याम्॥

चूडाला। स्त्री। उच्चटायाम्॥ श्वेतगुञ्जायाम्॥ नागरमुस्तायाम्॥ लजन्तात्टाप्॥

चूडावान्। त्रि। चूडायुक्ते॥ पक्षेमतुप्॥

चूत। पु। आम्रवृक्षे। रसाले॥ चोष्यतेऽसौ। चूषपाने। क्त। पृषोदरादि॥ च्योततिरसमितिवा। च्युतिर्क्षरणे। अच्॥ गुह्यद्वारे॥

चूतक। पु। आम्रे॥ कूपके॥

चूर्ण। पु न। सम्पेषणेन जातेरजसि। चूरण चूर्ण चून चूर इत्यादिभाषा प्रसिद्धे। चोदे॥ तत्तत्पचाद्दि यथा। अत्यन्तशुष्कं यद्द्रव्यं सुपिष्टं वस्त्रगालितम्। तत्स्याच्चूर्णं रजः क्षोदस्तन्मात्राकर्षसम्मिता॥ चूर्णेगुडः समो देयः शर्करा द्विगुणा मता। चूर्णन्तु भर्जितं हिङ्गु देयं नोत्क्लेदकृद्भवेत्॥ लिह्येच्चूर्णं द्रवैः सर्वैः घृताद्यैर्द्विगुणोन्मितैः। पिबेच्चतुर्गुणैरेव चूर्णमालोडितं द्रवैः॥ चूर्णावलेहगुटिकाकल्कानामनुपानकम्। पित्तवातकफातङ्के त्रिद्व्येकपल मात्रेदिति भावमिश्रः॥ चूर्णौषधस्यपूर्वं वीर्यं पक्षनवपर्यन्तं तिष्ठति॥ धूलौ॥ चूना इति प्रसिद्धे क्षार विशेषे॥ चूर्ण्यते। चूर्णपेषणे। चु॰। अच्॥

चूर्णक। पु। सक्तुषु॥ स्वार्थेके चूर्णशब्दार्थे॥ न। गद्यभेदे॥ यथा। अपादः पदसन्तानो गद्यं तत्तु त्रिधा मतम्। चूर्णकोत्कलिका प्रायवृत्तगन्धि प्रभेदतः॥ अकठोराक्षरं स्वल्पसमासं चूर्णकं विदुः। तत्तु वैदर्भरीतिस्थं गद्यं हृद्यतरं भवेत्॥ भवदुत्कलिकाप्रायं समासाढ्यं दृढाक्षरम्। वृत्तैकदेशसम्बन्धाद्वृत्तगन्धि पुनः स्मृतम्॥ तत्र चूर्णकं यथा। सहि त्रयाणामेव जगतां गतिः परमपुरुषः पुरुषोत्तमो दृप्तदानवभरेण भङ्गुरा

ॐ धरणीमवलोक्य करुणार्द्रहृदय
तया भारमवतारयितु रामकृष्ण
स्वरूपेणांशतो यदुवंशे अवततारे
ति ॥ पु । आमलकविशेषे ॥
चूर्णकार । पु । चूनरी इति गौडभा
षाप्रसिद्धे नटकन्यायापुण्ड्रकाज्जा-
ते वर्णसङ्करजातिविशेषे ॥
चूर्णकुन्तल । पु । शिरस्थे क्षुद्रकुन्तले
। अलके ॥ चूर्णस्यकर्पूरादिचोदस्य
कुन्तल ॥
चूर्णखण्ड । पु । न । कर्करे । कङ्करइ
तिकांकर इतिचभाषा ॥
चूर्णदासी । स्त्री । पिष्टकारिण्याम् ।
पिसनहारी इतिभाषा ॥
चूर्णपारद । पु । हिङ्गुले ॥
चूर्णशाकाङ्क । पु । गौरसुवर्णशाके ॥
चूर्णा । स्त्री । वासयोगे । पटवासादि
चोदे । निवासयुक्तिषु । सुगन्धिचू
र्णे ॥ चूर्ण्यते । चूर्ण॰ ॥ घञ् ॥
चूर्णि । स्त्री । पातञ्जले महाभाष्ये ॥
कपर्दके ॥ शतसङ्ख्यककपर्दकेषु ॥
चूर्णस्यकरणम् । तत्करोतीतिणय
न्तादच्इ ॥ यद्वा । चरणं चारणवा । इ
णिपृश्निपार्ष्णिचूर्णिभूर्णि इतिसाधु ॥
चूर्णिका । स्त्री । सक्तुषु ॥
चूर्णित । त्रि । सवलिते ॥ कृत चूर्णे ॥
चूर्णी । स्त्री । महाभाष्ये ॥ कपर्दकि
शते ॥ कृदिकारादिति पक्षेङीष् ॥
चूर्णीकृत् । पु । महाभाष्यकारे । पत
ञ्जलौ ॥
चूर्णीकृत । पु । गन्धविशेषे ॥ यथा ।
गन्धचूर्णं गन्धपत्र चूर्णं सुमनसां त
था । प्रशस्तगन्धयुक्तानां पत्रचूर्णा
नियानिच ॥ तानि गन्धाह्वयानित्यु
सगन्ध प्रथम स्मृत इति ॥ त्रि । कृ
तचूर्णे ॥
चूल । पु । कपाटाद्यो भागान्तरे ॥
चूलक । पु । केशे ॥
चूला । स्त्री । गृहोपरिगृहे । चन्द्रशा
लायाम् ॥ चूडायाम् ॥
चूलिकम् । न । घृतभृष्टसमितायाम् ॥
चूलिका । स्त्री । हस्तिकर्णमूले ॥ चू-
ल्यते ऽनया । चूलसमच्छाये । स
भायामितिशब्द ॥ नाटकाङ्गे ॥
चूषा । स्त्री । कक्षायाम् । गजमध्यब
न्धनरज्ज्वाम् ॥ चूष्यते पीयते पृष्ठ
मांसेनाद्दश्यतां नीयते । चूषपाने ।
कर्मणिघञर्थेक ॥
चेकितान । पु । नृपविशेषे ॥
चेठ । पु । दासे ॥ चेटति । चिटपर
प्रेष्ये । अच् ॥
चेटक । पु । दासे । भृत्ये ॥ चेट्यते ।
चिट॰ । कृञादिभ्योवुन् ॥ उपपति
नायकविशेषे । सन्धानचतुरे ॥

चेटि । स्त्री । दास्याम् ॥ चेटति । चि
ट० । इन् ॥
चेटिका । स्त्री । दास्याम् ॥ स्वार्थे क ॥
करण्याम् ॥
चेटी । स्त्री । दास्याम् ॥ चेटति । चि
ट० । सर्वधातुभ्य इन् । कृदिकारादि
तिपक्षे ङीष् ॥ करण्याम् ॥
चेडिका । स्त्री । } चेटिकायाम् । दा
चेडी । स्त्री । } स्याम् ॥
चेत् । अ । यद्यर्थे । पक्षान्तरे ॥ अस
न्देहे ऽपिसन्देहवचने ॥ यथा । सम्य
चेद्गुणवाक्यमेव पितरोदेवाश्चचे
योगिनी प्रीताश्चेत् परदेवताचय-
दिचे देहः प्रमाणश्चिचेत् । आत्री
यं यदि दर्शनं भवति चेदाशाघ्नमो
चाक्षिचेत् स्वातन्त्र्या अमिकैशिका
श्चयदिचेत् स्याम् मेजय. सर्वदेति॥
चेतति । चिती संज्ञाने । विच् ॥
चेतक' । त्रि । चेतनकर्त्तरि ॥ चेतय
ति । चिती० । ण्वुल् ॥
चेतकी । स्त्री । हरीतक्याम् ॥ चिरे
ण चेतकीत्येयेतितस्याश्चयाम् ॥
चेतकी द्विविधा प्रोक्ता श्वेता कृष्णा
च वर्णतः । षडङ्गुलायता शुक्ला कृ
ष्णा चैकाङ्गुलास्मृता ॥ काचिदास्वा
दनाचेचा काचिद्गन्धेनभेदयेत् । का
चित्स्पर्शेन दृष्ट्या ऽन्या चतुर्धाभे

दयेच्छिवा ॥ चेतकीपादपच्छाया
मुपसर्पन्ति ये नराः । भिद्यन्ते तत्
क्षणादेव पशुपक्षिमृगादय ॥ चेत
कीतु धृता हस्ते यावत्तिष्ठति देहि
नः । तावद्भिद्येत वेगैस्तु प्रभावान्ना
त्रसंशय ॥ नृपादिसुकुमाराणां कृ
शानां भेषजद्विषाम् । चेतकी पर
मा शस्ता हिता सुखविरेचिनी ॥
गौरादित्वात् ङीष् ॥
चेतन । त्रि । प्राणिनि ॥ पु । मनुष्ये
॥ आत्मनि । प्राणादिप्रवर्त्तके ॥ र
थादौ नियताचेष्टा चेतनेनाऽधि
ष्ठिते । नष्टा चेतनस्तेन प्राणादी
नांप्रवर्त्तक ॥ चेतति । चिती० ।
नं० ल्यु ॥
चेतनकी । स्त्री । हरीतक्याम् ॥
चेतना । स्त्री । संविदि । धियि । बु
द्धौ ॥ स्वरूपज्ञानमभिव्यञ्जिकायां प्रमा
णासाधारणकारणिकायां चित्स्वरू
पौ ज्ञानाख्यायाम भगवतोविभूतौ
॥ चेतयतेऽनया । चितसञ्चेतने ।
चु० । ण्यासश्रन्थोयुच् । टाप् ॥ जी
वनाख्याम् ॥ चेतनाना मधिष्ठानं म
नोदेहश्चसेन्द्रिय । केशलोमनखा
ग्रान्त मलद्रवगुणैर्विना ॥
चेतनावानम् । न । सर्वशरीरे ॥ हृ
दये ॥

चेतनीया । स्त्री । ऋद्धिनामौषधौ ॥

चेतस् । न । चित्ते ॥ चितौ० । असुन् ॥ पु । चैतन्य ॥ साक्षीचेता इति श्रुते ॥

चेतोंशु । पु । जीवे ॥ चेतसश्चैतन्यस्य अंशुरिव ॥

चेतोमुख. । पु । चैतन्यदीप्ताज्ञानदृत्तिप्रधाने प्राज्ञे ॥ स्वप्नादिप्रतिबोधचेत प्रतिद्वारीभूतत्वात् । स्वप्नोजागरितत्वेति प्रतिबोधशब्दितं चेतस्तत् प्रतिद्वारभूतस्तं द्वारभावेन स्थितस्तम् नहि स्वप्नस्य जागरितस्य वा सुषुप्तद्वारमन्तरेण सम्भवोस्ति तयोस्तत्कार्यत्वात् अत सुषुप्ताभिमानी प्राज्ञ स्थानद्वयकारणत्वात् चेतोमुखव्यपदेशभागित्यर्थ ॥

चेदि । पु । देशविशेषे । चैपुरे । डाहले ॥ पुभूम्नि । तद्देशस्थे । चेदय ॥

चेदिपति. । पु । उपरिचरवसौ ॥ चेदिराजे ॥ चेदीनां देशविशेषाणां पति. ॥

चेदिराट् । पु । शिशुपाले ॥ चेदिषु राट् यस्य । सं० क्विप् ॥ यद्वा । चेदीनां राट् । अन्ये० क्विप् । इतिकेचित् । वस्तुतस्तु सत्सूद्विषेति क्विप् ॥

चेदिराज. । पु । शिशुपाले ॥ चेदीनां देशविशेषाणांराजा । टच् ॥ उपरिचरवसौ ॥

चेपी । स्त्री । रागिणीविशेषे ॥ इतिहलायुध ॥

चेयम् । त्रि । चेतव्यमाणे ॥ चेतुयोग्यम् । चिञ्० । अर्हकृत्यतृचश्चेति योग्यतायामचोयत् ॥

चेलम् । न । वस्त्रे ॥ त्रि । अधमे ॥ चिलति चिल्यते वा । चिलवसने । चेलति चेल्यते वा । चेलृगतौ । अच् । घञ्वा ॥

चेलकम् । न । चेलशब्दार्थे ॥ स्वार्थेक ॥

चेलान । पु । चेलना इति गौडप्रसिद्धे फललताविशेषे । अल्पप्रमाणके ॥

चेलाल । पु । फललताविशेषे । चिभफले । खतापनखे । मुखाशे ॥

चेलिका । स्त्री । चेलकी इति प्रसिद्धे पट्टवस्त्रे ॥ यथा । सेय कृष्णस्य वनिता पीतशाटीपरिच्छदा । रक्तचेलिकयाच्छन्ना शातकुम्भघनस्तनी । इति पाद्मेपातालखण्डम् ॥

चेली । स्त्री । अधमायाम् ॥ गौरादित्वात् ङीष ॥ चेलइतिपचादेटित्वात्ङीप्वा ॥

चेलीमः । पु । वाचियाख्यमीने ॥

चेलुक. । पु । बुद्धभिक्षुशिष्ये । श्रामणेरे ॥

चेष्टक । पु । रतिबन्धविशेषे ॥ यथा । पादमेकं हृदिन्यस्य द्वितरेणैवचेष्ट येत् । कान्त' क्रोडे स्थितांनारींबन्धो यश्चेष्टकोमत ॥ त्रि । चेष्टाकर्त्तरि ॥

चेष्टा । स्त्री । कायपरिस्पन्दनादिरूपा या क्रियायाम् । प्राणधर्मे ॥

चेष्टानाश । पु । प्रलये ॥

चेष्टितम् । न । गतौ ॥ चेष्टायाम् ॥ चरिते ॥ त्रि । चेष्टान्विते ॥

चैकितान । पु । चिकितानस्यर्षेर पत्ये ॥

चैकितानेय । पु । ब्रह्मदत्ताख्येऋषि विशेषे ॥ चिकितानस्यापत्य चैकि तान, तदपत्य युवाचैकितानेय. ॥

चैकितायन । पु । दल्भ्यगोत्रापत्य त्वात् दाल्भ्ये ऋषिविशेषे ॥ चिकि तायनस्यापत्यम् । अण् ॥

चैतन्यम् । न । चेतनायाम् ॥ ब्रह्मणि । सर्वभूतभौतिकप्रपञ्चाधिष्ठानप्रका शे ॥ चैतन्य परमाणूनां प्रधानस्या पिनेष्यते । ज्ञानक्रियेजगत्कर्त्रीं दृ ष्टेते चेतनाश्रये ॥ नेष्यते वैशेषि कै साख्यैश्चेतिशेष ॥ प्रकृतौ ॥ भा वेस्वार्थेवाष्यञ् ॥

चैत्त । पु । विज्ञानस्कन्धातिरिक्तस्क न्धाभावे ॥

चैत्य । पुं । उद्देश्यपादपे । ग्रामादि प्रसिद्धिहेतौ महावृक्षे । देवतरौ । देवावासे ॥ जिनबिम्बे ॥ जिनसभा तरौ ॥ बुद्धे । न । आयतने ॥ चि ताचिह्ने ॥ बुद्धवेश्ये ॥ जिनसभाया म् ॥ यज्ञस्थाने ॥ जनानां विश्राम स्थाने ॥ देवस्थाने ॥ चित्यामित्रि ष्वेचेतिसाधु । चित्यायाइदम् । तस्येदमित्यण् ॥

चैत्यगृहम् । न । चतुष्पथमण्डपे ॥

चैत्यद्रु । पु । अश्वत्थाऽगमे ॥ प्रख्यात वृक्षे ॥

चैत्यद्रुम । पु । अश्वत्थवृक्षे ॥ प्रसिद्ध द्रुमे ॥ ग्रामादिसमीपे ख्यातवृक्षे ॥

चैत्यमुख । पु । कमण्डलौ ॥

चैत्यवृक्ष । पु । चैत्यद्रुमे ॥

चैत्योपराग । पु । कर्तृत्वादिसर्वप्र पञ्चसम्बन्धे ॥ चैत्येनउपराग ॥

चैत्र । पु । मासविशेषे । चैत्रिके । मधौ ॥ अत्रजातस्यफलम् । सत्का मेशालो विनयो सुवेशो भोगी सु खी स्या न्मधुरान्नभोजी । सत्सङ्ग युक्ता द्विजदेवभक्तो भवेन्मनुष्योम धुमासजन्मा ॥ चैत्रीपौर्णमास्यस्मि न् । विभाषाफाल्गुनीत्यादिनापक्षे ऽण् ॥ अद्रिविशेषे ॥ चित्रागर्भजे बुधपुत्रे सप्तद्वीपाधिपतौ सुरथरा जस्यपितामहे ॥ बुद्धभिक्षुके ॥ न ।

मृते ॥ देवकुले । देउल इति गौडभाषा ॥ मृतकचैत्ये ॥

चैत्रक. । पु । मधुमासि ॥ न । चित्रकलशाकादौ ॥

चैत्ररथम् । न । कुवेरस्योद्याने ॥ मेरोः प्राच्यांयोविष्कम्भशैल स्तस्योद्याने ॥ चित्ररथेन गन्धर्वेण निर्वृत्तम् । तेननिर्वृत्तमित्यण् ॥

चैत्रावली । स्त्री । चैत्र्यापूर्णिमायाम् । मधूत्सवे । सुवसन्ते ॥

चैत्रिक । पु । चैत्रे । मधुमासि ॥ चैत्रीपौर्णमास्यस्मिन् । विभाषाफाल्गुनी श्रवणाकार्त्तिकी चैत्रीभ्यइतिपचेठञ् । ठस्येक ॥

चैत्री । स्त्री । चैत्रपूर्णिमायाम् ॥ चित्रयायुक्ता पौर्णमासी । नक्षत्रेणयुक्तः कालइत्यण् । ततोङीप् ॥

चैद्य । पु । दमघोषात्मजे । शिशुपाले ॥ चेदीनांजनपदानामयम् । वृद्धेत्कोशला जादाञ्ञ्यङ्इतिञ्यङ् ॥ पुभूम्नि । चेदिदेशोद्भवे । चेदिषु ॥

चैलम् । न । मृदुवस्त्रे ॥ चेलति चेल्यते वा । चेल्लगतौ । अच् घञ्वा । तत प्रज्ञाद्यण् ॥

चोकम् । न । हेमाह्वायामूले ॥

चोक्ष । पु । मीते ॥ त्रि । शुचौ ॥ स्वभावशुचा वरयाादिदेशे ॥ दक्षे ॥

अभीक्ष्णे ॥ मनोज्ञे । चोखा इति भाषा ॥

चोचम् । न । वल्के ॥ चर्मणि ॥ गुडत्वचि ॥ त्वक्पत्रे । तेजपातइतिभाषा ॥ प्रशस्तं चोचमस्त्यस्मिन् । अर्शआद्यच् ॥

चोटी । स्त्री । शाट्याम् ॥ इतिहे० ॥

चोड । पु । प्रावरणे ॥ कञ्चुके ॥ पुभूम्नि । देशविशेषे । चोडा' ॥

चोदक । त्रि । प्रेरके ॥ चोदयति । चुदप्रेरणे । हेतुमणिजन्तात् कर्मणि ण्वुल् ॥

चोदनम् । न । प्रेरणे ॥

चोदना । स्त्री । विधौ ॥ चोदनाचोपदेशश्च विधिश्चैकार्थवाचिन इतिभट्टोक्तिः ॥ विधिवाक्ये । क्रियाया-प्रवर्त्तकेवचने ॥ चोदनानामलिङ्लोट्तव्यदादिशब्दव्यवस्थापितविधिनिषेधरूपयजनादिक्रियाप्रवर्त्तकं वचनमभिधीयते ॥ तर्जनायाम् ॥ प्रवर्त्तनायाम् ॥ प्रेरणायाम् ॥ शब्दभावनायाम् ॥ चोद्यते प्रवर्त्त्यतेऽनयेति । युच् ॥

चोदनागुड । पु । कन्दुके ॥

चोदित । त्रि । प्रेरिते ॥

चोद्यम् । न । अद्भुते ॥ प्रश्ने ॥ पूर्वपक्षे ॥ चोद्यंवा परिहारोवा क्रियता दैतभाषया । अदैतभाषया चौद्य

नास्ति नापितदुत्तरम् ॥ त्रि । चोदनार्हे । प्रेर्ये । प्रेरणायोग्ये ॥ चोदितुयोग्यः । अर्हेकृत्यतृचश्चेति यत् ॥

चोपनम् । न । शनैर्गमने ॥ मौने ॥ चुपेर्ल्युट् ॥

चोर । पु । स्तेयकर्त्तरि । तस्करे । दस्यौ । प्रच्छन्नापहारिणि ॥ गन्धद्रव्यविशेषे ॥ कृष्णशव्याम् ॥ चोरयति । चुरस्तेये । पचाद्यच् ॥

चोरक । पु । पृक्कायाम् । ग्रन्थिपर्णभेदे । भंडिउर इति नैपालभाषा ॥

चोरघात । पु । राजा । कलिविशेषे ॥ चोरंहन्ति । हन० । कृत्यल्युटोबहुलमिन्यण् ॥

चोरपुष्पिका । स्त्री । शङ्खिन्याम् ॥ चोरपुष्प्येव । स्वार्थेकन् ॥

चोरपुष्पी । स्त्री । शङ्खिन्याम् । केशिन्याम् । सांखाहूली इतिभाषा ॥ चोरइवपुष्पमस्या रात्रिविकाशित्वात् । पाककर्णेतिङीष् ॥

चोरस्नायु । स्त्री । काकनासालतायाम् ॥

चोरा । स्त्री । चोरपुष्पयाम् ॥

चोरिका । स्त्री । चौर्य्ये ॥

चोरित । त्रि । मुषिते ॥ चोर्यतेस्म । चुर० । क्त. ॥

चोल । पु । कूर्पासके । स्त्रीणां कञ्चुलिकाख्ये आप्रपदीनकञ्चुके ॥ चोल्यते ऽनेनवा । चुलसमुच्छ्राये । घञ् घोवा ॥ चोला इति प्रसिद्धे पुंसो वस्त्रविशेषे ॥ अधुना ताञ्जोर इति प्रसिद्धे देशे । द्रविडतैलङ्गयोर्मध्ये चोलदेश प्रकीर्त्तित । लम्बकर्णाश्चते प्रोक्ता लङ्केदा ऽवान्तरे भवेत् ॥ चीनदेशस्थेहृदविशेष ॥ श्मश्रुधारिणि वेदयागानधिकारिणि म्लेच्छविशेषे । पूर्वमय क्षत्रिय आसीत् स गरोराजास्य धर्मनाश वेशान्यत्वञ्च चकार ॥ न । वसने ॥

चोलक । पु । वाणवारके । कवचे ॥ न । वल्कले ॥

चोलकी । पु । करीरे ॥ नारङ्गे ॥ किष्कुपर्वणि ॥

चोलण्डुक । पु । शिरोवेष्टे ॥

चोलनम् । न । नागरङ्गे ॥ किष्कुपर्वणि ॥ करीरे ॥

चोलहृद । पु । चीनदेशीयसरोविशेषे ॥

चोली । स्त्री । कूर्पासके । अंगिया इतिभाषा ॥ अल्पत्वेोल गौरादित्वान् ङीष् ॥

चोलोण्डुक । पु । शिरोवेष्टे । उष्णीषे ॥

चोष । पु । दाहविशेषे । पार्श्वस्थिता

म्निनेवसन्तापे ॥ चूषणेनेवपीडायाम् ॥

चोष्य । त्रि । इक्षुदण्डादौ । यद्दन्तै निष्पीड्य रसांश निगीर्या ऽवशिष्ट त्यज्यतेत चोष्यमुच्यते ॥

चोक्क । पुं । सिन्धुवारे । हयोत्तमे ॥

चौडम् । न । चूडाकरणकर्मणि ॥ चूडाप्रयोजनमस्य । चूडादिभ्यउपसङ्ख्यानमित्यण् ॥

चौक्षम् । न । जलाशयविशेषे ॥ तज्जले ॥ शिलाकीर्णं स्वयं श्वभ्रं नीलाञ्जनसमोदकम् । लतावितानसञ्छन्नं चौक्षमित्यभिधीयते ॥ चौक्षवह्निकरं नीरं रूक्षं कफहरं लघु । मधुरं पित्तनुद्रुच्यं पाचनं विशदं स्मृतम् ॥

चौपैया । स्त्री । मात्रावृत्तविशेषे ॥ यथा । चौपैयाछन्द त्रिशन्मात्र फणिपतिपिङ्गलभणितम् कुरुसततुरङ्गम मतिहृदयङ्गममन्तेगुरुमुपनीतम् । यदिदशवसुरविभिश्छन्दोविद्धि क्रियतेयतिरभिरामम् सपदिस्तवसमये नृपति कवये वितरति ससदि कामम् ॥ यथा । कालियकुलगञ्जन दुरितविभञ्जनसज्जनरञ्जनकारी गोवर्द्धनधारी गोपविहारीवृन्दावनसञ्चारी । हतदुर्ज्जयदानवपालितमानवमुदिताखण्डलपाली सङ्गतगोपालीनिधुवनशाली भवतुमुदेवनमालीति ॥

चौर । पु । पाटच्चरे । तस्करे ॥ चोरपुष्पगोपधौ ॥ सुगन्धे ॥ चोरणम् । चुरस्तेये । अप्रत्ययात् । सञ्ज्ञापूर्वकत्वान्नगुणः । चुराशीलमस्य । छत्रादिभ्योणः ॥ चोरएववा । स्वार्थिकप्रज्ञाद्यण् ॥

चौरा । स्त्री । चोरपुष्पिकायाम् ॥

चौरिका । स्त्री । चौर्य्ये ॥ चोरस्य भाव कर्मवा । मनोज्ञादित्वाद् वुञ् ॥

चौर्य्यम् । न । चौरिकायाम् । स्तैन्ये ॥ चोरस्य कर्म भावोवा । ब्राह्मणादित्वात् ष्यञ् ॥

चौलम् । न । मुण्डनकर्मणि । चूडाकरणे ॥

चौलुक्य । पु । राजर्षिविशेषे ॥ चुलुकस्य गोत्रापत्यम् । गर्गादित्वात् यञ् ॥ त्रि । चुलुकेन कृते ॥

च्यवन । पु । भार्गवे ऋषिविशेषे ॥ न । पतने ॥

च्युत । त्रि । क्षरिते । गलिते ॥ च्यूयतेस्म । च्युङ्गतौ । क्त ॥ गत्यर्थाकर्मकेतिकर्त्तरिक्तो वा ॥ त्रुटिते ॥

च्युताचार । त्रि । स्खलितव्रते ॥

च्युति । स्त्री । चरणे ॥ यथा । धैर्यच्यु

ति ॥ भगे। योनौ ॥ गुदद्वारे ॥

च्युतोपल । पु। अश्मरत्ने॥अश्मपाषाणे॥

च्युप । पु। वक्त्रे। मुखे ॥ च्यवन्ते भाषन्तेऽनेन। च्युङ्०। अनेकार्थत्वा द्भाषणे। च्युव किच्चेतिपः ॥

च्योतत्। चि। स्रोतति ॥

च्योत्न । पु। गन्तरि ॥ अखण्डे ॥ स्त्री याप्युषे। च्यवते। च्युङ्०। जनिदे च्यादिना तथा ॥

छ

••••••

छ । पु। छकारे ॥ छेदने ॥ चि। निर्मले ॥ तरले ॥ न। गृहे ॥

छग । पु। छागे। अजे ॥

छगण । पु। न। करीषे। छाणा इति भाषा ॥ इतिहेमचन्द्रः ॥

छगल । पु। छागे ॥ न। नीलवस्त्रे॥ छायते। छोछेदने। छोगुगृहस्वश्चे तिकलच् ॥

छगलक । पु। छागे ॥ स्वार्थे क ॥

छगलण्ड । पु। दक्षिणदेशे समुद्रसन्निधौ प्रचण्ड दंष्ट्रा स्थाने ॥

छगला। स्त्री। वृद्धदारकवृक्षे ॥

छगलान्त्रिका। स्त्री। वृद्धदारकभेषजे ॥ छगलस्येवान्त्रमस्याः। गौरादित्वान्ङीष्। कन्। ह्रस्व ॥

छगलान्त्री। स्त्री। वृद्धदारकवृक्षे ॥ वृक्षे ॥ छगलस्येवान्त्रमस्याः। गौरादित्वान्ङीष् ॥

छगली। स्त्री। वृद्धदारकभेषजे॥ छागमातरि ॥

छच्छिका। स्त्री। छाछ इतिप्रसिद्धे तक्रप्रभेदे ॥ छच्छिकासरन्तोन स्याद च्छा प्रचुरवारिका ॥ छच्छिका शीतला लघ्वी पित्तश्रमतृषाहरी। वातनुत् कफकृत् सातु दीपनीलव णान्विता ॥ सरश्लेष्म दधि इति सम्बन्ध ॥

छटा। स्त्री। दीप्तौ ॥ परम्परायाम्॥

छटाफल । पु। गुवाकवृक्षे ॥

छटाभा। स्त्री। विद्युति ॥

छत्र । पु। अतिच्छत्रे। मूलेनपर्णैश्च वषाकारेवृक्षे। छातारियाविष छातनाविष खरविष इतिच गौडभाषा ॥ भूतृणे ॥

छत्रम्। न। आतपत्रे। छाता इति छत्री इतिचभाषा॥ अथास्यलक्षणम्। निचितन्तु हंसपक्षैः कुकवाकुमयूरसारसानावा। दौकूलेन नवेनतु समन्ततश्छादित शुक्लम्॥ मुक्ताफलै रुपचित प्रलम्बमालाविलस्फटिकमूलम् ॥ षड्ढस्तशुद्धहैम नवपर्वन गै कदण्डन्तु ॥ दण्डार्द्धविस्तृतं तत्

समाहृतं रत्नभूषितमुदग्रम् । नृप ते सदातपत्रं कल्याणपरं विजयदं च ॥ युवराजनृपतिपत्न्योः सेनापतिदण्डनायकानाञ्च । दण्डोऽर्द्धेन च तस्य समपञ्चकृतोऽर्द्धं विस्तारः ॥ अन्येषां मुख्यानां प्रसादपट्टैर्विभूषितशिरस्कम् । व्यालम्बिरत्नमालं छत्रं कार्यन्तु मायूरम् ॥ अन्येषान्तु नराणां शीतातपवारणन्तु चतुरस्रम् । समवृत्तदण्डयुक्तं छत्रं कार्यन्तु विप्राणाम् ॥ ६ ॥ इति वाराह्यामेकसप्ततितमोऽध्यायः ॥ ७१ ॥ विशेषोयुक्तिकल्पतरौ द्रष्टव्यः ॥ छादयति छाद्यतेऽनेन वा । छद अपवारणे । गन्त । ष्ट्रन् । इस्मन्त्रन्क्विषु चेति ह्रस्वः ॥ पत्रपात्रपवित्रेत्यादिलिङ्गानुशासनात् पुंस्त्वमपि बोध्यम् ॥

छत्रक । पु । मत्स्यरङ्गखगे ॥ अतिच्छत्रे । रांगाकुलियाखडा इति गौड भाषा ॥ ईश्वरगृहविशेषे ॥ न । छत्रार्थे ॥

छत्रगुच्छ । पु । गुण्डतृणे ॥

छत्रचक्रम् । न । राज्ञां शुभाशुभज्ञानबोधके समयामृतोक्तचक्रविशेषे ॥

छत्रधर । पु । } छत्रस्य धारके । त्रा

छत्रधार । पु । } यकारे । छाताधा

रइति भाषा ॥

छत्रपत्रम् । न । स्थलपद्मे ॥ पु । भूर्जवृक्षे ॥

छत्रपुष्पक । पु । तिलकवृक्षे ॥

छत्रभङ्ग । पु । नृपक्षये । नृपनाशे ॥ स्वातन्त्र्ये ॥ वैधव्ये ॥

छत्रवृक्ष । पु । मुचुकुन्दे । पुष्पवृक्षविशेषे ॥

छत्रा । स्त्री । मधुरिकायाम् । मिश्रौ ॥ अतिच्छत्रे ॥ धान्याके ॥ शिलीन्ध्रे ॥ छत्रमस्या अस्ति । अच् । छत्राकारस्तवकत्वात् ॥ मञ्जिष्ठायाम् ॥ टाप् ॥

छत्राक । पु । जालवर्बुरकेवृक्षे ॥ न । शिलीन्ध्रे ॥

छत्राकी । स्त्री । रास्नायाम् ॥ छत्रमकति । अककुटिलायांगतौ । कर्मण्यण् ॥

छत्रातिच्छत्र । पु । छत्रातिच्छत्रायाम् । छत्रवत्तृणे । छत्राकारे जलोद्भवे सुगन्धाख्यतृणविशेषे ॥

छत्राधान्यम् । न । धन्याके ॥

छत्रिका । स्त्री । छिलीरे । शिलीन्ध्रे ॥

छत्री । त्रि । छत्रवति ॥ मत्वर्थेइनि ॥ पु । नापिते ॥

छत्त्वर । पु । गृहे ॥ कुञ्जे ॥ छादयति छद° । छित्वरछत्त्वरेत्यादिना

छदर | छन्द४

च्छरच् । ह्रस्वतकारो निपातनात् ॥
छद । पु । पत्रे । पलाशे ॥ गच्छति । पक्षे ॥ ग्रन्थिपर्णे ॥ तमालवृक्षे ॥ छद्यते ऽनेन । छद° । णिजभावे पुंसि संज्ञायामितिघ । छाद्यते ऽनेन वा । छादेर्घे इति ह्रस्व ॥
छदनम् । न । पत्रे । पर्णे ॥ पक्षे ॥ पिधाने ॥ तेजपात इति प्रसिद्धे तमालपत्रे ॥ छद्यते ऽनेन । छद° । आधृषाद्वेति णिजभावपक्षे करणेल्युट् ॥
छदपत्र. । पु । भूर्जपत्रवृक्षे ॥
छदि । पु । छदिषि । छप्पर इति छान इतिभाषाप्रसिद्धे ॥
छदि४ । स्त्री । पटले । छान इति भाषा ॥ छादयति छाद्यते ऽनेनवा । छद° । च° । अर्चिशुचीतिइसि । इस्मन्त्रिति ह्रस्व' ॥ छदि स्त्रियामेवेतिलिङ्गानुशासनसूत्रम् ॥
छद्मजित । त्रि । व्याजलब्धे ॥ छद्मना मिषेण जितो लब्ध ॥
छद्मतापस । पु । वैडालव्रतिके ॥
छद्म । न । कपटे । व्याजे । शाठ्ये ॥ अपदेशे ॥ स्वरूपाच्छादने ॥ छाद्यतेनेन । छद° च° । मनिन् । इस्मन्त्रन्क्विषु चेतिह्रस्व' ॥
छद्मिका । स्त्री । गुडूच्याम् ॥
छद्वरः । पुं । छत्वरे ॥

छन्द । पु । वशे ॥ अभिप्राये ॥ विषभेदे ॥ इच्छायाम् ॥ यथा । छन्द' काम कर्मपापं भय स्यात् कर्मणा' फलम् । अनर्थरूप वितथ मद्देसे वीक्ष्यते नहि ॥ कर्मशब्देन धर्माधर्मौ वुच्येते ॥ छन्द्यते छन्दन वा । छदि संवरणे इच्छायामपि । घञ् ॥
छन्दपर्णं । पु । मायामये संसारवृक्षे ॥ छन्दांसि छादनात् तत्त्ववस्तुप्रावरणात् संसारवृक्षरक्षणाद्वा कर्मकाण्डानि ऋग्यजुः सामलक्षणानि । तानि पर्णानीव पर्णानियस्य । यथा वृक्षस्य परिरक्षणार्थानिपर्णानि भवन्ति तथासंसारवृक्षस्य परिरक्षणार्थानि कर्मकाण्डानि । धर्माधर्मतद्धेतु फलार्थत्वात् छन्दसाम् ॥
छन्द'सुत् । पु । गरुडे । वैनतेये ॥ छन्दोभि स्तावयन्ते सोमि । छन्° क्विप्तुक् ॥
छन्द४ । न । वेदे ॥ स्वैराचारे ॥ अभिलाषे ॥ नियताक्षरपादरूपेगायत्र्यनुष्टुवादौ । गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्ति त्रिष्टुब्जगतीषु सप्तसु ॥ पद्ये ॥ पद्यस्यलक्षण यथा । पद्यं चतुष्पदी तच्च वृत्तजातिरितिद्विधा । वृत्त मक्षरसङ्ख्यातं जातिर्मात्राकृता भवेत् ॥ सममर्द्धसमवृत्तं विषम

च्चेतितविधा। समंसमचतुष्पादं भवत्यर्द्धसमपुन ॥ आदिस्तृतीयवच्च यस्यपादस्तुर्यो द्वितीयवत्। भिन्न-चिह्नचतुष्पाद् विषमं परिकीर्त्तितम् ॥ एषामर्थ । अक्षरसङ्ख्यातमक्षरगणनया परिप्राप्त वृत्तमुच्यते। मात्राकृता मात्रागणनयानिर्णीता जाति जातिसञ्ज्ञका भवति ॥ सम समचतुष्पादम्। अर्द्धसमवस्यप्रथम. पाद तृतीयेन पादेन तुल्य.। चतुर्थ पादो द्वितीयेन पादेन तुल्य । विषमं पृथक्लक्षणचतुष्पादम्। इति ॥ तच्चनानाविधम्। तस्य पिङ्गलादयो बहवोग्रन्था सन्ति ॥ छन्दसां लक्षणोदाहरणानि तत्तत् स्थाने द्रष्टव्यानि ॥ चन्दनम् चन्द्यते ऽनेनवा। चदिआह्लादने दीप्तौच। चन्देरादेश्वछइत्यसुन्॥

छन्दस्य। त्रि। इच्छयाकृते ॥ छन्दसा निर्मित। छन्दसोनिर्मित इति यत्॥

छन्दोग। पु। सामगे। सामवेदज्ञे ब्राह्मणे ॥ छन्दोगायति। गैशब्दे। गायोऽष्टगिति ष्टक्॥

छन्दोगपरिशिष्टम्। न। कात्यायनमुनिकृते सामवेदिनां कर्मबोधके गोभिलसूत्राणां परिशेषग्रन्थे ॥

छन्दोभङ्गः। पु। छन्दस पतने ॥ अपि माघं मघं कुर्याच्छन्दोभङ्गं त्यजेद्गिराम् ॥

छन्दोविचिति। स्त्री। श्रुतच्छन्दसां प्रत्यायके शास्त्रे ॥

छन्नम्। न। निर्जनस्थाने। रहसि ॥ छद्यतेस्म। छद०। क्त। आगमशासनित्यत्वान्नेट् ॥ त्रि। छादिते। ढका इतिभाषा ॥ छाद्यतेस्म। छद०। णिजन्त। वादान्तत्यादिना साधु ॥

छमण्ड'। त्रि। मृतपितृके। छोरा छोरीइतिछोकरा छोकरी इतिचभाषा इत्युणादिकोष.॥

छर्द्दम्। न। वमने ॥

छर्द्दन। पु। अलम्बुषराक्षसे ॥ निम्बवृक्षे ॥ मदनद्रुमे ॥ न। वमने॥

छर्द्दापनिका। स्त्री। वर्कव्याम्॥

छर्द्दि। स्त्री। वमनरोगे। वमथौ ॥ छादयन्नाननंवेगै रर्दयन्नङ्गभञ्जनैः। निरुच्यते छर्द्दिरिति दोषोवक्त्रंप्रधावित ॥ छर्द्दयति। छृदीसन्दीपने। णिजन्तादच इ ॥ कास श्वासोज्वरो हिक्का तृष्णा वैचित्त्यमेवच। हृद्रोगस्तमकश्चेतिज्ञेयाश्छर्द्देरुपद्रवा ॥

छर्द्दिका। स्त्री। चक्राङ्कितकायाम्। छर्द्दिषि ॥ विष्णुक्रान्तायाम्॥

छर्द्दिकारिपु। पु। चुद्रैलायाम्॥ त्रि

। छर्द्दिघ्न ॥

छर्द्दिघ्न । पु । अरिष्टे । निम्बे । मालके ॥

छर्दि० । स्त्री । वमो । वमने ॥ छर्दति । छृदीसन्दीपने । अर्चिशुचीत्यादिना इसि ॥

छर्दी । स्त्री । वमने ॥ आमाशयोत्क्लेशभवाहि सर्वाश्छर्द्योमता लङ्घनमेवतस्मात् । विधीयते मारुतजां विनातु संशोधनं वा कफपित्तहारी तिवैद्यकम् ॥ छर्दिकारादिश्निन इति ङीष् ॥

छलम् । न । स्खलिते । कूटयुद्धादिना युद्धमर्यादायाश्चलने ॥ छद्मनि । शाठ्ये । व्याजे । स्वरूपाच्छादने ॥ तात्पर्यान्तरेण प्रयुक्तस्य शब्दस्याऽर्थान्तरेणाश्रयणे ॥ तथाचाक्षपादप्रणीत सूत्रम् । वचनविघातोऽर्थविकल्पोपपत्त्या छलम् । ५० ॥ अर्थस्यवाऽभिमतस्य योविकल्पोविरुद्ध कल्पो ऽर्थान्तरकल्पनेतियावत् तदुपपत्त्या युक्तिविशेषेण योवचनस्य वा उक्तस्य विघातो दूषणं तच्छलमित्यर्थः । वक्तृतात्पर्याऽविषयार्थकल्पनेन दूषणाभिधानमितिफलितम् । तात्पर्याविषयत्वम् विशेष्ये विशेषणे संसर्गेवा ॥ यथा । नेपालादागतोऽयं नवकम्बलवत्त्वादित्यत्र नवसंख्यापरत्वकल्पनयाऽसिद्ध्यभिधानम् । प्रमेय धर्मत्वादित्यत्र पुण्यत्वांशकल्पनया भागासिद्ध्यभिधानम् । वह्निमान् धूमादित्यत्र धूमावयवे व्यभिचाराभिधानम् ॥ तत्त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलञ्च ॥ ५१ ॥ छानम् । छोछेदने । वृषादित्वात्कल ॥

छलना । स्त्री । परप्रतारणायाम् ॥

छलित । पु । स्खलिते । छले ॥

छल्ली । स्त्री । विरुधि ॥ सन्ताने ॥ वल्कले । छाल इति भाषा ॥ कुसुमविशेषे ॥

छवि । स्त्री । शोभायाम् ॥ रुचि ॥ छ्यति असारम् । छो० । कृविघृष्विच्छवीत्यादिनाक्विन्नन्तोनिपातित ॥ छिनत्ति तमो वा । छिदिरद्वैधीकरणे ॥

छा । पु । शावके ॥ इत्येकाक्षर ॥

छा । स्त्री । छादने ॥

छाग । पु । वस्ते । छागलके । अजे । बर्करे । बकरा इतिभाषा ॥ ततमरीचोक्तायुक्तिकल्पतरौ भोजराजेन । मषवाणां विभेदेन नराणां तु गणत्रयम् । तेषांशुभाय निर्दिष्ट पशुवस्तुत्रयवलौ ॥ येकृष्णाः शुचयश्छागा पशवोन्ये तथैवच । देवजातिनिवस्

सृज्यास्तेसर्वार्थोपसिद्धये ॥ येपीता
हरितावापिनरजाते हरीरिता ।
ये शुक्लाश्चमहान्तोवारणेजाते शु
भप्रदा ॥ योमोहादथवा ज्ञानाद्ब
लिमन्य प्रयच्छति । वधएवफलं तस्य
नान्यत् किञ्चित् फलभवेदिति ॥
अस्यमासगुणा । छागमास लघुस्नि
ग्ध स्वादुपाक त्रिदोषनुत् । नाति
शीत मदाहिस्यात् स्वादुपीनसनाश
नम् ॥ परबलकरवर्च्यंदृंहण वीर्यब
र्द्धनम् ॥ अजायाअप्रसूताया मांस
पीनसनाशनम् । शुष्ककासेऽरुचौशो
षे हितमग्नेश्चदीपनम् ॥ अजासुत
स्यबालस्य मास लघुतरस्मृतम् । हृ
द्यज्वरहर श्रेष्ठसुस्वादुबलद भृशम्
॥ मासनिष्कासिताण्डस्य छागस्य क
फकृत्तत । स्रोत शुद्धिकर बल्य मां
सद वातपित्तनुत् ॥ वृद्धस्य वातल
रूक्ष तथा व्याधिमृतस्यच । ऊर्द्ध्वज
त्रुविकारघ्नछागमुण्डरुचिप्रदमिति॥
*॥ अथछागलक्षणम् । छागशुभाशु
भलक्षण मभिधास्ये नवदशाष्टदन्ता
स्ते । धन्या स्थाप्यावेश्मनि सन्त्याज्या
सप्तदन्तास्ते ॥ दक्षिणपार्श्वेमण्डल
मसित शुक्लस्य शुभफलं भवति ।
ऋष्यनिभ कृष्णलोहितवर्णानाश्वे
तमतिशुभदम् ॥ स्तनवदवलम्बतेय

छाग

कण्ठेऽजाना मणि सविज्ञेय । एक
मणि शुभफलकृद् धन्यतमा द्विम
णयोये ॥ मुण्डा सर्वेशुभदा सर्व
सिता सर्व कृष्णदेहाश्च । अर्द्धासि
ता सितार्द्धा धन्या कपिलार्द्धकृष्णाश्च
॥*॥ अथचतुर्णां कुट्टककुट्टिकजटि
लवामनानां क्रमेण लक्षण करोति।
विचरति यूथस्याग्रे प्रथमं वाम्भोव
गाहते योऽज । सशुभ सितमूर्द्धा
वा मूर्द्धनि वा कृत्तिकायस्य ॥ सपृष
तकण्ठशिरावा तिलपृष्ठनिभश्चताम्रदृ
क्शस्त । कृष्णचरण सितोवा कृ
ष्णोवा श्वेतचरणोय ॥ य कृष्णाण्ड
श्वेतो मध्ये कृष्णेन भवतिपट्टेन ।
योवाचरति सशब्द मन्दञ्च सशो-
भनश्छाग ॥ ऋष्यशिरोरुहपादो
योवाप्राक्पाण्डुरोऽपरेनील । स-
भवति शुभकृच्छाग श्लोकश्चाप्यत्र
गर्गोक्त ॥ तमाह । कुट्टक कुट्टिक
श्चैव जटिलो वामनस्तथा । तेच-
त्वार श्रिय पुत्रा नालक्ष्मीके वस
न्तिवै ॥*॥ अथाऽप्रशस्तानां लक्षण
म् ॥ अथाऽप्रशस्ता खरतुल्यनादा
प्रदीप्तपुच्छा कुनखा विवर्णा । निकृ
त्तकर्णा द्विपमस्तकाश्च भवन्ति तेषा
सितताल्लुजिह्वा ॥*॥ अथ शुभलक्ष
णानि । वर्णौ प्रशस्तौ मणिभि प्रयुक्ता

मुण्डाश्च ये ताम्रविलोचनाश्च। ते पूजिता वेश्मनि मानवाना सौख्या नि कुर्वन्ति यशःश्रियश्चेति ॥ पुरोडाशे ॥ न। छागीदुग्धे ॥ छ्यति। छो०। छायते छिद्यते वा। छापूछ छिभ्य कित्दितिगन् ॥ त्रि। छाग च्छा ग्यो.सम्बन्धिनि ॥ मत्स्यविशेषे ॥ यथा। श्वेतं सुपाकं समदीर्घहस्तमि प्र-त्यक्षं छागलकं वदन्ति। गले हिक वाट किमतस्पृष्टे कण्ट सुपथ्यो रुचि दोषलप्रद इति ॥

छागण। पु। करीषाग्नौ। गोठेकी आग इतिभाषा ॥

छागभोजी। पु। वृके ॥ त्रि। छागभ क्षके ॥

छागरथः। पु। अग्नौ ॥ छागोरथेऽस्य ॥

छागल। पु। छागे ॥ छागलएव। प्रज्ञा द्यण् ॥ आत्रेये ऋषिविशेषे ॥ छग लस्या पत्यम्। विकर्णशुङ्गच्छगला दिण्यण् ॥

छागलक। पु। अजे। स्तुभे। वर्करे। छागे ॥ स्वार्थे कः ॥

छागलाद्यम्। न। भैषज्यरत्नावल्युक्ते भिषजोक्तविशेषे ॥

छागलान्त्रिका। स्त्री। वृद्धदारकवृक्षे ॥

छागलान्त्री। स्त्री। वृके ॥

छागवाहन। पु। अग्नौ ॥

छागिका। स्त्री। छाग्याम् ॥ स्वार्थेकः। केण इति ह्रस्व ॥

छागी। स्त्री। अजायाम्। छागमात रि ॥ छागात् जातेरितिङीष् ॥

छागीदुग्धम्। न। अजाक्षीरे ॥ छागं क षायं मधुरं शीतं ग्राहि पयो लघु। रक्तपित्तातिसारघ्नं क्षयकासज्वरा पहम् ॥ अजानांलघुकायत्वात्माना द्रव्यनिषेवणात्। नात्यम्बुपानाद् व्यायामात् सर्वव्याधिहरंपय ॥

छात। त्रि। छिन्ने ॥ दुर्बले ॥ छायते स्म। छो० क्त। छ्यतिस्यवा। गन्त्य र्थेतिक्त। शाछोरन्यत रस्यामिती त्त्वा भाव ॥

छात्र। पु। अन्तेवासिनि। शिष्ये ॥ गुरुदोषाच्छादनं छत्रम्। तच्छील मस्य। छत्रादिभ्योण ॥ न। मधुप्र भेदे ॥ वरटा.कपिला पीता प्रा योहिमवतोवने। कुर्वन्ति छत्रकाका रंतज्जंछात्रमधुस्मृतम् ॥ छात्रकपि लपीतस्यात् पिच्छिलंशीतलंगुरु। स्वादुपाकं कृमिश्वित्ररक्तपित्तप्रमेह जित् ॥ भ्रमतृण्मोहविषहृत्तर्पणं चागुणाधिकम् ॥

छात्रकम्। न। छात्रेमधुनि ॥ यथा। छत्राकारंस्तुपटलं सरघा पीतपिङ्ग ला। या कुर्वन्तितदुत्पन्नंमधुच्छा

वकमीरितम् ॥ शिवमेकभूमिमप्य विद्याच्छाय गुणोत्तरम् ॥

छात्रगण्ड । पु । पदार्थविद्ि । श्लोकार्थपदवेत्तरि ॥

छात्रदर्शनम् । न । हैयङ्गवीने ॥ इति शब्दचन्द्रिका ॥ शिष्यावलोकने ॥

छात्रादिनिलय' । पु । मठे ॥ छात्रोऽन्तेवासी आदिर्येषां परिव्राजकक्षपणकादीनाम् तेषांनिलय ॥

छादनम् । न । दले । पर्णे ॥ आच्छादने ॥ अन्तर्द्धाने ॥ पु । नीलाम्लानवृक्षे ॥

छादित' । त्रि । संवृते । आच्छादिते ॥ यथा । घनतरघनवृन्दैश्छादितौ पुष्पवन्ताविश्वदृष्ट ॥ छादितेस्म । छद्ं'वादान्ततपक्षेसाधु ॥

छादिषेयम् । न । तृणे ॥ छदिषे इदम् । छदिरुपधिवलेर्ढञ् ॥

छाद्मिकः । त्रि । कापटिके । व्याजेन व्यवहर्त्तरि ॥ छद्मना चरति । ठक् ॥

छान्दस । पु । श्रोत्रिये । वेदाध्ययनकर्त्तरि । वेदवेत्तरि ॥ छन्दोधीते वेत्तिवा । पक्षे तदधीतेतद्वेदेत्यण् ॥ छन्दसो व्याख्यानस्तत्र भवोवा । छन्दसोयदणा विच्यण् । यतित् छन्दस' ॥ त्रि । छन्दसम्बन्धिनि ॥

छान्दोग्यम् । न । छन्दोगानां धर्मे आम्नाये समूहे च ॥ चरणेभ्योधर्मवदिति छन्दोगौक्थिकेतिञ्य ॥ सामवेदोपनिषदि ॥

छाया । स्त्री । आतपाभावे । भावानुगायाम् । श्यामायाम् ॥ प्रतिबिम्बे ॥ अर्कयोषिति । सत्त्वाप्रतिकृतौ ॥ पालने ॥ उत्कोचे ॥ कान्तौ ॥ सच्छोभायाम् ॥ पङ्क्तौ ॥ तमसि ॥ अतिधृतिसप्तकोनविंशाक्षरा वृत्ति विशेषे ॥ यथा । भवेत् सैवच्छाया तयुगगयुतास्याद्‍द्वादशान्ते यदा ॥ सैव मेघविस्फूर्जितैवेत्यर्थ । यथा । अभीष्टजुष्टोयो वितरति लसद्दोश्शाखशाखोज्ज्वल स्फुरन्नानारत्नस्तवकिततनु शिखाशुकाख्मिवत । नयस्माङ्घ्रिच्छाया मुपगतवतासत्तारतीआतप स्तनोतिप्रोत्ताप स जगद्‍वतात्कसारिकल्पद्रुम ॥ इति । छो० । श्याद्यधेतिण । आतोयुक् ॥ यद्वा । माङ्खासमिभ्योय ॥ साद्दश्ये ॥

छायाकर । त्रि । छत्रधारे । छाताधार इतिभाषा ॥

छायातनय । पु । शनैश्चरे ॥ छायायास्तनय ॥

छायातरु । पु । स्थिरच्छायवृक्षे ॥

छायात्मज । पु । शनिग्रहे ॥

छायापथ । पु । आकाशे ॥ देवपथे ।

नभ सरिति ॥ स्वातीपथे ॥ छाया पथो नाम ज्योतिश्चक्रमध्यवर्त्तीकश्चि त्तिरश्चीनोऽवकाश इति मल्लिनाथ ॥

छायापुत्र । पु । मन्दे । शनौ ॥

छायापुरुष । पु । आकाशेदृष्टव्ये निजच्छायारूपे पुरुषे ॥ तदवलोकन विधिर्योगप्रदीपिकायां द्रष्टव्य ॥

छायाभृत । पु । चन्द्रे ॥

छायामित्रम् । न । आतपत्रे । छत्रे ॥

छायामृगधर । पु । विधौ । चन्द्रे ॥

छायावृक्ष । पु । छायाप्रधाने वृक्षे ॥ शाकपार्थिवादि ॥

छायासुत । पु । शनौ ॥

छि । पु । गर्हायाम् ॥ इत्येकाक्षर-कोष ॥

छिक्कनी । स्त्री । चवक्षात । नकछिकनीति ख्यातौषधौ ॥ छिक्कनी कटुका रुच्यातीक्ष्णोष्णा वह्निपित्तकृत् । वातरक्तहरी कुष्ठकृमिवातकफापहा ॥

छिक्कर । पु । मृगविशेषे ॥ मांसं छिक्करज कृत्त माज्ये तप्ते सुभृष्टकम् । दधिसैन्धवहिङ्ग्वाढ्य सुधूलेनाति धूपितम् ॥ कषाय मधुर स्वादु कफ पित्तानिलापहम् । विपाके कटुक प्रोक्तं विशेषेणाग्निवर्द्धनम् ॥

छिक्का । स्त्री क्षुते ॥ छींक इति भाषा॥

छिक्किका । स्त्री । छिक्कन्याम् ॥

छित । त्रि । लूने ॥ छायतेस्म । छो० । क्त । शाच्छोरन्यतरस्यामितीत्त्वम्॥

छित्ति । स्त्री । छेदे ॥ छिदे ॥ छिद्यते छेदन वा । छिदिर्० । स्त्रियांक्तिन् ॥ पु । करञ्ज वृक्षे ॥

छित्वर । त्रि । धूर्त्ते ॥ वैरिणि ॥ न । छेदनद्रव्ये ॥ छिनत्ति । छिदिर्० । छित्वरच्छत्वरेत्यादिनाष्वरच् निपातनाद्दकारस्यत कारो गुणाभावश्च॥

छिद् । त्रि । छेदनकर्त्तरि ॥ छिनत्ति । छिदिर्० । क्विप् ॥

छिदकम् । न । वज्रे ॥

छिदा । स्त्री । छेदने । द्वैधीकरणे ॥ छिदिर्० । षिद्भिदादिभ्योऽङ् । टाप् ॥

छिदि । स्त्री । कुठारे ॥ शस्त्रे ॥ छिनत्ति । छिदिर्० । इन् ॥ कृगॄशॄपॄकुटी त्यादिना इ किद्वा ॥

छिदिर । पु । पावके ॥ रज्जौ ॥ करवाले ॥ परश्वधे ॥ छिनत्ति । छिदिर्० । इषिमदिमुदिखिदिच्छिदी त्यादिनाकिरच् ॥

छिदुर । त्रि । वैरिणि ॥ धूर्त्ते ॥ न । छेदनद्रव्ये ॥ छेदके ॥ छिनत्ति तच्छील: । छिदिर्० । विदिभिदि च्छिदे: कुरच् ॥

छिद्र । न । दूषणे ॥ रन्ध्रे ॥ निम्नं

छिद्रानुसार्येरे. ॥ अवकाशे ॥ गर्त्ते ॥ अष्टमभवने ॥ छिद्र्यते । छिद्रभेदने । घञ् । यद्वा । छिद्यते । छिदिर्° । स्फायितञ्चीतिरक् ॥

छिद्रवैदेही । स्त्री । गजपिप्पल्याम् ॥

छिद्रान्तः । पु । नले । पोटगले ॥

छिद्राफलम् । न । मायाफले ॥

छिद्रित । त्रि । विद्धे । कृतच्छिद्रे । वेधिते । वींधा इति भाषा ॥ छिद्रन्तेस्म । छिद्र° अदन्त । क्त ॥

छिन्न' । त्रि । कृत्ते । छाते । लूने । कृतच्छेदने । काटा चीरा फाडा इति भाषा ॥ छिद्यतेस्म । छिदिर्° । क्त ॥

छिन्नग्रन्थिनिका । स्त्री । त्रिपर्णिकायाम् ॥

छिन्नद्वैध । त्रि । अवयादिपरिपाकेण निष्पन्नसर्वसंशये ॥

छिन्नपत्री । स्त्री । अम्बष्ठायाम् ॥

छिन्नमस्ता । स्त्री । महाविद्याप्रभेदे । प्रचण्डचण्डिकायाम् ॥ छिन्नमस्तयस्या ॥ त्रि । छिन्नमस्तके ॥

छिन्नरुह । पु । तिलकवृक्षे ॥

छिन्नरुहा । स्त्री । अमृतायाम् । गुडूच्याम् ॥ छिन्ना रोहति । रुह° । इगुपधेतिक । ङ्याप्पोरितिह्रस्व ॥ शल्लक्याम् ॥ स्वर्णकेतक्याम ॥

छिन्नवेधिका । स्त्री । पाठायाम् ॥

छिन्ना । स्त्री । छिन्नमस्तायां देव्याम् ॥ गुडूच्याम् ॥ दूर्वायाम् । पुंश्चल्याम् ॥ क्तान्ताच्छिदेष्टाप् ॥

छिन्नोद्भवा । स्त्री । गुडूच्याम् । गिलोय इतिविख्यातायाम् ॥

छिलिहिण्ट । पु । पातालगरुड्यामोषधौ ॥ छिलिहिण्ट परम्रष्य कफघ्न पवनापह ॥ छिलिहिण्डोपि ॥

छुच्छुका । स्त्री । छुच्छुन्दर्याम् ॥

छुच्छुन्दरी । स्त्री । गन्धमुष्याम् । छुछूदर इतिभाषा ॥

छुट्टम् । न । प्रतीकारो ॥ रश्मौ ॥

छुप । पु । क्षुपे ॥ स्पर्शने ॥

छुरणम् । न । विलेपने ॥

छुरा । स्त्री । सुधायाम् । चूर्णे । लेपनद्रव्ये । चूना इति भाषा ॥

छुरिका । स्त्री । शस्त्रविशेषे । असिपुत्र्याम् ॥ छुरति । छुरच्छेदने । क्वुन् ॥ इगुपधेतिके कन् वा । ह्रस्वम् ॥

छुरित । त्रि । खचिते ॥ रञ्जिते ॥ रुषिते ॥

छुरी । स्त्री । छुरिकायाम् ॥

छूरिकापत्री । स्त्री । श्वेतायाम् ॥

छूरी । स्त्री । छुरिकायाम् ॥ इति-भरत ॥

छेक । त्रि । गृह्यके । गृहाश्रिते मृगे पक्षिणिच ॥ नागरे । विदग्धे ॥ क्व

तिछायते वा। छो॰। वा॰ छे कन्॥

छेका। स्त्री। मत्तायाम्॥

छेकानुप्रास। पु। अलङ्कारविशेषे॥ सोनेकस्य सकृत् पूर्वं। अनेकस्य अर्थायुक्तस्य सकृदेकवार साहृश्य छेकानुप्रास। उदाहरण यथा। ततो ऽरुणपरिस्पन्दमन्दीकृतवपुः शशी। दभ्रेकामपरिक्षामकामिनीगण्डपाण्डुताम्॥

छेकोक्ति। स्त्री। वक्रोक्तौ॥ छेकाया उक्ति॥

छेत्ता। त्रि। छेदनकर्त्तरि॥ छिनत्ति। छिदिर्॰। तृच्॥

छेदः। पु। खण्डे॥ छेदने॥ छेदनम् छिद्यते वा। छिदिर्॰। घञ्॥

छेदनम्। न। भिदि॥ कल्पने। वर्द्धने। कर्त्तने। अवयव द्विधाकरणे। कांगना काटना इति भाषा॥ छिदिर्॰। ल्युट्॥

छेदनीय। पु। कतकवृक्षे॥ त्रि। छेद्ये॥ छेदितु योग्य। अर्हेकृत्यतृचश्चेति अनीयर्॥

छेदवत्। त्रि। विच्छेदयुक्ते॥

छेदि.। त्रि। छेत्तरि॥ छिनत्ति। छिदिर्॰। कृपिभिदिच्छिदिभ्यश्चेति इन्॥

छेदितः। त्रि। छिन्ने॥

छेद्य। त्रि। छेदनीये॥ परिच्छेद्ये॥ ॥ छेत्तु शक्य। शकिलिङ्चेति शक्यार्थे कृत्य॥

छेमण्ड। पु। पितृहीने। छोंडा छोरा इत्यादिभाषा॥ इत्युणादिकोष॥

छेलक। पु। छागे॥

छेलिका। स्त्री। अजायाम्। छाग्याम्॥

छलु। पु। सोमराज्याम्॥

छैदिक। पु। वेतसे॥ छिन्नप्ररूढत्वात् छेदं नित्यमर्हति छेदादिभ्यो नित्यमिति ठञ्॥

छोटिका स्त्री। तर्ज्जन्यङ्गुष्ठशब्दे। अङ्गुलिध्वनौ॥

छोटी। पु। कैवर्त्ते। जालिके॥

छोरणम्। न। परित्यागे। छोड़ना इति भाषा॥ इतित्रिकाण्डशेष॥

छोलङ्ग। पु। मातुलुङ्गे। टावानेबु इतिगौड भाषा॥

छोहारा। स्त्री। द्वीपान्तरखर्जूरिकायाम्॥ खर्जूरी गोस्तनाकारा परद्वीपादिहागता। जायते पश्चिमे देशे सा छोहारेतिकीर्त्यते॥

ज

ज.। पु। जकारे॥ मृत्युञ्जये॥ जन्मा

म् ॥ तातमाचे ॥ जनार्द्दने ॥ वेगे ॥ भुक्तौ ॥ विषे ॥ मुक्तमध्यगे(।ऽ।) ॥ त्रि। वेगिते ॥ जेतरि ॥ जायते। जनी०। अन्येभ्योपिदृश्यतइतिड ॥

जकुट । पु । मलयाचले ॥ शुनि ॥ ॥ न । वार्त्ताकुपुष्पे ॥

जक्षणम् । न । भक्षणे ॥

जक्षि । स्त्री । भोजने ॥

जगच्चक्षु । पु । सूर्ये ॥

जगत् । पु । वायौ ॥ त्रि । जङ्गमे ॥ न । विश्वस्मिन् । लोके । सचराचरे प्रपञ्चभूते भोगोपयोगिपरिकरसहिते मायामये जन्तुचक्रे ॥ यथा । न निरूपयितु मक्या विस्पष्ट भासते यथा । सामायेतीन्द्रजालादौलोका सम्प्रतिपेदिरे ॥ स्पष्टं भातिजगच्चेदमशक्यतन्निरूपणम् । मायामय जगत्तस्मादीक्षस्वापक्षपाततः ॥ यथा। यदुपते क्वगता मथुरापुरी रघुपते क्वगता चरकोशला । इति विचिन्त्य कुरुष्व मनस्थिर न सदिद जगदित्यवधारयेति रूपसनातन गोस्वामिनौ ॥ गच्छति । गम्लृ गतौ । द्युतिगमिजुहोतीनांद्वेचेति क्विपि द्वित्वे गम कावितिमलोपे तुकि जगत् जगतौ । यद्वातुवर्त्तमाने पृषदृहन्महज्जगच्छतृवच्चेति व्युत्पातते तदा उगिदचामिति नुमि जगन्त् जगन्ता विश्वादिबोध्यम् ॥ सामविशेषे ॥

जगती । स्त्री । भुवने । लोके । जगति ॥ क्ष्मायाम् ॥ जने ॥ जम्बूवप्रे ॥ वास्तुविशेषे ॥ छन्दोविशेषे । द्वादशाक्षरायांपङ्क्तौ ॥ गच्छति । गम्लृ०। वर्त्तमाने पृषदिति साधु । शतृवद्भावादुगितश्चेतिङीप् ॥ यद्वा । द्युतिगमिजुहोतीनां द्वेचेति क्विप् । गमः काविति मलोपे तुक् ॥

जगतीधर । पु । भूधरे ॥ जगत्या धर ॥

जगत्कर्त्ता । पु । ब्रह्मणि ॥ जगत. कर्त्ता ॥

जगत्पति । पुं। परमेश्वरे। हिताहितोपदेशकवेदप्रणेतृत्वेन सर्वस्य जगत. पालयितरि ॥ जगतां पति ॥

जगत्प्रभु । । पु । नारायणे ॥ जगत् जङ्गमाजङ्गमम् तस्यप्रभु स्वामी ॥ वुद्दे ॥

जगत्प्राण । पु । समीरणे । वायौ ॥ जगतां प्राण ॥

जगत्साक्षी । पु । सूर्ये ॥ जगतांसाक्षी॥

जगदम्बा । स्त्री । जगज्जनन्याम् । गौर्याम् । पार्वत्याम् ॥ जगतामम्बा ॥

जगदम्बिका । स्त्री । दुर्गायाम् ॥

जगद्धात्री । स्त्री । दुर्गाप्रभेदे ॥

जगदाधार । पु । वायौ ॥ काले ॥ त्रि । जगतामाश्रये ॥ जगताम् आधार ॥

जगदीश । पु । विष्णौ ॥ जगतामीश ॥

जगद्गौरी । स्त्री । मनसादेव्याम् ॥

जगद्बल । पु । वायौ ॥ जगतो बलयेन ॥

जगद्योनि । पु । सदाशिवे ॥ विधातरि ॥ विष्णौ ॥ स्त्री । प्रकृतौ ॥ भूमौ ॥ जगतो योनि ॥

जगद्रूपम् । न । नामरूपात्मके विश्वस्मिन् ॥ अस्ति भाति प्रियरूप नाम चेत्यंशपञ्चकम् । आद्य त्रय ब्रह्मरूप जगद्रूप ततो द्वयम् ॥

जगद्वहा । स्त्री । धरित्र्याम् ॥

जगद्विनाश । युगान्ते ॥ जगता विनाशो यस्मिन् जगत्या विनाश ॥

जगनु । पु । जन्तौ ॥ वैश्वानरे ॥

जगन्नाथ । पु । विष्णौ ॥ पुरुषोत्तमक्षेत्रे । उड्यानपीठस्थे भैरवे ॥ उड्याने विमलाक्षेत्रे जगन्नाथस्तु भैरवइत्यागमशास्त्रम् ॥ शालग्रामो हरेर्मूर्त्तिर्जगन्नाथश्च भारतम् । कलेर्दश सहस्राण्ते ययौ त्यक्त्वा हरे पदमिति ब्रह्मवैवर्त्तम् ॥ वैशाखस्यामले पक्षे अष्टम्या पुष्ययोगत । कृता प्रतिष्ठा भोविप्रा शोभने गुरुवासरे ॥ कृता ब्रह्मणातिशेष ॥ महापवित्र क्षिहरे निवेदित नियोजयेद् य पितृदेवकर्मसु । तृप्यन्ति तस्मै पितर सुराश्च प्रयान्तिलोक मधुसूदनस्येति महाप्रसादमाहात्म्यस्य वचनम् ॥

जगन्निवास । पु । जगतामाधारे सर्वाश्रये परात्मनि ॥ जगतांनिवास ॥

जगन्तु । पु । जगन्वर्थे ॥

जगर । पुं । कवचे । सन्नाहे ॥ जगता गृह्यते । प्रातिपदिकाद्धात्वर्थे इति णिच् । बाहुलकादर । जागर्त्ति । अच् । पृषोदरादित्वा ॥

जगल । पु । मदनद्रुमे ॥ मेदके । सुराकल्के ॥ पिष्टमद्ये ॥ त्रि । धूर्ते । कितवे ॥ भृश गलति गल्यते वा । गलअदने । यङ्लुगन्तात् अच् । सन्धापूर्वकत्वाद्दीर्घोऽकित इति न दीर्घ ॥

जग्धम् । त्रि । भुक्ते । भक्षिते ॥ अद्यतेस्म । अद॰ । क्त । अदोजग्धिर्ल्यप्तिकितीतिजग्धि । इकारउच्चारणार्थ । धत्त्वम् । झरोझरिसवर्णे ॥

जग्धतृण । त्रि । भक्षिततृणे ॥ जग्धं तृणमनेन ॥

जग्धि । स्त्री । विघसे । भोजने । जेमने ॥ अदनम् । अद॰ । स्त्रियांक्तिन् । अदोजग्धिर्ल्यप्तिकिति ॥

जघनम् । न । स्त्रिय श्रोणिपुरोभागे

॥ कटौ ॥ हन्यते । हन्ते. शरीराव यवेदेशेच्यत् ॥ यद्वा । वक्र हन्ति । यङ्लुगन्तादच् । अनित्यमागमशासनमित्यभ्यासस्यनुगतोनुनासिकान्तस्येतिनुक्न ॥

जघनकूपौ । पु । कुकुन्दरयोः ॥ द्विवचनान्तोयमिति हलायुध ॥

जघनचपला । स्त्री । मात्रावृत्तेऽर्थार्या प्रभेदे ॥ यथा । प्राक्प्रतिपादितमर्द्धे प्रथमेचरमेदलेतुचपलाया । लक्ष्माश्रयेत सोक्ता विशुद्धधीभि र्जघनचपला ॥ यथा । कृष्ण शृङ्गारघटु यौवनमदचञ्चल सुललिताङ्ग । आसीद्व्रजाङ्गनानां मनोहरोजघनचपलानामिति ॥

जघनेफला । स्त्री । काकोदुम्बरिकायाम् । कठम्बरी इति भाषा ॥ जघनेफलमस्याः । अमूर्द्धेतिसप्तम्या अलुक् ॥

जघन्य । त्रि । चरमे ॥ गर्हिते ॥ धर्मार्थकामा सममेवसेव्या योह्येकसक्तः सजनोजघन्य ॥ अन्त्ये ॥ पु । शूद्रे ॥ न । मेहने । शिश्ने ॥ अश्लेषा शतभिषा आर्द्रा स्वाति ज्येष्ठा भरणी षड्नक्षत्रेषु ॥ जघनेभव । दिगादित्वात् यत् शरीरावयवत्वा द्वा ॥ यद्वा । कुटिलं हन्यते । हन्ते यङन्तादचोयत् । अनित्यमागमशासनमिति नुगतोऽनुनासिकान्तस्येति ननुक् ॥ जघनमिववा ।-शा०य. ॥

जघन्यज । पु । स्त्री । वृषले । शूद्रे ॥ त्रि । कनिष्ठे ॥ जघन्येऽवरकाले जात । सप्तम्यांजनेर्ड ॥ जघन्यात्त्याज्यात् जात । जनी० । पञ्चम्यामजातावितिड ॥

जघन्यभम् । न । जघन्यसंज्ञकेषु षट्सु नक्षत्रेषु ॥ जघन्यञ्चतत्भञ्च ॥

जघ्नि । पु । हननयोग्यास्त्रे ॥

जघ्नु । त्रि । घातके । हन्तरि ॥ हन्ति । हन० । कुर्भ्रश्चेतिचकारात् अन्यतोपि कुर्द्वातोर्द्वित्वञ्च ॥

जङ्गम । त्रि । स्थावरेतरे । चरे । चरिष्णौ ॥ वक्रगच्छति । गत्यर्थानां नित्यकौटिल्यइति यङ्भृशार्थेवा । पचाद्यच् ॥

जङ्गमकुटी । स्त्री । छत्रे ॥ वारित्रायाम् ॥

जङ्गमगुल्म । पु । प्रचारिपदातिसमूहे । गल इति भाषा ॥

जङ्गमेतर । त्रि । स्थावरे ॥

जङ्गल । पु । न । पिशिते ॥ त्रि । निजनस्थाने ॥ वनप्रधानदेशे ॥

जङ्गाल । पु । सेतौ ॥ रोधविशेषे ।

जगणाद्दक्षिख्याते ॥ इतिजटाधर ॥
जङ्घलम् । न । विषे ॥ इतिचिकाण्डशेष ॥
जङ्घन्यमान । त्रि । अतिशयेन हन्यमाने । भृशपीड्यमाने ॥
जङ्घा । स्त्री । प्रसृतायाम् । गुल्फोर्द्ध जान्वधोभागे । टङ्गायाम् । टाँग जाघ इतिच भाषा ॥ जायन्ते रोमाण्यस्याम् । जनी० । अच् । तस्य जङ्घच ॥ यद्वा । जङ्घन्यते कुटिलं गच्छति । हन्तेर्यङ्लुगन्तात् अन्येभ्योपीति ड' ॥ टाप् ॥
जङ्घाकरिक । त्रि । धावके । जाङ्घिके । जङ्घाजीविनि ॥ जङ्घासाध्यस्त्वादुप्रचारात् गतिर्जङ्घा । सैवकरो राजदेयो भाग, आकर अंशोवा । जङ्घाकरोऽस्यास्ति । अतइनिठनाविति ठन् ॥ जङ्घैव करीहस्ती यस्येति वा । कन् ॥
जङ्घात्राणम् । न । जङ्घासन्नाहे । मङ्घुणे ॥
जङ्घाल । त्रि । वेगिनि । अति जवे ॥ अतिशयिता जङ्घाऽस्य ॥ सिध्मादित्वा ल्लच ॥ पशुविशेषाणागणे ॥ हरिणैणाकुरङ्गर्श्यपृषतन्यङ्कुशम्बरा । राजीवोपिच मुण्डीचेत्याद्या जङ्घालसञ्ज्ञका ॥ हरिणस्ताम्रवर्णः स्यादेणः कृष्णः प्रकीर्त्तितः । कुरङ्गईषत्ताम्रः स्याद्धरिणाकृतिकोमहान् ॥ ऋष्यो नीलाण्डको लोके स रोझ इतिकीर्त्तितः । पृषतश्चन्द्रबिन्दुः स्याद्धरिणात्किञ्चिदल्पकः । न्यङ्कुर्बहुविषाणोथशम्बरोगवयान् महान् । राजीवस्तुमृगोज्ञेयोराजीभिः परितोवृतः ॥ योमृग शृङ्गहीन स्यात् समुण्डीति निगद्यते ॥ जङ्घाला' प्रायशः सर्वेपित्तश्लेष्महराः स्मृताः । किञ्चिद्वातकराश्चापिलघवोबलवर्द्धनाः ॥
जङ्घिल । त्रि । जङ्घाले ॥ अतिशयिते जङ्घेऽस्य । पिच्छादित्वात् इलच् ॥
जज' । पु । योधे ॥ जजति । जजयुद्धे । पचाद्यच् ॥
जञ्जपूक । त्रि । वावाले ॥ पुनः पुनः भृशंवा गर्हितं जपति तच्छीलः । यजजपदशायङ इत्यूक
जञ्जभ्यमान । त्रि । गात्रविनामेन विदारितमुखेपुरुषे ॥ इति कर्ममीमांसा ॥
जटा । स्त्री । केशविकारे । लग्नकचे । व्रतिनः शिखायाम् । सटायाम् ॥ जायते जन्यतेवा । जनेष्टन्लोपश्चेति टन् धातोरन्त्यस्य लोपश्च ॥ मूले । शिफायाम् । जड इति भाषा ॥ मांस्याम् ॥ वेदपाठविशेषे ॥ सामगा-

नोपकरणे ॥ रुद्रजटायाम् । अतात्र यीम् ॥ जटति । जटसङ्घाते । ऋच् । टाप् ॥ जटाअस्यस्याः । अर्शआद्यच् ॥

जटाजूट । पु । जटासमूहे ॥ जटा नां- जूटोबन्ध ॥

जटाज्वाल । पु । प्रदीपे ॥

जटाटङ्क । पु । शिवे ॥ जटायाटङ्को- यस्य ॥

जटाटीर । महादेवे । शिवे ॥

जटाधर' । पु । महेश्वरे ॥ बुद्धभेदे ॥ धरति । धृञ्० । पचाद्यच् । जटानांध र ॥ त्रि । जटाधारिणि ॥ जटाधर' सन् जुहुधीह पावकम् ॥

जटामांसी । स्त्री । मल्दे । मांसाम् । सुगन्धिद्रव्यविशेषे ॥

जटायु । पुं । अरुणपुत्रे सम्पाते क नीयसि दशरथसखे गृध्रविशेषे ॥ ॥ जटायाति प्राप्नोति । या० । मृ० कु' ॥ गुग्गुलौ ॥

जटायुध । पु । गुग्गुलौ ॥

जटायुष । पु । जटायौ ॥ गुग्गुलौ ॥ जटाआयुरस्य ॥

जटाल । पु । कचूरे ॥ गुग्गुलौ ॥ मु- ष्कके ॥ वटे ॥ त्रि । जटाधरे । जटा वति ॥ जटाऽस्त्यस्य । प्राणिस्थाद्वा- तोलजन्यतरस्याम् ॥

जटाला । स्त्री । जटामांस्याम् ॥ टाप् ॥

जाटावान् । त्रि । जटिले ॥

जटावती । स्त्री । जटामांस्याम् ॥

जटावल्ली । स्त्री । गन्धमांस्याम् ॥ रुद्र जटायाम् ॥

जटि' । पु । प्लक्षद्रुमे ॥ जटायाम् ॥ स मूहे । जटति । जट० सर्वधातुभ्य इन् ॥

जटित । त्रि । खचिते ॥

जटी । पु । प्लक्षागमे । पाकरि इति भाषा ॥ सर्पविशेषे ॥ त्रि । जटायुक्ते ॥ मत्वर्थे व्री० इनि ॥

जटिल । पु । जटावति ब्रह्मचारिप्रभे दे ॥ सिंहे । केशरिणि ॥ त्रि । जटा युक्ते ॥ यथा । यच्चिन्तितं तदिह दूर तर प्रयाति यच्चेतसा नगणितं तदि हाभ्युपैति । प्रातर्भवामि वसुधाधि पचक्रवर्त्ती सोऽहं व्रजामि विपिने- जटिल स्तपस्वीति ॥ जटास्त्यस्य ।- पि० इलच् ॥

जटिला । स्त्री । जटामांस्याम् ॥ पिप्प ल्याम् ॥ वचायाम् ॥ दमनकवृक्षे ॥ राधिकाश्वश्र्वाम् ॥ टाप् ॥

जटी । स्त्री । प्लक्षवृक्षे ॥ जटामांस्याम् ॥ कृदिकारादक्तिन ङीष् ॥

जटुल । पु । पिप्लौ । देहस्थेकृष्णलक्ष्म णि । लसन इति भाषा ॥ जटति । जट० । बाहुलकादुलच् ॥

जठर'। पु। न। कुक्षौ॥ त्रि। वृद्धे॥ कर्कशे। कठिने॥ जायतेऽस्मिन् जन्तुर्मलो वा। जनेरठश्चेस्त्वर। पृषोदरादि॥

जठरनुत्। पु। आरग्वधे॥

जठरामय'। पु। जलोदररोगे॥

जड। पु। स्वनाम्ना प्रसिद्धे पुरुषे॥ यथा। इष्टवाऽनिष्टवा सुखदुःखवा नवेत्ति यो मोहात्। परवशग सभवेदिह नाम्ना जडसंज्ञक पुरुषइति॥ वेदग्रहणासमर्थे। मूर्खे॥ न। वारिणि॥ सीसके॥ त्रि। हिमग्रस्ते॥ मूके॥ अप्रज्ञे। बुद्धिविकले॥ अचिदात्मघटादीनां यत्स्वरूपं जडं हि तत्॥ अनुयमे॥ जलति घनीभवति। जलघातने। अच्। डलयोरैकत्वम्॥

जडक्रिय। त्रि। चिरक्रिये। दीर्घसूत्रिणि॥ जडाक्रियास्य॥

जडता। स्त्री। जाड्ये। सैमिष्ये। अपाटवे॥ विरहदुःखेन जीवनमात्र स्थितौ॥

जडभरत। पु। ऋषभपुत्रे। राज्ञि॥ यन्नाम्नेदं भारतं वर्षमभूत्॥

जडा। स्त्री। शूकशिम्ब्याम्॥ भूम्यामलक्याम्॥ अस्रायाम्॥ जडयति। तत्करोतीति णिजन्तात् अच्। टाप्॥'

जडिमा। पु। जडतायाम्॥ यथा। इष्टाऽनिष्टापरिज्ञान यत्र प्रश्ने प्यऽनुत्तरम्। दर्शनश्रवणाभावो जडिमा सोऽभिधीयते॥ जडस्य भाव। इमनिच्॥

जडुल। पु। जटुले॥ जलति। जल। वाऽचुलच्। डलयोरैक्यम्॥

जतु। न। अलक्ते। लाक्षायाम्॥ जायते। जनी०। फलिपाटीत्यु तोन्तादेशश्च॥

जतुकम्। न। हिङ्गुनि॥ लाक्षायाम्॥ जटुले॥ अल्पिष। इवेप्रतिकृताविति कन्॥

जतुका। स्त्री। अजिनपत्रायाम्। चर्मचटिकायाम्॥ गन्धद्रव्यविशेषे। जन्याम्॥ पर्पट्याम्॥ मालवदेश प्रसिद्धे लताविशेषे। तिर्यक्फलायाम्। निशान्धायाम्। जनेष्टायाम्॥ कन्नन्तात टाप्॥

जतुकारी। स्त्री। जतुकालतायाम्॥

जतुकृत्। स्त्री। ज य म। चक्रवर्तिन्याम। गन्धद्रव्यविशेषे। चकवत इति २ ष्ठा॥ जतुकरोति। क्विप्॥

जतुकृष्णा। स्त्री। पर्प्यट्याम्॥

जतुनी। स्त्री। चर्मचटिकायाम्॥

जतुरसक। पु। नये। कृतोपकरणभेदे। पापकगुटिकायाम्॥

जतुमणि । पु । चुद्ररोगविशेषे ॥ यथा । सममुत्सन्नमरुज मण्डलकफर क्तजम । सहज लक्ष्मचैकेषां लक्ष्यो जतुमणिस्तु स ॥ इतिनिदानम् ॥

जतुरस । पु । अलक्तके ॥

जतूका । स्त्री । अजिनपत्रायाम् ॥ जनीवृक्षे । चकवत इतिभाषाप्रसिद्धे ॥ जायते आरोग्यमनया । जनी० । जतूकादयश्चेति निपातनात् क्वचिद्दकिङिन्त्यपिनलोप ॥

जत्रु । न । स्कन्धकक्षयो सन्धौ । कण्ठस्याधोभागे स्थितयोरस्नोः ॥ कक्षयोर्वक्षस सन्धौ जत्रुणी समुदाहृते ॥ जायते बाहुरस्मात् । जनी० । जत्वादित्वात् रुप्रत्ययोनकारस्यत-कारश्च ॥

जत्वश्मकम् । न । शिलाजतुनि ॥

जन । पु । लोके ॥ पृथग्जने । पामरे ॥ आत्मीयविवेकहीने ॥ महर्लोकोर्द्धे लोके ॥ जनो ऽष्टकोऽव्यवच्छिन्न पितृजङ्गजनाश्रय ॥ जनम जन, जन्म । भावेघञ् । जनिवध्योश्चेतिनवृद्धि ॥ समुद्रस्य दैत्यविशेषेषु ॥ भार्कराक्ये मुनौ ॥

जनक । पु । पितरि ॥ मिथिलाधिपेविदेहे ॥ काश्यप ॥ जनयति । जनीप्रादुर्भावे । ण्वुल् । जनिवध्यो श्चेतिनवृद्धि ॥ पि । उत्पादयितरि ॥

जनकतनया । स्त्री । } सीतायाम् ॥
जनकनन्दिनी । स्त्री । }

जनकराजकूप । पु । तीर्थविशेषे ॥

जनकसुता । स्त्री । जानक्याम् ॥

जनकात्मजा । स्त्री । श्रीरामपत्न्याम् । सीतायाम ॥ जनकस्य आत्मजा ॥

जनकारी । पु । अलक्तके ॥ नाम्नो ऽयम् ॥ इतिराजनिर्घण्ट ॥

जनङ्गम । पु । चण्डाले ॥ अधार्मिकान् जनान् गच्छति । जनेभ्यो गच्छतिवा । गमश्चेति खच् मुमागम' ॥

जनता । स्त्री । जनानां समूहे ॥ ग्रामजनबन्धुभ्यस्तल् । तदन्त स्त्रियाम् ॥ जनत्वे ॥ भावेतल् ॥

जननम् । न । वंशे ॥ जन्मनि ॥ जन्यते । जनी० जनजनने वा । ल्युट्' । कर्मणिल्युट् ॥ दीक्षयाध्वरेष जमान स्यजन्मनि ॥ पुनर्वा एतमृत्विजो गर्भं कुर्वन्तिये दीक्षयन्तीत्यादिश्रुते । मातुरग्रे ऽधिजनन द्वितीय मौञ्जिबन्धने । तृतीय यज्ञदीक्षाया द्विजस्य श्रुतिचोदनादितिमनुस्मृतेश्च ॥

जननि । स्त्री । जनीनामगन्धद्रव्ये ॥

जननी । स्त्री । मातरि । प्रस्वाम् ॥ दयायाम् ॥ कटुकायाम् ॥ मञ्जिष्ठायाम् ॥ अलक्तके ॥ जटामांस्याम् ॥

जनीनामगन्धद्रव्ये ॥ जनयति । ज नी० कृत्यल्युटो बहुलमितिल्युट् । टित्वात् ङीप् ॥

जनपद । पु । देशे । नीवृति ॥ जन.प पद्यं वस्तु यत्र ॥ जने ॥

जनपदी । पु । जनपदस्वामिनि ॥

जनप्रवाद । पु । कौलीने । वचनीय तायाम् । लोकापवादे ॥

जनप्रिय' । पु । धान्यके ॥ शोभाञ्जने ॥ त्रि । जनानां प्रीतिविषये ॥

जनमेजय । पु । परीक्षितराजस्य पुत्रे । पारीक्षिते ॥ पुरुराजपुत्रे ॥ जनमे जयति । शब्रन्तादेजेः कर्त्तरिखश् । जनशमुमागम. ॥

जनयिता । पु । ताते । पितरि ॥ जनय ति । जनी । तृच् ॥

जनयित्री । स्त्री । जनन्याम् । मातरि ॥ तृजन्तात् । ऋन्नेभ्योङीप् ॥

जनरव' । पु । लोकवादे ॥ यथा । परी वाद स्तथ्यो भवति वितथोवापि म हतां तथा प्युच्चैर्धाम्नां हरतिमहि मान जनरव । तुलोत्तीर्णस्यापि प्र कटनिहताशेषतमसो रवेस्तादृक्- तेजो नहिभवति कन्यां गतवत ॥ इति वत्सराजेन ॥

जनलोक' । पु । महर्लोको परिभुवने । महर्लोकः स्थितेहूर्द्ध मेककोटि

प्रमाणत । कोटिद्वयेन संख्यातो जनोभूर्लोकतोजने ॥ निवसन्त्यम ला यत्रमानसा ब्रह्मणा सुताः । सन न्दनाद्या योगीन्द्रा सर्वेतेचूर्द्धरेत स इतिकाशीखण्डम् ॥

जनवल्लभ । पु । श्वेतरोहितवृक्षे ॥ त्रि । लोकप्रिये ॥

जनवाद. । पु । जनप्रवादे ॥

जनवार्त्ता । स्त्री । लोकानां किंवद न्त्याम् ॥

जनश्रुति । स्त्री । सत्यान्मृतसाधारण लोकप्रसिद्धौ । किंवदन्त्याम् ॥ जने भ्य श्रूयते । श्रुश्रवणे । क्तिन् ॥

जनस्थानम् । न । दण्डकारण्ये ॥ दण्ड कारण्यस्थाश्रिके स्थानविशेषे ॥

जनातिग' । त्रि । लोकातिशयिनि ॥ जनमतिगच्छति । गम० । अन्यत्रा पीतिड ॥

जनान्त । पु । देशे । जिला इति पार स्य भाषा ॥ इति धनञ्जय' ॥

जनान्तिकम् । न । अप्रकाशे । अगोच रे ॥ त्रिपताकाकरेणाऽन्यानपवार्य त्तिये कथाम् । अन्योन्यामन्त्रणं यत् स्या ज्जनानातज्ज नान्तिकम् ॥

जनार्द्दन । पु । नारायणे । विष्णौ ॥ सर्वै साधुभिर्जनैः स्वाभिलषिताभ्युद यनि श्रेयससिद्धये अर्द्यते याच्यते

इति व्युत्पत्तौ अर्द्देर्यौ अर्थात् क्र्यल्युटो बहुलमिति कर्मणिल्युट् ॥ यद्वा । जनन जन जन्म । तमर्दय ति इति जनार्दन । अर्द्दहिंसायाम् । नन्द्यादित्वाल्ल्यु ॥ जना समुद्र स्थादैत्यभेदा तेषामर्द्दन इतिवा॥ जनान् दुर्जनान अर्दयति हिनस्ती तिवा ॥

जनाग्रन । पु । हके ॥

जनाश्रय । पु । मण्डपे ॥ जनानालो काना माश्रय. ॥

जनि । स्त्री । उत्पत्तौ । अभूतप्रादुर्भा वे ॥ नाऽसतो जन्मनायोग सत सत्त्वान्नचेष्यते । कूटस्थेविक्रियाना स्ति तस्माद् ज्ञानतोजनि ॥ जनन म् । जनी०। जनिघसिभ्यामिण् । ज निवध्योश्चेति वृद्धिनिषेध ॥

जनित । त्रि । उत्पादिते ॥

जनित्र' । पु । पितरि ॥ जायतेऽस्मा त् । जनी०। जनिदेश्यादिना जने रित्वन् । जनित्रौ मातापितरौ ॥

जनित्रा । स्त्री । मातरि ॥ टाप् ॥

जनिनीलिका । स्त्री । महानील्याम्॥

जनिमा । पु । जन्मनि ॥ जायते । ज नी०। जनिमृङ् भ्यामिमनिच् ॥

जनी । स्त्री । सीमन्तिन्याम् ॥ वध्वाम् । स्नुषायाम् ॥ जायते गर्भो वस्त्रोवा ऽस्याम् ॥ उत्पत्तौ ॥ ओषधीभेदे । जतूकायाम् ॥ जायते आरोग्यमन या । जनी०। जनिघसिभ्यामितीण् । जनिवध्योश्चेति नवृद्धि । कृदिका रादितिङीष ॥

जनु० । न । जन्मनि ॥ जननम् । जनी० । जनेरुसि ॥

जनू । स्त्री । जनने । जन्मनि ॥

जनेष्ट । पु । मुद्गरवृक्षे ॥

जनेष्टा । स्त्री । जतुकायाम् ॥ जातीपु ष्पे॥ वृद्धिनामौषधौ ॥ हरिद्रायाम्॥

जनोदाहरणम् । न । यशसि ॥

जनौ । पु । जनरक्षके ॥ जनान् अव ति । अव० । क्षोरित्यूठ् । वृद्धि । ग्लौवत् ॥

जन्तु । पु । प्राणिनि । जननशीले ॥ अविद्यादि हृदयग्रन्थिभिर्युते ससारि णि । वस्तुस्वरूपादर्शिनि ब्रह्मादिस्त म्बपर्यन्ते प्राणिजाते ॥ जायते । ज नी० । कमिमनिजनीति तु ॥

जन्तुकम्बु । पु । कृमिशङ्खे ॥

जन्तुका । स्त्री । नाडीहिङ्गुनि । राम ठ्याम् ॥ लाक्षायाम् ॥

जन्तुघ्न । पु । वीजपूरे ॥ न । विडङ्गे॥ हिङ्गुनि ॥ त्रि । जन्तुघातिनि ॥

जन्तुघ्नी । स्त्री । विडङ्गे ॥

जन्तुनाशनम् । न । हिङ्गुनि ॥ विडङ्गे ॥

जन्तुपादप । पु । कोषाम्रवृक्षे ॥

जन्तुफल । पु । उदुम्बरे॥जन्तव फलेऽस्य

जन्तुमारी । स्त्री । निम्बूके ॥

जन्तुका । स्त्री । काश्मलके ॥

जन्तुहन्त्री । स्त्री । विडङ्गे ॥

जन्म. । पु । न । जन्मनि ॥ जननम् । इ षुयुधीति वाहुलकात् जनेर्मक् ॥

जन्मकील । पु । हरौ ॥

जन्मद । पु । पितरि ॥

जन्मदा । स्त्री । मातरि ॥

जन्म । न । आद्यक्षणसम्बन्धे । उत्पत्तौ ।जनने ।शुभाशुभकर्मवशात् पौन पुन्येनतत्तद्विविधयोनिषुद्भवे । गर्भ वासयोनिद्वारनिस्सरणरूपे विग्रह भेदग्रहणे॥ वासना कर्म विद्याच्च यय जन्मप्रयोजकम् ॥ उक्तञ्च सारकलि कायाम् । गर्भात् कोटिगुणं दुःख योनियन्त्रनिपीडने । सम्मूर्च्छितस्य जठराज्जायमानस्यदेहिन ॥ जाय मान पुरीषासृङ्मूत्रशुक्राविलान न ।प्राजापत्येन वातेन पीड्यमाना स्थिवन्धन ॥ अधोमुखो वैक्रियतेप्र बलैः सूतिमारुतैः । क्लेशान्निष्क्रा न्तिमायातिजठरान्मातु रातुर इति ॥ प्रेत्यभावे ॥ सच अपूर्वदेहेन्द्रि यादिसम्बन्ध । निकायविशिष्टाभिर पूर्वाभिर्देहेन्द्रिय मनो ऽहङ्कारबुद्धि वेदनाभि पुरुषस्याभिसम्बन्धो जन्म । ननु पुरुषस्य परिणाम तस्यापरि णामित्वात् । जन्मात्र नासत सम्भ किन्तु देहेन सयुति । प्रादुर्भावो जनेरर्थ सतएवसयुज्यतेइत्युक्त ॥ प्रथमतारायाम् ॥ जननम जायते-वा । जनी० । मनिन् ॥

जन्मवन्धविनिर्मुक्त । त्रि । जन्मात्मके न वन्धेन विशेषेणात्यन्तिकत्वेनचयो न निरवशेषं त्यक्ते ॥

जन्ममास । पु । जन्मनोमासे ॥ आर भ्य जन्मदिवस यावत् त्रिंशद्दिनभवे त् । जन्ममास' स विज्ञेयो वर्जित सर्वकर्मसु ॥

जन्मर्क्षम् । न । जन्मनो नक्षत्रे ॥

जन्मवर्त्म । न । योनौ । भगे ॥ जन्म नोवर्त्म ॥

जन्मान्तरम् । न । परलोके । भवान्त-रे । अमुष ॥

जन्माष्टमी । स्त्री । श्रीकृष्णस्य जन्मति थौ ॥ सातुमुख्यचान्द्रेण श्रावणस्य कृष्णाष्टमी। गौणचान्द्रेण भाद्रस्य कृ ष्णाष्टमी ॥ अथ भाद्रपदे मासि कृ ष्णाष्टम्यां कलौयुगे । अष्टाविंशति मे जात कृष्णोऽसौदेवकी सुत ॥

जन्मी । पु । प्राणिनि ॥ जन्मो ऽस्या स्ति। अस्त्यर्थे ॥ जन्मा ऽस्यास्ति वा।

श्री॰ इति ॥

जन्मेजय । पु । जनमेजये राज्ञि ॥ जन्मनैवातिशुद्धेन शत्रूनेजितवान् यतः । एजृकम्पनेधातोर्हि जन्मेजयइतिश्रुतइतिनिरुक्तिः ॥ शकन्ध्वादित्वात् पररूपम् ॥

जन्य । पु । जनके ॥ न । हट्टे ॥ परीवादे । कौलीने ॥ युधि । सङ्ग्रामे ॥ त्रि । उत्पाद्ये ॥ जनकस्य स्वभावो-हि जन्येतिष्ठति निश्चितम् । यथा श्रीकृष्णपादाङ्कं कालीयवशमस्तके ॥ नवोढाज्ञातिमित्रभृत्येषु ॥ नववरस्यज्ञातिमित्रभृत्येषु ॥ वरस्निग्धे । जामातृवत्सले ॥ देहे ॥ जननम् । जनेर्यक् ॥ जायते वा । भव्यगेये तिसाधु ॥ यद्वा । जायते जनयति वा । अचोयत् तकिशसिचतियति जनिभ्योयद्वाच्य । जनेर्यद्विधि स्वरार्थं । ऋहलोर्ण्यदिति ण्यतापिरूपसिद्धे । नचवृद्धिप्रसङ्ग जनिवध्योश्चेतिनिषेधात् ॥ जनस्यजल्प भतजनहलादितियत् ॥ यद्वा । जनींवधूं वहति प्रापयति । संज्ञायामितिसाधु ॥

जन्या । स्त्री । मातृवयस्यायाम् ॥ मुदि । प्रीतौ ॥ जायतेऽस्याम् । जनयति वा । यदन्तात यदन्ताद्वा टाप् ॥

जन्यु । पु । प्राणिनि ॥ अग्नौ ॥ धातरि । परमेष्ठिनि ॥ जायते । जनी॰ । यजिमनिशुन्धिदसिजनिभ्योयुच् ॥

जप । पु । श्रुतिमन्त्राद्यावृत्तौ ॥ जपस्तन्त्राद्युक्तः ध्येयसम्मुखीकरणमुने । मानसस्यान्तसङ्कल्परूपस्य उपांशुसञ्ज्ञकस्यच स्वसंवेद्यलघुध्वनेर्भाष्यस्यच श्रूयमाणस्यमन्त्रस्य ध्येयसम्मुखीकरणायावर्त्तने ॥ मन्त्रार्थोज्ञाने जपस्य फलाजनकत्वमुक्तंतन्त्रशास्त्रे । यथा । यथापशुर्भारवाही न तस्य भजते फलम् । तथैवार्थानभिज्ञो न जपस्यफलमश्नुतइति ॥ स्वाध्याये ॥ जपनम् जप्यतेवा । जपमानसेच । व्यधजपोरनुपसर्गइत्यप् ॥

जपनम् । न । जपे ॥

जपपरायण । पु । जपनशीले । जपासक्ते ॥

जपा । स्त्री । जवावृक्षे ॥ जपालङ्गुशाहि स्त्री केश्या त्रिसन्ध्याकफवातजित् ॥ जपति । जप॰ । पचाद्यच् । टाप् ॥

जप्यम् । त्रि । अघमर्षणादौ ॥ जप्यते । जप॰ । पोरदुपधादितियत् ॥

जप्येश्वर । पु । सिद्धस्थानविशेषे ॥ यथा । जप्येश्वरे महास्थानेशङ्करीच त्रिशूलिनो । त्रिशूलीशङ्करस्तत्रसर्वपापविमोचक इति ॥

जबाला । स्त्री । सत्यकामस्यर्षेर्मातरि ॥

जमज. । त्रि । यमजे ॥

जमदग्नि । पु । परशुरामपितरि । ऋचीकमुनिपुत्रे भृगुवंशजे यमदग्नि मुनौ ॥

जमनम् । न । भोजने ॥ जमुअदने । ल्युट् ॥

जम्पती । पु । सद्दोक्त्या जायापत्यो ॥ जायाच पतिश्च राजदन्तादिगणे पाठात् जायाशब्दस्य जमभावोनिपात्यते ॥ नित्यंद्विवचनान्त ॥

जम्बाल । पु । शैवाले ॥पङ्के॥ जमति । जमु० । बाहुलकादालन् ॥ यद्वा । जम्बअदने इति धातु । भावे घञ् । जम्बलाति । लादाने । आतोनुपेतिक । पृ० ॥

जम्बालिनी । स्त्री । नद्याम् । शैवलिन्याम् ॥

जम्बीर । पु । जंभोरीइति जमटुइतिच पर्वतीयभाषाप्रसिद्धे दन्तशठे । जम्बीरे । जम्भले ॥ जम्बीरं मुष्णं गुर्वम्लं वातश्लेष्मविबन्धनुत् । शूलकासकफक्लेशच्छर्दितृष्णामदे पजित् ॥ आस्यवैरस्यहृत्पीडा वह्निमान्द्यकृमीन् हरेत् । स्वल्पजम्बीरिकातद्वत्तृष्णाच्छर्दिनिवारिणी ॥ प्रश्नपुष्पे । मरुवा इतिख्याते ॥ अर्जके ॥ सितार्जके ॥ जम्यते । जमु० । गम्भीरा

इयश्चेति ईरन्प्रत्ययान्त साधु. ॥ यद्वा । जम्यते । क्विप् । वीरयति । वीरविक्रान्तौ । अच् । जम्चासौ वीरश्च ॥

जम्बु । स्त्री । जामनइति प्रसिद्धे वृक्षे । सुरभिपत्रायाम् । नीलफलायाम् ॥ मेरुसरिति ॥ जम्बुद्वीपे ॥ जम्बुद्वीपक्षितेर्नाभिस्तद्वृत्तं लक्षयोजनम् । क्षाराब्धिना परिवृत परिक्षेत्रेण तावता ॥ न । जम्बूफले । जाम्बवे ॥ जमति । जमु० । कम्बद्दन्नभूजम्बू इत्यादिना कू प्रत्ययो वुगागमश्च निपातित । बाहुलकात् ह्रस्व ॥ फलेलु जम्ब्वाः फलम् । जम्ब्वा वेत्यणोऽभावे ओरञ् । फलेलुक् । ह्रस्वोनपुंसके ॥

जम्बुक । पु । जम्बूकार्थेषु ॥ गोलापजाम इति गौडभाषाप्रसिद्धे वृक्षे ॥ श्योनाकप्रभेदे ॥ जमति । जमु० । मृगय्वादयश्चेतिसाधु ॥ शृगाले ॥

जम्बुद्वीप । पु । न । भूमेःसप्तद्वीपान्तर्गते द्वीपविशेषे । जम्बूद्वीपे ॥

जम्बुमार्ग. । पु । तीर्थविशेषे ॥

जम्बुल । पु । जम्बूले ॥

जम्बुवनजम् । न । श्वेतजवापुष्पे ॥

जम्बू । स्त्री । सेवतरङ्गिण्याम् ॥ नागदमन्याम् ॥ जामनइति प्रसिद्धे वृक्षे । राजफलायाम् । सुरभिपत्राया

म् ॥ सा बृहत्क्षुद्रभेदेन द्विविधा । तत्र बृहत्याः पर्य्यायाः । महाजम्बूः महापत्रा राजजम्बूः बृहत्फला फलेन्द्रः नन्दः महाफला सुरभिपत्रा चेति ॥ विष्टम्भित्वं रोचनत्वं गुरुत्वञ्च फलेगुणाः ॥ क्षुद्रायाः पर्य्यायाः । सूक्ष्मकृष्णफला दीर्घपत्रा मध्यमा ॥ अत्रैव वनजम्बूपर्य्यायाः । भूमिजम्बूः काकजम्बूः नादेयी शीतपल्लवा सूक्ष्मपत्रा जलजम्बुका ॥ फलगुणाः । जम्बूः सङ्ग्राहिणी रूक्षा कफपित्तास्रदाहनुत् ॥ जम्ब्वा फले । जम्बुनि । जाम्बवे ॥ जम्बूद्वीपे ॥ जमति । जमु० । अन्दूदृन्भू जम्बूकफेलूकर्कन्धूदिधिषू रित्युणादि सूत्रेण कूप्रत्ययो बुगागमश्च निपातित ॥ जायते वा । जनेर्वा तौ तेनैव निपातितौ ॥ फले तु जम्ब्वा फलम् । जम्ब्वा वेत्यणोऽभावपक्षे ओरञ् । तस्य लुप्चेति लुप् । लुपि युक्तवत् ॥ जम्बुद्वीपे ॥

जम्बूक । पु । फेरवे । शृगाले ॥ नीचे ॥ पश्चिमाशापतौ । वरुणे ॥ गुलापजामन इति प्रसिद्धे फलवृक्षे ॥ श्योनाकभेदे । जमति । जमु० । उलूकादित्वात् साधुः ॥

जम्बूका । स्त्री । काकलीद्राक्षायाम् । निर्बीजायाम् । रसाधिकायाम् ॥

जम्बूद्वीपम् । न । पु । भूमेः सप्तद्वीपान्तर्गते द्वीपविशेषे ॥ यथा । भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं जम्बूद्वीपं प्राहुराचार्यवर्याः । अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये क्षारक्षीराद्यम्बुधीनां निवेशः ॥ इति सिद्धान्तशिरोमणिः ॥ पुराणमतेन तु । अयद्वीपः पद्मकोषमध्यवर्त्तिकोषइव लक्षयोजनविस्तीर्णः पद्मपत्रमिव समवर्त्तुलः लक्षयोजनविस्तृतलवणसमुद्रेण वेष्टितः । यस्मिन् प्रत्येकनवसहस्रयोजनायामानि नववर्षाणि तेषाञ्च षीणामष्टौ सीमापर्वताः सन्तीति ॥

जम्बूल । पु । जम्बूविटपे ॥ केतकीवृक्षे । क्रकचच्छदे ॥ न । वरपक्षीयस्त्रीणां परिहासवचने ॥

जम्बूलमालिका । स्त्री । कन्यावरयोर्मुखचन्द्रिकायाम् ॥ जम्बूलानां वरपक्षीयस्त्रीपरिहासवचनानां मालिका श्रेणी ॥ इति हरिवंशटीकायां नीलकण्ठः ॥

जम्भ । पु । दैत्यविशेषे ॥ दन्ते ॥ जम्बीरे ॥ भक्षणे ॥ अंशे ॥ हनौ ॥ तूणे ॥ जम्भयति । जभी गात्रविनामे । पचाद्यच् । रधिजभोरचीति नुम् ॥

जम्भक॰। पु। जम्भार्थेषु॥ जभी॰। ण्वु लट्चाविति ण्वुल्। नुम्॥ स्वार्थे कोवा॥

जम्भका। स्त्री। जृम्भायाम्॥

जम्भग॰। पु। राक्षसविशेषे॥

जम्भद्विट्। पु। इन्द्रे॥

जम्भभेदी। पु। हरिहये। इन्द्रे॥ जम्भमसुरंभेत्तु शीलमस्य। सुप्यजातावितिणिनि॥

जम्भर॰। पुं। जम्बीरे॥

जम्भल। पुं। जम्बीरे॥ वुद्धदेवताविशेषे॥ जम्भयति। जभी॰। वृषादित्वात्कल। रधिजभोरितिनुम्॥

जम्भला। स्त्री। राक्षसीविशेषे॥ यथा समुद्रस्योत्तरेतीरे जम्भला नाम राक्षसी। तस्याः स्मरणमात्रेण विशल्यागर्भिणी भवेदिति॥

जम्भा। स्त्री। जृम्भायाम्॥ इतिराजनिर्घण्ट॥

जम्भारि। पु। इन्द्रे॥ वह्नौ॥ वज्रे॥ जम्भस्यारि॥

जम्भी। पु। जम्बीरे॥ इतिशब्दचन्द्रिका॥

जम्भीर। पु। जंभारी इति ख्याते जम्बीरद्रुमे॥ जम्भयति। जभी॰। गम्भीरादित्वात् ईरन्। रधिजभोरितिनुम्॥

जय। पु। अग्निमन्थे॥ जयन्ते॥ युधिष्ठिरे॥ शत्रुपराङ्मुखीकरणे। विजये। उत्कर्षप्राप्तौ। पराजितापेक्षयोत्कर्षलक्षणे। जीत इति भाषा॥ जयोरन्ध्रप्रहारिणाम्॥ वीररसे॥ नारायणस्य पार्षदविशेषे॥ इक्ष्वाकुवंशजे विजयनन्दनराजे॥ दक्षिणद्वारगृहे॥ अष्टाविंशतितमे वत्सरे॥ क्षत्रियास्तु तथा वैश्या शूद्राश्चनटनर्त्तकाः। पीडिताश्च वरारोहेजये सर्वेनसंशय॥ जयनम् जीयतेऽनेनवा। जि॰। एरच्॥ जयतिवा। पचाद्यच्॥ ग्रन्थविशेषे॥ यथोक्त ब्रह्मचारिकाण्डे भविष्यपुराणे। अष्टादशपुराणानि रामस्यचरितं तथा। विष्णुधर्मादिशास्त्राणिशिवधर्माश्चभारत॥ कार्ष्णंचपञ्चमोवेदो यन्महाभारतंस्मृतम्। सौराश्चधर्म्माराजेन्द्रमानवोक्तामहीपते॥ जयेतिनाम एतेषाम्प्रवदन्तिमनीषिण इति॥

जयकोलाहल। पु। पाशकभेदे॥ जयस्य कोलाहलो यस्मिन्न्॥ जयध्वनौ॥

जयढक्का। स्त्री। जीतकाडङ्का इति भाषा प्रसिद्धे वाद्यविशेषे॥

जयदत्त। पु। इन्द्रपुत्रे। पाकशासनौ॥

जयद्रथ । पु । सिन्धुराजे ॥

जेयनम् । न । तुरङ्गादिसन्नाहे ॥ जये ॥ जिजये । ल्युट् ॥

जयनी । स्त्री । इन्द्रसुतायाम् ॥

जयन्त । पु । इन्द्रपुत्रे । पाकशासनौ ॥ भीमे ॥ चन्द्रे ॥ शिवे । शम्भौ ॥ ॥ कृष्णानुजे ॥ ध्रुवकविशेषे ॥ तल्लक्षणं यथा । आदिताले जयन्त स्यात् शृङ्गाररससंयुत । षड्सख्याचरपद आयुर्वृद्धिकर परइतिदामोदर ॥ जयति । जि॰ तृभूवह्विवसीत्यादि नाझच् । झोन्त ॥ तीर्थविशेषे ॥

जयन्तिका । स्त्री । हरिद्रायाम् ॥ जायती त्वगितिच प्रसिद्धद्रव्ये ॥

जयन्ती । स्त्री । जयायाम् । तर्कार्याम् ॥ नादेय्याम् ॥ अस्यागुणा । मदगन्धयुक्तत्वम् । तिक्तत्वम् । कटुत्वम । उष्णत्वम् । कृमिभूतनाशित्वम् । कफठविशोधनत्वम् । तथकृष्णारसायनी । इतिराजनिर्घण्ट ॥ उमायाम् । गौर्याम् ॥ इन्द्रपुत्र्याम् ॥ पताकायाम ॥ जीवन्त्याम् ॥ योगविशेषे ॥ यथा । जय पुण्यञ्चकुरुतेजयन्तीमिति ताविदु । रोहिणी सहिताकृष्णा मासेच श्रावणे ऽष्टमी ॥ अर्द्धरात्रादधश्चोर्द्धं कलयापियदाभवेत् । जयन्तीनामसा प्रोक्ता सर्वपापप्रणाशिनी ॥ याचायोगविशेषे ॥ यथा । यच स्वोच्चगतश्चन्द्रो लग्नादेकादशे स्थित । जयन्तानामयोगोय शत्रुपक्षविनाशकृत् ॥ जयति । जि॰ । तृभूवह्विवसि भासि साधि गडि मण्डि जिनन्दिभ्यश्चेति झच् सच षित् । झोन्त । षित्वात् ङीष् ॥

जयपत्रम् । न । डिक्री इति डिगरी इतिच इङ्ग्रेजभाषा प्रसिद्धे विजयपत्रे । विवादविषयकजयबोधकलिपौ ॥ यथा । यदृत्त व्यवहारान्तु पूर्वपक्षोत्तरादिकम् । क्रिया ऽवधारणोपेत जयपत्रे ऽखिल लिखेत् ॥ पूर्वोत्तर क्रियायुक्त निर्णयान्त यदा न्टप । प्रदद्याज्जयिने लेख्य जयपत्र तदुच्यते इति ॥ अश्वमेधीययज्ञघोटककपालबद्धाया लिपौ ॥ यथा । त्रैलोक्य विजयी रामो रावणान्तकर प्रभु । तदीक्षितो वाजिमेधे तस्याय प्रोक्षित पशु ॥ पालितो लक्ष्मणेनैव सुलक्षणविलक्षित । सम्पूज्यश्चपरित्याज्य सर्वैरितिचसत्कृताम् ॥ इतिवाशिष्ठरामायणम् ॥

जयपाल । पु । दन्तीवीजे । सारके । जमालगोटा इति भाषा ॥ विधातरि ॥ विष्णौ ॥ न्टपे ॥ इतिशब्दरत्नावली ॥

जयपुत्रक । पु । पाशकविशेषे ॥

जयमङ्गल । पु । ज्वरघ्ने औषधविशेषे ॥ राजवाह्ये हस्तिनि ॥ ध्रुवकविशेषे ॥ यथा । चतुर्विंशतिवर्णाङ्घ्रि' कथितोजयमङ्गलः । शृङ्गारवीरयोरेव ताले चाँचपुटेषसद्दति ॥

जयवाहिनी । स्त्री । शच्याम् । इन्द्राण्याम् ॥ वाचस्पतौ तु इन्द्राणी चेन्द्राणी जयवाहिनीतिरभस. ॥ जयवाहिनीतिपाठान्तरम् ॥ म.स्त्र्याम् ॥ जय सैन्ये ॥ जयस्य वाहिनी ॥

जयशेखर । पु । स्वर्क्षमूलत्रिकोणोच्च स्थानगोयदिगीष्पति । जयशेखर-योगोय नानाऽभितफलप्रद इतिवर्णिते याचायोगे ॥

जया । स्त्री । जयन्त्याम् ॥ तिथिविशेषे । त्रयोदश्यष्टमीचैव तृतीयाचजया स्मृता ॥ पथ्यायाम् । हरीतक्याम् ॥ उमायाम् । दुर्गायाम् ॥ व्युत्पत्ति र्यथा । जय कल्याणवचनो ह्याकारोदातृवाचक. । जयंददातियानित्य साजयापरि कीर्त्तितेति ब्रह्मवैवर्त्तपुराणम् ॥ दुर्गायाः सख्याम् ॥ बुद्धशक्तिविशेषे । ताराायाम् ॥ गणिकारिकायाम् । अग्निमन्थवृक्षे ॥ विजयायाम् । भङ्गायाम् ॥ पताकाविशेषे ॥ नीलदूर्वायाम् ॥ शाल्मलिवृक्षे ॥ जयति । जि० । पचाद्यच् । टाप् ॥

जयारव । पु । वन्दिनांजयजयेतिशब्दे ॥

जयावहा । स्त्री । भद्रदन्तीवृक्षे ॥

जयाश्रया । स्त्री । जरडीतृणे ॥

जयाह्वा । स्त्री । भद्रदन्तीवृक्षे ॥

जयी । त्रि । जययुक्त । विजयिनि ॥ जेतुंशीलमस्य । प्रजोरिनिरित्यधिकारे जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्चेति इनि ॥

जय्य' । त्रि । जेतुंशक्ये ॥ जिजये जि-अभिभवेवा । शकिलिङ्चेति शक्यार्थेयत् । गुण । क्षय्यजय्यौशक्यार्थे इति याऽन्तादेश' ॥

जरठ । त्रि । कर्कशे ॥ पाण्डौ ॥ कठिने ॥ जीर्णे ॥ जीर्यति । जृष्वयोहानौ । वाहुलकादठ. ॥ पु । जरायामितिविश्व ॥

जरडी । स्त्री । तृणविशेषे । गण्डाटिकायाम् । सुनालायाम् ॥

जरण । पुं । न । जीरके ॥ अजाज्याम् । कृष्णजीरके ॥ हिङ्गुनि ॥ सौवर्चले ॥ कुष्ठौषधौ ॥ पु । कासमर्द्दे ॥ जरयति । जृष्° । नंद्यादित्वात् ॥ ल्यु

जरणद्रुम. । पुं । अश्वकर्णवृक्षे ॥

जरणा । स्त्री । कृष्णजीरके ॥

जरन । त्रि । जरातुरे । वृद्धे ॥ पुराण

ने ॥ जीर्यति । जृष्० । जीर्यतेर
तृन् ॥
जरती । स्त्री । जीर्णायाम् । वृद्धायाम्
॥ उगितश्चेतिङीप् ॥
जरत्कार । पु । जरत्कारुमुनौ ॥
जरत्कारु । पु । मुनिविशेषे । यायाव
रे ॥ इति त्रिकाण्डशेष ॥
जरत्कारु । स्त्री । मनसादेव्याम् ॥
जरत्कारुप्रिया । स्त्री । मनसादेव्याम् ॥
जरद्गव । पु । वृद्धोक्षे ॥ जरन् चासौगौ
श्च । पूर्वकालैकेतिसमास । गोरत
द्धितलुकीतिटच् ॥ गृध्रविशेषे ॥
जरन्त । पु । महिषे ॥ त्रि । वृद्धे ॥ जी
र्यति । जृष्० । जृविशिभ्यांझच् ॥
जरसान । पु । पुरुषे ॥ जीर्यते । जृष्०
। ऋन्दस्यसानच्शुजृभ्यामित्यसानच् ॥
जरा । स्त्री । विस्रसायाम । वय. कृत
श्लथमांसाद्यवस्थाविशेषे । प्रकाश
न्तिते जोनिरोधपरपरिभवादिरू
पायां वलिपलितादिलक्षणायां व
योहानौ ॥ सातुकालकन्या । यथा ।
कालकन्या जरा साक्षात् लोकस्ता
नाभिनन्दति । स्वसार जगृहे मृत्यु
क्षयाय यवनेश्वर ॥ इति श्रीभागव
तम् ॥ एषां भेदप्रभेदेन चतुष्षष्ठि
कजसम्भूता । मृत्युकन्यासुताश्चैव
जरा तस्याश्चकन्यका ॥ जराच भ्रा

जरा

तृभि सार्द्धं भ्रमन्ति भूतलम् ।
एते चोपायवेत्तारं न गच्छन्ति च
सम्मतम् ॥ पलायन्तेच तंदृष्ट्वा वै
नतेय मिवोरगा ॥ चक्षुर्जलञ्च व्या
याम पादाधस्तैलसेवनम् । कर्णेते
लमूर्द्धितैलं जराव्याधिविनाशनम्
॥ वसन्ते भ्रमणं वह्निसेवा ऽस्वमक
रोतिय । बालाञ्चसेवते काले जरा
तं नोपगच्छति ॥ खातशीतोद-
कस्नायी सेवते चन्दनद्रवम् । नोपया
ति जरातञ्च निदाघे ऽ निलसेवि
नम् ॥ प्रावृष्युष्णोदक स्नायीघन-
तोय नसेवते । समयेच समाहा-
री जरातं नोपगच्छति ॥ शरद्रौ
द्र न गृह्णाति भ्रमणं तत्रवर्जये-
त् । खातस्नायी समाहारी जरात
नोपतिष्ठते ॥ खातस्नायीचहेमन्ते
कालेवह्निं निषेवते । भुङ्क्ते नवा
न्नमुष्णञ्चजरात नोपगच्छति ॥ शि
शिरे ऽ शुकवह्निंच नवोष्णान्नञ्चसेव
ते । य एवोष्णोदकस्नायी जरातनो
पगच्छति ॥ सद्योमास नवान्नञ्च
वालस्त्रीक्षीरभोजनम् । घृतञ्चसे
वते योहि जरा त नोपगच्छति ॥
भुङ्क्ते सदन्नं क्षुत्काले तृष्णायांपीय
तेजलम् ॥ । नित्यं भुङ्क्ते चताम्बू
लं जरा त नोपगच्छति ॥ दधिहैय

क्षीनञ्च नवनीत तथा गुडम् । नित्यं भुङ्क्ते सयमीयो जरांतनैव गच्छयि ॥ शुष्कमास स्त्रियो वृद्धा बालार्क स्तरुण दधि । त सेवन्तंजरा याति प्रहृष्टाभ्रातृभि सह ॥ रात्रौ येद्धिसेवन्ते पुंश्चलीञ्च रजस्वलाम् । तमुपैति जरा हृष्टाभ्रातृभि सह सुन्दरि इतिब्रह्म वैवर्त्तपुराणे ब्रह्मखण्डम् ॥ अस्याऔषधं यथा । पलाशचूर्णं समधु गव्याज्यामलका न्वितम् । सविडङ्गं पीतमार्षं नरकु र्यान्महामतिम् ॥ मासैकेन महा देव जरामरणवर्जित ॥ पलाशवीज सद्दतिलम ध्वन्वित समम् । स मार्ष भक्षित रुद्र जरां नयति सत्त्व यमिति गारुडे १९६ अध्याय ॥ कौरिकाहत्ते ॥ राक्षसीविशेषे ॥ यथा । अन्यस्यामपिभार्यायां शकले द्वद्वद्वयात् । तेमात्रावहिरुत्सृष्टे जरयाचाभिसन्धिते ॥ जीवेत्यनया । जूष्° । षिड्गिरादिभ्योङ् । ऋदृशो ङिगुण ।टाप् ॥ याचभार्याविरूपा चौकश्मला कलहप्रिया । वचनोत्त रवक्रोच साजरान जराजरेति चा ख्यम् ॥

जरातुर । त्रि । जर्जरे । जरारोगग्रस्ते ॥

जरापुष्ट । पु । जरासन्धे ॥

जराभीरु. । पुं । मदने । कामदेवे ॥ त्रि । जराभयशीले ॥

जरायणि. । पु । जरासन्धे ॥

जरायु । पु । उल्वे । गर्भाशये । गर्भावरणचर्मणि ॥ येनवेष्टितो गर्भ कुक्षौतिष्ठतिसजरायु ॥ यातुचर्माकृतिः सूक्ष्माजरायु सानिगद्यतेइति भगवतीगीतोक्ते. ॥ जटायौ पक्षिराजे ॥ जरामेति । किञ्चरये श्रिया इतिञुण् ॥

जरायुजः । त्रि । मनुष्यपश्वादौ ॥ पशवश्च मृगाश्चैव व्यालाश्चोभयतोद त ।रक्षांसिच पिशाचाश्च मनुष्याश्च जरायुजा इति मनु ॥ यातुचर्माकृति सूक्ष्मा जरायु सानिगद्यते । शुक्रशोणितयोर्योग स्तस्मिन्सजायतेयत । तत्रगर्भोभवेयस्मात्तेनप्रोक्तोजरायुजइति श्रीभागवतेभगवतीगीता ॥ जरायोजात. । पञ्चम्यामितिजनेर्ड ॥

जरासन्ध । पु । चन्द्रवंशीयेनृपविशेषे । मागधभूपे । वार्हद्रथौ ॥ अन्यस्यामपि भार्यायां शकले द्वे द्वद्वयात् । तेमात्रावहिरुत्सृष्टे जरया चाभिसन्धिते ॥ जीवजीवेति क्रीडन्त्याजरासन्धोऽभवत्सुत इति भागवम् ॥ जरयासन्धितोयस्मात् जरासन्धस

तच्छ्रुत ॥

जरासन्धजित् । पु । भीमसेने ॥

जरी । चि । वृद्धे ॥ इतिहेमचन्द्र ॥

जरूथम् । न । मांसे ॥ स्थमांसे ॥ जीर्यति । जृष्० । जृवृभ्यां मूथन् ॥ पु । असुरविशेषइतिवेदभाष्यम्॥

जर्ज्जरम । न । शैवले ॥ शक्रध्वजे ॥ त्रि । जरातुरे ॥ जीर्णे ॥ जर्जति । जर्जप रिभाषणभर्त्सनयो । वाहुलका दर ॥

जर्ज्जरीक । त्रि । वहुच्छिद्रद्रव्ये ॥ जरातुरे ॥ जर्जति । जर्ज० । पर्फरीकादयश्चेति साधु ॥

जर्ण । पु । चन्द्रे ॥ वृक्षे ॥ जीर्यति । जृष०। हृदज्सीतिनन् ॥ त्रि । जार्णे ॥

जर्त्तिक । पु । जट्ट इतिप्रसिद्धे वाहीकदेशस्थेशूद्रे ॥ यथा । शाकल नामनगर मापगानामनिम्नगा । जर्त्तिका नामवाहीका स्तेषावृत्तं सुनिन्दित मितिभारतेकर्णपर्व ॥

जर्त्तिल । पु । अरण्यतिले ॥ जर्त्तिल काप्यतेसङ्किरराय प्रभवस्तिल ॥

जर्त्तु । पु । योनौ ॥ मतङ्गजे ॥ जायते । जनी० । जनेस्तुरच्च । तु इत्यविभक्तिकोनिर्द्देश । तुप्रत्ययोरेफश्चान्तादेश ॥

जल । त्रि । जडे ॥ न । गोकल्ने ॥

ह्रीवेरे ॥ नीरे । अम्बुनि । तोये ॥ ॥ पञ्चभूतान्तर्गतभूतविशेषएतत् ॥ अस्योत्पत्त्यादयो निरूप्यन्ते ॥ रूपमात्राद्धि कुर्वाणात् तेजसोदैवचोदितात् । रसमात्रमभूत् तस्मादम्भो जिह्वारसग्रह ॥ वर्णशुक्लोरसस्पर्शौ जलेमधुरशीतलौ । स्नेहस्तत्रद्रवत्त्वन्तुसांसिद्धिकमुदाहृतम् ॥ नित्यतादिप्रथमवत् किन्तुदेहमयोनिजम् । इन्द्रियरसनसिन्धुर्हिमादिर्विषयोमत इतिकारिकावली ॥ जलंचतुर्विध प्राहु रन्तरीक्षोद्भव वुधा । धाराज कारकञ्चैव तौषार हैमसित्यपि ॥ हेमन्ते सारस तोय ताडाग वाहित स्मृतम् । हेमन्तविहितं तोय शिशिरेपिप्रशस्यते ॥ वसन्तग्रीष्मयो कौपं वाप्यं वानैर्भरजलम् । नदेयं वारिनादेय वसन्तग्रीष्मयो वुधै । विषवद्गनदञ्चाखा पत्राद्यैर्दूषित यत ॥ औद्भिद वान्तरीक्षवा कौपंवा प्रावृषिस्मृतम् । शस्त शरद्गि नादेय नीर मशूदकपरम् ॥ दिवा रविकरैर्जुष्ट निशिशीतकरांशुभि । चेयमशूदकनाम स्निग्धदोषत्रया पहम् ॥ अनभिष्यन्दि निर्द्दोषमान्तरीक्षजलोपमम् । वल्य रसायनमेध्य शीत लघु सुधासमम् ॥ अन्यच्च

।शरदिस्वच्छमुदयादगस्त्यस्याखिलहितम् ॥ वृद्धसुश्रुतस्तु । पौषेवारि सरोजातं माघेतत्तुतडागजम् । फाल्गुने कूपसम्भूतं चैत्रेचौण्ड्यं हितंमतम् ॥ वैशाखेनैर्झरंनीरं ज्येष्ठेशस्तं तथौद्भिदम् । आषाढेशस्यतेकौप आवणे दिव्यमेवच ॥ भाद्रेकौपपय शस्तं माश्विने चौण्ड्यमेवच । कार्त्तिके मार्गशीर्षेच जलमात्रंप्रशस्यते ॥ पानविधिस्तु । अत्यम्बुपानान्नविपच्यतेऽन्न मनम्बुपानाच्चसएवदोष । तस्मा न्नरो वह्निविवर्द्धनाय मुहु र्मुहु र्वारि पिबेद् भूरि ॥ अल्पाम्बुपानविषयस्तु । अरोचके प्रतिश्याये मन्देग्नौ श्वयथौ क्षये । मुखप्रसेके जठरे कुष्ठेनेत्रामयेज्वरे ॥ व्रणेचमधुमेहेचपिबेत् पानीय मल्पकम् ॥ पानावश्यकन्तु । जीवनजीविनाजीवो जगत्सर्वन्तुतन्मयम् । अतोऽत्यन्ततनाशेपि न कश्चिद्वारिवारयेत् ॥ अन्नेनापिविनाजन्तु प्राणान् धारयते चिरम् । तोयाभावे पिपासार्त्तः क्षणात् प्राणैर्विमुच्यते ॥ हारीतोप्याह । तृष्णागरीयसी घोरासद्य प्राणविनाशिनी । तस्माद्देय तृषार्त्ताय पानीयं प्राणधारणम् ॥ तृषितोमोहमायाति मो

हात् प्राणान् विमुञ्चति । अत सर्वास्ववस्थासु न कश्चिद्वारिवारयेत् ॥ प्रशस्तजलन्तु । अगन्ध मव्यक्तरस सुशीत तर्षनाशनम् । अच्छंलघुचहृद्यञ्चतोय गुणवदुच्यते ॥ निन्द्यंजलम् । पिच्छिल कृमिल क्लिन्नं पर्णशैवालकर्द्दमै । विवर्णं विरस सान्द्रं दुर्गन्ध न हितं जलम् ॥ अतिनिन्द्यजलम् । कलुषं छन्न मम्भोजपर्णनीलीतृणादिभि । दुर्दर्शजमसस्पृष्टं सौरचान्द्रमसांशुभिः ॥ अनार्त्तवं वार्षिकमपि प्रथम तच्चभूमिगम् । व्यापन्न परिहर्त्तव्यंसर्वदोषप्रकोपनम् ॥ तत्कुर्यात् स्नानपानाभ्यां तृष्णाध्मानोदरज्वरान् । कासाग्निमान्द्याभिष्यन्दकण्डूगण्डादिकांस्तथा ॥ दुष्टोदकविर्दोषीकरणोपायस्तु । निन्दितञ्चापिपानीयं क्वथितंसूर्य्यतापितम् । सुवर्णरजतंलोहं पाषाणं सिकतां मृदम् ॥ भृशंसन्ताप्यनिर्वाप्य सप्तधासाधिततथा । कर्पूरजातीपुन्नागपाटलादिसुवासितम् ॥ शुचिसान्द्रपटस्रावं क्षुद्रजन्तुविवर्जितम् । स्वच्छकनकमुक्ताद्यैः शुद्धंस्याद्दोषवर्जितम् ॥ पर्णमूलबिसग्रन्थिमुक्ताकनकशैवलै । गोमेदेनचवस्त्रेणकुर्य्यादम्बुप्रसादनम् ॥ जलस्यपाकाव

धिस्तु । आमलकजीवेति यामना च तद्दुर्भावं मृतशीतलञ्च । तद्दृष्टमात्रन्तु मृतंकदुष्ण पयः प्रपाकेऽपयए वकाख्ला ॥ विशेष पानीये द्रष्टव्य ॥ पूर्वाषाढाख्ये नक्षत्रे ॥ जलति । जलअपवारणे । पचाद्यच् ॥ ईशाने चापिपूर्वस्मिन्पश्चिमेचतथोत्तरे । शिविरस्यजलं भद्रमन्यत्राशुभमेवच ॥

जलकण्टक । पु । शृङ्गाटके ॥ कुम्भीरे ॥

जलकपि । पुं । शिशुमारे ॥

जलकपोत । पु । जलपारावते ॥

जलकरङ्क । पु । नारिकेलफले ॥ अम्बुजे ॥ शङ्खे ॥ जलवतायाम् ॥ मेघे ॥

जलकल्क । पुं । जम्बाले ॥

जलकाक । पु । जलकौवा इति प्रसिद्धे दात्यूहे पक्षिणि । पानीकौडि इतिगौडभाषा ॥ स्निग्धंगुरुहिमन्दर्घ्यं मांसजलपक्षिणान्तु वातहरम् ॥

जलकाङ्क्ष । पुं । हस्तिनि ॥

जलकाङ्क्षी । पु । हस्तिनि ॥ त्रि । जलाऽभिलाषिणि ॥

जलकान्तार । पुं । वरुणे ॥

जलकामुक । पु । कुटुम्बिनीवृक्षे ॥

जलकिराट । पुं । ग्राहे ॥

जलकुक्कुट । पुं । कारण्डवखगे । मद्गौ ॥

जलकुक्कुटी । स्त्री । गङ्गाचिल्लयाम् ॥

जलकुम्भ । पु । कोयष्टिखगे । कौडा पाखी इति गौडभाषा ॥

जलकुन्तल । पुं । शैवाले ॥

जलकुब्जक । पु । पङ्कारे ॥

जलकूपी । स्त्री । कूपमर्त्ते ॥ पुष्करिण्याम् ॥

जलकूर्म । पु । शिशुमारे ॥

जलकेश । पु । शैवाले ॥

जलक्रीडा । स्त्री । नद्यादौवयस्यादिभि सह जलनि क्षेपादिरूपायां खेलायाम् । व्यात्युक्ष्याम् । करपत्रिकायाम् ॥ परितापिषु वासरेषु पयः स्फटलेखाश्रितमांसलैम्भकम् । सुविशोधितनक्रमीनजाल अवगाहेत जल मुहूर्तसमेत ॥

जलगुल्म । पु । जलावर्त्ते ॥ कच्छपे । कमठे ॥ जलचत्वरे ॥

जलज्ञ । पु । ओषधिविशेषे । महाकाले ॥

जलचत्वरम् । न । चद्दरइतिख्याते जलगुल्मे । चातरजल इति गौडभाषा ॥

जलचर । पुं । ग्राहादियादसु ॥ जले चरति । चर० । चरेष्ट ॥

जलचारी । पु । मत्स्ये ॥ त्रि । जलचरमात्रे ॥

जलज । पु । जिज्जलवृक्षे ॥ शैवले ॥ वानीरवृक्षे ॥ शङ्खे ॥ कुपीलौ ॥ क

किंमीनोतु जलजावन्त्याद्दुं मकरस्येति प्रसिद्धराशिषु ॥ मत्स्य ॥ न । पद्मे ॥ शङ्खे ॥ चारविशेषे । लोकारे ॥ त्रि । जलजाते ॥ जलेजात । जनो० । ड ॥

जलजन्तु । पु । यादसि ॥ जलानां जन्तु ॥

जलजन्तुका । स्त्री । जलौकायाम् ॥

जलजन्म । न । पद्मे ॥ जले जन्मास्य ॥

जलजम्बूका । स्त्री । क्षुद्रजम्बाम् । भुमिजामन वनजामन इतिभाषा ॥

जलजिह्व । पुं । नक्रे ॥

जलबिम्ब । पु । शम्बूके । संबुला इति भाषा ॥

जलतण्डुलीय । पु । कञ्चटे ॥

जलतापिक । पु । इल्लीशमत्स्ये ॥ काकचीमत्स्ये ॥

जलतापी । पु । जलतापिके ॥

जलताल । पु । इल्लीशे ॥

जलतिक्तिका । स्त्री । शल्लकीवृक्षे ॥

जलत्रा । स्त्री । छत्रे । अङ्गमकुन्याम् ॥

जलद । पु । मुस्तके ॥ मेघे ॥ त्रि । जलदानकर्त्तरि ॥ जलंददाति । ददाञ्० । आतोनुपेतिक ॥

जलदागमः । पुं वर्षाकाले ॥

जलदाशन । पु । शालवृक्षे ॥

जलदुर्गम् । न । जलदुर्गे ॥

जलद्राची । स्त्री । शालिञ्च्याम् ॥

जलद्रोणी । स्त्री । नौकाया सेकभाजने । अवगाहे ॥

जलधर । पु । मेघे ॥ मुस्तके ॥ तिनिशवृक्षे ॥ समुद्रे ॥ त्रि । जलधारिणि ॥ जलस्यधर ॥

जलधरमाला । स्त्री । मेघपङ्क्तौ ॥ जगतीसंज्ञकद्वादशाक्षरावृत्तभेदे । मोभस्मौ चेज्जलधरमालाब्ध्यष्टै ॥ याभक्तानां कलिदुरितोत्तप्तानां तापच्छेदे जलधरमालानव्या । भव्याकारादिनकरपुत्रीकूले केलीलोलाहरितनुरव्यात् साव ॥

जलधरमालाकाल । पु । वर्षाकाले ॥

जलधि । पु । समुद्रे । रसमाम्नाया अविशेषात् क्षारोदादिसप्तसु ॥ तेच । क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमण्डोदशुद्धोदा. सप्तद्वीपपरिखा इवाभ्यन्तरद्वीपसमाना एकैकश्येन यथानुपूर्वं सप्तस्वपिवहिर्द्वीपेषु पृथक् परितउपकल्पिता ॥ जलानिधीयन्तेऽत्र । डुधाञ्० । कर्मण्यधिकरणेचेतिकि । आकारलोप ॥ दशशङ्खसङ्ख्यायाम् । शतञ्च कोटिषु १०००००००००००००० ॥

जलधिगा । स्त्री । नद्याम् । सरिति ॥ जलधि गच्छति । गम्लृ० । ड. ॥

जलधिजा । स्त्री । लक्ष्म्याम् ॥ जलधौ जाता । सप्तम्या अनेडे ॥ त्रि । अब्धिजमात्रे ॥

जलधेनु । स्त्री । दानार्थकृत्रिमधेनौ ॥

जलनकुल । पु । उद्रे । जलमार्जारे । उद्बिलाव इति भाषा । धाडिया इति गौडभाषा ॥

जलनिधि । पु । उदन्वति । समुद्रे ॥ जलानि नितरां धीयन्तेऽत्र । कर्मण्यधिकरणेचेतिधाञ कि । जलानां निधिरितिवा । नेरुपसर्गस्योपसर्गान्तर निवृत्त्यर्थमुपादानम् ॥

जलनिर्गम । पु । भ्रमे । अम्बुमार्गे ॥ प्राकारगृहभित्त्यादिषु जलनि सरणजालके ॥ नद्यादावध स्थस्यजलस्योर्द्ध्वनिस्सरणे ॥ निर्गमनम् । गम्लृ० । ग्रहवृदृनिश्चिगमश्चेत्यप् ॥ निर्गम्यते ऽनेनवा करणे खनोघञ्चेतिघ । जलाना निर्गम ॥

जलनीलिका । स्त्री । शैवाले ॥ स्वार्थेकन् । ह्रस्व ॥

जलनीली । स्त्री । शैवाले ॥ जलनीलयति । नीलवर्णे । णिच् । कर्मण्यण् ॥

जलन्धर । पु । असुरविशेषे ॥

जलपति । पु । वरुणे । दैत्यदेवे ॥ समुद्रे ॥

जलपवित्रम् । न । संन्यासिनांचिद्रबद्धवस्त्रे ॥ तत्सुविलसितमार्गं शुक्लवस्त्र सर्वदाचमनादौ जलशोधनार्थंच तुष्कोणादौर दिकोणादौरवा भवति॥

जलपारावत । पु । कोपिनि । जलकपोते ॥

जलपित्तम् । न । वह्नौ ॥ जलाना पित्तमिव दाहकत्वात् ॥

जलपिप्पली । स्त्री । जलपीपर इति भाषाप्रसिद्धे पिप्पलीविशेषे । सा कुल्याम् । शारदाम् ॥ जलपिप्पलिका हृद्या चक्षुष्या शुक्रला लघु । संग्राहिणी हिमा रूक्षा रक्तदाहव्रणापहा ॥ कटुपाकरसा रुच्याकषाया वह्निवर्द्धिनी ॥ जलस्य पिप्पलीव ॥

जलपृष्ठजम् । न । शैवाले ॥

जलप्रायम् । न । अनूपे ॥ जलप्रायप्रत्र ॥

जलप्रिय । पु । चातके ॥ मत्स्ये ॥

जलप्लव । पु । उद्रे । जलनकुले ॥

जलफलम् । न । शृङ्गाटके ॥

जलबन्धक । पु । जलमध्यगे स्रोतोभेदकरे दारुशिलादौ । विदारके । कूपके ॥

जलबन्धु । पु । मीने ॥

जलबुद्बुदम् । न । जलविम्बे । बुलबुला बुदुदा इतिच भाषा ॥ यथा ।

मानुष्येकदलीस्तम्भनिस्सारे सारमा र्गणम् । यः करोति स वैमूढोज लबुद्बुदसन्निभे ॥

जलब्राह्मी । स्त्री । हिलमोच्याम् ॥

जलभू । पु । मेघे ॥ जलपिप्पल्याम् ॥

जलमक्षिका । स्त्री । वारिकृमौ ॥

जलमद्गु । पु । मत्स्यरङ्गविहङ्गमे ॥

जलमधूक । पु । जलमहुआ इतिख्या ते मधूकवृक्षप्रभेदे । दीर्घपत्रे । म ङ्गल्ये ॥

जलमसिः । पु । मेघे ॥ इतिहारावली॥

जलमार्ग । पु । प्रणालके । प्रणाल्या म् । पनाला पनारा इतिच ख्याते ॥

जलमार्जार । पु । जलनकुले ॥

जलमुक्-ग् । पु । धूमयोनौ । मेघे ॥ जल मुञ्चति । मुच्लृमोक्षणे । क्विप् ॥

जलमूर्त्ति । पु । शिवे ॥ जलं मूर्त्ति र्यस्य ॥ स्त्री । करकायाम् ॥ जलस्य मूर्त्तिः ॥

जलमोदम् । न । उशीरे ॥

जलयन्त्रम् । न । फुहारा इतिख्याते धारायन्त्रे ॥

जलयन्त्रगृहम् । न । जलमध्यकृतगृहे । जलभवने । जलमहल इति भाषा ॥ समुद्रगृहे । फुहारेकाघरइतिभाषा ॥

जलयन्त्रनिकेतनम् । न । जलयन्त्र गृहे ॥

जलयन्त्रमन्दिरम् । न । समुद्रगृहे । फुहारेकाघरइतिभाषा ॥

जलरङ्क । पुं ।
जलरङ्कु । पु ।
जलरञ्ज । पु । } दात्यूहपक्षिणि ॥

जलरण्ड । पु । जलकणे ॥ इतिहेम ॥

जलरस । पु । लवणे ॥

जलरुण्ड । पु । जलावर्त्ते ॥ पयोरेणौ ॥ भुजङ्गमे ॥ इतिमेदिनी ॥

जलरुट्-ड् । पु । पद्मे ॥

जलरुहम् । न । पद्मे ॥ जले रोहति । रुह० । इगुपधेतिक ॥

जलरूप । पु । मकरे ॥ इतित्रिकाण्ड शेष ॥

जललता । स्त्री । तरङ्गे ॥ इतिहारा वली ॥

जलवराट । पु । जलवसन्ताख्यद्रव्ये । रोगे ॥ पानीवसन्त इतिगौडभाषा ॥

जलवल्कल । पु । कुल्हणे । कुम्भिका याम् ॥

जलवल्ली । स्त्री । शृङ्गाटके ॥

जलवानीर । पु । अम्बुवेतसे ॥ जले जातोवानीरः । शाकपार्थिवादि ॥

जलवायस । पु । मद्गुपक्षिणि ॥

जलवालक । पु । विन्ध्यपर्वते ॥

जलवालिका । स्त्री । विद्युति ॥

जलवास । पु । विष्णुकन्दे ॥ न । उशीरे ॥

जलवाह । पु । मेघ ॥ जलवहति । वहे कर्मण्यण् ॥

जलवाहक । पु । महिषे । जुलामे ॥ जलस्य वाहक ॥

जलविडाल । पु । जलनकुले ॥

जलबिन्दुजा । स्त्री । यावनालीशर्करायाम् ॥

जलबिल्व । पु । कर्कटे ॥ पद्माङ्ग ॥ जलचत्वरे । चातरजल इति गौड भाषा । चहर इतिभाषा ॥

जलविषुवम् । न । आश्विनचिह्निते । तुलासङ्क्रान्तौ ॥ ज्योतिर्विदा चक्र विशेषे ॥

जलविहङ्गम । पु । सलिलकुक्कुटकारण्डवकलहंसादिषु ॥

जलवृश्चिक । पु । चिङ्गटमत्स्ये ॥

जलवेतस । पु । परिव्याधे । वानीर वृक्षे ॥ जलेजातोवेतस । शाकपार्थिवादि । जलजोवेतस शीतस ङ्ग्राहीवातकोपन ॥

जलव्यध । पु । कङ्कचोटमत्स्ये ॥

जलव्याल । पु । अलगर्हेसर्पे । अलाध इतिभाषा ॥ जलस्थो व्याल ॥ क्रूरकर्म्मणि जलजन्तौ ॥

जलशय । पु । विष्णौ ॥ शेते ऽस्मिन् । पुसीतिशीङोघ । जलेशय शय्याऽस्य ॥

जलशयन । पु । विष्णौ ॥ जलेशयनं यस्य ॥

जलशायी । पु । नारायणे ॥

जलशुक्ति । स्त्री । शम्बूके ॥

जलशूकम् । न । शैवाले ॥

जलशूकर । पु । कुम्भीरे ॥

जलसर्पिणी । स्त्री । जलौकायाम् ॥

जलसूचि । पु । कङ्कचोटिमत्स्ये ॥ शृङ्गाटके ॥ शिशुमारे ॥ काके ॥ स्त्री । जलौकायाम् ॥

जलस्तम्भनम् । न । मन्त्रादिना जल गतिवारणे ॥

जलस्था । स्त्री । गण्डदूर्वायाम् ॥

जलहम् । न । स्वल्पजलयन्त्रगृहे ॥

जलहरणम् । न । मात्रावृत्तप्रभेदे ॥ यथा । लघुगुरुकनियमगत मिह फणिपतिमत मवगत मतिसुखनिगदपदम् दशवसुभुवनेर्यति रिह यदि भवतिहि रसिकजन हृदयविहितमदम् । वसुविमलचतुष्कलगणकृतगुणिगणचरणविरामाहितसगणम् क्वचिदपि गुरुसहित भवति कविहित छन्द सुन्दरि जलहरणम् ॥ यथा ॥ उपगम्य निभृततर मभिनवजलधर सुभगसुदर्शनचक्रधरम्- सखिकथयहृदयरुज मुरगराजभुज ममलकमलदलनयनवरम् । अति

कुटिलकठिनशठ मपनय मविशठ दर्शन मपि न ददासि चिरा द्धि राङ्गलनासहशीनवयौवनकान्ति र चिरमिहचिरतरा ॥

जलहस्ती । पु । ग्राहाख्ययादसि ॥

जलहास । पु । समुद्रफेने । फेने ॥ इ लिचिकापण्डश्रेष ॥

जलाकाश । पु । जलस्थाकाशे ॥ यथा । घटावच्छिन्नखे नीरं यत् तत्र प्रति बिम्बित । साभ्रनक्षत्र आकाशो ज लाकाशउदीर्यते ॥

जलाची । स्त्री । जलपिप्पल्याम् ॥

जलाखु । पु । जलप्लवे ॥

जलाञ्चलम् । न । स्वतोवारिनिर्गमे ॥ शैवाले ॥

जलाटन । पु । लोहपृष्ठे । कङ्कखगे ॥

जलाटनी । स्त्री । जलौकायाम् ॥

जलाटक । पु । नक्रराजे । घोंगर-इतिभाषा ॥ न । पोताधाने ॥

जलात्मिका । स्त्री । जलौकायाम् ॥

जलाधार । पु । तडागादिजलाशये ॥ जलमार्गे । आध्रियते ऽस्मिन् । धृङ् अवस्थाने । अध्यायन्यायोद्यावसंहाराधारावायानामुपसंख्यानात् घञ् । जलस्य आधारः ॥

जलाधिदैवत । पु । न । वरुणो ॥ न । पूर्वाषाढानक्षत्रे ॥

जलाम्बिका । स्त्री । कूपे ॥

जलायुका । स्त्री । जलौकायाम् ॥ जल मस्या आयु इत्यर्थे पृषोदरादित्वा त् साधु ॥

जलार्णव । पु । वर्षाकाले ॥ जलस मुद्रे ॥

जलार्द्र । पु । आर्द्रवस्त्रे ॥

जलार्द्रा । स्त्री । याज्ञिकानां जलनवि शेषे । धुविश्रे ॥ धुवित्रं तालवृन्तं स्या दुत्क्षेपव्यजनञ्चतत् । जलेनार्द्रं ज लार्द्रास्यादिति वैजयन्ती ॥ क्लिन्न-वस्त्रे ॥

जलालु । पु । पानीयालौ ॥

जलालुकम् । न । पद्मकन्दे ॥

जलालुका । स्त्री । जलौकायाम् ॥

जलालूकम् । न । शालूके । पद्मादिक न्दे । मृणालमूले ॥

जलालोका । स्त्री । जलौकायाम् ॥

जलावर्त्त । पुं । अम्भसाम्भ्रमे । जल-गुल्मे ॥

जलाशय । पु । तडागादिजलाधारे ॥ शृङ्गाटके ॥ समुद्रे ॥ न । उशीरे ॥ लामज्जके ॥ त्रि । जडाशये ॥ जल माशयो हृदय मस्य ॥ जलमाश्रेते तिष्ठत्यनया । पुसीतिघ ॥ जलेषा शेते वा । अच् ॥

जलाशया । स्त्री । गुण्डालाख्ये ॥

जलाश्रय । पु । वृत्तगुण्डतृणे ॥

जलाश्रया । स्त्री । शूलीतृणे ॥ जला-
कायाम् ॥

जलाष्ठीला । स्त्री । पुष्करिण्याम् ॥

जलाह्वयम् । न । उत्पले ॥

जलूका । स्त्री । जलौकायाम् ॥

जलेचर । पु । हंसमद्गुवकादिजलच
रपक्षिणि ॥ जले चरति । चरेष्ट ।
तत्पुरुषेकृतीत्यलुक् ॥

जलेच्छया । स्त्री । हस्तिशुण्डाहृये ॥

जलेजातम् । न । पद्मे ॥

जलेन्द्र । पु । वरुणे ॥ जम्भले । पूर्वय
चे ॥ महोदधौ ॥ जलाना मिन्द्र ॥

जलेन्धन । पु । वाडवाग्नौ ॥ न । सौ
रविद्युदादितेजसि ॥

जलेरुहा । स्त्री । कुटुम्बिनीहृये ॥

जलेवाह । पु । लुवा इति गोताखोर
इतिचख्याते जातिविशेषे ॥ यथा । ज
लेवाहा नथाहूय वहून्स न्ययोज
यत् । तच्छ्रुत्वा परमं यत्न माप राम
राम न तत् । इति पाद्मे पातालख
ण्डम् ॥

जलेशय । पु । मत्स्ये ॥ जले शेते । शी
ङ् । अधिकरणेशेतेरित्यच् । शय
वासेष्वलुक् ॥

जलेश्वर । पु । वरुणे ॥ समुद्रे ॥ जला
नामीश्वर ॥

जलोका । स्त्री । जलौकायाम् ॥

जलोच्छ्वास । पु । परीवाहे । प्रवृद्धजल
स्य निर्गममार्गे । समधिकजलस्य सर्व
तो वहने वा । समधिकजलस्योपाये
निष्कासने वा ॥ जलानि उच्छ्वसन्त्य
भि । श्वसप्राणने । हलश्चेति घञ् ॥
जलानामुच्छ्वसनं वा । भावे घञ् ॥

जलोदरम् । न । जठरामये ॥ तस्य
निदानादि यथा । य. स्नेहपीतो-
ऽप्यनुवासितो वा वान्तो विरिक्तो
ऽप्यथवा निरूढः । पिबेज्जलं शीतल
माशु तस्य स्रोतांसि दुष्यन्ति हि त
द्वहानि ॥ स्नेहोपलिप्तेष्वथवापि तेषु
दकोदरं पूर्ववदभ्युपैति । स्निग्धम-
हत् तत्परिवृत्तनाभिसमाततं पू-
र्णं मिवाम्बुनाच ॥ यथादृतिः क्षुभ्य
ति कम्पते च शब्दायते चापि दकोद
रन्तत् । जन्मनैवोदरं सर्वं प्राय' कृ
च्छ्रतममतम् । वलिनस्तद्जातान्बु
यत्नसाध्य नवोत्थितमिति ॥

जलोद्धतगति । स्त्री । द्वादशाक्षराया
जगत्या प्रभेदे ॥ यथा । जसौ जस
युतौ जलोद्धतगति । यथा । यदीय
हलतो विलोक्य विपदङ्कलिन्दत
नया जलोद्धतगति । विलासविपिन
विवेश सहसा करोतु कुशलं हली
स जगताम् ॥

जलोद्भवा। स्त्री। लघुब्राह्मयाम् ॥

जलोद्भूता। स्त्री। गुण्डालाक्षुपे ॥

जलोरगी। स्त्री। जलौकायाम् ॥

जलौकाः। स्त्री। जलौकायाम् ॥ जल मोक स्थान मस्याः। ओकस् सान्त म् प्रसिद्धम् ॥

जलौकस। स्त्री। भूम्नि। रक्तपायाम्॥ जलमोक स्थानमासाम्। सान्तोय बहुवचनान्त इत्यमर ॥ जलोरगी जलोकातु जलौकाच जलौकसीति संसारावर्त्ता बहुवचन प्रायिक मिति वदन्ति ॥

जलौकस। पु। रक्तपायाम् ॥ जलमो कोऽस्यास्ति। अर्श आद्यच्। जलौकसे नेव रक्ताकृष्टि निपुणेन वेश्याजने नेति वासदत्ता ॥

जलौका। स्त्री। जलोरग्याम्। रक्तपा याम् ॥ * ॥ अथातो जलौकावचार- णीयमध्यायं व्याख्यास्याम ॥ * ॥ नृ पाढ्यबालस्थविरभीरुदुर्बलनारीसु कुमाराणामनुग्रहार्थं परमसुकुमा रोऽय शोणितावसेचनोपायोऽभि हितो जलौकस। तत्र वातपित्तक- फदुष्टशोणित यथासख्य शृङ्गजलौ कालाबुभिरवसेचयेत् स्निग्धशीतरू क्षत्वात् सर्व्वाणिसर्व्वैर्व्वा ॥ * ॥ भ वन्ति चात्र ॥ उष्णं समधुरं स्निग्धं ग

वां शृङ्गं प्रकीर्त्तितम्। तस्माद्वा- तोपसृष्टे तु हितं तदवसेचने ॥ शीताधिवासा मधुरा जलौका वा रिसम्भवा तस्मात्पित्तोपसृष्टे तु हि ता सात्ववसेचने ॥ अलाबुकटुक रूक्ष तीक्ष्णञ्च परिकीर्त्तितम्। तस्माच्छ्लेष्मोपसृष्टे तु हिततदवसेच ने ॥ * ॥ तच प्रच्छितेतमुवस्त्रपट लावनद्धेन शृङ्गेण शोणित मवसेचये दाचूषणात्। सान्तर्दीपया ऽलाब्वा ॥ * ॥ अथ जलायुका वक्ष्यन्ते। जलमासामायुरितिजलायुकाजल मासामोक इति जलौकस। ता द्वादश तासां सविषा षट्। ता- वत्यएव निर्विषा। तत्र सविषा। कृ ष्णा कर्बुरा अलगर्द्दा इन्द्रायुधासामु द्रिका गोचन्दना चेति। तास्वञ्जनचू र्णवर्णा पृथुशिरा कृष्णा। वर्म्मिम त्स्यवदायता छिन्नोन्नतकुक्षि कर्बु रा। रोमशा महापार्श्वा कृष्णमुख्य लगर्द्दा। इन्द्रायुधवदूर्द्ध्वराजिभि श्चि चिता इन्द्रायुधा। ईषदसितपीतिका विचित्रपुष्पाकृतिचित्रा सामुद्रिका। गोवृषणवदधोभागे द्विधाभूताकृति रणुमुखी गोचन्दनेति। ताभिर्दष्टे पुरुषे दंशे श्वयथुरतिमात्र कण्डूर्मू र्च्छा ज्वरोदाहच्छर्दिर्मद. सदनमि

ति लिङ्गानि भवन्ति। तत्र महागद पानालेपननस्यकर्म्मादिषूपयोज्य । इन्द्रायुधादष्ट मसाध्यमित्येता सविषा सचिकित्सिताव्याख्याता ॥ * ॥ अथ निर्विषा । कपिला पिङ्गला शङ्कुमुखी मूषिका पुण्डरीकमुखी सावरिकाचेति ॥ * ॥ तत्र मन श्शिलारञ्जिताभ्यामिव पार्श्वाभ्या पृष्ठे स्निग्धामुद्गवर्णा कपिला। किञ्चिद्रक्ता वृत्तकाया पिङ्गाऽऽशुगाच पिङ्गला। यकृद्वर्णा शीघ्रपायिनी दीर्घतीक्ष्णमुखी शङ्कुमुखी। मूषिकाकृतिवर्णाऽनिष्टगन्धा च मूषिका। मुद्गवर्णा पुण्डरीकतुल्यमुखी पुण्डरीकमुखी । स्निग्धपद्मपत्रवर्णाष्टादशाङ्गुलप्रमाणा सावरिका सच पश्वर्थे ॥ इत्यविषाव्याख्याता ॥ तासां यवनपाण्ड्यसह्यपौतनादीनिक्षेत्राणि । तेषु महाशरीरा बलवन्त्य शीघ्रपायिन्यो महाशना निर्व्विषाश्च विशेषेण भवन्ति ॥ तत्र सविषमत्स्यकीटदर्दुरमूत्रपुरीषकोथजाता कलुषेष्वम्भ सु च सविषा । पद्मोत्पलनलिनकुमुदसौगन्धिककुवलयपुण्डरीकशैवालकोथजाता विमलेष्वम्भ सु च निर्विषा ॥ * ॥ भवति चात्र ॥ क्षेत्रेषु विचरन्त्येता

सलिलेषु सुगन्धिषु। न च सङ्कीर्णचारिण्यो न च पङ्केशया सुखा ॥ * ॥ तासा ग्रहणमार्द्रचर्म्मणान्यैर्वा प्रयोगैर्गृह्णीयात् । अथैनानवे मह ति घटे सरस्तडागोदकपङ्कमावाप्य निदध्यात् । भक्ष्यार्थं चासामुपहरेच्छैवल वल्लूरमौदकाश्च कन्दाश्चूर्णीकृत्य निदध्यात् । स्वापार्थं तृणमौदकानिच पत्राणि । त्र्यहात् त्र्यहाच्चान्यज्जल भक्ष्यच दद्यात् सप्त रात्रात् सप्तरात्राच्चघटमन्य सङ्क्रामयेत् ॥ * ॥ भवतिचात्र॥ स्थूलमध्या परिक्लिष्टा पृथ्व्योमन्दविचेष्टिता । अग्राहिण्योऽल्पपायिन्य सविषाश्च न पूजिता ॥ अथ जलौकोऽवसेकसाध्यव्याधितमुपवेश्य सन्निवेश्य वा विरूक्ष्य चास्य तमवकाश मृद्गोमयचूर्णैर्यद्यरुज स्यात् । गृहीताश्च ता सर्षपरजनीकल्कोदकप्रदिग्धगात्री सलिलशरावमध्ये मुहूर्त्त स्थिताविगतक्लमा ज्ञात्वा ता भीरोग ग्राहयेत् । सूक्ष्मशुक्लार्द्रपिचुप्रोतावकुण्ठ्याकृत्वा मुखमपावृणुयात् । अगृह्णन्त्यै क्षीरबिन्दु शोणितबिन्दुवादद्यात् शस्त्रपदानि वा कुर्व्वीत यद्येवमपि न गृह्णीयात्तदान्यां ग्राहयेत् । यदाच निविशतेऽश्वखुरवदाननकृत्वोन्नम्यच स्कन्धतदा जानीयाद्गृ

जलौका	जव
त्वातीति गृह्णन्तीं चार्द्रवस्त्रावच्छन्नां धारयेत्सेचयेच्च । दंशे तोदकण्डू-प्रादुर्भावैर्जानीयाच्छुद्धमियमादत्त इति शुद्धमाददानामपनयेत् । अथ शोणितगन्धेन न मुञ्चेन्मुखं मस्या सैन्धवचूर्णेनावकिरेत् । अथ पतितां तण्डुलकण्डनप्रदिग्धगात्रीं तैललवणाभ्यक्तमुखीं वामहस्ताङ्गुष्ठाङ्गुलीभ्यां गृहीतपुच्छां दक्षिणहस्ताङ्गुष्ठाङ्गुलिभ्यां शनैः शनैरनुलोममनुमार्जयेत् तां मुखादा वामयेत् यावत्सम्यग्वान्तलिङ्गानीति । सम्यग्वान्ता सलिलसरकन्यस्ता भोक्तुकामा सती चरेत् । या सीदति न चेष्टते सा दुर्वान्ता तां पुनः सम्यग्वामयेत् । दुर्वान्तायाव्याधिरसाध्यइन्द्रमदो नाम गदो भवति । अथ सुवान्तां तां पूर्ववत्सन्निदध्यात् शोणितस्य च योगायोगानवेक्ष्य जलौकोव्रणान्मधुनावघट्टयेच्छीताभिरद्भिश्च परिषेचयेत्, नवनीतं वा व्रणे कषायमधुरस्निग्धशीतैश्च प्रदेहैः प्रदिह्यादिति । भवति चात्र ॥ चेताश्चि ग्रहणं जानीयो घ सावचारवान् । जलौकसाध्ययो वेत्ति तत्साध्यान्स जयेद्गदान् ॥ इति सुश्रुते सूत्रस्थाने * १३ ऽध्याय ॥	इतिनिपातनादेको ऽदन्त' । टाप् ॥
	जल्प । पु । विजिगीषुवचने । स्वपक्षस्थापनपरपक्षदूषणवत्यां विजिगीषुकथायाम् ॥ यथोक्तोपपन्नः छल जातिनिग्रहस्थानसाधनोपालम्भो जल्प । न्यायसूत्राम् १ । ४२ ॥ यथोक्तोपु यदुपपन्नं तेनोपपन्नइत्यर्थः । मध्यमपदलोपीसमास ॥ भावघो ॥ वादे ॥ जल्पनम् । जल्पव्यक्तायां वाचि । घञ् ॥
	जल्पक' । त्रि । बहुभाषिणि ॥ जल्पति । जल्प० ण्वुल् ॥
	जल्पन् । त्रि । व्याहरति ॥
	जल्पनम् । न । कथने ॥ किं मिथ्याप्रतजल्पनेन सततं रेवक्त्रा रामंवद ॥ त्रि । बहुभाषिणि ॥ जल्पति । जल्प० । नं द्यादित्वाल्ल्यु ॥
	जल्पाक. । त्रि । वाचाले । बहुकुत्सितभाषिणि ॥ जल्पति । जल्प० । सञ्जीषु । जल्पभिक्षेतिषाकन् । षित्वात् स्त्रियां जल्पाकी ॥
	जल्पित । त्रि । उक्ते । कथिते ॥ जल्प्यते स्म । जल्प० । क्त. ॥ न । कथने ॥
	जव । पु । वेगे ॥ त्रि । वेगवति ॥ जु इति सौत्रोधातु । जवनम् । ऋदोरप् ॥ न । सवेगगतिवचने ॥ वेगाख्यगुणे ॥

जवन' । पु ॥ वेगिद्रव्ये ॥ जवशील' । जु इति सैाचो गतै। वेगे च। जुचङ्क्रम्येतियुच् ॥ हूउनान इति जन प्रसिद्धे देशे ॥ म्लेच्छजातिविशेषे । जवनदेशोद्भवे प्रथमत'चत्रिये प श्चाद्विहितक्रियालोपादिना शूद्रत्वमापन्ने दस्युपदवाच्ये ॥ सगरोऽस्य सर्वे शिरोमुण्डन सर्वधर्मवहिष्कृतत्वञ्च चकार ॥ स्त्रीकारीस्वगे ॥ घोटके ॥ न । वेगे । स्यदे ॥ त्रि। वेगिनि ॥

जवनालम् । न। जुन्हरी जुवार इतिच प्रसिद्धे धान्ये ॥

जवनिका । स्त्री । कनात चिकसिरकी इत्यादिभाषाप्रसिद्धे व्यवधायकवस्त्रादै। प्रतिसीरायाम् । तिरस्करिण्याम् । व्यवधानपव्याम् ॥ जवन्यणाम् । जु॰ । ल्युट । कम् ॥

जवनी। स्त्री। अपव्याम्॥ श्रौषधीभेदे॥

जवसम् न। घासे॥इतिशब्दरत्नावली॥

जवा । स्त्री । श्रोड्रपुष्पे ॥ श्रोडूचे ॥ जवति । जु॰ । अच् । टाप् ॥ मदप्रसिद्धे चद्रजन्तुविशेषे ॥

जवादि । न । सुगन्धिद्रव्यविशेषे । गन्धराजे । कृत्रिमे । मृगधर्मजे॥ जवादि नीरस स्निग्ध शीघतपिङ्गं सुगन्धदम् । आतपे वह्नुलामोद रासीं योग्यन्तन्मतमितिलक्षणम् ॥

जवाधिक' । पु । जवने। वेगाधिकहये ॥ जवेन अधिक' ॥ त्रि । अतिशयवेगवति ॥

जवापुष्पम् । न । श्रोड्रपुष्पे॥ जवाऽस्य मस्य ॥

जवी । त्रि । वेगवति ॥ जवोऽस्यास्ति । इनि ॥ उष्ट्रे ॥ घोटके॥

जविष्ठः । त्रि । अतिवेगवति ॥ अतिशयेन जववान् । अतिशायने इष्ठन् । विन्मतोर्लुगिति मतुपोलुक् ॥

जवीय । त्रि । अयवत्तरे॥ मत्त्वमाद्दीय सुनि मतुपोलुक् ॥

जसुरि । पु । वज्रे॥ जस्यति। जसुमोच णे । जसिसहोरुरिन् । जसुरये श्रान्नाय जसुरिचुधित मितिवेदभाष्यम् ॥

जहक' । पु । काले॥ बाले॥ निर्मोके ॥ निर्मोके ॥ जहाति । श्रोहाक्॰। जहातेर्द्वेचेतिकुन् ॥ त्रि । त्यागिनि॥

जहदजहल्लचणा । स्त्री । अंशान्तरपरित्यागेनांशान्तरलचणायाम् । भागत्यागलचणायाम्। वाच्यार्थैकदेशपरित्यागेनैकदेशवृत्तै। ॥ यथा । सोयदेवदत्त इतिवाक्ये सशब्दायशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेन अविरुद्धदेवदत्तेन सह लच्यलचणभाव

सम्बन्धइति ॥

जहल्लक्षणा । स्त्री । वाच्यार्थमशेषत परित्यज्य तत्सम्बन्धिन्यर्थान्तरेप्रवृत्तिरूपायां लक्षणायाम् ॥ यथा । गङ्गायां घोष प्रतिवसतीति वाक्ये गङ्गाघोषयो राधाराधेयभावलक्षणस्य वाक्यार्थस्या ऽशेषतोविरुद्धत्वात् वाच्यार्थमशेष परित्यज्य तत् सम्बन्धितीरलक्षणाया युक्तत्वात् अजहल्लक्षणासङ्गच्छते ॥

जहत्स्वार्था । स्त्री । जहल्लक्षणायाम् ॥ जहत्स्वार्थातुतत्रैव यत्रुढिर्विरोधिनीस्मृता ॥

जहा । स्त्री । मुण्डितिकायाम् ॥

जहानक । पु । प्रलये ॥ इतिहेमचन्द्र ॥

जहुः । पु । अपत्ये ॥ यथा । मृगजहुना मृगापत्येनेति श्रीधरस्वामी ॥

जह्नु । पु । चन्द्रवंशोद्भवेकुरुराजपुत्रे ॥ गङ्गाऽऽगमनकाले येन गङ्गा पीता पुनर्भगीरथप्रार्थनया जरु भित्वा बहिर्निर्गमिता तेनसाजाह्नवीति ख्याति मागता ॥ विष्णौ ॥ जनान् सञ्चारसमये ऽपह्नुतेऽपनयति । ह्नु ङ् अपनयने । क्विप् ॥ जहात्यवि दुष भक्त न् नयति परमिति वा ॥ यद्वा । जहाति । ओहाक् त्यागे । जहातेर्द्वे ऽन्त्यलोपश्चेतिनु ॥

जह्नुतनया । स्त्री । गङ्गायाम् ॥ जह्नोरपत्यं स्त्री इति तनया ॥

जह्नुसप्तमी । स्त्री । वैशाखसितसप्तम्याम् ॥ शुक्लपक्षस्य सप्तम्यां वैशाखे जह्नुपुत्रिकाम् । प्रपूजयेत् सुखार्थाय स्वर्गमोक्षफलायचेत्युत्तर कामाख्यातन्त्रे ११ पटल ॥

जह्नुसुता । स्त्री । गङ्गायाम् ॥

जा । स्त्री । यातरि । भर्तृभ्रातृभार्यायाम् ॥ इत्येकाक्षरकोषः ॥

जागत । पु । प्रगाथविशेषे ॥ जगती आदिरस्य । सोस्यादिरितिच्छन्दसः प्रगाथेष्विण्स्यात् ॥ न । जगतीछन्दसि ॥ स्वार्थे ऽण् ॥

जागर । पु । जागरणे । अन्त करणस्य कृतस्वविकाशे ॥ जागृनिद्राक्षये । भावे घञ् ॥ जाग्रोविचीतिगुण ॥

जागरणम् । न । जागरे । निद्राभावे ॥ प्रमितिर्जागरेजाग्रद्भ्रम स्वप्नोऽथ मूढता । पानादिजन्यासुप्ति स्यादेवजागरण त्रिधा ॥ जागृ० । ल्युट् ॥

जागरा । स्त्री । जागर्यायाम् ॥ जागरणम् । स्त्रियामधिकारे जागर्तेरकारो वा । जाग्रोविचिणल्ङित्स्विति गुण ॥

जागरितम् । न । इन्द्रियैरर्थोपलब्धौ ॥ स्वप्नदर्शनहेतुककर्मक्षये जागरित

मागच्छन् स्वोपाध्यन्तःकरणेन्द्रियसम्बिवस्तत्तदिन्द्रियविषयाननुमेयाश्चस्थूलान् व्यावहारिकान् पदार्थाननुभवति तदिदमस्य जागरितमित्युक्तम् ॥ जागृ० । क्त ॥

जागरितस्थान । पु । व्यष्ट्युपहितचैतन्ये विश्वशब्दवाच्ये ॥ जागरितस्थानमस्य ॥

जागरितान्तम् । न । जागरितमध्ये जागरितविषये ॥

जागरिता । त्रि । सजागरे । जागरूके ॥ जागरणशील । जागृ० । तृन ॥

जागरी । त्रि । जागरूके ॥ जागरमस्यास्ति । इनि ॥

जागरूक । त्रि । अप्रमत्ते । सजागरे । जागरितरि । जागरणशीले ॥ जागर्त्तितच्छीलः । जागृ० । जागरूकः तिजागर्त्तेरूक ॥

जागर्त्ति । स्त्री । जागरणे ॥ स्त्रियां क्तिन् ॥

जागर्य्या । स्त्री । जागरे ॥ जागरणम् । जागर्त्तेरकारोवेति पक्षेश । यक् । जाग्रोविचीतिगुण ॥

जागुडम् । न । कुङ्कुमे ॥ पु । देशविशेषे ॥ तत्रत्यकुङ्कुममत्युत्तमभवति ।

जागृत् । पु । जागरणे ॥ जागृ० । क्विप्तुकौ ॥

जागृवान् । त्रि । जागरूके ॥

जागृवि । पुं । अग्नौ ॥ नृपे ॥ जागर्त्ति । जागृ० । जॄशॄस्तॄजागृभ्यः क्विन् ॥

जाग्रत् । त्रि । जागरणविशिष्टे ॥ स्त्री । जागरितावस्थायाम् ॥ यथा । श्रोत्रादिज्ञानेन्द्रियै शब्दादिविषयं यदुपलभ्यते सा जाग्रदवस्था । साचत्रिधा । यथा । प्रमितिर्जागरे जाग्रत् भ्रमः स्वप्नोऽथमूढता । पानादिजन्यासुप्ति स्यादेव जागरणे त्रिधा ॥ जाग्रति । जागृ० । शतृ ॥

जाग्रिया । स्त्री । जागरणे ॥ जागरणम् । जागृ० । जागर्त्तेरकारोवेतिपक्षेश' । यक् । गुणात् परत्वेन रिङादेशइति धातु पारायणम् ॥

जाघनी । स्त्री । जरौ ॥ इतित्रिकाण्डशेष ॥

जाङ्गल । पु । कपिञ्जले पक्षिणि ॥ स्वनामाख्याते निर्वारिदेशे ॥ आकाशशुभ्र उच्चश्च स्वल्पपानीयपादप । शमीकरीरविल्वार्कपीलुकर्कन्धुसङ्कुल ॥ हरिणैणर्ष्यपृषतगोकर्णखरसङ्कुल । सुस्वादुफलवान् देशो वातलो जाङ्गल स्मृत ॥*॥ मासवर्गेऽत्र जङ्घाला बिलस्थाश्च गुहाशया । तथा पर्णमृगा ज्ञेया विष्किरा प्रतुदा अपि ॥ प्रसहा अथचग्रा

न्या भष्टौजाङ्गलजातय ॥ आङ्गला मधुराह्रखा स्तुवरा लघवस्तथा । वल्यास्तहंहणा हृष्या दीपना दोषहारिणा ॥ कृकता भिम्मगाश्वश्वगशहत्व दिने तथा । वाधिर्य मन्दचि छर्दिं प्रमेह मुखजान् गदान् । श्ली पद गलगण्डञ्च नाशयन्त्यनिलामयान् ॥ जङ्गलेभवः । तत्रभवइत्यण् ॥ न । पलले । मांसे ॥*॥ पानीयविशेषे ॥ यथा । अल्पोदकोल्पहन्नस्त्र पित्तरक्तामयान्वित । ज्ञातव्योजाङ्गलो देशस्तत्रत्य जाङ्गलजलम् ॥ जङ्गलंसलिलंरूक्ष लवणं लघुपित्तनुत् । वह्निकृत् कफहृत् पथ्य विकारान् हरतेवहून् ॥ जालिनीफले ॥ त्रि । जङ्गलोत्पन्ने ॥

जाङ्गलदेश । पु । कुरुदेशसमीपस्थदेशे ॥ यथा । अल्पोदकतृणोयस्तु प्रवातः प्रचुरातप । सज्ञेयो जाङ्गलोदेशो बहुधान्यादिसंयुत इति ॥ जाङ्गलश्चासौदेशश्च ॥

जाङ्गलि । पु । विषवैद्ये ॥

जाङ्गली । स्त्री । शूकशिंव्याम् । जागुली इति पर्वतीयभाषा ॥ विषविद्यायाम् ॥

जाङ्गुलम् । न । जालिनीफले ॥

जाङ्गुलिक । पु । विषवैद्ये ॥ जाङ्गुली विषविद्या तामधीते वेदवा । वसन्तादित्वाट्ठक् ॥ जाङ्गुल्यादीव्यति वा । तेनदीव्यतीतिठक् ॥ परीक्षित स मश्नीयात् जाङ्गुलीभि भिषग्वृत ॥

जाङ्गुली । स्त्री । विषविद्यायाम् ॥ जाङ्गुलीविषघ्नोमन्त्र इति कश्चित् ॥

जाङ्घिक । पुं । उष्ट्रे ॥ श्रीकारीहरणे ॥ जङ्घाजीविनि । धावके । जङ्घाकरिके ॥ जङ्घाभ्यांजीवति । वेतनादिभ्यो जीवतीतिठञ् ॥

जाजी । त्रि । योधिनि ॥ जजति । जज युद्धे । ताच्छील्येणिनि ॥

जाज्वल्यमान । त्रि । देदीप्यमाने ॥ भृशंज्वलति । ज्वलदीप्तौ । धातो रेकाच इति यङ् । ततोलट शान आदेश ॥

जाटलि । पु । स्त्री । वृक्षविशेषे ॥ जटनम् । जटसङ्घाते । घञ् । जाटलाति । लादाने । वाहुलकात् डि ॥

जाठर । पुं । उदरस्थेऽग्नौ ॥ जठरे भव । तत्रभवइत्यण् ॥

जाडार । पु । जडात्मजे ॥ जडस्यापत्यम् । आरगुदीचामित्यारक् ॥

जाड्यम् । न । जडतायाम् । स्तम्भे ॥ जडस्यभाव । ष्यञ् ॥

जाड्यारि । पु । जम्बीरे ॥

जात । त्रि । उत्पन्ने । स्वकृतधर्माधर्मादि

यशाल्लब्धशरीरेन्द्रियसम्बन्धे॥ यथा। एकयोनौ सकृज्जात' कोर्यं सोढु न शक्नुयात्। अनन्तयोनिष्वऽसकृज्जायमानस्य का कथा॥ न। व्यक्तौ॥ श्रोघे। सङ्घे॥ जन्मनि॥ जायतेऽनेन। जनीप्रादुर्भावे। क्तिच्क्तौचेतिक्त। जनसनेत्यात्वम्॥

जातकम्। न। जातस्य शुभाशुभनिर्णायके होराग्रन्थे। वृहज्जातकादौ॥ जातकर्माख्यमङ्गले॥ चि। जाते॥

जातकर्म्म। न। जातस्य कर्त्तव्येमन्त्रवत् सर्पि प्राशनादिरूपे जननसंस्कारे॥ प्राङ्नाभिवर्द्धनात् पुंसोजातकर्म्मविधीयते। मन्त्रवत् प्राशन चास्य हिरण्यमधुसर्पिषामितिमनु॥ जातस्य कर्म। जातकर्मवा॥

जातमात्र चि। सद्योजाते॥ जातएव॥

जातरूपम्। न। स्वर्णे॥ धुस्तूरे॥ आकरजे स्वर्णे॥ चि। प्रशस्तरूपे॥ जातरूप यस्य। यद्वा। प्रशस्त जातम्। प्रशसाया रूपप्॥

जातवेदा३। पुं। पुन पुनर्हवींषी भोक्तरि। हुताशने॥ विद्यते लभ्यते। विविद्लृलाभे। असुन्॥ जात वेदोधन यस्मात्॥ जातेजाते सर्वप्रपञ्चस्य स्वस्मिन्नध्यस्तत्वेन ये विद्यते। विदसत्तायाम्। जात वेत्ति वेदयते वा। विदचेतनादौ। असुन्॥ जातानि भुवनानि चराचराणि सर्वंज्ञत्वेन स्वस्मादुत्पन्नत्वेनच वेत्तिवा। जातानिसर्वकारणत्वेन य विदन्ति वा॥ चित्रकौषधौ॥

जातापत्या। स्त्री। प्रसूतायाम्॥ जात मपत्य यस्या॥

जाति। स्त्री। गोत्रे॥ जन्मनि॥ चुल्याम्। अग्निकायाम्॥ आमलक्याम्॥ सामान्ये। ब्राह्मणक्षत्रियवैश्यशूद्रात्मके॥ छन्दसि॥ जातीफले॥ मालत्याम्। चवेली इति भाषा॥ श्वेताजाति स्तथापीता मोच्यते स्वर्णजातिका। जातीयुग तिक्त मुष्ण तुवर लघु दोषजित्। शिरोक्षिमुखदन्तार्त्तिविषकुष्ठव्रणास्रजित्॥ काम्पिल्ले॥ *॥ समानप्रसवात्मिका जाति॥ २। १३४। इति न्यायसूत्रम्॥ अस्यार्थ। समान समानाकारक प्रसवो बुद्धिजननम् आत्मा स्वरूपयस्या' सा। तथाच समानाकारबुद्धिजननयोग्य त्वमर्थ। समानाकारबुद्धिजननयोग्यधर्मविशेषो नित्यानेकसमवेतत्वरूपार्थइत्यपिवदन्ति। इदन्तुबोध्यम्। एवंसत्याकृत्यविषयको गवादिपदात्-शाब्दबोध। अनुभवेपि तथैवकार्य

कारणाभावकल्पनात् गोपदस्य गो-
त्वविशिष्टे शक्तिरेवस्यादिति ॥ नि
त्यत्वे सत्यनेकसमवेतत्वं जाति
त्व मिति न्यायसिद्धान्तमुक्तावलि-
॥ * ॥ गोत्वादौ ॥ तस्य लक्षणं यथा
। आकृतिग्रहणा जाति र्लिङ्गानाञ्च न
सर्वभाक् । सकृदाख्यातनिर्ग्राह्या
गोत्रञ्च चरणैः सह ॥ अस्यार्थः । आ
क्रियते व्यज्यतेऽनयेति आकृतिः स
स्थानम् । गृह्यतेऽनेनेति ग्रहणं ज्ञा
नम् । आकृत्या ग्रहणं यस्याः सा आ
कृतिग्रहणा । जातिराकृतिग्रहणा भ
वति । संस्थानव्यङ्ग्येत्यर्थः । तेन
मनुष्यगोमृगहंसादीनां पृथक् पृथ
क् संस्थानैर्व्यज्यमाना मनुष्यत्वगो
त्वमृगत्वहंसत्वादि र्जातिः ॥ एवं
ब्राह्मणक्षत्रियवैश्यशूद्राणां पृथक्
संस्थानाभावात् ब्राह्मणत्वादेर्जाति
त्वं नायातमिति लक्षणान्तरमाह ।
लिङ्गानाञ्च न सर्वभागिति । या
सर्वाणि लिङ्गानि न भजते सा च जा
तिरित्यर्थः । स्त्रीपुंसयोरपत्यान्ता
द्विचतुष्षट्पदोरगाः । जातिभेदाः
पुमाख्याश्चेत्यमरसिंहे जातिभेदा
नां स्त्रीपुंसयोरेवेति नियमे ब्राह्मणा
दीनां सर्वलिङ्गभाक्त्वाभावा
ज्जातित्वम् । किन्तु अजातहंसस्य

अनस्य हंसं दृष्टवतोऽपि तस्य स
स्थानेन हंसत्वव्यक्तिर्न शक्यते इ
ति हंसस्यापि जातित्वं नायातमिति
पूर्वलक्षणस्य दोषः । एवं देवदत्ता
दिसंज्ञाशब्दस्यापि सर्वलिङ्गभाक्त्वा
भावाज्जातित्वापत्तिरिति द्वितीय-
लक्षणस्य दोषः । इति दोषद्वयमपाक
र्तुं द्वयोर्लक्षणयोर्विशेषणमाह । स
कृदाख्यातनिर्ग्राह्येति । सकृदेकवार
माख्यातेन उपदेशेन निर्निश्चये
न ग्राह्या ग्रहीतुं शक्या इत्यर्थः ।
तेन हंसोऽयमित्युपदेशे हंसदृष्ट
वतस्तस्य संस्थानेन हंसत्वव्यक्तिः
शक्यत एवेति पूर्वलक्षणस्य न दोषः
। एवं देवदत्तादिसंज्ञाशब्दस्यैक-
स्मिन्नुपदेशेऽपि अन्यस्मिन् ज्ञाना-
भावात् जातित्वं न स्यादिति परल
क्षणस्यापि न दोषः । गार्ग्यः पुरुषः
गार्गी स्त्री गार्ग्यं कुलमिति स
र्वलिङ्गभाक्त्वात् संस्थानव्यङ्ग्य
त्वाभावाच्च गार्ग्यादीनां जातित्वा
नुपपत्तौ तृतीयलक्षणमाह । गो
त्रञ्चेति । पुत्रपौत्रप्रभृति अपत्य
गोत्रमिति पूर्वाचार्यपरिभाषितगो
त्रमिह गृह्यते गार्गी वात्सीत्यादि ।
चतुर्थलक्षणमाह । चरणैः सहेति
। चरणञ्च जातिरित्यर्थः । चरणाश

व्दोवेदैकदेशवाचीकठादिरूप स च अध्ययनक्रियासम्बन्धेन प्रवृत्तत्वात् क्रियावाचकएव नतु जाति वाचक । तेनास्य जातिसमार्थं चरणे सहे त्युक्तम् गार्ग्यादीनां यञश्चेतिङी पिसिद्धेपि जातिसंज्ञाफलन्तु गार्गी भार्यायस्यासौ गार्गीभार्य इत्यादौ जातेश्चेति पुम्वद्भावनिषेध । गार्गी चासौ भार्याचेति गार्ग्यभार्या इत्यादौ पुवत्कर्मधारयेतिपुन पुवद्भाव ॥*॥ प्रादुर्भावविनाशाभ्यांसत्त्वस्य युगपद्गुणे । असर्वलिङ्गांवह्वर्थां तां जाति कवयोविदु ॥ गोत्रञ्च चरणानिचेत्यपरस्य जातिलक्षणम् । यथापूर्वं जातिलक्षण तथा कुमारी भार्येति भवितव्यम् । यथोत्तर तथाकुमारभार्य इति इतिभाष्यम् ॥ जननम् जनयति वा । जनी० । स्त्रियाक्तिन् । जनसनेत्यात्वम् ॥*॥ साधर्म्यवैधर्म्याभ्या प्रत्यवस्थान जाति । साधर्म्यवैधर्म्याभ्यामिति सावधारणोनिर्देश । तेन व्याप्तिनिरपेक्षाभ्या साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थान दूषणाभिधान जातिरित्यर्थं ॥ षड्जादिसप्तसु ॥ काव्यालङ्कारप्रभेदे ॥ घटत्वादिरूपाजातिर्हि घटादिशब्द प्रवृत्तौनिमित्तम् ॥

जातिकोषम् । न । जातीफले । जायफल इतिभाषा ॥

जातिकोषी । स्त्री । जातीपत्र्याम् । जाविन्नी इतिभाषा ॥

जातिधर्म्म । पु । ब्राह्मणत्वादिनिवन्धने अध्ययनाध्यापनादौ ॥ जातेर्धर्मे ॥

जातिफलम् । न । जातिकोषे ॥

जातिब्राह्मण । पु । तपश्रुतविहीने विप्रे ॥ यथा । तपश्रुतञ्च योनिश्चएतद्ब्राह्मणकारणम् । तपश्रुताभ्यायोहीनो जातिब्राह्मणएवस इति ॥ जात्याजन्मना ब्राह्मण ॥

जातिभ्रंशकरम् । न । नवविधपातकान्तर्गते पातकविशेषे ॥ यथा । ब्राह्मणस्य रुज. कृत्त्या घातिरघ्रेयमद्ययो । जैह्म्यञ्च मैथुनपुंसि जातिभ्रंशकरस्मृतमिति ॥

जातिवैरम् । न । स्वाभाविकशत्रुत्वे ॥ तत् पञ्चविधम् । स्त्रीकृतम् १ यथा श्रीकृष्णशिशुपालयो ॥ वास्तुजम् २ यथा कौरवपाण्डवानाम् ॥ वाग्जम् ३ यथा द्रोणद्रुपदयो ॥ सापत्नम् ४ यथा मूषिकनकुलयो ॥ अपराधजम् ५ यथा पूजनीब्रह्मदत्तयो । इतिमहाभारतम् ॥

जातिशस्यम् । न ।
जातिसारम् । न । } जातीफले ॥

जातिस्मर । पु । तीर्थविशेषे ॥ त्रि । पूर्वजन्मजातिस्मरणवति ॥

जाती । स्त्री । सुमनायाम् । सुमनसि । मालत्याम् । चमेली इतिभाषा ॥ तत्पुष्पे ॥ क्तिन्नन्तात् क्तिजन्ताद्वा ङीष् ॥ जात्या पुष्पम् । पुष्पमूलेषु बहुलमित्यनुदात्तादेरञो ऽ सस्य लुक् ॥

जातीकोशम् । न । जायफल इतिप्रसिद्धे जातीफले ॥

जातीपत्री । स्त्री । सुमन पत्रिकायाम् । जावित्री इतिभाषा ॥ जातीपत्री लघु स्वादु कटुष्णा रुचिवर्णकृत् । कफकासवमिश्वासतृष्णाकृमिविषापहा ॥

जातीफलम् । न । जातीकोषे ॥ जातीफलरसेतिक्तं तीक्ष्णोष्णं रोचनं लघु । कटुकं दीपनं ग्राहि स्वर्यं श्लेष्मानिलापहम् ॥ निहन्ति मुखवैरस्य मलदैर्गन्ध्यकृष्णता । कृमिकासवमिश्वासशोषपीनसहृद्रुज ॥ जात्यफलम् । जं तीलताया फलवा ॥

जातीय । त्रि । जातौभवे ॥ वृद्धाच्छ ॥ प्रकारार्थबोधके तद्धितप्रत्ययविशेषे ॥ यथा । तार्किकप्रकारः । तार्किकजातीय । प्रकारवचनेजातीयर् ॥

जातीरसम् । न । बोले ॥

जातु । अ । कदाचिदर्थे ॥ यथा । जातु जनो नैति सुखं कर्मवाहुल्यात् कर्मणैव याति सुखं मानपुरस्तात् । मानरस वक्षरस येन निपीतं द्वारभय मारभय तेनविगीतमिति ॥ ॥ शब्दे ॥ विगर्हणे ॥ अविकल्पे ॥ निषेधे ॥ जायति । ऐश्वर्ये । बाहुलकात् क्तुन ॥

जातुकम् । न । हिङ्गुनि ॥ इतिशब्दचन्द्रिका ॥

जातुधान । पुं । राक्षसे ॥ जातु कदाचित्रन्ध्रप्राप्य धार्म सन्निधानमस्य ॥

जातुषम् । त्रि । लाक्षानिर्मिते ॥ जतुनोविकारः । त्रपुजतुनोः षुगित्यण् ॥

जातूकर्ण । पु । ऋषिविशेषे ॥ वैद्यशास्त्रप्रवर्तके मुनिविशेषे ॥

जातेष्टि । स्त्री । वैश्वानर द्वादशकपालनिर्वपेत् पुत्रेजातइतिजातकर्माङ्गविहितायामिष्ट्याम् ॥

जातोक्ष । पु । दम्यवत्से । युवद्वषे ॥ जातश्चा सा वुक्षाचा । अचतुरेति साधु ॥ उत्पन्न उक्षाजातोक्ष इत्यमर । अत्रउत्पन्नोऽस्यदम्यभावप्राप्तवलीवर्दभावोवार्थ ॥

जात्य । त्रि । श्रेष्ठे । कुलीने ॥ कान्ते

॥ जातोभव' । यत् ॥

जात्यन्ध । त्रि । जन्मान्धे ॥

जात्याभास । त्रि । मायोत्पन्ने रज्जुस र्पादौ ॥ अजातिसत् जातिवदाभा सते इतिविग्रहः ॥

जात्युत्तरम् । न । असदुत्तरे ॥

जानकी । स्त्री । सीतायाम ॥

जानपद. । पु । जने ॥ देशे ॥ त्रि । ज नपदोत्पन्ने ॥ जनपदे भव. । उत् सादित्वादञ् ॥

जानपदी । स्त्री । जनपदोत्पन्नवृत्तौ ॥ जानपदात् वृत्तौ वाच्यायां जान पदकुण्डेत्यादिना ङीष् ॥ अजन्तत्वे न टिड्ढेतिङीप्याद्युदात्त' ॥ जनप दप्रभवायाम् ॥

जानान' । त्रि । ज्ञानवति ॥

जानु । न । अरुजङ्घयोर्मध्यभागे । अष्ठीवति । घोंटु इति भाषा ॥ जा यते । जनी०। दृसनिजनीतिञुण् । जनिवध्योश्चेति नप्रवर्त्तते अनुबन्ध द्वयसामर्थ्यात् ॥

जानुकम् । न । जानुनि ॥ स्वार्थेयावादि भ्य'कन् ॥

जानुकारक । पु । रवे पार्श्वगविशेषे ॥

जाप । पु । जपे ॥ जपेर्भावेघञ् ॥

जापक' । त्रि । जपकर्त्तरि ॥ जपति । जपमानसे । ण्वुल् ॥

जापनम् । न । निरसने ॥ निर्वर्त्तने ॥

जावाल । पु । सत्यकामेमुनौ ॥ जबा लाया अपत्यम् । अण् ॥

जावालि' । पु । मुनिविशेषे ॥

जामदग्न्य । पु । जमदग्निसुते । पर शुरामे ॥ जमदग्नेर्गोत्रापत्यम् । ग र्गादिभ्योयञ् इत्यनन्तरापत्येपि गोत्रत्वोपाध्यारोपात् यञ् । अनन्त रविवक्षायान्तुऋष्यन्धकेत्यऽणि जा मदग्न इतिबोध्यम् ॥

जामलम् । न । तन्त्रशास्त्रविशेषे । या मले ॥

जामाता । पु । दुहितृपत्यौ ॥ सूर्या वर्त्ते । सुलचिया इति गौडप्रसिद्धे शाके ॥ धवे । वल्लभे ॥ जाया माति मिमीते मिनोतिवा । मा० । माङ्० । डुमिञ्० वा । नप्तृनेष्ट्रितिसाधु ॥

जामि. । स्त्री । स्वसरि । भगिन्याम् ॥ कुलस्त्रियाम् ॥ दुहितरि ॥ स्नुषाया म् ॥ शोचन्ति जामयो यत्र विनश्य त्याशु तत्कुलम् । न शोचन्ति तु यत्रैता वर्द्धते तद्धिसर्वदेतिमनु । गृहपतिसंवर्द्धनीयसन्निहितसपिण्ड स्त्रियोजामयइतिकुल्लूकभट्ट ॥ जा यति जायतेवा । जैक्षये । वाहु लकात्मिः ॥ यद्वा । जमति । जमु अदने । वाहुलकादिण् दीर्घश्च

॥ कर्मंधीअजादिभ्यश्रतीप् वेति-
स्वामी ॥

जामिता । स्त्री । चालस्ये ॥

जामा । स्त्री । कुलयोषायाम् ॥ स्वसरि
॥ ङीष् ॥

जामेय । पु । भागिनेये ॥ जाम्या अप
त्यम् । स्त्रीभ्योढक् ॥

जाम्बवम् । न । जम्बूफले ॥ जम्ब्वाःफल
म् । जम्ब्वा वेत्यण् । तस्यविधानात
लुक् ॥ सुवर्णे ॥ कपिविशेषे ॥ नगर
विशेषे ॥

जाम्बवान् । पु । ब्रह्मणःपुत्रे । रामाय
थादिमसिद्धपराक्रमे ऋक्षराजे ॥-

जाम्बवता । स्त्री । जाम्बवतोदुहितरि
श्रीकृष्णपत्न्याम् ॥ नागदमन्याम् ॥

जाम्बवी । स्त्री । नागदमन्याम् ॥

जाम्बुवान् । पुं । जाम्बवति ॥

जाम्बूनदम् । न । स्वर्णे ॥ धुस्तूरे ॥ का
ञ्चनविशेषे ॥ यथा जाम्बूनदेनाम्न
सदृशं लोहमस्तिचेत् । तथा चकु-
लधर्मेण समयोन्य समोभवेदिति॥
समय आचार. ॥ जम्बूरसस्य नद्या
भवम् । तत्रभवइत्यण् ॥ तीरस्थस्य
रसप्राप्य सुखवायुविशोषिता । जा
म्बूनदाख्यं भवति सुवर्णं सिद्धभूषणा
म् ॥ तद्रसं जम्बूरसम् ॥ यथा । मेरु
मन्दरपर्वतस्थजम्बूफलाना मत्युच

निपातविशीर्णाना मनस्थिप्रायाणा
मिभकायनिभानां रसेन जम्बूनाम
नदी इत्यावृतं वहति । तस्या उभ-
योःतीरयो र्मृत्तिका जम्बूरसेनानु
विध्यमाना वाय्वर्कसंयोगविपाके-
न सदामरलोकाभरणं जाम्बूनदं-
नाम स्वर्णं भवति ॥ इति श्रीभाग
वतम् ॥

जम्बूनदेश्वरी । स्त्री । देवीविशेषे ॥
तत्स्थाने ॥

जायकम् । न । काळीयके । पीतवर्णे
सुगन्धिकाष्ठप्रभेदे । कालिया इति
गौडभाषा ॥ जयति मन्धान्तरम् ।
जिअभिभवे । ण्वुल् ॥

जायमान । पु । उपनीते ॥

जाया । स्त्री । विधिनाविवाहितायां
स्त्रियाम् । पत्न्याम् । द्वितीयायाम्
॥ जायतेऽस्याम् । जनी० । जनेर्यक् ।
येविभाषेत्यात्वम् । पतिर्भार्यां संप्र
विश्य गर्भोभूत्वेह जायते । जायाया
स्तद्धि जायात्वं यदस्यां जायते पुनः
॥ स्मृतात् ससमभवने ॥

जायाघ्न । चि । तिलकालकादि चिह्न-
॥ जायांहन्ति । हन० । अमनुष्यक
र्तृके चेतिटक् ॥ ङीपि जायाघ्नी ॥

जायाजीवः । पुं । नटे ॥ जायया जीव
ति । जीव० । इगुपधेतिकः ॥

आयानुजीवी । पु । नटे ॥ बकपक्षिणि ॥ वेश्यापतौ ॥ दु स्थे ॥

आयापती । पु । द्विवचनान्त । सहोक्त्या भार्याभर्त्तौ ॥ जायाच पतिश्च । रा जदन्तादिषु निपातनात् पूर्वनिपात ॥

आयु । पु । औषधे ॥ जयति रोगान् । जि० । कृवापाजिमिस्वदिसाध्यशूभ्यउण् इत्युण् ॥

आर । पु । उपपतौ ॥ जरयति । जृष्० । दारजारौकर्त्तरिणि लुक्चेति घञ् । जीर्यतेऽनेनेति करणेवा घञ् ॥

आरज । त्रि । विजन्मनि । अनियुक्ता सुते ॥ जारात् जात । जनी०ड ॥

आरणी । स्त्री । स्थूलजीरके ॥

आरङ्गवी । स्त्री । मध्यममार्गे नक्षत्रविशेषाणां संज्ञाविशेषे ॥ यथा । ज्येष्ठानुराधाविशाखावीथीजारङ्गवीमता । एतास्तुवीथयस्तिस्रो मध्यमोमार्ग उच्यतइति ॥

आरित । त्रि । शोषिते ॥

आरी । स्त्री । औषधीभेदे । जाडी इतिगौडभाषा ॥

आरुत्थ । पु । त्रिगुणाच्छिद्राकयन्त्रे ॥

आल: । पु । नीपवृक्षे ॥ न । गवाक्षे । जाली इतिभाषा ॥ आनाये । सूत्रादिनिर्मिते मत्स्यादिजन्तुरोधकवस्तुनि ॥ न्धारके । पक्ष्यादिधारणार्थे पाशे ॥ दम्भे ॥ वृन्दे । गणे ॥ इन्द्रजाले ॥ जलेक्षिप्यते । शेषत्वस्य यू ॥ जलतिघनीभवति । जलघातने । ज्वलितीतिवा ॥ यद्वा । जालयति । जलसवरणे । चु० । पचाद्यच् ॥

जालक । पु । गवाक्षे ॥ न । कोरके ॥ दम्भे ॥ कुलाये ॥ आनाये ॥ न । स्त्री । मोचकफले ॥ नवकलिकावृन्दे । धारके ॥ समूहे ॥

जालकार । त्रि । जालकर्त्तरि ॥

जालकारक । पु । मर्कटके । लूतायाम् ॥ त्रि । जालकर्त्तरि ॥ जालस्र कारक ॥

जालकिनी । स्त्री । मेष्याम् ॥

जालगर्द्दभ । पु । रोगविशेषे ॥ तल्लक्षणं यथा । विसर्पवत् सर्पति यः शोथस्तनुरपाकवान् । दाहज्वरकरपित्तात् सशेयोजालगर्द्दभइति ॥

जालगोणिका । स्त्री । कलशाकायाम् ॥

जालजीवी । पु । धीवरे ॥

जालन्धर । पु । पीठविशेषे ॥ त्रिगर्त्तदेशे ॥ पुभूम्नि । जालन्धरा ॥ तद्देशस्थेषु । त्रिगर्त्तेषु ॥

जालपात् । पु । हंसे ॥

जालपाद । पु । शरारिप्रभृतिपक्षिविशेषेषु ॥ जालाकारपादस्त्वादेषाम् ॥

जालप्राया । स्त्री । योद्धृणां लोहमय्या

मङ्गरश्चिष्ठाम् ॥

जालवर्बूरकः । पुं । वर्बूरवृक्षविशेषे । छ त्राके ॥ जालवर्बूरको ज्ञेयो वातरो गकफापहः । पित्तदाहकरश्चोष्णः कषायश्चप्रकीर्त्तितः ॥

जालवान् । त्रि । मायाविनि ॥

जालिकः । पु । वागुरिके । जालजीवि नि ॥ लूतायाम् ॥ कैवर्त्ते ॥ त्रि । ग्रामजालिनि ॥ जालेन चरति । प र्पादिभ्यष्ठन् । ङीपि जालिकी ॥

जालिका । स्त्री । वस्त्रविशेषे ॥ स्त्रीणां मुखावरणवस्त्रे ॥ गिरिसारे ॥ जलौ कायाम् ॥ विधवायाम् ॥ भटानांलौ हरचिताङ्गरक्षिण्याम् । लोहसना हे ॥ चारके ॥

जालिनी । स्त्री । चित्रार्थगृहे । चित्र शालायाम् ॥ कोषातक्याम् ॥ राज कोशातक्याम् । तोरञी इति यस्याः प्रसिद्धिः ॥

जाली । स्त्री । पटोलिकायाम् । तोर ञी इति प्रसिद्धलतायाम् ॥ पटोले ॥ जलति । ज्ल० । ज्वलितीतिणः । जातेरिति गौरादित्वाद्वाङीष् ॥

जाल्म । पु । पामरे ॥ क्रूरे ॥ असमी क्ष्यकारिणि ॥ जालयति जाल्यते वा । जलअपवारणे । प्राकृतकानृम, । नेडुशिकृति ॥ जालं करोतिवा ॥

जावाल' । पु । सत्यकामेमुनौ ॥ ज वालाया अपत्यम् । अण् ॥ अजाजी वे । छागजीविनि । गडरिया इतिभा षा ॥ अवमलतिआलाति वा । अल० । अण्कोवा । जवालोऽजः तस्यायम् । अण् ॥

जापकम् । न । काळीयनामगन्धद्रव्ये ॥ इतिसारसुन्दरी ॥

जापी । पु । ध्रुवकप्रभेदे ॥ जापीति नाम्नाध्रुवको द्वात्रिंशच्चरान्वितः । सन्निपातेन तालेन शृङ्गारे ऽभीष्ट दोयके ॥ नाम्नः शब्दोयम् ॥

जाहक । पु । घोङ्घ खगे । घोंघ इति भाषा ॥ मार्जारे ॥ खट्वायाम् ॥ का कण्ड्वाम् । जलौकायाम् ॥ गात्रसङ्को चिनिप्राणिविशेषे । कामरूपिणि । विलवासे ॥

जाह्नवी । स्त्री । गङ्गायाम् । त्रिपथगा याम् ॥ जानुद्वारा पुराद्त्ता जह्नु' सम्प्रीयकोपतः । तस्यकन्या स्वरूपा च जाह्नवी तेनकीर्त्तितेतिब्रह्मवैव र्त्तपुराणम् ॥ जह्नो रपत्यं स्त्री । अण् ङीप् ॥

जाह्नवीय । त्रि । गाङ्गे ॥ जाह्नव्याअय म् । तस्येदमित्यर्थे वृद्धाच्छः ॥

जि. । पु । पिशाचे ॥ त्रि । जेतरि ॥ इ त्येकाक्षरकोषः ॥

जिगत्नु । पु । प्राणेषु ॥ जिगंसति । गत्नु० । गमे सन्वच्चेतिक्नु । अनुदात्तोपदेशे त्यादिना मलोप ॥

जिगमिषा । स्त्री । गमनेच्छायाम् । गन्तुमिच्छायाम् ॥

जिगमिषु । त्रि । गन्तुमिच्छौ ॥

जिगीषा । स्त्री । जेतुमिच्छायाम् । जयस्पृहायाम् ॥जेतुमिच्छति जिगीषति । जिगीषतीति जिगीषा । अप्रत्ययात् । टाप् ॥ व्यवसाये ॥ प्रकर्षे ॥

जिगीषु । त्रि । जयेच्छौ । जेतुमिच्छौ । नित्योत्साहवति ॥

जिघत्सा । स्त्री । क्षुधायाम् । बुभुक्षायाम् ॥ अत्तुमिच्छा घस्तुमिच्छा वा । अदे सन्नन्तादप्रत्यय । लुङ्सनोर्घस्लृ इतिघस्लादेश ॥

जिघत्सु । त्रि । क्षुधार्त्ते । बुभुक्षिते ॥ अत्तुमिच्छु । अदे सनि लुङ्सनोर्घस्लृ । तत सनाशंसेच्छ्यु ॥

जिघांसक । त्रि । हननेच्छुके ॥

जिघांसा । स्त्री । हननेच्छायाम् ॥ हन्तुमिच्छेत्यर्थ ॥

जिघांसु । पु । शत्रौ ॥ त्रि । हन्तुमिच्छौ ॥ हन्ते सन्नन्तादुप्रत्यय । अभ्यासाच्चेतिकुत्वम् । अज्झनगमासनीतिदीर्घ ॥

जिघृक्षा । स्त्री । गृहीतुमिच्छायाम् ॥

जिघृक्षु । त्रि । गृहीतुमिच्छौ ॥ गृहे सन्नन्तादु ॥

जिघ्र । त्रि । घ्राणकर्त्तरि ॥

जिङ्गिनी । स्त्री । वृक्षविशेषे । प्रमोदिन्याम । झिङ्गिन्याम् ॥ जिङ्गनीमधुरासोष्णा कषाया योनिशोधिनी । कटुका व्रणहृद्रोगवातातीसारहृत्पटु ॥

जिङ्गी । स्त्री । मञ्जिष्ठायाम् ॥ जिङ्गति । जिगिगतौ । पचाद्यच । गौरादित्वान् ङीष् ॥

जिजीविषा । स्त्री । जीवितुमिच्छायाम् ॥

जिजीविषु । त्रि । जीवितुमिच्छौ ॥

जिज्ञासनीय । त्रि । जिज्ञासितव्ये । जिज्ञास्ये ॥

जिज्ञासा । स्त्री । ज्ञातुमिच्छायाम् ॥

जिज्ञासित । त्रि । ज्ञातुमिष्टे ॥ विचारिते ॥ कृतजिज्ञासे ॥

जिज्ञासु । त्रि । मुमुक्षौ । आत्मज्ञानार्थिनि ॥ ज्ञातुमिच्छौ ॥ बहुश्रुतस्वल्पभाषी जिज्ञासुर्ज्ञानवानपीति तन्त्रम् ॥

जित । त्रि । प्राप्तपराजये । परिभूते । पराजिते ॥ यथा । नहि जिते जेतु रणे स्यात् मुचितम् ॥ भजते विदे

श अधिकेनजित कादनुप्रतेश अथ वा कुशल ॥ लब्धे । स्वायत्तीकृते । वशीकृते ॥ पु । अर्हदुपासकविशेषे ॥

जितकाम । त्रि । सदाशिवे ॥ जित कामोयेन ॥

जितकाशि । त्रि । दृढमुष्टौ ॥ इतिमहा भारतेनीलकण्ठ. ॥

जितकाशी । त्रि । जिताहवे । जयिनि ॥ जितेनजयेन काशते प्रकाशते । काशृदीप्तौ । शीले णिनिः ॥

जितक्रोध । पु । शिवे ॥ विष्णौ ॥ जित क्रोधो येन ॥ जितक्रोध कामं त ह्रिंसुरादीन् ४न्ति माधव. । वेदमा र्गस्थापनार्थं नतु कोपवशात् प्रभु ॥ भृगुपाद्घातेनापिक्रोधानुत्पत्ते ॥ त्रि । जितामर्षे ॥

जितनेमि । पु । आश्वत्थे । अश्वत्थनि र्मितेदण्डे ॥ त्रि । जितनेमिके ॥

जितशत्रु । पु । इत्तार्हत्पितरि ॥ त्रि । कृतशत्रुपराजये ॥

जितसङ्गदोष. । त्रि । प्रियाप्रियसन्नि धावपि रागद्वेषविवर्जिते ॥ जिता. सङ्गजनिता दोषा येन ॥

जितात्मा । त्रि । जितेन्द्रिये ॥ जितआ त्मायेन ॥

जितामित्र । पु । हरौ ॥ जिता अमित्रा वाह्या आभ्यन्तराश्च येन ॥ त्रि ॥ कृ तशत्रुपराजये ॥

जितारि । पु । बुद्धे ॥ वृत्तार्हत्पितरि ॥ त्रि । जितशत्रौ ॥ जिताअरयोयेन ॥

जिताष्टमी । स्त्री । जीमूताष्टम्याम् ॥

जिताहव. । पु । जितकाशिनि ॥

जितुम. । पु । मिथुनराशौ ॥

जितेन्द्रियः । त्रि । स्ववशीकृतसर्वेन्द्रिये । शान्ते ॥ यथा । श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नर. । न हृष्यति ग्लायतिवा सविज्ञेयो जितेन्द्रिय' ॥ जितानि वशीकृतानि इन्द्रियाणि श्रोत्रादीनियेन ॥ इत्यमरः ॥ पु । कामवृक्षाख्ये क्षुपविशेषे ॥

जितेन्द्रियाह्वः । पु । काकटुङ्गितरौ ॥

जित्तम. । त्रि । जयशीलानांमध्ये उ त्तमे ॥

जित्यः । पु । हलौ । हलदले । कृष्टस मीकरणार्थे स्थूलकाष्ठे ॥ विमूलनि र्नीयजित्या मुख्यकल्कषित्रिषु इति निपातनात् क्यप् ॥

जित्वा । पु । जयिनि ॥ जयति । जि० । शीङ्क्रुशीत्यादिनाक्वनिप् ॥

जित्वर । त्रि । जेतरि ॥ जयशील । इण्नशजिसर्त्तिभ्य क्वरप् ॥

जित्वरी । स्त्री । काशिकापुर्याम् ॥ टि ड्ढेतिङीप् ॥ जयशीलायाम् ॥

जिन । पु । अर्हति ॥ बुद्धे ॥ विष्णौ ॥

अतिवृद्धे ॥ विश्वाकुचितमवादिति मुनि विशेषे ॥ त्रि । जिञ्चरे ॥ अवति । जि० । स्नुपिञ्जिदीकृत्यविभ्यो नक् ॥

जिनसद्म । न । जिनगृहे । जैन्यो विहारे ॥

जिनसुत । पु । बुद्धे ॥ बुद्धोनाम्नाजिन सुत' कीकटेषु भविष्यति । इति श्रीभागवतम् ॥

जिनेन्द्र । पु । बुद्धे ॥ जिनाना मिन्द्र' ॥

जिवि । पुं । काले । समये ॥ पर्यायिः ॥ जीवंति जीयंते वा । कृभृ० । जी यंते क्विन्रश्चव इति क्विन्प्रत्ययो राञ्चचवादेश । वाकुत्वकाद्य क्विने जिदीर्घोन ॥

जिष्णु' । पु । वासवे ॥ अर्जुने ॥ विष्णौ ॥ अर्के ॥ वसुषु ॥ त्रि । जित्वरे ॥ जयति । जयनशीलोवा । जितवेऽ भिभवेवा । ग्लाजिस्थश्चेतिग्स्नु ॥

जिहीर्षा । स्त्री । हर्तुमिच्छायाम् ॥ कृञ्०-अप्रत्ययादित्य ॥

जिह्म । त्रि । कुटिले ॥ मन्दे ॥ न । तग रपादपे ॥ जहाति त्यज्यतेवा । ओहा क्० । जहाते.सन्वद्वालोपश्चेतिमन् ॥

जिह्मग । पु । सर्पे ॥ मदने ॥ त्रि । म न्दगे ॥ जिह्मकुटिलगच्छति । गम्लृ०, अन्येभ्योपीतिड' ॥

जिह्मता । स्त्री । सङ्कोचे ॥

जिह्मप्राय' । त्रि । कपटबहुले ॥

जिह्ममोहन' । पु । भेके ॥

जिह्मशल्य । पु । खदिरे ॥

जिह्मित. । त्रि । घूर्णित ॥

जिह्म । पु । न । तगरमूले ॥

जिह्वल. । पि । लुब्धे । लोलुपे ॥ यथा । आत्मकृत्वा परश्राद्धे भुञ्जते ये च जिह्वला । पतन्ति नरके घोरे लु प्तपिण्डो दकक्रिया ॥

जिह्वा । स्त्री । रसनायाम् । रसज्ञाने न्द्रिये ॥ अस्या परीक्षा यथा । शाकपत्रप्रभारूक्षा स्फुटिता रसना ऽनिलात् । रक्ता श्यामा भवेत् पित्ता लिप्ता शुभ्री धवला कफात् ॥ परिदग्धा खरस्पर्शा कृष्णा दोषत्रये ऽधिके । सैव द्वेषद्वयाधिक्ये दोष द्वितयलक्षणेति भावमिश्र' ॥ लेढि लिहन्त्यनयावा । लिह० । शेवयह्व जिह्वेतिसाधु ॥

जिह्वानिर्लेखनम् । न । जिह्वामार्जने । जीभी कनी इति भाषा ॥ जिह्वा मार्जनद्रव्ये । जीभी इति भाषा ॥ तत्तु दशाङ्गुल कोमल कृशं स्वर्ण रूप्यताम्र लोहनिर्मित जिह्वामला पकर्षणे प्रशस्तम् । तस्यगुणा । वक्त्रवै रस्यजिह्वाश्रितमलनाशित्वम् । आ

रोग्यरुचिकारित्वञ्चेतिराजवल्लभ ॥

जिह्वाप । पु । शुनि ॥ मार्जारे ॥ व्याघ्रे ॥ दीपिनि । चित्रव्याघ्रे ॥ भल्लूके ॥ सिंहे ॥ जिह्वयापिबति । पा० । क ॥

जिह्वामलम् । न । कुलुके ॥

जिह्वामूलीय । पु । कखाभ्यां प्रागर्द्धविसर्गसदृशे (ꣻ) विसर्गप्रभेदे ॥ जिह्वामूलेभव । जिह्वामूलाङ्गुलेश्छ ॥

जिह्वारद' । पु । खगे ॥

जिह्वालिट् । पु । कुक्कुरे ॥ मार्जारे ॥ जिह्वयालेढि । लिह० । क्विप् ॥

जिह्वाशल्य । पु । खदिरवृक्षे ॥

जिह्वास्वाद । पु । लेहने ॥ आस्वदनम् । स्वद० । घञ । जिह्वयाआस्वाद' ॥

जीन । त्रि । वृद्धे ॥ जिनातिस्म । ज्या० । गत्यर्थेतिक्त । ग्रहिज्येतिसम्प्रसारणम् ॥ हलइतिदीर्घ । ल्वादिभ्यश्चेतिनत्वम् ॥ चर्मपुटे ॥

जीमूत । पु । अद्रौ ॥ भृतिकरेइति मेदिनी ॥ भृतिकरे इतिहेम ॥ देवताडे ॥ जीमूतइव ॥ पयोधरे ॥ वासवे घोषके ॥ मुस्तके ॥ जयति नभ जीयतेऽनिलेनवा । जि० । जेमूट्चोदात्तइतिक्त । जेर्दीर्घश्च ॥ जीवस्योदकस्यमूत पटवन्धोयस्येति वा । पृ० ॥ जीवनं जल मूत बद्धमनेन । मूङ् बन्धने । कर्मणि क्त । पृषोदरादित्वात् वनशब्दलोप ॥ ज्यानजी । ज्या० । स० क्विप् । जियावयोहान्यामूतोवद्धइति वा ॥ जीवन मुञ्चति वा । पृ० ॥

जीमूतक । पु । देवदाल्याम् ॥

जीमूतकूट । पु । पर्वते ॥

जीमूतमूलम् । न । शट्याम् ॥

जीमूतवाहन । पु । इन्द्रे ॥ जीमूतावाहनमस्य ॥ धर्मरत्ननामकस्मृतिसङ्ग्रहकर्त्तरि ॥

जीमूतवाही । पु । धूमे ॥

जीमूताष्टमी । स्त्री । गौणाश्विनकृष्णाष्टम्याम् ॥

जीर' । पु । जीरके ॥ खड्गे ॥ अणौ ॥ जुवति । जु सौत्र । जोरीचेतिरक ॥ जिनाति वा । ज्या० । ज्यश्चेतिरग्वा ॥

जीरक । पु । अजाज्याम् । जीराइति भाषा ॥ जीरात् सञ्ज्ञायामितिकन् ॥ अस्यगुणायथा । जीरकत्रितयं रूक्षं कटूष्णदीपनं लघु । सङ्ग्राहि पित्तलंमेध्यं गर्भाशयविशुद्धिकृत् ॥ ज्वरघ्नं पाचनं वल्यं वृष्यं रुच्यं कफापहम् । चक्षुष्यं पवनाध्मानगुल्मच्छर्द्यतिसारहृदिति भावप्रकाश ॥

जीरण । पु । जीरके ॥

जीरिका । स्त्री । वंशपत्रीतृणे ॥

जीर्ण । पु । जीरके ॥ न । शैलजे ॥ त्रि ।

वृद्धे । जर्ति ॥ पुरातने॥ परिपक्के ॥
जीर्य्यतिस्म । जृष् ० । गन्त्यर्थेतिक्त
। चहतदृत । निष्ठानत्वम् ॥
जीर्णज्वर. । पु । पुरातनज्वरे ॥ अस्य सामान्यलक्षण यथा । योद्वादशभ्यो दिवसेभ्य ऊर्द्धं दोषत्रय स्तद्दिगुणेभ्यऊर्द्धम् । न्त्वर्णां तनौ तिष्ठति मन्द वेगो भिषग्भिरुक्तोज्वर एष जीर्ण-इति ॥
जीर्णदारु । न । विधारा इति प्रसिद्धे वृद्धदारकभेदे । सुपुष्पिकायाम् ॥
जीर्णपत्र । पु । पट्टिकालोध्रे ॥
जीर्णपत्रिका । स्त्री । वशपत्रीतृणे ॥
जीर्णपर्ण । पु । कदम्बे ॥ न । पुरातन पत्रे ॥ त्रि । तद्वति ॥
जीर्णफञ्जी । स्त्री । जीर्णदारुणि ॥
जीर्णवज्रम् । न । वैक्रान्तमणौ ॥
जीर्णवस्त्रम् । न । पटच्चरे । मलवस्त्रे॥ जीर्णञ्च तद्वस्त्रञ्च ॥ त्रि । तद्युक्त ॥
जीर्णवुध्र । पु । पट्टिकालोध्रे ॥ कैव-र्त्तीमुस्तके ॥
जीर्णवुध्रकम् । न । परिपेले ॥
जीर्णा । स्त्री । स्थूलजीरके ॥
जीर्णास्थिमृत्तिका । स्त्री । अकार्य्यार्थ कृत्रिममृद्विशेषे ॥ यथा । अथवक्ष्ये तुजीर्णास्थिमृत्तिकाकरणम्प्रिये । ग्रि खातत्स्थले कुर्य्याद्दीर्घं गर्त्तं म नोहरम् ॥ नि क्षिपेत् तत्रमानास्थ्य स्थय द्विचतुष्पदाम् । सर्जिक्षार म हाक्षार मृत्क्षार लवणानिच ॥ ग न्धकोप्याजक चेष्य नानामूत्राणि त त्रच । एव कृत्वा मासषट्क दद्यात् पाषाणमृत्तिकाम् ॥ कङ्कास्यूर्द्धं त दूर्द्धन्तु कुर्य्यादक्षोष्टका शुभाम् । त्रि वर्षाज्जायते सर्वमेकीभूत द्दषत्स मम् ॥ ततोनिष्काश्य तच्चूर्णं कृत्वा पात्राणि निर्म्ममेत् । प्रशस्त भोजन तत्र सूचये दन्नदूषणम् ॥ मद्यावि षस्य सयोगात् तस्य भङ्ग प्रजायते । दूषीविषादिसंयोगात् पात्रे स्फो टाभवन्तिहि ॥ तत्रचिन्ह चतुर्विध पात्र कृष्ण प्रजायते । एवज्ञात्वा त च दद्यान्नकदाचिद्विषादिकभितिरा वण ॥
जीर्णि । स्त्री । ज्यानौ । जीर्णत्वे ॥ ज रणम् । जृष्वयोहानौ । क्तिन् । ऋ ल्वादिभ्य क्तिन्निष्ठावत् । रदाभ्यामि तिनत्वम् ॥
जीर्णोद्धार । पु । भग्नमन्दिरादे स स्कारे ॥
जीर्य्यत् । त्रि । वयोहानिप्राप्नुवति ॥
जीर्व्वि । पु । कुठारे । परशौ ॥ जृष० । जृशस्तृ जागृभ्य क्विन् ॥
जीव । पु । प्राणिनि ॥ दस्तौ ॥ वच

भेदे ॥ वृहस्पतौ ॥ अमुधारणे ॥ कर्णे ॥ मनुष्यादिकीटपर्यन्ते प्राणिमात्रे । कार्यकरणसङ्घाते ॥ अनेकान्तवादिनां जीवास्तिकायसञ्ज्ञया परिभाषिते जीवपदार्थे ॥ त्रिविधस्त्वसौ अनादिसिद्धमुक्तबद्धभेदात् । अत्रानादिसिद्धो ऽर्हन् जीवास्तिकायाख्य. । अथेतमोक्षादिवन्धोमुक्तः । मोक्षाद्यावृतस्तु बद्ध इति ॥ * ॥ उपाधिप्रविष्टे ब्रह्मणि । वाङ्मन प्राणकरणग्रामानुप्रविष्टे । घटावच्छिन्नाकाशवत् शरीरचितयावच्छिन्ने चैतन्ये ॥ दर्पणस्थमुखप्रतिविम्बवत् वुद्धिस्थे-चैतन्यप्रतिविम्बे ॥ साभासाहङ्कारे । चित्प्रतिविम्बे ॥ प्राणादिकलापस्य धारयितरि ॥ प्राणान् चेतनरूपेण धारयन् जीव उच्यते ॥ लिङ्गदेहे ॥ एवं पञ्चविध लिङ्ग त्रिवृत् षोडश विस्तृतम् । एष चेतनया युक्तो जीव इत्यभिधीयते ॥ इति श्रीभागवतम् ॥ पञ्चविधं पञ्चतन्मात्रात्मकम् । । त्रिवृत् त्रिगुणम् । षोडशविकारात्मना विस्तृतमित्यर्थ ॥ * ॥ विज्ञानमयकोशावच्छिन्नश्चिदात्मा कर्त्तृत्वभोक्तृत्वाद्यभिमानित्वेन इहलोकपरलोकगामी व्यावहारिको जीवउच्यते ॥ वालाग्रशतभागस्य शत

धा कल्पितस्य च । भागो जीव. स विज्ञेय सचानन्त्याय कल्पते ॥ * ॥ जीवोनामदेहादिव्यतिरिक्तस्तत्साक्षीत्वम्पदार्थी योय विज्ञानमय यो य संसरति योय संसारी नतु देहादिर्जीव तस्य दृश्यस्य द्रष्टत्वानुपपत्ते. ॥ * ॥ अस्ति देवि परब्रह्मस्वरूपी निष्कल शिव । सर्वज्ञः सर्वकर्त्ता च सर्वेशो निर्मलो ऽव्यय. ॥ स्वयंज्योति रनाद्यन्तो निर्विकार' परात्पर. । निर्गुणः सच्चिदानन्द स्तदंशा जीव सञ्ज्ञका. ॥ अनाद्यविद्योपहिता यथाग्नौविस्फुलिङ्गका । देहाद्युपाधिसम्भिन्ना स्ते कर्मभि रनादिभि. ॥ सुखदु' खप्रदै पुण्यपापरूपै र्नियन्त्रिता' । तत्तज्जातियुत देह मायुर्भोगञ्च कर्मजम् ॥ प्रतिजन्म प्रपद्यन्ते तेषा मप्यपरं पुन । सूक्ष्म लिङ्गशरीर तदामोक्षा दक्षयं प्रिये ॥ इति कुलार्णवे १ उल्लास ॥ पु । न । जीविते ॥ जीवनम् । जीव० । इत्यच्चेति घञ् ॥ जीवति वा । इगुपधलक्षण क ॥ जीवयति वा । अच् । सुतसञ्जीवनमन्त्रज्ञत्वात् ॥

जीवक । पु । प्राणके द्रुमे ॥ पीतसाले । विजयसार इति ख्याते ॥ क्षपणे ॥ क्षपणे ॥ अष्टवर्गान्तर्गतौषधविशेष

। कूर्चशीर्षे । ह्रस्वाङ्गे ॥ अस्यस्वरूप पर्यायगुणा । यथा । जीवकर्षभकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ । रसोनकन्दवत्कन्दौ निःसारौ सूक्ष्मपत्रकौ ॥ जीवकः कूर्चकाकार ऋषभो वृषशृङ्गवत् ॥ जीवको मधुरः शृङ्गो ह्रस्वाङ्गः कूर्चशीर्षकः । ऋषभो वृषभो धीरो विषाणी न्द्राक्ष इत्यपि ॥ जीवकर्षभकौ बल्यौ शीतौ शुक्रकफप्रदौ । मधुरौ पित्तदाहार्श्वकार्श्यवातक्षयापहाविति ॥ त्रि । से वके । सेविनि ॥ वृद्ध्याशिनि ॥ जीविनि ॥ आहितुण्डिके ॥ जीवयति । जीव० । ण्वुल् ॥ जीवतात् आशिषिचेतिवुन ॥

जीवघन । पु । हिरण्यगर्भे ॥ घनोमूर्त्तिः । जीवस्यघनो घन जीवघन सैन्धवखिल्यवत् ॥

जीवजीव । पु । चकोरे ॥

जीवञ्जीव । पु । चकोरे ॥ जीवंजीवयति । तद्दर्शनेनविषनाशात् । कृत्यल्युटो बहुलमिति बाहुलकात् खच् ॥ खगान्तरे ॥ द्रुमप्रभेदे ॥

जीवत्तोका । स्त्री । जीवद्वत्सायाम् । जीवत्स्याम् ॥ इतिहेम ॥

जीवत्वम् । न । कूटस्थादीनां चतुर्णां समूहे ॥ तथ हि । कूटस्थब्रह्म अन्तःकरणम् अन्त करणाश्रयाऽविद्या चिदाभासश्चेति चतुष्टयमिलितसञ्जीवत्वमितिनीलकण्ठश्चैव ॥

जीवत्पति । स्त्री । सधवायाम् ॥

जीवत्पितृक । त्रि । विद्यमानपितृके ॥ यथा । अमास्नान गयाश्राद्ध दक्षिणामुखभोजनम् । नजीवत् पितृक कुर्यात् कृतेपि पितृहाभवे दितिरघुनन्दन ॥

जीवथ । पु । कूर्मे ॥ प्राणे ॥ मयूरे ॥ मेघे ॥ त्रि । चिरायुषि ॥ धार्मिके ॥ जीवति । जीव० । शीङ्शपिरुगमिवञ्चिजीविप्राणिभ्योऽथ ॥

जीवद । पु । वैद्ये ॥ विद्विषि । रिपौ ॥ ग्रन्थिपर्णे ॥ त्रि । जीवनदातरि ॥ जीव ददाति । डुदाञ्० । क ॥

जीवदात्री । स्त्री । ऋद्धिनामौषधौ ॥

जीवधनम् । न । गवादिपशुषु ॥

जीवनम् । न । वर्त्तने । जीविकायाम् ॥ जीवन्त्यनेन । जीव० । ल्युट् ॥ नीरे । जले ॥ प्राणधारणे । आयुषि । जन्ममरणयोमेध्यकाले ॥ क्षीन जीवना द जीवन वरम् ॥ मज्जनि ॥ हैयङ्गवीने ॥ पु । पुत्रे । जीवकौषधे ॥ वाते ॥ क्षुद्रफलकवृक्षे ॥ जीव्यतेऽनेन । जीव० । करणाऽधिकरणयोश्चेतिकरणे ल्युट् ॥

जीवनकम् । न । अन्ने ॥

जीवनयोनि । स्त्री । यत्नविशेषे ॥ स तु । अतीन्द्रिय शरीरे प्राणसञ्चार कारणम् । इतिभाषापरिच्छेद ॥

जीवनहेतु । पु । वर्त्तनोपाये ॥ विद्या शिल्पभृति.सेवागोरक्ष विपणि कृषि । वृत्तिर्भैक्ष्य कुसीदञ्च दशजीवनहेतव ॥

जीवना । स्त्री । मेदौषधे ॥

जीवनाघातम् । न । विष ॥

जीवनावास । पु । वरुणे ॥ जीवन मावासो यस्य ॥

जीवनिका । स्त्री । हरीतक्याम् ॥

जीवनी । स्त्री । गुर्जरदेशे डोडी इति प्रसिद्धायां जीवन्त्याम् । मधुस्रवाया म् । काकोल्याम् ॥ डोड्याम् ॥ मेदायाम् ॥ महामेदायाम् ॥ यष्ट्याम् ॥ जीव्यतेऽनया । जीव॰ । करणेल्युट् ॥

जीवनीयकम् । न । } जले । वारि-
जीवनीयकम् । न । } णि ॥ जीवनाय हितम् । छ ॥ जीवनीयगणे ॥

जीवनीयगण । पु । औषधविशेषे ॥ यथा । अष्टवर्ग सयष्टीको जीवन्ती मुद्गपर्णिका । माषपर्णी गणोऽयन्तु जीवनीय इतिस्मृत ॥ जीवनो मधुरश्चापि नाम्ना सपरिकीर्त्तित. ॥ जीवनीयगण. प्रोक्त. शुक्रकृद् दृष्टणो हिम ॥ गुरुर्गर्भप्रद स्तन्य कफकृत् पित्तरक्तहृत् । तृष्णा शोष ज्वरदाह भ्रम मूर्छा व्यपोहति ॥ अपिच । अष्टवर्गश्च पर्णिन्यौ जीवन्ती मधुक स्तथा । जीवनीयगण प्रोक्तो जीवन स्तु पुन स्तथेतिवैद्यक परिभाषा ॥

जीवनीया । स्त्री । जीवन्त्याम् । गुर्जरे डोडी इति प्रसिद्धायाम् ॥ जीवनाय हिता । तस्मैहितमिति छ ॥

जीवनेत्री । स्त्री । सहल्याम् ॥

जीवनौषधम् । न । जीवातौ । मृतस ञ्जीवनौषधे ॥ येनम्रियमाणो जीवति । जीवनस्य औषधम् ॥

जीवन्त. । पु । प्राणे ॥ औषधे ॥ जीवशाके ॥ त्रि । आयुष्मति ॥ जीव्यात् । जीव॰ । कृच्छिनन्दि जीविप्राणिभ्य षिद्राशिषोतिभच् । भोन्त ॥

जीवन्तिका । स्त्री । गुडूच्याम् ॥ जीवाख्यशाके ॥ वन्दायाम् ॥ हरीतक्याम् । जीवति । जीव॰ । कृच्छिनन्दीति भच षित्त्वान् ङीष् । कन् ॥

जीवन्ती । स्त्री । जीवन्त्याम् । मधुस्रवायाम् ॥ जीवन्ती शीतला स्वादु स्निग्धा दोषत्रयापहा ॥ रसायनी बलकरी चक्षुष्या ग्राहिणी लघु ॥ शाकप्रकारस्तु जीवन्त्या कोमल

पच स्विन्न तक्र सुभर्जितम्। हिङ्गुना सयुते तैले तक्र चिप्ता प्रलेहयेत् ॥ डोडी इति गुर्जरेऽस्या प्रसिद्धिः॥ अम्याम्॥ गुडूच्याम्॥ वन्दायाम्॥ डोड्याम्॥ हरीतक्याम्॥ जीवन्ती स्वर्णवर्णिनीति लचणम्॥ जीवति जीवयति वा। जीव०। लट'शतुरु गित्वात् ङीप्॥

जीवन्मुक्त। चि। आत्मविदि। जीवन्नेव मुक्तससारे॥ जीवन्मुक्तो नाम स्वस्वरूपाखण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डब्रह्मणि साचात्कृते अज्ञानतत्कार्यसञ्चितकर्मसशयविपर्ययादीना मपिबाधितत्वा दखिलबन्धरहितो ब्रह्मनिष्ठ इति॥*॥ ननुजीवन्मुक्तो व्यवहरति न वा। आद्ये तस्य वद्वान्निशिलचणता। द्वितीये देहस्यानुपयोगात् सद्य पातप्रसङ्ग इत्यतआह। अयन्तु व्युत्थानसमये मासशोणितमूत्रपुरीषादि भाजनेन शरीरेण आन्ध्यमान्द्यपटुत्वादि भाजनेनेन्द्रियग्रामेण अशनायापिपासाशोकमोहादिभाजनेनचान्त करणेन पूर्वपूर्ववासनया क्रियमाणानि कर्माणि भुज्यमाननि ज्ञानाविरुद्धान्यारब्धफलानिच पश्यन्नपि बाधितत्वात् परमार्थतो न पश्यतीति। दृष्टान्तेनोक्तमर्थं स्पष्टयति। यथेन्द्रजालमिति ज्ञानवान् तदिदमिन्द्रजाल पश्यन्नपि परमार्थमिदमिति न पश्यति। उक्तञ्च। सुषुप्तिवज्जाग्रति यो न पश्यति द्वयन्तु पश्यन्नपिचाऽद्वयत्वत। तथाच कुर्वन्नपि निष्क्रियश्च य स आत्मवि न्नान्य इतीह निश्चय. इति॥ वेदविद्याव्रत स्नान देशिकस्य मुखात् स्वयम्। गृहीत्वाष्टोत्तरशत ये पठन्ति द्विजोत्तमा। प्रारब्धच्चयपर्यन्त जीवन्मुक्ताभवन्तिते॥ अष्टोत्तरशत मुपनिषदाम्॥ कौलिके॥ यथा। धन्या माहेश्वरा स्वार्थप्रत्यभिज्ञानशालिन। स्वपरिज्ञानमात्रेण जीवन्मुक्ता भवन्तिहि॥ महामन्त्रप्रभावेण कुलाचारप्रभावत। स्वेच्छाचारा निर्विकल्पा जीवन्मुक्ताहि कौलिका॥ योन्तर्यामवदृश्यत्वः स जीवन्मुक्त उच्यते॥ जीवन्नेव मुक्त॥

जीवन्मुक्ति। स्त्री। जीवतो बन्धनिवृत्तौ॥ जीवत पुरुषस्य कर्तृत्वभोक्तृत्वसुखदु खादिलचण श्चित्तधर्मः क्लेशरूपत्वाद्बन्धो भवति तन्निवृत्ति स्वरूपाजीवन्मुक्ति॥

जीवन्मुक्त्युपाय। पु। कुलमार्गे॥ जी

वन्मुक्तो रुपायस्तु कुलमार्गेष्विनापर इतिसदाशिवोक्तो ॥

जीवपुत्र । पु । } जीयापोताइति
जीवपुत्रक. । पु । } प्रसिद्धे पुत्रजीव द्रुमे ॥

जीवपुष्पा । स्त्री । वृहज्जीवन्त्याम् ॥

जीवप्रिया । स्त्री । हरीतक्याम् ॥

जीवभद्रा । स्त्री । जीवन्तीलतायाम् ॥ वृद्धिनामौषधे ॥

जीवभूत । त्रि । प्राणधारणोपाधिना कर्त्ता भोक्ता ससारीति स्वपेव प्रसिद्धिमुपगते ॥

जीवमन्दिरम् । न । शरीरे ॥

जीवला । स्त्री । सैहल्याम् ॥

जीवलोक' । पुं । ससारे ॥ यथा । माता पिता गुरुजन स्वजनो ममेति मायोपमे जगति कस्य भवेत् प्रतिज्ञा । एको यतो व्रजति कर्मपुर सरोऽय विश्रामवृक्षसदृश खलुजीवलोक ॥ सायसायं वासवृक्ष समेता प्रात' प्रातस्तेनतेन प्रयान्ति । त्यक्त्वान्योन्य तञ्च वृक्ष विहङ्गा स्वदत् तद्वज्ज्ञातयो ऽज्ञातयश्चेति ॥ जीवानांलोक ॥

जीववल्ली । स्त्री । क्षीरकाकोल्याम् ॥

जीवशाक । पु । मालवप्रसिद्धे शाक विशेषे । जीवन्ते । रक्तनाले । ताम्र पत्रे ॥

जीवशुक्ला । स्त्री । क्षीरकाकोल्याम् ॥

जीवश्रेष्ठा । स्त्री । ऋद्धिनामौषधे ॥

जीवसञ्ज्ञ: । पुं । कामवृद्धिवृक्षे ॥

जीवसाधनम् । न । धान्ये ॥

जीवसू: । स्त्री । जीवद्वत्सायाम् । जीवत्तोकायाम् ॥

जीवस्थानम् । न । मर्मणि ॥

जीवा । स्त्री । जीवन्तिकायाम् । मधुस्रवायाम् । डोडी इति गुर्जर भाषा ॥ मौर्व्याम् । धनुषोगुणे ॥ वचायाम् ॥ शिञ्जिते ॥ भूमौ ॥ वृत्ती ॥ जीवति । जीव० । पचाद्यच् । टाप् ॥

जीवातु । पुं । न । अन्ने । भक्ते ॥ जीविते ॥ जीवनौषधे । मृतसञ्जीवनौषधे ॥ जीवयति जीवत्यनेन वा । जीव० । जीवेरातु ॥

जीवात्मा । पु । देहिनि । जीवे । पुत्र भेदिनि ॥

जीवाधार । पुं । चेषे ॥ हृदये ॥

जीवान्तक । पु । जीवनार्थं पक्ष्यादीना घातके । शाकुनिके ॥ त्रि । जीवनाशके ॥ जीवाना मन्तक ॥

जीवाला । स्त्री । सैंहल्याम् ॥

जीवास्तिकाय. । पु । अनेकान्तवादिनां जीवपदार्थे ॥

जीविका । स्त्री । आजीवे । जीवनो-

पाये ॥ जीवन्त्याम् ॥ जीव्यते ऽन या । जीव० । गुरोश्चहलइत्य । सं ज्ञायां कन् । कुन्वा ॥

जीवितम् । न । प्राणने । जीवने ॥ चि । जीवनान्विते ॥ ब्रह्मादीनामपिजी वित स्वल्पमेव ॥ यथा । ये समर्था ज गत्यस्मिन् सृष्टिस्थित्यन्तकारिणः । तेपि काले प्रलीयन्ते कालोहिवलव- त्तर इतिस्मृतेः ॥

जीवितकाल । पु । जीवनावच्छिन्नका ले । आयुषि ॥ जीवितस्यकालः ॥

जीवितज्ञा । स्त्री । नाड्याम् ॥ इ० रा० ॥

जीविताशा । स्त्री । जीवनलोभे ॥ जी र्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः । जीविताशा धनाशाच जी र्यतो ऽपिनजीर्यति ॥

जीवितेश । पु । यमे । पितृपतौ ॥ प्रा णनाथे ॥ चन्द्रे ॥ सूर्ये ॥ चि । जी वितेश्वरे ॥ प्रिये ॥ जीवितस्वामिनि ॥ जीवातौ ॥

जीवी । पु । प्राणिनि ॥ जीविनां दाह णो रोगः कर्मभोगः शुभाशुभः । भ क्तो वैद्यस्त निहन्ति कृष्णभक्तिरसा यनात् ॥

जीवेष्टि । स्त्री । बृहस्पतिसवे ॥

जीवोत्पत्तिवाद । पु । पाञ्चरात्राणां वादे ॥ सयथा । ब्रह्मणोवासुदेवा ख्याज्जीवः सङ्कर्षणाभिधः । जायते च मनस्तस्मात् प्रद्युम्नाख्यं ततः पु नः ॥ अहङ्कारो ऽनिरुद्धाख्य श्चत्वा रो विश्वरूपकाः । वासुदेवाराधना द्यैजीयतेबन्धमोचनम् मिति ॥

जीवोपाधि । पु । सुषुप्त्यादिषु ॥ त्रयो जीवोपाधयः । तथाहि । सुषुप्तौ बु द्ध्यादिसंस्कारोपरञ्जित मज्ञानमात्र मुपाधिः । स्वप्ने जाग्रद्वासनामयं लि- ङ्गशरीर मुपाधि । जाग्रदवस्थाया- न्तु सूक्ष्मशरीरसंसृष्टस्थूलशरीरमु- पाधिरिति ॥

जीव्या । स्त्री । गोचुरदुग्धायाम् ॥ जी वन्त्याम् ॥ हरीतक्याम् ॥

जु । स्त्री । त्वरागमने ॥ सामान्यग मने ॥

जुगुप्सनम् । न । निन्दने ॥ त्रि । जुगु- प्साशीले ॥ जुगुप्सते तच्छील । गु पेरनुदात्तेतश्चेतियुच् ॥

जुगुप्सा । स्त्री । निन्दायाम् ॥ घृणायाम् । घिन् इतिभाषा ॥ जुगुप्सनम् । गुपगो पनकुत्सनयोः । गुपेर्निन्दायांसन् । अप्रत्ययादिति भावेस्त्रियाम । टाप् ॥

जुगुप्सित । चि । निन्द्ये ॥

जुङ्ग । पु । वृन्दारके ॥ जुङ्गति । जु गिवर्जने । अच् ॥ जुङ्ग्यते वा । घञ् ॥

जुङ्गक । पु । वृद्धदारकवृक्षे ॥ स्वार्थ

कन् ॥

जुटकम् । न । जटायाम् ॥ इति शब्द रत्नावली ॥

जुटिका । स्त्री । शिखायाम् । चोटी इति भाषा ॥ सहतकेशेषु ॥ जूडा जूटी इति भाषा ॥

जुषन् । त्रि । सेवमाने ॥

जुषमाण । त्रि । प्रीयमाणे ॥ सेवमाने ॥

जुष्कक । पु । मुद्गयूषे ॥

जुष्टम् । न । उच्छिष्ट । झूठ भूँठ इतिच भाषा ॥ त्रि । सेविते ॥ प्रीते । जुष्य ते स्म । जुषीप्रीतिसेवनयोः । क्त ॥

जुष्य । त्रि । सेव्ये ॥

जुहराण । त्रि । कुटिले ॥ चन्द्रे ॥ जु हूर्षति । हुर्च्छाकौटिल्ये । हुर्च्छे सनोलुक् छलोपश्चेत्यानच् ॥ जु हुराण कौटिल्यकारि इतिभाष्यम् ॥

जुहुवान् । पु । अनले ॥

जुहुवाण । पु । अध्वर्यौ ॥ जातवेद सि ॥ चन्द्रे ॥

जुहू । स्त्री । स्रुग्भेदे । पलाशकाष्ठनि र्मिते ऽर्द्धचन्द्राकृतिरूपे यज्ञपात्रे ॥ पर्णमये यज्ञपात्रविशेषे ॥ जुहोति अनया वा । हुदानादनयोः । द्युति गमि जुहोतीनां द्वेचेति क्विप् जुहो तेर्दीर्घश्च ॥ त्रैलोक्यात्मनः कोऽपस्य प्राग्भागे ॥ जुहूश्चयस्यादिशिकर्णि

णः प्राङ्मुखाः सन्त इति ॥

जू । स्त्री । आकाशे ॥ सरस्वत्याम् ॥ पिशाच्याम ॥ जवने ॥ जु सौत्रोगतौ । भ्राज भासेतिक्विप्दीर्घश्च । जू जु वौ जुव ॥ क्विब्वचिप्रच्छीत्यादिना क्विब्दीर्घौ वा ॥

जूट । पु । जटायाम् । जूडा इतिभाषा ॥ बन्धे ॥

जूटक । पु । न । केशबन्धे । जटायाम् ॥

जूति । स्त्री । जवने । वेगे ॥ जु सौत्रो वेगे । क्तिन् । ऊतियूतीत्यादिना निपातनाद्दीर्घ ॥

जूतिका । स्त्री । कर्पूरविशेषे ॥

जूर्ण । पु । उलपे ॥

जूर्णाख्य । पु । उलू इति गौडप्रसिद्धे तृणविशेषे । खरच्छदे । सूच्यग्रे ॥

जूर्णाह्वय । पु । देवधान्ये । जुवार इति भाषा ॥ इति हेमचन्द्र ॥

जूर्त्ति । स्त्री । वेगे ॥ आदित्ये ॥ ज्वर ति । ज्वररोगे । वीज्याज्वरिभ्योनि ॥

जूर्त्ति । स्त्री । ज्वरे ॥ ज्वरणम् । ज्वर० । क्तिन् । ज्वरत्वरेत्यूठ् ॥

जूष । पु । न । यूषे ॥

जूषणम् । न । धातुपुष्प्याम् । धाइका फूल इतिभाषा ॥

जृम्भ । त्रि । मुखादिविकाशे । जृम्भा याम् ॥ जृम्भात्त्यर्थं समीरणात् ॥

पीत्वैक श्वास मनिल पुन स्त्यजति वेगवान् । आलस्यनिद्रायुक्तस्य स जृम्भ इतिकथ्यते ॥ अस्यचिकित्सा । यथा । शुण्ठी पिप्पल्यूषण दीप्यक श्च सिन्धूद्भूत चेति सर्वं पृथग्वा । तद्रूप वा स्त्यम्चूर्णीकृत वा जृम्भाभङ्ग स्तत्कृत स्यात्तदैव ॥ जृम्भावेगे समुत्पन्ने शोभनेशयनेनरम् । स्वापयेत् तेन नियमाज्जृम्भावेग प्रशाम्यति ॥ जृम्भावेग चय याति कटुतैलेन मर्द्दनात् । भोजनात् स्वादुभोज्याना तथा ताम्बूलभक्षणादिति ॥

जृम्भणम् । जृभि॰ । घञ् ॥

जृम्भणम् । न । जृम्भे ॥ जृभिगात्रविनामे ॥ भावेल्युट् ॥

जृम्भमाण । त्रि । जृम्भाकुर्वाणे ॥ विवर्द्धमाने ॥

जृम्भा । स्त्री । विकाशे ॥ मुखविदारणे । जृम्भे ॥ जृभि॰ । गुरोश्चेत्य । टाप् ॥

जृम्भिका । स्त्री । जृम्भे ॥

जृम्भितम् । न । स्त्रीणा करणे ॥ ईहायाम् । विचेष्टिते ॥ प्रवृद्धे ॥ जृम्भे ॥ स्फुटिते । प्राप्तविकाशे ॥ जृम्भ सञ्जातो ऽस्य । तारकादित्वादितच् ॥

जृम्भिणी । स्त्री । एलापर्ण्याम् ॥

जेतुम् । अ । वशीकर्त्तुमित्यर्थे ॥

जेता । त्रि । जित्वरे । जैत्रे ॥ जयनशील । हन् । हत्वा ॥ विजितोत्कर्षो ज्जेतुरुत्कर्षी भवति ॥ पु । मधुच्छन्दस पुत्रे ऋषिविशेषे ॥

जेन्ताक । पु । चरकोक्ते स्वेदविशेषे ॥

जेमनम् । न । भोजने । जीमना इतिभाषा ॥ जमुअदने । ल्युट् ॥

जेय । त्रि । जेतव्यमात्रके ॥ जेतुयोग्य । अर्हेकृत्यतृचश्चेति योग्यतायामन्वोयत् ॥

जैत्र । पुं । पारदे ॥ न । औषधे ॥ त्रि । जेतरि ॥ जेतैव । प्र॰ अण् । जैत्रस्तु जेतायोगच्छत्यल विद्विषत'प्रति ॥

जैत्ररथ । त्रि । जयशीले ॥ इतिहलायुध ॥

जैत्री । स्त्री । जयन्तीवृक्षे ॥

जैन । पु । जिनमतावलम्बिनि । बौद्धे ॥ जिनस्यायम् । अण् ॥

जैपाल । पु । जयपालवृक्षे ॥

जैमिनि । पु । पर्व्वमीमांसाचार्य्ये ऋषिविशेषे ॥ अयसामवेदधरो वेदव्यासशिष्योवज्रवारक ॥ यथा । मुने कल्याणमित्रस्य जैमिनेश्चापि कीर्त्तनात । विद्युदग्निभयं नास्ति पठितेच गृहोदरेइति ॥

जैवम् । त्रि । जीवसम्बन्धिनि ॥ जीवस्येदम् । अण् ॥

जैवलि । पु । प्रवाहणे ॥ जीवलस्यरा

जोऽपथ्यम् । इञ् ॥

जैवातृक । पु । ग्लावि । सोमे ॥ भेषजे ॥ कर्पूरे ॥ त्रि । आयुष्मति । दीर्घायुषि ॥ कृशे ॥ जीवति जीवयति वा । जीव० । जीवेरित्यनु वृत्तौ आतृकन् वृद्धिश्चेतिसाधु ॥

जैह्माशिनेयः । पु । जिह्माशिनोऽपत्ये ॥ शुभ्रादित्वाट्ढक् । ढाखिडनायनेतिटिलोपाभाव ॥

जैह्म्यम् । न । कुटिलत्वे ॥

जोङ्गकम् । न । अगुरुणि ॥ जुङ्गति जुङ्ग्यते वा । जुगिवर्जने । कुन् । पृषोदरादि. ॥

जोङ्गट । पु । गर्भिण्यभिलाषे । दोहदे ॥ इति शब्दावली ॥

जोटिङ्ग । पु । महादेवे ॥ महाव्रतिनि ॥

जोड । पु । जोडने ॥ जोडनम् । जुड बन्धने । घञ् ॥

जोडनम् । न । बन्धने ॥

जोन्गाल । पु ।
जोन्गाला । स्त्री । } देवधान्ये ॥

जोषणम् । न । सेवने ॥

जोषम् । अ । सुखे ॥ प्रशंसायाम् ॥ तूष्णीमर्थे ॥ लङ्घने ॥ जुषते । जुषेरसौ । बाहुलकादम् ॥

जोषा । स्त्री । योषिति ॥ जुषते जुष्यते वा । जुषी प्रीतिसेवनयो । अच् घञ्वा ॥

जोषिका । स्त्री ॥ जालिकायाम् ॥

जोषित् । स्त्री । योषिति ॥ हृसृरुहियुषिभ्य इतिपाठे जुषेरिति ॥

जोषिता । स्त्री । स्त्रियाम् ॥ जोष्यते स्म । णिजन्तात्कर्मणि क्त ॥

जोष्य । त्रि । प्रियेविषये ॥ जोष्याम् हि जुषत. काख संमासौऽ निच्छन्तोमम ॥

जोहलम् । न । } पम्बमात्रस्यद्वि-
जोहलकम् । न । } तीये (ऽ।ऽ) पर्याये ॥

ज्ञ । पु । ब्रह्मणि । स्वप्रकाशे ॥ चान्द्रमसायने । बुधग्रहे ॥ विचक्षणे । विदुषि ॥ पद्मासने । चतुराननेऽ॥ भौमे ॥ जानाति । ज्ञाअवबोधने । इगुपधेतिकः । आतोलोपइटिचेत्या लोप ॥

ज्ञपित । त्रि । ज्ञप्ते ॥ ज्ञप्यतेस्म । ज्ञा मारणादौमित् । ण्यन्त.क्त. । वादान्तशान्तेतिसाधु ॥

ज्ञप्त । त्रि । ज्ञपिते ॥ ज्ञप्यतेस्म । ज्ञा अवबोधने मारणादौचवर्तते । मारणादौच्चामित् । ण्यन्त । क्त । वादान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ता. इतिसाधुः ॥

ज्ञप्ति । स्त्री । बुद्धौ । मनीषायाम् ॥

ज्ञपयति । ज्ञपमिच्च । अथ ज्ञाने ज्ञापने मारणतोषणनिशामने षुच वर्त्तते । चुरादि । तत्र ज्ञानार्थकात् ज्ञपेर्ण्यन्तत्वात् प्राप्तं युच वाधित्वा वाहुलकात् क्तिन् ॥ ज्ञाने ॥ ज्ञप्ते स्तु कारणं राम शिष्यप्रज्ञैवकेवला ॥

ज्ञात । त्रि । ज्ञानेन विषयीकृते । प्रतीते । बुद्धे । प्रमिते ॥ ज्ञा० । क्त ॥

ज्ञातनन्दन । पु । वर्द्धमानार्हद्विशेषे ॥

ज्ञातव्य । त्रि । अवगन्तव्ये । बोध्ये ॥ मन्तव्ये ॥

ज्ञातसिद्धान्त । पु । तान्त्रिके । शास्त्रतत्त्वज्ञे । तत्त्वार्थज्ञातरि ॥ ज्ञाता सिद्धान्ता येन ॥ आगमभाषया सर्वसिद्धान्तोपरि विराजमाने कौले ॥ यथा । सर्वेभ्यश्चोत्तमा वेदा वेदेभ्यो वैष्णवं परम् । वैष्णवादुत्तमं शैवं शैवाद्दक्षिणमुत्तमम् ॥ दक्षिणादुत्तमं वामं वामात् सिद्धान्तमुत्तमम् । सिद्धान्तादुत्तमं कौलं कौलात् परतरं नहीति ॥

ज्ञाति । पु । ताते । पितरि ॥ पितृव्यादिपितृपक्षे । सगोत्रे । सपिण्डसहोदरादौ । स्वजने ॥ सचतुर्विध । सप्तमपुरुषपर्य्यन्त सपिण्ड । ततस्त्रिपुरुषपर्यंत सकुल्य । ततश्चतुर्थपुरुषपर्यन्त समानोदक । जन्मनामस्मृतिपर्यन्तमपि समानोदक. । तत पर गोत्रज. ॥ ज्ञातिद्रोहे दोषोयथा । यानि कानिच पापानि ब्रह्महत्यादिकानिच । ज्ञातिद्रोहस्य पापस्य कलां नार्हन्तिषोडशीम् ॥ जानाति । ज्ञा० । क्तिच् ॥ ज्ञायते वा । क्तिन् ॥

ज्ञाता । त्रि । ज्ञानशीले । विदुरे । ज्ञानिनि ॥ ज्ञानाश्रये । अहङ्कारादिप्रकाशकत्वेन चेतने ॥ जानाति । ज्ञा० । तृन् ॥ इन्द्रियद्वारा विषयज्ञानवति ॥

ज्ञातेयम् । न । ज्ञातित्वे ॥ ज्ञातेर्भाव कर्म वा । कपिज्ञात्योर्ढक् ॥

ज्ञान । पु । जीवे ॥ ज्ञश्चासावनश्च । विषयान्जानाति प्राणिति चेत्यर्थं ॥

ज्ञानम् । न । विशेषेण सामान्येनचाववोधे ॥ पदार्थग्राहिकायां वृत्तौ ॥ यथा । ज्ञानद्विधा वस्तुमात्रद्योतक निर्विकल्पकम् । सविकल्पन्तु सञ्ज्ञादिद्योतकत्वादनेकधा ॥ सङ्कल्पसंशयभ्रान्तिस्मृतिसादृश्यनिश्चया । ऊहोऽनध्यवसायश्च तथान्येऽनुभवा अपि ॥ इत्यादिभेदेनानेकविधाभवन्तीत्यर्थं ॥ सम्यगवबोधे ॥ न्यायमते । अप्रमाच प्रमाचेति ज्ञान द्विविधमुच्यते । तच्छून्ये तन्मतिर्यास्यादप्रमा सानिरूपिता ॥ तत् प्र

ज्ञानम्

पञ्चो विपर्यास संशयोपि प्रकीर्त्तित. । आद्योदेहआत्मबुद्धि शङ्खादौ पीततामति ॥ भवेन्निश्चयरूपासा संशयोथ प्रदर्श्यते । किंस्विन्नरोवा स्थाणुर्वेत्यादिबुद्धिस्तु संशय ॥ तदभावा ऽप्रकाराधी स्तत् प्रकारातुनिश्चय ॥ समंशयो भवेद्याधीरेकत्रा भावभावयो । साधारणादिधर्मस्य ज्ञानं संशयकारणम् ॥ दोषोऽप्रमायाजनक प्रमायास्तुगुणो भवेत् । पित्तदूरत्वादिरूपो दोषो नानाविधोमत' ॥ गुण स्याद्भ्रमभिन्नस्तु ज्ञानमन्नोच्यते प्रमा । अथवातत् प्रकारंयज्ज्ञान तद्वत् विशेष्यकम् ॥ ज्ञानंयन्निर्विकल्पाख्य तदतीन्द्रियमिष्यते । तत् प्रमा ना ऽप्रमा नापिज्ञानं यन्निर्विकल्पकम् ॥ प्रकारत्वादिशून्यंहिसम्बन्धानवगाहनात् ॥ इतिभाषापरिच्छेद ॥*॥ योगेतु । एकत्त्व बुद्धिमनसो रिन्द्रियाणाञ्च सर्वश । आत्मनोव्यापिन स्तात ज्ञानमेतदनुत्तमम् ॥ इति मोक्षधर्मे ॥ एकत्त्व बुद्धिमायेणावस्थानम् बुद्धिवृत्तिनिरोध इतियावत् ॥ देवताध्यानादौ ॥ विवेकविज्ञाने । शास्त्राचार्योपदेशजे परमात्मविषये साक्षान्मोक्षफले आत्मनिश्चये ॥ तत्त्वज्ञाने ॥ शास्त्रे ॥

ज्ञानम्

मोक्षफलिकार्याधियि ॥ जीवेश्वरजगद्भेदभ्रमाधिष्ठानभूते निश्चयस्वप्रकाशे सच्चिदानन्दरूपाद्वितीये परमार्थसत्ये ॥ आत्मामात्मसर्वपदार्थावबोधे ॥ विवेक सामर्थ्ये ॥ अहङ्कारोपासने ॥ शब्दयुक्तिभ्यामात्मनिश्चये ॥ अमानित्त्व मदम्भित्त्वमहिंसा क्षान्तिरार्जवम् । आचार्योपासनं शौचं स्थैर्यं मात्मविनिग्रह ॥ इन्द्रियार्थेषु वैराग्य मनहङ्कारएवच । जन्ममृत्युजराव्याधिदु खदोषानुदर्शनम् ॥-असक्ति रनभिष्वङ्ग पुत्रदारगृहादिषु । नित्यञ्च समचित्तत्त्व मिष्टानिष्टोपपत्तिषु ॥ मयिचानन्ययोगेन भक्तिरव्यभिचारिणी । विविक्तदेशसेवित्त्व मरति र्जनसंसदि ॥ अध्यात्मज्ञाननित्यत्त्व तत्त्वज्ञानार्थदर्शनम् । एतज्ज्ञानामति प्रोक्त मज्ञान यदतोन्यथा ॥ सात्त्विकादिभेदात् तत् त्रिविधम् । यथा । सर्वभूतेषु येनैक भाव मव्यय मीक्षते । अविभक्त विभक्तेषु तज्ज्ञान विद्धि सात्त्विकम् ॥ सात्त्विक सर्वसंसारोच्छित्तिकारणम् ॥ पृथक्त्वेनतु यज्ज्ञानं नानाभावान् पृथग्विधान् । वेत्ति सर्वेषुभूतेषु तज्ज्ञानं विद्धिराजसम् ॥ यत्तुकृत्स्नवदेकस्मिन् कार्ये स-

क्तमहेतुकम् । अतत्त्वार्थवदल्पञ्च तत्तामसमुदाहृतम् ॥ राजसं तामसञ्च संसारकारणम् ॥ आत्मनः श्रवणमननाभ्यां परिनिष्पन्ने ॥ प्रमाणजन्यचेतोवृत्त्यभिव्यक्तसच्चिद्रूपे ॥ परमात्मज्ञानसाधने ॥ शास्त्रादात्मतत्त्वस्यावगमे ॥ आत्मसाक्षात्कारे ॥ साङ्गवेदतदर्थविषयेऽवबोधे ॥ ब्रह्मात्मैक्यसाक्षात्कारे ॥*॥ गुणपुरुषान्यताख्यातौ ॥ अध्यवसाये ॥*॥ महावाक्यजन्याखण्डाकारायां वृत्तौ ॥ स्वस्वरूपस्फुरणे ॥ ब्रह्मैवाहं समः शान्तः सच्चिदानन्दलक्षणः । नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ निर्विकारो निराकारो निरवद्यो ऽहमव्ययः । नाहं० ॥ निरामयो निराभासो निर्विकल्पोऽहमाततः । नाहं० ॥ निर्गुणो निष्क्रियो नित्यो नित्यमुक्तोऽहमच्युतः । नाहं० ॥ निर्मलो निश्चलोऽनन्तः शुद्धोऽहमजरोऽमरः । नाहं० ॥ लोकवासनया जन्तोः शास्त्रवासनयापि च । देहवासनया-ज्ञानं यथावन्नैव जायते ॥*॥ ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः । यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि ॥ वेदे ॥ ज्ञायतेऽनेन । ज्ञा० । करणे ल्युट् ॥ अन्ययजति

रेकाभ्यां जाग्रत्स्वप्नसुषुप्तिषु । यदेकं केवलं ज्ञानं तदेवास्मि परं बृहत् ॥ ज्ञानाज्ञानविलासोयं ज्ञानाज्ञानेन शाम्यति । ज्ञानात् ज्ञानं परित्यज्य ज्ञानमेवावशिष्यते ॥

ज्ञानगम्यम् । न । ज्ञेये ब्रह्मणि ॥ ज्ञानेन अमानित्वादिना साधनकलापेन ज्ञानहेतुतया ज्ञानशब्दितेन गम्यं प्राप्यं ज्ञेयं ब्रह्म न तु तद्विना ॥ ज्ञानेन गम्यते । गम्लृ० । पोरदुपधादिति यत् ॥ त्रि । परमेश्वरे । परमात्मनि ॥ न कर्मणा न ज्ञानकर्मभ्यां गम्यते किन्तु ज्ञानेनैव गम्यते इति सहस्रनामभाष्यम् । विवृतञ्चैतत् तारकब्रह्मानन्दसरस्वतीयतिना ॥ यथा । ज्ञानेनैव गम्यो ज्ञानगम्यः । सर्ववाक्यं सावधारणमिति न्यायात् ज्ञानेनैवेत्यवधारणलाभ इत्यभिप्रेत्याह । न कर्मणेति । अनेन केवलकर्मणां साक्षान्मोक्षसाधनत्वं व्यावर्त्यते । न ज्ञानकर्मभ्यामित्यनेन समुच्चयो वार्यत इति ॥

ज्ञानतपाः । पु । विदुषि । आत्मविदि ॥ ज्ञानमेव तपः सर्वकर्मक्षयहेतुर्यस्य स । नहि ज्ञानेन सदृशं पवित्रमिह विद्यते ॥

ज्ञानदग्धशरीरः । त्रि । सर्वसङ्गनिवृ

त्मभिज्ञौ ॥ ज्ञानदग्धशरीरस्य पुन
र्दाहो नास्तीत्यशौचक । सर्वस
ङ्गनिवृत्तस्य ध्यानयोगरतस्य च । न
तस्य दहन कार्यं नैवपिण्डोदकक्रि
या ॥ निदध्यात् प्रणवेनैव विले भि
क्षो कलेवरम् । प्रोक्षणं खननञ्चा
पि सर्वं तेनैव कारयेत् ॥

ज्ञानदर्पण. । पु । पूर्वजिने । मञ्जुघोषे ॥

ज्ञानदा । स्त्री । शारदायाम् ॥ ज्ञान
ददाति । ददाक० । आतश्चतिक'
॥ त्रि । ज्ञानस्यदातरि ॥

ज्ञानदाता । पु । ब्रह्मोपदेष्टरि श्रीगुरौ
॥ पितुर्दशगुणा माता गौरवेणेति
निश्चितम् । मातु' शतगुण पूज्यो
ज्ञानदाता गुरु. प्रभो ॥ ज्ञानप्र-
दाता ॥

ज्ञानदीप. । पु । दीपसदृशे ज्ञाने ॥
स्वप्रकाशचैतन्यानन्दाद्वितीयलक्षण-
आत्मा सएव मद्विषयान्त करणपरि
णामरूपोदीपउच्यते ॥ ज्ञानं दी
पइव ॥

ज्ञानदीपित. । त्रि । ज्ञानेनप्रकाशिते
॥ बोधपूर्वकसमाधौ ॥ ज्ञान वेदान्तवा
क्यजन्यो ब्रह्मात्मैक्यसाक्षात्कार तेन
अविद्यातत्कार्यनाशद्वारा दीपित. अ
त्यन्तोज्ज्वलित ॥

ज्ञाननिर्धूतकल्मष । त्रि । अवधूते । ब
रमहंसे ॥ ज्ञानेन निर्धूतं समुन्मू
लितं पुनर्देहसम्बन्धकारणं कल्मष
पुण्यपापात्मक कर्म यस्य ॥

ज्ञाननिष्ठ । त्रि । ज्ञानिनि ॥ ज्ञाने नि
ष्ठाऽस्य ॥

ज्ञानप्लव । पु । ज्ञानपोते ॥

ज्ञानमय । पु । शिवे ॥ त्रि । अखण्ड
ब्रह्माकारे प्रकाशस्वरूपे ॥ ज्ञानं
तत्वत समस्तपदार्थावबोधकत्वा-
त्मक ॥

ज्ञानयज्ञ । पुं । न्यायेन वेदार्थनिश्चय
परे ॥ ब्रह्माग्ना वपरे यज्ञं यज्ञेनैवो
पजुह्वति । ब्रह्माग्नौ सत्यज्ञानान
न्तानन्दरूपं निरस्तसमस्तविशेषं ब्र-
ह्म तत्पदार्थं तस्मिन्नग्नौ यज्ञं प्र
त्यगात्मानं त्वं पदार्थम् यज्ञेनैव य
ज्ञशब्द.आत्मनामसु यास्केनपठित.
इत्थम्भूतलक्षणे तृतीया एवकारोऽभे
दाभेदव्यावृत्त्यर्थः त्वपदार्थाभेदेनै
वोपजुह्वति तत्स्वरूपतया पश्यन्ती
त्यर्थ । अपरे पूर्वस्मात् कर्मयोगि
नो विलक्षणास्तत्वदर्शननिष्ठा.सन्न्या
सिनइत्यर्थ ॥ * ॥ महापापवतां
नृणां ज्ञानयज्ञो न रोचते । प्रत्युत
ज्ञानयज्ञस्तु प्रद्वेष्यो भासते स्वत ॥
भोगसारस्वविभ्रान्त्या ज्ञाने भोगौ
घशालिनि । प्रद्वेषोऽशुद्धचित्तस्य

महापापवतोभवेत् ॥

ज्ञानयोग । पु । निष्ठाविशेषे । ज्ञानमेव ब्रह्मणा युज्यते इति ज्ञानयोग निष्ठायाम् ॥ ब्रह्मज्ञानप्राप्त्युपाये ॥

ज्ञानयोगव्यवस्थिति । स्त्री । जीवन्मुक्तौ ॥ आत्मसाक्षात्कारमनोनाशवासनाक्षयानुकूलपुरुष प्रयत्नाभ्यां विशिष्टासंसारविलक्षणावस्थिति ॥

ज्ञानलक्षणा । स्त्री । त्रिविधालौकिकसन्निकर्षान्तर्गतसन्निकर्षे ॥ तल्लक्षणं यथा । विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणा इति । अस्यार्थः । तद्विषयज्ञापकतद्विषयज्ञानम् । यथा पूर्वं घटादिज्ञाने सति पश्चात् घटादिज्ञानम् ॥

ज्ञानवान् । त्रि । ज्ञानिनि ॥ ब्रह्मविदि ॥ ज्ञानमस्त्यस्य । मतुप् ॥

ज्ञानवापी । स्त्री । काश्यन्तर्गततीर्थविशेषे । ज्ञानोदतीर्थे ॥

ज्ञानसाधनम् । न । इन्द्रिये ॥

ज्ञानसिद्धि । स्त्री । ब्रह्मात्मैक्यबोधे ॥

ज्ञानस्कन्धः । पु । निर्विकल्पके ॥

ज्ञानस्वरूप । पु । जीवे ॥ ज्ञश्चासावनश्च । विषयान् जानाति प्राणितिच । तादृशस्वरूपोजीवः ॥

ज्ञानाग्निदग्धकर्मा । त्रि । पण्डिते ॥ कर्मादावकर्मादिदर्शनं ज्ञानं तदेवाग्नि स्तेन दग्धानि शुभाशुभलक्षणानि कर्माणि यस्य सः ॥

ज्ञानापोहः । पु । विस्मरणे ॥

ज्ञानाभ्यास । पु । श्रवणाद्यावृत्तौ ॥ तच्चिन्तन तत्कथन मन्योन्य तत्प्रबोधनम् । एतदेकपरत्वञ्च ज्ञानाभ्यासंविदुर्बुधा ॥ सर्गादावेव नोत्पन्नं दृश्य नास्त्येव तत् सदा । इदं जगदहञ्चेति बोधाभ्यासं विदुः परम् ॥

ज्ञानावस्थितचेता । पु । स्थितप्रज्ञे ॥ निर्विकल्पकब्रह्मात्मैक्यबोधएवाऽवस्थितं चेतो यस्य सः ॥

ज्ञानासि । पु । आत्मविषयकनिश्चयखड्गे ॥

ज्ञानी । त्रि । पदवाक्यन्यायादिमाननिपुणे । तत्त्वदर्शिनि । कृतसाक्षात्कारे ॥ परोक्षज्ञानवति ॥ स्वतोऽपरोक्षं ज्ञानमसम्भावनादिप्रतिबन्धेन फलमजनयत् परोक्षमित्युपचर्यते ॥ भगवत् तत्त्वसाक्षात्कारो ज्ञानं तेन नित्ययुक्ते ॥ तीर्णमाये । निवृत्तसर्वकामे । निष्कामभक्ते । तत्त्वज्ञानवति ॥ ज्ञानिना हृदयाम्भोजे हृल्लेखा परमेश्वरीति देवीगीता ॥ पु । दैवज्ञे ॥ ज्ञानमस्यास्ति । अत इनिठनाविति इनि ॥

ज्ञानेन्द्रियम् । न । धीन्द्रियेषु । श्रोत्र

ज्ञेयम्

त्वक्चक्षुर्जिह्वाघ्राणाख्येषु ॥ एता न्याकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्य' पृथक् पृथक् क्रमेणोत्पन्नानि॥ यथोक्तं देवीभागवते। पञ्चभूतस्थसत्त्वांशैः श्रोत्रादीनां समुद्भव। ज्ञानेन्द्रियाणां राजेन्द्र प्रत्येकंमिलित ॥ ज्ञानसाधनमिन्द्रियम् ज्ञानार्थमिन्द्रियं वा॥ क्रमशो दिग्वातार्कप्रचेतोऽश्विनो ज्ञानेन्द्रियाणां देवता' ॥ शब्दस्पर्शरूपरसगन्धाश्च क्रमशो ज्ञानेन्द्रियाणां विषयाः ॥

ज्ञापकम् ॥ त्रि। गमके। बोधके ॥ निदर्शने ॥ ज्ञापयति। ज्ञा०। ण्वुल् ॥

ज्ञापनम्। न। बोधने। जनावना इति भाषा ॥

ज्ञापिका। स्त्री। बोधिकायाम् ॥

ज्ञापित' । त्रि। कथिते ॥ सूचिते ॥ प्रबोधिते ॥

ज्ञीप्समान । त्रि । बोधयितुमिष्टेऽर्थे॥

ज्ञेयम्। त्रि। वेदितव्ये। ज्ञानविषये। ज्ञानकर्मणि ॥ अज्ञातत्वात् ज्ञातुमर्हे ब्रह्मणि॥अहणामातव्याभावेन ज्ञातुमनर्हत्वात्॥ * ॥ ज्ञेय यत् तत् प्रवक्ष्यामि यद् ज्ञात्वाऽमृतमश्नुते। अनादिमत् परब्रह्म न सत् तन्नासदुच्यते ॥ सर्वत पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्। सर्वत श्रु

ज्यायान्

तिमल्लोके सर्वं मावृत्य तिष्ठति ॥ सर्वेन्द्रियगुणाभास सर्वेन्द्रियविवर्जितम्। असक्त सर्वभृच्चैव निर्गुण गुणभोक्तृ च ॥ बहि रन्तश्च भूताना मचर चरमेव च। सूक्ष्मत्वात् तदविज्ञेयं दूरस्थ चान्तिके च तत् ॥ अविभक्त विभक्तेषु विभक्त मिव च स्थितम्। भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥ ज्योतिषा मपि तज्ज्योति स्तमसः पर मुच्यते। ज्ञान ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितम् ॥ ज्ञातुं योग्यम्। ज्ञा०। अ चो यत्। ईयति। गुण ॥

ज्या। स्त्री। मातरि ॥ वसुधायाम् ॥ मौर्व्याम्। धनुर्गुणे ॥ जिनाति। ज्या वयोहानौ। अघ्न्यादित्वात् यग न्तोनिपातित.॥ अन्येष्वपीति डो-वा। टाप्॥

ज्याघातवारणम्। न। गोधायाम्-। तले ॥ ज्याया' क्षिप्ताया गुणस्य आघात स्तस्य वारणम् ॥

ज्यानि.। स्त्री। जीर्णौ ॥ हानौ ॥ तटिन्याम् ॥ ज्यानम्। ज्या०। ग्लाज्याहाभ्योनिः॥ यद्वा। जिनाति। ज्या०। वीज्याज्वरिभ्योनिः ॥

ज्यायान्। त्रि। अतिवृद्धे। वर्षीयसि ॥ अतिप्रशस्ते ॥ अयमनयो रतिश

येन वृद्ध प्रशस्यो वा । ज्यच वृद्धस्य च । द्विवचनेतीयसुनि वृद्धप्रशस्ययो ज्यादेश । ज्यादादीयस इत्यात्वम्॥

ज्यायसी । स्त्री । अतिप्रशस्तायाम् ॥ वृद्धायाम् ॥ ज्येष्ठायाम् ॥ ङीप् ॥

ज्येष्ठ । पु । शुक्रे । ग्रीष्मर्त्तो. प्रथमे मासि ॥ ज्येष्ठी पूर्णमास्य ऽस्मिन् । सास्मिन् पौर्णमासीत्यण् । संज्ञापूर्वकविधेरनित्यत्वादृद्धयभाव ॥ त्रि । अतिवृद्धे ॥ श्रेष्ठे ॥ अयमेषामति शयेन वृद्ध प्रशस्योवा। अतिशायने तमबिष्ठनाविति इष्ठनि वृद्धस्य च ज्यचे त्यनेनच वृद्धप्रशस्ययोर्ज्यादेश ॥ अग्रजे ॥

ज्येष्ठतात' । पु । पितुरग्रजे ॥ तातस्य ज्येष्ठ' । राज० ज्येष्ठस्यपूर्वनिपात. ॥

ज्येष्ठवर्ण. । पुं । ब्राह्मणे ॥ वर्णानां ज्येष्ठ । राज० ॥ कर्मधारयो वा ॥ त्रि । श्रेष्ठवर्णे ॥

ज्येष्ठवला । स्त्री । सहदेव्याम् ॥

ज्येष्ठश्वश्रू. । स्त्री । कुल्याम् । पत्न्या ज्येष्ठभगिन्याम् । वडीसाली इति जेठसास इतिचभाषा ॥

ज्येष्ठसामगः । पुं । ज्येष्ठसाम्नांगातरि ॥ तानिच आरण्यके गीयन्ते ॥

ज्येष्ठसाम । न । सामप्रभेदे । आरण्यके गीयमाने सामनि ॥ तदध्ययना क्रियते ॥

ज्येष्ठस्थानम् । न । तीर्थविशेषे ॥ अत्र महादेवस्तिष्ठति ॥

ज्येष्ठा । स्त्री । अश्विन्यादिष्वष्टादशे नक्षत्रे ॥ सत्कीर्त्तिपुत्रै र्विविधै' समेतो विद्यान्वितोऽत्यन्तलसत्प्रताप' । श्रेष्ठप्रतिष्ठो विकलस्वभावो ज्येष्ठाभवेद्यस्यचजन्मकाले ॥ गृहगोधायाम्॥ मध्यमाङ्गुलौ ॥ गङ्गायाम् ॥ अलक्ष्म्याम् ॥ नायिकाभेदे । परिणीतत्वेसति भर्तुरधिकस्नेहायाम् ॥ प्रथमजायाम् ॥ज्येष्ठस्त्रियाम् ॥ ज्येष्ठस्त्री । पुंयोगलक्षणङीषंबाधित्वाअजादित्वाट्टाप् ॥

ज्येष्ठामूलीयः । पु । ज्येष्ठे ॥ ज्येष्ठामूलीय मित्याहुर्मास माषाढपूर्वजम् ॥

ज्येष्ठाम्बु । न । तण्डुलाम्बुनि । मण्डे ॥

ज्येष्ठाश्रम' । पुं । गृहिणि ॥ यस्मात्त्रयोप्याश्रमिणो ज्ञानेनान्नेनचाऽन्वहम् । गृहस्थेनैव धार्यन्ते तस्माज्ज्येष्ठाश्रमो गृही ॥ ज्येष्ठ आश्रमोयस्य । कर्मधारयो वा ॥

ज्येष्ठाश्रमी । पु । गृहस्थे । गृहस्थो ब्रह्मचारीच वानप्रस्थोथभिक्षुक । चत्वार आश्रमा. प्रोक्ता. सर्वेगार्हस्थ्यमूलकाः ॥ ज्येष्ठश्चा सावाश्रमीच ॥

ज्येष्ठी । स्त्री । गृहगोधायाम् । छिपकली इतिभाषा ॥

ज्येष्ठ । पु । ज्येष्ठे मासे । शुक्रे ॥ विदेश इति पुरुष. सुतीव्र. समान्वित स्यात् खलु दीर्घसूत्रः । विचित्रबुद्धि र्विदुषां वरिष्ठो ज्येष्ठाभिधाने जनन हि यस्य ॥ ज्येष्ठीपूर्णमास्यस्मिन् । सास्मिन् पौर्णमासीत्यण् ॥

ज्यैष्ठिनेय. । पु । ज्येष्ठाया अपत्ये ॥ कल्याण्यादित्वात् ढक् इनङादेशश्च ॥

ज्येष्ठी । स्त्री । ज्येष्ठपूर्णिमायाम् ॥ ज्येष्ठयायुक्ता पौर्णमासी । नक्षत्रेणयुक्त कालइत्यण् । ततोङीप् ॥ गृहगोधायाम् ॥

ज्यैष्ठ्यम् । न । ज्येष्ठत्वे ॥ यथा । विप्राणांज्ञानतो ज्यैष्ठ्यं क्षत्रियाणान्तुवीर्यत । वैश्यानां धान्यधनत शूद्राणामेवजन्मतइतिमनु ॥

ज्योक् । अ । कालभूयस्त्वे ॥ प्रश्ने ॥ शीघ्रार्थे ॥ सम्प्रत्यर्थे ॥

ज्योतिरिङ्ग । पु । खद्योते ॥

ज्योतिरिङ्गण । पुं । तमोमणौ । खद्योते ॥ ज्योतिर्नेत्रम तद्वदिङ्गति । इगि गतौ । नन्द्यादित्वात् ल्युः ॥ नन्दनशब्दार्थादित्युक्त ॥

ज्योतिर्मोचकह्रद । पु । तीर्थविशेषे ॥

ज्योतिर्विद् । पु । कालपरमार्थ वादिनि ॥

ज्योतिर्व्वीजम् । न । खद्योते ॥

ज्योतिश्चक्रम् । न । चन्द्रसूर्यादिग्रहनक्षत्रमण्डले । राशिचक्रे ॥ सप्तविंशतिभै ज्योतिश्चक्र स्तिमितवायुगम् । तदष्टांशो भवेद्राशि र्नवर्क्षचरणाङ्कित. ॥

ज्योतिश्शास्त्रम् । न । ग्रहनक्षत्रादीनां तत्त्वनिर्णायके शास्त्रे ॥ सिद्धान्त संहिताहोरारूपस्कन्धत्रयात्मकम् । वेदस्य निर्मलं चक्षुर्ज्योतिश्शास्त्रमकल्मषम् ॥ विनैतदखिलं श्रौतस्मार्तं कर्म न सिद्ध्यति । तस्माज्जगद्धितायेदं ब्रह्मणानिर्मितं पुरा ॥ अतएवद्विजैरेतदध्येतव्यं प्रयत्नत ॥

ज्योतिषम् । न । वेदाङ्गविशेषे ॥ ग्रहनक्षत्रादिगणनशास्त्रे । पञ्चस्कन्धसिद्धान्तहोरागणितसंज्ञित । केरलि शकुनञ्चेति ज्योतिश्शास्त्रमुदीरितम् ॥ वेदाहि यज्ञार्थ मभिप्रवृत्ता कालानुपूर्व्या विहितास्च यज्ञा । तस्मादिद कालविधानशास्त्र योज्योतिषं वेद सवेद यज्ञान् ॥ यथा शिखा मयूराणां नागाना मणयो यथा । तद्वद्वेदाङ्गशास्त्राणां गणितं मूर्द्धिन स्थितम् ॥ लोभात्लोभाच्च मोहाच्च योविप्रो ऽज्ञानतोपिवा । शूद्रायामुपदेशन्तु दद्यात् सनरकं व्रजेत् ॥ ज्योतिर्नक्षत्राद्यधिकृत्यकृतोग्रन्थ. । कृतेग्र

ज्ये इत्यत्र। सत्रापूर्वकत्वान्नवृद्धिः॥

ज्योतिषी। स्त्री। तारायाम्॥

ज्योतिष्क.। पु। चित्रकवृक्षे॥ मेथिका बीजे॥ गणिकारिकावृक्षे॥ पुंभूम्नि। ज्योतिष्का। चन्द्रार्कग्रहनक्षत्रतारकासु॥ न। मेरो शृङ्गान्तरे॥ तदीशभागे तस्यात्र शृङ्गमादित्यसन्निभम्। यत्तज्ज्योतिष्कमित्याहु सदापशुपतेःप्रियम्॥ तस्य ब्रह्मपुर्याः ईशानभागे॥

ज्योतिष्टोम। पु। षोडशर्त्विक्साध्ये यज्ञविशेषे॥ अग्निष्टोमादयोऽस्य संस्था भवन्ति॥ ज्योतींषि स्तोमा यस्य यज्ञस्य सोऽयं ज्योतिष्टोमः। ज्योतिरायुष स्तोम इतिषत्वम्। सलोपः॥

ज्योतिष्मन्। पु। सूर्ये॥ प्लक्षद्वीपस्थेऽद्रिविशेषे॥ त्रि। दीप्तियुक्ते॥ ज्योतिरस्यास्ति। मतुप्॥

ज्योतिष्मती। स्त्री। पारावताङ्घ्र्याम्। कटभ्याम्। मालकांगणी इतिभाषा॥ ज्योतिष्मती कटुस्तिक्ता सरा कफसमीरजित्। अत्युष्णा वामनी तीक्ष्णा वह्निवुद्धिस्मृतिप्रदा॥ रात्रौ॥ उगित्त्वान् ङीप्॥

ज्योतिः। पु। अग्नौ॥ दिवाकरे॥ मेथिकायाम्॥ न। दृष्टौ। नेत्रकनीनिकामध्ये॥ नक्षत्रे॥ प्रकाशे॥ सर्वावभासके ब्रह्मणि चैतन्ये। आदित्यादीनां वृक्षादीनाञ्च वाह्यानामान्तराणामपि जडज्योतिषां चैतन्यज्योतिषोऽवभासकत्वोपपत्तेः॥ विज्ञाने॥ द्योतते द्योतनं वाऽनेनवा। द्युत०। द्युतेरिसिन्नादेश्च जः॥

ज्योतीरथ। पु। ध्रुवे। औत्तानपादौ॥

ज्योत्स्ना। स्त्री। चन्द्रातपे॥ ज्योत्स्नायुक्तनिशि॥ कौमुद्याम्॥ श्वेतघोषायाम्॥ ज्योतिरस्यास्ति। ज्योत्स्नातमिस्रेत्यादिना ज्योतिषउपधलोपोनप्रत्ययश्च निपात्यते॥

ज्योत्स्नाप्रिय.। पु। चकोरे॥

ज्योत्स्नावृक्ष.। पु। दीपाधारविशेषे॥

ज्योत्स्नी। स्त्री। पटोलिकायाम्। चचेंडा इति प्रसिद्धे दीर्घफले॥ चन्द्रिकायुक्तायां रात्रौ। चादनीरात इति भाषा॥ रेणुकानामगन्धद्रव्ये॥ ज्योत्स्नाऽस्त्यस्याः। ज्योत्स्नादिभ्यउपसंख्यानमित्यण्। सत्रापूर्वकत्व.वृद्ध्यभाव.। ङीप्॥

ज्योतिषिक। पु। दैवज्ञे। कालपरमार्थवादिनि॥ ज्योतिषमधीते वेदवा। क्रतूक्थादीति ठक्॥

ज्यौत्स्न। पु। शुक्लपक्षे॥ ज्योत्स्नाऽस्मिन्नस्ति। ज्योत्स्नादिभ्य इत्यण्॥ त्रि। दीप्ते। ज्योत्स्नायुक्ते॥

ज्यौत्स्निका । स्त्री । चन्द्रिकायुक्तायां रात्रौ ॥ पटोल्याम् ॥

ज्यौत्स्नी । स्त्री । ज्योत्स्नया युक्तायां रात्रौ ॥ ज्योत्स्न्याम् ॥ अणन्तत्वान्ङीप् ॥

ज्वरः । पु । स्वनाम्ना प्रसिद्धे रोगे । जूर्त्तौ । रोगपृष्ठे । मद्दागदे ॥ तस्योत्पत्तिः संख्या चोक्ता भिषग्भिः । दक्षापमानसंक्रुद्धरुद्रनिश्वाससम्भवः । ज्वरोऽष्टधा पृथग्द्वन्द्वसंघातागन्तुजः स्मृतः इति ॥ तथाहि । वातिकः पैत्तिकश्चैव कफजो वातपित्तजः । वातश्लेष्मप्रभूतश्च पित्तश्लेष्मोद्भवस्तथा ॥ संघातागन्तुजा चैव ज्वरोऽष्टविध उच्यत इति ॥ अपिच । जनकः सर्वरोगाणां दुर्वारो दारुणो ज्वरः । शिवभक्तश्च योगी च स एव विकृताकृतिः ॥ भीमस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः । भस्मप्रहरणो रौद्रः कालान्तकयमोपमः ॥ मन्दाग्निस्तस्य जनको मान्द्याग्नेर्जनकास्त्रयः । पित्तश्लेष्मसमीराश्च प्राणिनां दुःखदायकाः ॥ इत्यादि वैद्यशास्त्रतो विशेषोऽवगन्तव्यः ॥ ज्वरणम् । ज्वररोगे । घञ् । संज्ञापूर्वकत्वात् वृद्ध्यभावः ॥ ज्वरति । अच् वा ॥ सन्तापहेतुत्वाच्छोके ॥ ज्वरमुक्तस्य लक्षणं यथा । स्वेदो लघुत्वं शिरसः कण्डूः पाको मुखस्य च । क्षवथुश्चान्नलिप्सा च ज्वरमुक्तस्य लक्षणम् ॥

ज्वरघ्न । पु । गुडूच्याम् ॥ वास्तूके ॥ त्रि । ज्वरनाशके ॥

ज्वरघ्नी । स्त्री । } मञ्जिष्ठायाम् ॥
ज्वरहन्त्री । स्त्री । }

ज्वराग्निः । पु । आधिमन्थे । ज्वररूपाग्नौ ॥

ज्वराङ्गी । स्त्री । भद्रदन्तिकायाम् ॥

ज्वरान्तकः । पु । नेपालनिम्बे ॥ आरग्वधे ॥ औषधविशेषे ॥ त्रि । ज्वरनाशके ॥

ज्वरापहा । स्त्री । बिल्वशुण्ठ्याम् । बिल्वपत्र्याम् ॥ त्रि । ज्वरनाशके ॥

ज्वरारिः । पुं । ज्वरघ्नौषधविशेषे ॥

ज्वरितः । त्रि । ज्वरिणि ॥ ज्वरः सञ्जातोऽस्य । तारकादित्वादितच् ॥

ज्वरी । त्रि । ज्वरयुक्ते ॥ गुर्वभिष्यन्द्यकाले वा ज्वरी नाद्यात् कथञ्चन ॥

ज्वलः । पु । ज्वाले । दीप्तौ ॥ त्रि । दीप्तिविशिष्टे ॥ ज्वलति । ज्वलदीप्तौ । अच् ॥

ज्वलका । स्त्री । अग्निशिखायाम् ॥ इति हेमचन्द्रः ॥

ज्वलत् । त्रि । दीप्तिमति ॥

ज्वलनः । पु । अग्नौ ॥ चित्रकवृक्षे ॥ न । दहने ॥ ज्वलति । ज्वल० । जुच

धूकश्यद्भ्रश्यद्धगधिज्वलशुचलषप-
तपद. इति ताच्छीलयादिषु युच् ॥
ज्वलनाश्मा । पु । सूर्यकान्तमणौ ॥
ज्वलित । त्रि । दग्धे ॥ उज्ज्वले ॥ भा
स्करे ॥ उज्ज्वलिते ॥ ज्वल० । क्त ॥
ज्वलिनी । स्त्री । मूर्वालतायाम् ॥
ज्वाल । पु । अग्निशिखायाम् ॥ त्रि ।
दीप्तिविशिष्टे ॥ ज्वलति । ज्वल० ।
ज्वलितकसन्तेभ्योणः ॥
ज्वाला । स्त्री । अग्निशिखायाम् ॥ टाप् ॥
ज्वालागर्दभक । पुं । जालगर्दभरोगे ॥
ज्वालाजिह्व । पुं । अग्नौ ॥
ज्वालामरिचम् । न । रक्तमरिचे । पि
पर्ली लालमरिच इत्यादि भाषा ॥
ज्वालामुखी । स्त्री । जालन्धरपीठान्त
र्गतपीठस्थानविशेषे ॥ तत्रभगवत्या
जिह्वापतिता । तत्राम्बिकादेवी ।
उन्मत्तनामको भैरवश्च ॥ तथाहि ।
ज्वालामुख्या महाजिह्वा देव उन्म-
त्तभैरव । अम्बिका सिद्धिदानाम्नी
स्तन जालन्धरे मसेति तन्त्रचूडाम
णि. ॥ देव्यन्तरे ॥ ज्वालामुखयस्याः ॥
ज्वालिका । स्त्री । ज्वालायाम् । जाल
इतिभाषा ॥

झ

झ । पु । झञ्झीशे ॥ सुरगुरौ ॥ दै-
त्यराजे ॥ ध्वनौ ॥ झञ्झावाते ।
झंखड इतिख्याते । प्रचण्डानिले ॥
वृष्टौ ॥ त्रि । नष्टवसुनि ॥
झगझगायमान । त्रि । चाकचिक्य
युक्ते ॥
झगिति । अ । शैघ्र्ये ॥
झङ्कार । पु । भ्रमरादिसमूहशब्दे ॥
झङ्कृति । पु । कांस्यतालादिध्वनौ ॥
झञ्झा । स्त्री । वाते ॥ तारवायौ ॥
नष्टे ॥ ध्वनिविशेषे ॥ अम्बुकणवर्षेण ॥
झञ्झानिल । पु । प्रावृषिकवायौ ॥
झञ्झावात । पु । झञ्झानिले ॥
झटा । स्त्री । भूम्यामलक्याम् । वित्-
न्नकौषधौ ॥ झट्यते । झटसङ्घाते ।
घञ् । सत्तापूर्वकस्यात्वृद्धि ॥
झटि । पु । क्षुद्रवृक्षे ॥ झट० । इन् ॥
झटिति । अ । शीघ्रार्थे । तत्क्षणार्थे
॥ झट० । सम्पदादित्वात् क्विप् । झट
मेति । इण्० । क्तिच् ॥
झणत्कार । पु । } कङ्कणादिध्वने र-
झनत्कार । पु । } नुकरणशब्दे ॥
झम्प । पु । सम्पातपतने । लम्फे ॥ स्वे
च्छाधीनपतने ॥
झम्पारु । पु । वानरे ॥
झम्पाशी । पु । मत्स्यरङ्कविहङ्गमे ॥
झम्पी । पु । वानरे ॥

जरः । पुं । निर्झरे । उत्सान्निर्गते गिरिवारिप्रवाहे ॥ जरणम् । जॄष्वयोहानौ । कर्त्तरि पृ ॥

जरा । स्त्री । जरे । निर्झरे ॥ पिप्पाद्यङ् ॥

जरि । स्त्री । जरे ॥ जरणम् । जॄष्० । अप्रत्ययः ॥

जरी । स्त्री । गिरिवारिप्रवाहे ॥ गौरादित्वात् ङीष् ॥

जर्झरः । पुं । कलियुगे ॥ वाद्यभाण्डविशेषे । खञ्जाँज इतिभाषा ॥ गौडास्तु चर्मपुटाच्छादितकाष्ठखाने इति वारन इतिख्यातेच । डिण्डिमोडेझरी प्रोक्तो जर्झरं पटहः स्मृत' । इति तत्पर्याया । झल्लकी झल्ली झर्झरी जर्झरी इतिशब्दरत्नावल्यामाहु ॥ नेपालभाषया झ्याली इति प्रसिद्धे कांस्यवाद्ये ॥ नदविशेषे ॥ झझर इति प्रसिद्धे जलपात्रविशेषे ॥ झरणा झर्ना इतिच ख्याते पाकसाधने लोहद्रव्ये ॥ झर्झ इति शब्दं राति । आतोऽनुपेति क ॥ यद्वा । झर्झति । झर्झ परिभाषणभर्त्सनयो । बाहुलकादर ॥

जर्झरकः । पु । कलियुगे ॥ शब्दार्थबोधकेषु, जर्झरशब्दार्थेषु ॥ क. ॥

जर्झरा । स्त्री । वेश्यायाम् ॥

जर्झरिका । स्त्री । रोटिकाविशेषे ॥ यथा । धूमसीरचिता रोटी प्रोक्ता जर्झरिकाबुधै । जर्झरी कफपित्तघ्नी किञ्चिद्वातकरी स्मृतेति ॥

जर्झरी । स्त्री । जर्झरवाद्ये ॥ झझरी इति ख्याते स्वल्पेशारिपाचे ॥ धूमसी रोटिकायाम् ॥

जर्झरीकः । पु । न । शरीरे ॥ जर्झति । जर्झ परिभाषणभर्त्सनयो । पर्फरीकादित्वात् साधु. ॥

झञ्झा । स्त्री । हस्तिकर्णास्फालने ॥

झबरी । स्त्री । हुडुके । जर्झरवाद्ये ॥ वाद्यकुम्भके । केशवके ॥

झला । स्त्री । आतपश्चोर्मी ॥ कन्यायाम् ॥

झल्ल । पु । व्रात्यात् क्षत्रियात् सवर्णायामुत्पन्नेवर्णसङ्करजातिविशेषे ॥ करणे । मल्ले ॥ भाँड इति प्रख्याते प्रहासके ॥

झल्लकम् । न । कांस्यनिष्पन्ने करताले ॥ यथा । शिवागारे झल्लकञ्च सूर्यागारेच शङ्खकम् । दुर्गागारे वंशिवाद्य मधुरीञ्च न वादयेत् ॥

झल्लकण्ठ. । पु । कपोते ॥

झल्लरी । स्त्री । हुडुक्कवाद्ये ॥ वक्रकेशेषु ॥ झर्झते । झर्झ° । बाहुलकाद्अरन् । पृषोदरादि । गौरादित्वान्

डाप् ॥ युद्धे ॥ क्लदे ॥

झल्लिका। स्त्री। उद्वर्त्तनमले।झिल्ली इति भाषा॥ द्योते॥ दीप्तौ। आतपच्छवि॥

झल्ली। स्त्री। झर्झरवाद्ये ॥

झल्लोख.। पु। तर्कुवासके। चरखा इति भाषा ॥

झष।पु। मत्स्ये। मीने ॥ मीनराशौ ॥ तापे ॥ अटव्याम्॥ न। खिले ॥ झषति। झषहिंसार्थ ।पचाद्यच् ॥ यद्वा। झष्यते । खनोघचेतिघ. ॥

झषकेतन. । पु। } कामदेवे। मदने ॥झषोमकर.
झषकेतु । पु। }
केतनङ्केतुर्वा यस्य ॥

झषा। स्त्री। नागवलायाम् ॥ टाप् ॥

झषाङ्क । पु। अनिरुद्धे। कन्दर्पे ॥

झषाशन । पु। शिशुमारे ॥ पि। मत्स्यादे ॥

झषोदरी। स्त्री। व्यासमातरि ॥

झाङ्कृतम्। न। चरणालङ्कारविशेषे॥

झाट.। पु। निकुञ्जे ॥ कान्तारे ॥ व्रणादीनांमार्जने ॥ न। सङ्घाते ॥ झटनम्। झट०। घञ् ॥

झाटल । पु। घण्टापाटलौ। लोध्रविशेषे ॥ झाट सङ्घात लाति। ला०। आतोनुपेतिक ॥

झाटलि.।पु। स्त्री। आटलिवृक्षे ॥

झाटा। स्त्री। भूम्यामलक्याम् ॥ यूथीवृक्षे ॥ झट्यते।झटसङ्घाते। घञ् ॥

झाटामला। स्त्री। } भूम्यामलक्याम् ॥
झाटिका। स्त्री। }
झाटी। स्त्री। }

झामकम्। न। दग्धेष्टकाविशेषे। झामाइति झांवा इतिच भाषा ॥

झामरः। पु। तर्कुशाणे। तकुवेकीसाण इतिभाषा ॥

झार्झर। त्रि। झार्झरिके। झर्झरवाद्यकर्त्तरि ॥ झर्झरवादन शिल्प मस्य। मड्डुकझर्झरादन्यतरस्यामित्यण् ॥

झार्झरिक । त्रि। झार्झरे ॥ झर्झरवादन शिल्प मस्य। पचेठक् ॥

झालि'। स्त्री। पानकविशेषे ॥ यथा। आम्रमामफल पिष्ट राजिकालवणान्वितम्। भृष्टहिङ्गुयुतं पूत घोलित झालिरुच्यते ॥ झालि ईरतिजिह्वाया' कुण्ठस्य कण्ठशोधिनी। मन्द मन्दं निपीता सा रोचनी वह्निबोधिनी॥

झाबु.।पु।झाउ इतिख्याते पिचुलवृक्षे ॥ झामितिशब्दं वेति गच्छति। वी गत्यादिषु। मित०डु ॥

झाबुक। पु। पिचुले। झाउ इतिभाषा ॥ संज्ञायांकन् ॥

झिल्लाकम् । न । फलविशेषे ॥

झिल्लिनी । स्त्री । उल्कायाम् ॥ झिल्लि नीहत्त्वे ॥

झिल्ली । स्त्री । झिल्लिनीहत्वे ॥

झिञ्झिम. । पु । दावाग्नौ ॥

झिञ्झिरिष्टा । स्त्री । झिञ्झिरी इ-तिगौडप्रसिद्धे क्षुपविशेषे । पीत पुष्पायाम् । रोमाश्रयफलायाम् ॥

झिञ्ज़ी । स्त्री । जिह्वायाम् ॥ यथा । झिञ्ज़ावाऽव्यक्तमधुरा कूजन्तीम धुराकृतिरित्यागम. ॥

झिण्टिका । स्त्री । झिण्ट्याम् ॥ कन् ॥

झिण्टी । स्त्री । सैरीयके ॥ झिमिति रटति । रट० । अच् । पृषोदरादि. । गौरादित्वान्ङीष् ॥ अस्यागुणा' । कटुत्वम् । तिक्तत्वम् । दन्तामय शूलवातकफशोफकासत्वग्दोषना-शित्वञ्चेतिराजनिर्घण्ट. ॥ कुन्दर-वृक्षे ॥

झिरिका । स्त्री । ⎫ जिह्वायाम् । झीं
झिरी । स्त्री । ⎬ गुर इ० झींगर
झिरीका । स्त्री । ⎭ इतिचभाषा ॥

झिल्लि । स्त्री । वाद्यविशेषे ॥ यथा । घण्टा शङ्ख स्तथा भेरीमृदङ्गौ झि ल्लिरेवच । पञ्चानां शस्यते वाद्यं देवताराधनेषु चेतिगूढार्थदीपिका ॥

झिल्लिका । स्त्री । झिल्लीकायाम् । ची र्याम् ॥ उद्वर्त्तनांशुके ॥ आतपस्यच चैा ॥ विलेपनस्यमले ॥ स्वार्थेकन् ॥

झिल्ली । स्त्री । कीटविशेषे । झींगर इति भाषाप्रसिद्धे । झिरिकायाम् । चीर्याम् ॥ आतपरुचि ॥ वर्त्याम् ॥ उद्वर्त्तनांशुके ॥ स्थालीलग्नदग्धान्ने ॥ झिल्लति । झिल्लशैथिल्ये । अच् । पृषोदरादित्वा त्वसाधुः । गौरादि त्वान् ङीष् ॥

झिल्लीकण्ठ । पु । गृहकपोते ॥

झिल्लीका । स्त्री । झिल्लिकार्थेषु ॥

झीरुका । स्त्री । जिह्वायाम् । झींगुर इति भाषा । झीतिरौति । रुशब्दे । बाहुलकात् कक् ॥

झुण्ट' । पु । अप्रकाण्डद्रुमे । स्तम्बे । गुल्मे । झुण्ड इति भाषा ॥

झुमरि । स्त्री । रागिणीविशेषे ॥ यथा । प्राय शृङ्गार बहुला माध्वीकमधुरा मृदु' । एकैव झुमरिर्लोके वर्णादि नियमोज्झिता ॥ अतो लक्षणमेत स्या नोदाहारि विशेषकम् । इदन्ति ग्रामगं स्तूच प्रसिद्धं न्मपरञ्जनम् ॥ इति सङ्गीतदामोदर. ॥

झूषिः । स्त्री । क्रमुकभेदे ॥ दुष्टदैव भूतौ ॥

जोड़ः । पु । गुवाकवृक्षे ॥ इतिभूरिप्र योगः ॥

अ

अ. । पु । अकारे ॥ बलीवर्दे ॥ शुक्रे ॥ वाममतौ ॥ गायने ॥ घर्घरध्वनौ ॥

॥॥ इत्यादिगौडकुलोत्पन्नाडीचवालप्रधानोपनामतुलाराममिश्रात्मजश्रीधनपतिमिश्रापरनाम्ना तथाश्रीसद्गुरुकुलावधूतश्रीपरमहंसपरिव्राजकाचार्यश्रीमद्धरिहरानन्दनाथभारतिशिष्येण ब्राह्मावधूतश्रीसुखानन्दनाथपरनामधेयेन विरचिते शब्दार्थचिन्तामणौ चवर्गं समाप्ति कृत ॥ १ ॥

तत् सत्

ट

ट । पु । टकारे ॥ वामने ॥ पादे ॥ निस्वने ॥ न । करङ्के ॥ टङ्कारे ॥ टगणे ॥

टक्कदेशीय. । पु । शालूकशाके ॥ इति चिकाण्डशेष ॥

टङ्कनामान. । पुभूम्नि । देशविशेषे । वाहीकेषु ॥ वाहीकाष्टङ्कनामान

इति हेमचन्द्र ॥

टगण । पु । त्रयोदशभेदभिन्नेषात्रामात्रिके । यथा । (ऽऽऽशिव १) (।।ऽऽशशि २) (।ऽ।ऽदिनपति ३) (ऽ।।ऽसुरपति ४) (।।।।ऽशेष ५) (।ऽऽ। अहि ६) (ऽ।ऽ। सरोजम् ७) (।।ऽ। धाता ८) (ऽऽ।। कलि ९) (।।ऽ।। चन्द्र १०) (।ऽ।।। ध्रुव ११) (ऽ।।।। धर्म. १२) (।।।।।। शालिकर १३) इति षण्मात्रे त्रयोदशभेदा ॥

टगर । पु । टङ्कणक्षारे ॥ हेलाविभ्रमगोचरे ॥ त्रि । केकराक्षे ॥

टङ्क । पु । कोपे ॥ असिकोशे ॥ खड्गे ॥ ग्रावदारणे । टाँकी इति भाषा ॥ चतुर्माषकस्वरूपेमाने । चतुर्विंशतिरक्तिकारूपे वा ॥ दर्पे ॥ परशौ ॥ राजाम्रे ॥ पु । न । नीलकपित्थे ॥ खनित्रे ॥ टङ्कने ॥ टङ्कयति । टकि बन्धे । चुरादि । अच् ॥ टम् इति शब्दङ् कायति वा । कै० । आतोऽनुपेतिक सुपीति वा ॥

टङ्कक । पु । रजतमुद्रायाम् । रूप्या इति भाषा इत्यमरटीकासारसुन्दरी ॥

टङ्कपति । पु । रूप्याध्यक्षे ॥

टङ्कशाला । स्त्री । रजतमुद्रागृहे । टकशाल इतिभाषा ॥ इत्यमरटीकासारसुन्दरी ॥

टङ्कटीक । पु । शिवे ॥ इतित्रिकाण्डशेष. ॥

टङ्कण । पु । न । रसशोधने । मालतीतीरजे । लोहद्रावित्वि । सुहागा इति प्रसिद्धे क्षारे ॥ टङ्कणं वह्निकृद्रूक्षं कफघ्नं वातपित्तकृत् ॥ टङ्कयते स्म । टङ्क । पृषोदरादि ॥

टङ्कनम् । न । टङ्कणे ॥

टङ्का । स्त्री । जङ्घायाम् । टाँग इति भाषा इतिमेदिनी ॥

टङ्कानक । पु । श्लेष्मदारुवृक्षे ॥

टङ्कार । पु । विस्मये ॥ प्रसिद्धौ ॥ शिञ्जिनीध्वनौ ॥ टमितिशब्दं करोति । कृ० । अण् ॥

टङ्कारी । स्त्री । टेकारी इति गौड प्रसिद्धे क्षुपविशेषे ॥ टङ्कारी वातजित् तिक्ता श्लेष्मघ्नी दीपनी लघुः । शोथोदरव्यथाहन्त्री हिता पीठविसर्पिणाम ॥

टङ्ग । पुं । न । खनित्रे ॥ खड्गविशेषे । असौ ॥ जङ्घायाम् । टांग इतिभाषा ॥

टङ्गण । पु । न ।
टङ्गन । पु । न । } टङ्कणे ॥ इति राजवल्लभ ॥

टङ्गिनी । स्त्री । पाठायाम् । अम्बष्ठायाम् । आकनादी इति गौडभाषा ॥

टट्टनी । स्त्री । ज्येष्ठ्याम् । छिपकली इतिविस्तुया इतिचभाषा ॥

टट्टरी । स्त्री । अनृताख्याने । मृषावादे । टरटर इति भाषा ॥ लम्पावाद्ये ॥ पटहवाद्ये ॥

टट्टर । पुं । भेरीरावे ॥

टनत्कम् । न । चित्रवे ॥

टवर्ग । पु । टादिपञ्चवर्णेषु ॥

टवर्गीय । पुं । टवर्गभवेवर्णे । वर्गान्ताच्छः । इतिच्छ. ॥

टा । स्त्री । पृथिव्याम् ॥

टाङ्कम् । न । मद्यभेदे ॥

टाङ्कर । पु । नागवीटे ॥

टार । पु । रङ्गे ॥ तुरङ्गे ॥ खङ्गे ॥

टिटिभ । पु ।
टिटिभक । पु । } टिट्टिभे ॥

टिट्टिभ । पु । टटीहरी इति भाषा प्रसिद्धे कीयष्टिखगे । टीटि इति गौड भाषा ॥ टिट्टि शब्दं भाषते । टिट्टि शब्देन भाति वा । अन्येभ्योपीतिड ॥ दानवविशेषे ॥

टिट्टिभक । पु । कीयष्टिके । टिट्टिभे ॥ स्वार्थे कन् ॥

टिट्टिभिका । स्त्री । अम्बुशिरीषिकायाम ॥

टिण्डिश, । पु । डिंडसी इतिटिण्डा इतिचभाषाप्रसिद्धे फलशाकविशेषे । मुनिनिर्मिते । रोमशफले । डिण्डिशे ॥

टिप्पनी । स्त्री । टीकायाम् ॥

टीका । स्त्री । विषमपदव्याख्यायाम् ॥ वृत्तौ ॥ व्याख्यामात्रे ॥ टीक्यते गम्यतेऽर्थोऽनया । टीकृगतौ । गुरोश्च हलइत्य । टाप् ॥

टुण्टुक । पु । श्योनाकवृक्षे ॥ कृष्णख दिरवृक्षे ॥ टुण्टुनि इति गौडप्रसिद्धे पक्षिविशेषे ॥ श्योनाकप्रभेदे ॥ त्रि । अल्पे ॥ टुण्टु इति कायति । कै० । आत इतिक ॥

टुनाका । स्त्री । तालमूल्याम् ॥

टेर । त्रि । वक्रचक्षुषि । टेरके ॥

टेरक । त्रि । वलिरे । केकरे । वक्रचक्षुषि । भैंगा इति भेडा इतिचभाषा ॥

ठ

ठ । पु । ठकारे ॥ मण्डले ॥ चन्द्रविम्बे ॥ शून्ये ॥ लोकगोचरे ॥ महेश्वरे ॥ ध्वनौ ॥ ठगणे ॥ पु । न । अनुकरणशब्दे ॥

ठक्कुर । पु । विष्णुप्रतिमायाम् । ठाकुर इतिभाषा ॥ द्विजोपाधिविशेषे ॥ यथा । त्वसिंहठक्कुर ॥ चन्द्रपालठक्कुर इति ॥

ठगण । पु । अष्टभेदभिन्ने पञ्चमात्रि

के ॥ यथा (।ऽऽ इन्द्रासनम् १) (ऽ।ऽ शूर २) (।।।ऽ चाप ३) (ऽऽ। हीर ४) (।।ऽ। शेखरम् ५) (ऽ।।। कुसुमम् ६) [ऽ।।। अहिगण ७] ॥।।। पापगण ८] इति ॥

ठठम् । अ । } ठठठम् । अ । } अनुकरणशब्दे । ठन् ठन् इति ठनन् ठनन् इति चभाषा ॥ यथा । रामाभिषेके मदविह्वलाया' कक्षाच्च्युतो हेमघट स्तरुण्या । सोपान मासाद्य चकार शब्दं ठठं ठठ ठ ठठठ ठठ ठ ॥ इतिमहानाटकम् ॥

ड

ड । पु । डकारे ॥ वाडवाग्नौ ॥ शिवे ॥ शब्दे ॥ त्रासे ॥ डगणे ॥

डगण । पु । पञ्चभेदभिन्ने चतुर्मात्रिके ॥ यथा [ऽऽ गज १] [।।ऽ रथ २] [।ऽ। तुरङ्गम ३] [ऽ।। पदाति ४] (।।।। पत्ति ५] इति ॥

डङ्कर । पु । डिङ्करे ॥

डङ्गरी । स्त्री । गजदन्तफलायाम् । दीर्घेर्वारौ । ककडी इति तरा इतिच भाषा ॥

डङ्गारी । स्त्री । डङ्गरीफले ॥

डण्ड । पु । डण्डारीतिख्याते मत्स्ये ॥ डण्डमत्स्यो रसे तिक्त पित्त रक्त कफ हरेत् । वातसाधारण प्रोक्त शुक्लो वलवर्द्धन ॥

डम । पु । चाण्डाल्या लेटाज्जाते डोम इति प्रसिद्धे ऽन्त्यजे ॥

डमर । पु । अशस्त्रकलहे ॥ विप्लवे । धाकडलुटनादौ । डाका इतिधाडा इतिचभाषा ॥ परचक्रादिभये ॥ न । भीत्यापलायने । शृगालकायाम् ॥ डम इतिशब्दस्य रानम् । रा० । वाहुलकात् घञर्थेक ॥

डमरु । पु । वाद्यप्रभेदे । कापालिक योगिवाद्य ॥ चमत्कारे ॥ डमिति शब्द मियर्त्ति । मृगय्वादित्वादृत्कु । गणपाठादेवगुण ॥

डयनम् । न । पुरुषस्कन्धवाह्ये यानविशेषे । कर्णीरथे । चौडोल इतिख्याते ॥ डीयते ऽनेन । डीङ् विहायसागतौ । ल्युट् ॥ नभोगतौ ॥

डल्लकम् । न । वंशादिरचितेपात्र विशेषे । डगरा डाला छबडा छावी इतिभाषा ॥ त्रिशतञ्च षष्ट्यधिक डल्लक चरुसयुतम् । सभोज्य सोपवीतञ्च सोपहार मनोहर मितिब्रह्मवैवर्त्तप्रकृतिखण्डम् ॥

डवित्थ । पु । काष्ठमये मृगे ॥ डित्थ. काष्ठमयो हस्ती डवित्थस्तन्मयो मृग इति सुपद्मव्याकरणोक्ते ॥

डहु । पु । लकुचे । लिकुचे । वडहल इतिप्रसिद्धेवृक्षे ॥ दहति तोहति वा । दहभस्मीकरणे । तुहिर् अर्दने वा । मृगय्वादिषु निपातित ॥

डा । स्त्री । डाकिन्याम ॥

डाकिनी । स्त्री । कालीगणविशेषे ॥ डाकानासमूहे ॥ खलादित्वादिनि ॥

डाङ्गरी । स्त्री । डङ्गरीफले ॥

डामर । पु । चमत्कारे ॥ शिवोक्त षड्विधे शास्त्रविशेषे ॥ तेषांनामानि श्लोकसङ्ख्याश्चोक्तावाराहीतन्त्रे । यथा । डामर षड्विधोज्ञेय प्रथमो योगडामर । श्लोकास्तत्र त्रयस्त्रिंशत् तथापञ्चशतानिच । त्रिविंशतिसहस्राणि श्लोकानिचेहसङ्ख्यया ॥ १ ॥ एकादशसहस्राणि सङ्ख्याता शिवडामरे । श्लोका सप्तैवनिश्चित्य ईश्वरेणैवभाषिता ॥ २ ॥ तावच्छ्लोकसहस्राणि पञ्चश्लोकशतानि च । गुणोत्तराणि दुर्गायाडामरे कथितानिच ॥ ३ ॥ नवश्लोकसहस्राणि नवश्लोकशतानिच । सारस्वते तथा श्लोका: पञ्चैवपरिकीर्त्तिता: ॥ ४ ॥ स्वरसङ्ख्यासहस्राणि श्लोका

ना ब्रह्मडामरे। पञ्चोत्तरशतान्यष सङ्ख्यातानिशिवेनतु ॥ ५ ॥ षष्टि श्लोकसहस्राणि गान्धर्वडामरोत्तमे। श्लोकाश्चषष्टिसङ्ख्याता ब्रह्मणाव्यक्तयोनिनेति ॥ तथाहि। योगडामर २३५३३। शिवडामर-११००७। दुर्गाडामर ११५०३। सारस्वतडामर ९९०५। ब्रह्मडामर ७१०५। गन्धर्वडामर. ६००६० ॥ इति ॥ भूतडामराद्यो ऽन्येपिसन्ति। भूतानांडामरश्चमत्कारो ऽत्रेतिनिबन्धकार ॥ डमरे ॥

डाहल। पु। चैद्य। चैपुरेदेशे ॥

डाहुक। पु। दात्यूहखगे ॥

डिङ्करी। स्त्री। दिङ्कर्याम् ॥

डिङ्गर.। पु। डङ्गरे ॥ क्षेपे ॥ खले ॥ धूर्ते ॥ सेवके ॥

डिण्डिभाण्डम्। न। वादित्रविशेषे ॥ पटहमृदङ्गकरटा. समेतायत्र वाद्यन्ते तानि डिण्डिभाण्डानीतिव्याख्यानात् ॥

डिण्डिम। पु। डौंडी इतिख्याते वाद्यभेदे ॥ यथा। श्लोकार्द्धेनच यत् प्रोक्तं तदुक्तं ग्रन्थकोटिभि ॥ ब्रह्म सत्यं जगन्मिथ्येत्येषवेदान्तडिण्डिम ॥ गजघण्टानादे ॥ यथा। मतिरेव बला द्गरीयसी तदभावेकरिणामि य दृशा। इतिघोषयतीव डिण्डिम. करिणो हस्तिपकाहत क्वणन् ॥ पानीयामलके ॥ डिण्डि इतिशब्दं-मिनोतिप्रकाशयति। डुमिञ्०। ड ॥

डिण्डिर.। पु। समुद्रफेने ॥

डिण्डिश। पु। डिण्डसी ढेढस टिण्डा इत्यादि भाषाप्रसिद्धे मुनिनिर्मिते। रोमशफले ॥ डिण्डिशो रुचिकृद्भेदी पित्तश्लेष्मापहः स्मृत। सुशीतो वातलो रूक्षो मूत्रलश्चाश्मरीहर ॥ * ॥ निश्शेषवीजं त्वतिवृत्तखण्डं सहिङ्गुकं प्रोज्झितचण्डशब्दम्। स्नेहेप्रतप्तं चणदविदग्धं रुचिप्रदं डिण्डिशकं सपिण्डम् ॥

डिण्डीर। पु। अब्धिकफे। समुद्रफेने ॥ डिण्डि इतिशब्दम् ईरयति। ईरगतौ कम्पनेच। अण्। अच्छा ॥

डिण्डीरमोदकम्। न। गृञ्जने ॥

डित्थ.। पु। काष्ठमये गजे ॥ डित्थ काष्ठमयो हस्ती डवित्थस्तन्मयो मृगइतिसुपद्मव्याकरणोक्तो ॥ विशेषलक्षणयुक्तेपुरुषे ॥ यथा। श्यामरूपोयुवाविद्वान् सुन्दर प्रियदर्शन। सर्वशास्त्रार्थवेत्ताच डित्थइत्यभिधीयतइति कलापटीका ॥

डिम.। पु। नाटकस्य रूपकविशेषे ॥

डिम्ब। पु। भयध्वनौ ॥ अण्डे ॥ पु-

म्फुसे ॥ प्रीशनि ॥ विप्लवे । डमरे । अमक्ष कलहे ॥ एरण्डे ॥ भये ॥

डिम्बनम् । डिविनोदे । घञ् ॥

डिम्बाहव । पुं । भूभृताशून्ये युद्धे ॥

डिम्बिका । स्त्री । जलविम्बे ॥ शोणाक वृक्षे ॥ कामुकस्त्रियाम् ॥

डिम्भ. । चि । बालिशे । वैधेये ॥ बाले । शिशौ ॥ डिम्भयति । डिभिसङ्घाते । चुरादि । पचाद्यच् ॥ डिंभ्यते वा घञ् ॥ अस्यरूपान्तरं डिम्बो पीतिद्विरूपकोश ॥

डिम्भक. । पु । डिम्भे ॥ स्वार्थेक. ॥

डिम्भचक्रम् । न । स्वरोदयोक्ते नराणां शुभाशुभनिर्णायके चक्र वि० ॥ यथा । डिम्भचक्रे न्यसेद्भानि भानुभादित्रिमस्तके । मुखेचोणि दयस्कन्धे चैकैक शाहुहस्तयो ॥ हृदिपञ्च नाभिगुह्ये चैकैकषट्चजानुनो । चरणाभ्यां तथैकैक जन्मर्क्षपतनात् फलम् ॥ शीर्षस्थेछत्रलाभ स्यात् वक्त्रेमिष्टान्नभोजनम् । स्कन्धेधनीच बाहुभ्यां स्थानभ्रष्टो भ .वर ॥ पाणिभ्यांतस्करो लक्ष्मीर्हृदयायुश्च नाभित । गुह्येकामोभ्रमोजान्वोरल्पजीवीचपादयोरितिस्वरोदय ॥

डिम्भा । स्त्री । स्तनपायाम् ॥ टाप् ॥

डीनम् । न । पक्षिगतिप्रभेदेपतनमाषे ॥ कर्णपर्वणिविशेषोऽस्यद्रष्टव्य ॥ आगमशास्त्रविशेषे यथा । डामर डमर डीन श्रुत कालीविलासकम् । सप्तकोटि महाग्रन्था मम वक्त्राद्विनिर्गता ॥ इति मुण्डमालातन्त्रम् ॥

डयनम् । डीङ् विहायसागतौ । नपुसके भावेक्त. । स्वादयश्चोदित । ओदितश्चेति निष्ठातस्य न ॥

डीनडीनकम् । न । खगानागतिक्रियाविशेषे ॥ तेषांपतन निर्विशेषणाङ् कुत्सितञ्च डीनडीनकपदवाच्यम् ॥

डीनावडीनम् । न । पक्षिणांगतिविशेषे ॥ तत्तु एकस्यागतौ गत्यन्तरमिश्रणम् ॥ अध'कुत्सितगमनञ्च ॥

डीयमान । त्रि । आकाश प्रच्युगच्छति ॥

डुण्डु । पु । डुण्डुभसर्पे ॥

डुण्डुभ. । पु । राजिलेसर्पे ॥ डुण्डुइत्यनुकरणशब्द । तम् भणति तेन भातीति वा । अन्येभ्योपीतिड ॥ यद्वा । लड्यते । ओलडिउत्क्षेपे । घञ् । डलयोरैकत्वम् । डभति । डभपूरणे । इगुपधेतिक । डण्डश्चासावुभश्च । पृषोदरादि ॥ द्विमुखो डुण्डुभ स्मृत ॥

डुण्डुल. । पु । क्षुद्रोलूके । पिङ्गले । हस्तहाविषि ॥

डुलि: । स्त्री । कमठ्याम् ॥ डोलयति । डुलउत्क्षेपे । इगुपधादितिकिः ॥

डुलिका । स्त्री । खञ्जनाकृतिपक्षिविशेषे ॥

डुली । स्त्री । चिल्लीशाके ॥

डोडिका । स्त्री । सुमुष्क्याम् । करेञ्जा इति प्रसिद्धे फलशाकविशेषे ॥ डोडिकापुष्टिदा वृष्या रुच्या वह्निप्रदा लघु । हन्ति पित्तकफार्शांसि कृमिगुल्मविषामयान् ॥ * ॥ वालडोडीफलं मविकलं स्विन्नमीषच्च तोये स्नेहे भृष्टं प्रथयितिततो वेसवारैश्च सिद्धम् । गव्यं तक्रं क्वथितनिहिते साधितं रामठेन खादन् स्वादनं निभृत ममृत निन्दितभोक्तृभिकै ॥ * ॥ सम्मूज्यशुष्कतरणेः प्रतापात् प्रतप्त माज्ये नवडोडिशाकम् । सवैन्धवं रामठदत्तवासं खादन्नरो निन्दति व्यञ्जनानि ॥ डोडिका वातला रूक्षा शीता गुर्वी विषापहा । सुस्विन्ना रोचनी हृद्या अस्विन्ना कण्ठकर्त्तरी ॥

डोडी । स्त्री । डोडिकायाम् ॥ क्षुपविशेषे । जीवन्त्याम् । सुखालुकायाम् ॥

डोम' । पु । स्वनामख्याते ऽस्पृश्यजातौ ॥ यथा । चण्डालश्चैव डोमश्च स्नानकश्च तथा इति । दण्डीरश्चैव भण्डीरो भूषण्डश्च इत्याश्रमी ॥ इयामुण्डी लिङ्गधारी समाप्तते यश्विनि । स्पृष्ट्वा प्रमादत स्नात्वा गायत्र्यष्टशत जपेदिति मत्स्यसूक्ततन्त्रे ३९ पटल ॥

डोरम् । न ।
डोरकम् । न । } हस्तादिबन्धनसूत्रे ॥

डोरडी । स्त्री । वृहत्याम् ॥ इतिराजनिर्घण्ट ॥

ढ

ढ । पु । ढकारे ॥ ढक्कायाम् ॥ शुनि ॥ श्वलाङ्गूले ॥ निर्गुणे ॥ ध्वनौ ॥ ढगणे ॥

ढक्का । स्त्री । यश पटहे ॥ ढगितिकायति । कैशब्दे । आतइतिक. ॥

ढक्कारी । स्त्री । तारिणीदेव्याम् ॥

ढगण । पु । भेदत्रयविशिष्टे त्रिमात्रिके ॥ यथा । (।ऽ ध्वज १) (ऽ। ताल. २) (॥। ताण्डवम् ३) इति ॥

ढालम् । न फलके ॥

ढाली । त्रि । चर्मिणि ॥

ढामरा । स्त्री । हस्याम् ॥

ढुण्ढि. । पु । श्रीगणेशविशेषे ॥ यथा । अन्वेषणे ढुण्ढिरयं प्रथितोऽस्ति धातु

सर्व्वाङ्गं ढिल्लतया भवतु ढिल्लनामा । काशीप्रदेशमपि कोऽपभतेऽपदे ही तेषां ढिला तव विनायक ढुण्ढिराज ॥ इति काशीखण्डगणेशप्रति शिववाक्यम् ॥

ढोल । पु । स्वनामख्यातेवाद्यविशेषे ॥

ण

—

ण । पु । णकारे ॥ बुद्धदेवताविशेषे । बिन्दुदेवे ॥ भूषणे ॥ गुणवर्जिते ॥ पानीयनिलये ॥ निर्णये ॥ ज्ञाने ॥

णयः । पु । शकलोकस्थे समुद्रोपमे सरोविशेषे ॥

* ॥ * ॥ इत्यादिगौडकुलोत्पन्नाढीववाढप्रधानोपनामतुलारामभिश्रात्मजश्रीधनपतिमिश्रापरनाम्ना तताश्रीसद्गुरुश्चावधूतश्रीपरमहंसपरिव्राजकाचार्यश्रीमद्धरिहरानन्दनाथभारतिशिष्येण शाक्तावधूतश्रीसुखानन्दनाथपरनामधेयेन विरचिते शब्दार्थचिन्तामणौ टवर्गः समाप्तः ॥ १ ॥ * ॥ * ॥ * ॥ * ॥ * ॥

तत् सत्

त

त । पु । तकारे ॥ चौरे ॥ अन्दे ॥ पुच्छे ॥ क्रोडे ॥ म्लेच्छे ॥ रत्ने ॥ सुगते ॥ योधे ॥ गौरविवर्जितपुच्छे ॥ क्रोष्टुपुच्छे ॥ स्त्री । न । तरणे ॥ पुण्ये ॥ तटति । तटउच्छ्राये । ड. ॥

तकिल । त्रि । धूर्त्ते ॥

तकिला । स्त्री । औषधे ॥

तक्रम् । न । चतुर्थांशजलसयुक्ते दधिनि । गोरसजे । दण्डाहते । कालसेये ॥ तत्पञ्चविधम् । यथा । ससरं निर्जलं घोलं मथितन्त्वसरोदकम् । तक्रं पादजलं प्रोक्तं मुदश्विच्चार्द्धवारिकम् ॥ छच्छिकासरहीनाख्या स्वच्छा प्रचुरवारिका ॥ * ॥ तुर्य्यांशेन जलेन सयुतमतिस्थूलं सदन्यं दधिप्रायो माहिष मंशुकेन विमले म्लानाजने गालयेत् । भृष्टहिङ्गुवजीरकञ्च लवणं राजीञ्च किञ्चिन्मितां पिष्टा तद्विनिमिश्रयेद्भवतितत् तक्रनकस्य प्रियम् ॥ अस्यगुणायथा । तक्रवश्विकरंवह्निदीपनं पाचनं परम् । उदरेये गदार्त्तेषां नाशनं तृप्तिकारकम् ॥ अपि च । तक्रं ग्राहि कषायाम्लं स्वादु

पाकरसं लघु । वीर्य्योष्णं दीपनं वृ
ष्यं प्रीणनं वातनाशनम् ॥ ग्रहण्या
दिमतां पथ्यं भवेत् संग्राहि लाघवा
त् ॥ * ॥ किञ्च स्वादुविपाकित्वान्न
च पित्तप्रकोपणम् । कषायोष्णविका
शित्वाद्रौक्ष्याच्चापि कफापहम् ॥ न
तक्रसेवी व्यथते कदाचिन्न तक्रदग्धाः
प्रभवन्ति रोगाः । यथा सुराणाममृ
तं सुखाय तथा नराणां भुवि तक्रमा
हुः ॥ समुद्धृतघृतं तक्रं पथ्यं लघु विशे
षतः । स्तोकोद्धृतघृतं तस्माद्गुरु वृ-
ष्यं कफापहम् ॥ अनुद्धृतघृतं सा-
न्द्रं गुरु पुष्टिकफप्रदम् ॥ * ॥ वाते
ऽम्लं शस्यते तक्रं शुण्ठीसैन्धवसंयुतम्
। पित्ते स्वादु सितायुक्तं सव्योषं श
स्तं कफे ॥ * ॥ हिङ्गुजीरयुतं घोलं सै
न्धवेन सुसंयुतम् । भवेदतीव वातघ्न
मर्शोऽतीसारहृत् परम् ॥ रुचिदं पुष्टि
दं बल्यं वस्तिशूलविनाशनम् । मूत्र
कृच्छ्रे तु सगुडं पाण्डुरोगे सचित्र
कम् ॥ शीतकालेऽग्निमान्द्ये च तथा
वातामयेषु च । अरुचौ स्रोतसां रो
धे तक्रं स्यादमृतोपमम् ॥ तत्तु ह-
न्ति गरच्छर्द्दिप्रसेकविषमज्वरान् ।
पाण्डुमेदोग्रहण्यर्शोमूत्रग्रहभगन्द-
रान् ॥ मेहं गुल्ममतीसारं शूल-
प्लीहोदरारुचीः । श्वित्रकोठघृतव्या

पत्कुष्ठशोथतृषाकृमीन् ॥ नैव त
क्रं क्षते दद्यान्नोष्णकाले न दुर्बले
। न मूर्च्छाभ्रमदाहेषु न रोगे रक्त
पैत्तिके ॥ * ॥ यान्युक्तानि दधीन्य
ष्टौ तद्गुणं तक्रमादिशेत् ॥ अथामय
घ्नतक्रगुणाः । तक्रमामं कफं कोष्ठे ह
न्ति कण्ठे करोति च । पीनसश्वासका
सादौ पक्वमेव प्रयुज्यते ॥ तक्यति
तच्यते वा । तक् गतौ । स्फायितञ्ची
तिरक् । चक्रादिः ॥

तक्रकूर्च्चिका । स्त्री । छाना इति गौड
भाषाप्रसिद्धे दुग्धविकृतौ ॥ उष्ण-
दुग्धे तक्रयोगात् जाता स्यात् तक्र-
कूर्च्चिका ॥ तक्रेण सह पक्वे क्षीरे ॥
तक्रेणपक्वं यत्क्षीरं सा भवेत् तक्र
कूर्च्चिकेति ॥

तक्रपिण्डः । पु । क्षीरविकृतौ ॥ दध्ना
तक्रेण वा नष्टं दुग्धं बद्धं सुवाससा ।
द्रवभागेन हीनं यत् तक्रपिण्डः स-
उच्यते ॥

तक्रमांसम् । न । मांसप्रकारविशेषे ॥
यथा । पाकपात्रे घृतं दत्त्वा हरिद्रां-
हिङ्गु भर्ज्जयेत् । छागादेः सवसञ्चा
ऽपि खण्डशश्च भर्ज्जयेत् ॥ सिद्धि
योग्यं जलं दत्त्वा पचेन्मृदुतरं च-
मा राजिकादिद्रुते तक्रे मांसञ्चा-
निधापयेत् ॥ तक्रमांसन्तु वातघ्नं च

सुरूपं लघुमदम् । कफघ्नं पित्तलं किञ्चित् सर्वोष्णारम्भ पाचनम् ॥

तक्रवामनः । पु । नारङ्गे ॥

तक्राटः । पु । मन्थानदण्डे ॥ तक्रो ऽस्य अटति । अट० । अच् ॥

तक्षः । पुं । भरतात्मजे । तक्षशिलाधीशे ॥ न । चित्रानक्षत्रे ॥

तक्षकः । पु । पातालस्थाष्टनागान्तर्गत नागराजविशेषे । कश्यपात्कद्रुगर्भे जाते इन्द्रसखे ॥ वर्द्धकौ । तक्षिण ॥ वृक्षविशेषे ॥ विश्वकर्मणि ॥ तक्षति । तक्षू तनूकरणे । ण्वुल् ॥

तक्षणम् । न । तनूकरणे । तक्षू० । ल्युट् ॥

तक्षणी । स्त्री । वाश्याम् । वसूला इति भाषा ॥ गौरादि ॥

तक्षा । पु । त्वष्टरि । वर्द्धकौ ॥ काष्ठं तक्ष्णोति तक्षति वा । तक्षू० । कनिन् युवृषि तक्षीति कनिन् ॥

तक्षशिला । स्त्री । देशविशेषे ॥ नगरीविशेषे । सिन्धुदेशे भरतात्मजस्य तक्षस्य राजधान्याम् ॥

तगण । पुं । अन्त्य(ऽऽ।)लघौ ॥ तसंज्ञकोगण ॥

तगर । पुं । चान्दनी इति देशभाषा प्रसिद्धे पुष्पवृक्षविशेषे । सितपुष्पे । कहुच्छदे । कालपर्णे । टगर इति-

गौडभाषा ॥ मदनवृक्षे ॥ न । नन्द्यावर्त्तवृक्षे । पिण्डतगर इतिकोङ्कणभाषा । तगरमूल इतिगौडभाषा ॥ तन्मूले तत्पुष्पे च ॥ तगरद्वयमुष्णंस्यात् स्वादु स्निग्धं लघु स्मृतम् । विषाऽपस्मारमूर्द्धाक्षिरोगदोषत्रयापहम् ॥ काहुस्यद्वृक्षे ॥

तगरपादिकम् । न । तगरे । नन्द्यावर्त्ते ॥

तगरपादी । स्त्री । अं० । तगरे ॥

तङ्क । पु । दुःखेन जीवने ॥

तङ्कनम् । न । दुःखेनजीवने ॥ तकि० । ल्युट् ॥

तङ्ग । पु । जनपदविशेषे ॥

तङ्गण । पु । नीवृद्विशेषे ॥

तच्छील । त्रि । तत्स्वभावे ॥ यः स्वभावतः फलनिरपेक्षतया प्रवर्त्तते स तच्छील ॥

तज्ज । त्रि । सांदृष्टिकार्थे ॥ तज्जाते ॥

तज्ञ । त्रि । तदभिज्ञे ॥ तत् जानाति । इगुपधेतिकः ॥

तञ्ची । स्त्री । हिङ्गुपत्न्याम् ॥

तट । त्रि । शरीरे । कूले । रोधसि ॥ तटति । तटउच्छ्राये । अच् ॥ न । क्षेत्रे ॥

तटस्थः । त्रि । तीरस्थे ॥ तटे तिष्ठति । स्था० । क ॥ न । तद्भिन्नत्वेबोधति त

दोधकत्वमितिलक्षणलक्षिते स्वरू पेतरलक्षणे ॥ स्वरूपा ऽनन्वयित्वे सति विशेषणान्तरं सहूच्येतरव्यावर्त्त कस्वरूपे लक्षणे ॥

तटाक । पु । तडागे । पद्माकरे ॥ तटमकति । अकुटिलायांगतौ । कर्मण्यण् ॥

तडाग । पु । तडागे ॥ तटमगति । अगकुटिलायांगतौ । कर्मण्यण् ॥

तटिनी । स्त्री । नद्याम् ॥ तटमस्त्यस्या । अतइनिठनाविति इनि । पुष्करादिभ्योदेशेइति इनिर्वा । ऋन्नेभ्यइति ङीप् ॥

तटी । स्त्री । तीरे । कूले ॥ तटति । तट॰ अच् । जातित्वात् ङीष् ॥

तडाक । पु । तडागे ॥ तड्यते । तड आघाते । पिनाकादयश्चेतिसाधु ॥

तडाग । पु । जलाधारविशेषे । पद्माकरे ॥ प्रशस्तभूमिभागस्थो बहुसवत्सरोषित । जलाशय स्तडाग स्यादित्याहु शास्त्रकोविदा ॥ * ॥ पञ्चशतधनु परिमिते जलाशये ॥ यथा । चतुर्विंशाङ्गुलोहस्तो धनुस्तच्चतुरुत्तर । शतधन्वन्तरश्चैव तावत् पुष्करिणीशुभा । एतत्पञ्चगुण प्रोक्तस्तडागइतिनिर्णय ॥ इतिमत्स्य-वर्द्धमानधृतोवशिष्ठ ॥ यन्त्रकूटके ॥

तड्यते । तड॰ आघाते । तडगादयश्चेति निपातितम् ॥

तडाघात । पु । ऊर्द्धीकृत्यहस्तिशुण्डाघाते ॥ यथा । उच्चै करिकराक्षेपे तडाघात विदुर्बुधा इति ॥

तडित् । स्त्री । विद्युति ॥ ताडयत्यभ्रम् । तड॰ । ताडेर्णिलुक्चेतीति प्रत्यय ॥ कान्तिके ॥

तडित्वान् । पु । वारिदे । मेघे ॥ तडित सन्त्यस्मिन् । मतुप् ॥ मुस्तके ॥

तण्डक । पु । न । खञ्जने ॥ फेने ॥ समासप्रायवाचि । समस्तपदजातके ॥ गृहदारुणि ॥ तरुस्कन्धे ॥ त्रि । मायाबहुले ॥ तण्डते । तडिआडने । ण्वुल् ॥ उपघातके ॥

तण्डु । पु । शिवद्वारपालविशेषे ॥

तण्डुरीण । पु । कीटमात्रे ॥ न । तण्डुलोदके ॥ त्रि । वर्बरे ॥ इति हेमचन्द्र ॥

तण्डुल । पु । धान्यादिनिकरे । धान्यादिसारे । चाउर इतिचाँवल इतिचभाषा ॥ तण्डुलोमेहजन्तुघ्न सनवस्तु तिदुर्ज्जर ॥ ताड्यते । तड आघाते । सानसिवर्णसिपर्णसितण्डुलाङ्कुशे-त्यादिना निपातनादुलच् प्रत्ययो नुमागमश्च ॥ यद्वा । त्रियन्ते लुष्ठन्ते तन्यन्ते ताड्यन्ते वा इति तण्डुला ।

कृन्तुटितनिताडिभ्यउलच् तण्ड स्यादेश ॥ विडङ्गे ॥ अल्पमारिषे ॥

तण्डुलपरीक्षा । स्त्री । नवविधदिव्यान्तर्गतदिव्यविशेषे ॥

तण्डुला । स्त्री । महासमङ्गायाम् ॥ विडङ्गे ॥

तण्डुलाम्बु । न । ज्येष्ठाम्बुनि । तण्डुलोदके ॥

तण्डुलिकाश्रम । पु । तीर्थविशेषे ॥

तण्डुली । स्त्री । यवतिक्ताख्यलतायाम् ॥ यवाण्डुल्याम् ॥ तण्डुलीयशाके ॥

तण्डुलीक । पु । अल्पमारिषे ॥

तण्डुलीयः । पु । मेघनादे । अल्पमारिषे । बहुवीर्ये । सुशाके । चौंलाइ इतिभाषा ॥ तण्डुलीयो लघुः शीतो रूक्षः पित्तकफास्रजित् । सृष्टमूत्रमलो रुच्यो दीपनो विषहारकः ॥ तण्डुलायहित । विभाषाह विरपूपादिभ्य इति छः ॥ विडङ्गतरौ ॥ ताप्ये ॥

तण्डुलीयकः । पु । तण्डुलीयशाके ॥ विडङ्गे ॥ स्वार्थेकन् ॥

तण्डुलीविका । स्त्री ।
तण्डुलुः । पु । } विडङ्गे ॥

तण्डुलेय । पु ।
तण्डुलेर । पु । } तण्डुलीयशाके ॥

तण्डुलोत्थम् । न । तण्डुलाम्बुनि ॥

तण्डुलोदकम् । न । तण्डुलाम्बुनि ॥ यथा । जलमष्टगुणं दत्त्वा पलं कण्डिततण्डुलात् । भावयित्वा ततो देय तण्डुलोदककर्मणीति वैद्यकपरिभाषा ॥

तण्डुलौघ । पु । वेष्टवंशे ॥ तण्डुलसमूहे ॥

तण्डुल्य । पु । तण्डुलीयशाके ॥ तण्डुलायहितः । विभाषाहविरपूपादिभ्य इतिपक्षेयत् ॥

तण्डुवीथ । पु । कीटमाषे ॥ न । तण्डुलोदके ॥ त्रि । बर्बरे ॥ इतिमेदिनिकर ॥

तत् । अ । हेतौ ॥ तनोति । तनुविस्तारे । क्विप् । गमादीनामितिवक्तव्य नुनासिकलोपे तुक् ॥

ततम् । न । वीणादिवाद्ये ॥ पु । वायौ ॥ त्रि । व्याप्ते ॥ विस्तृते । पृथौ ॥ तन्यते । तनु० । तनिपत्यो र्छन्दसीति तनोतेस्तन् ॥ तन्यतेस्म वा । तनु० । क्त । अनुदात्तोपदेशेति नलोपः ॥

ततपत्री । स्त्री । कदलीवृक्षे ॥

ततम । त्रि । बहुषुमध्येएकस्मिन् ॥

ततरः । त्रि । द्वयोर्मध्ये एकस्मिन् ॥

ततवत् । त्रि । विस्तारयुक्ते ॥

ततः । अ । आदौ ॥ पश्चादर्थे ॥ आन

सर्यें ॥ कथान्तरे ॥ हेतै॥ पञ्चम्य र्थे ॥ तस्मात् । पञ्चम्यास्तसिल् । त्यदाद्यत्वम् ॥

ततस्त्य. । त्रि । ततोभवे ॥ ततसम्बन्धिनि ॥ अव्ययात् त्यप् ॥

तति । स्त्री । श्रेण्याम् ॥

तत्काल । पु । तदाख्ये । वर्त्तमानकाले ॥ सधावै काववय ॥

तत्कालधीः । त्रि । प्रत्युत्पन्नमतौ । उपस्थितबुद्धौ ॥ तत्कालेधीर्यस्य ॥

तत्क्रिय । त्रि । कर्मकारे । वेतन विनाकर्मकारके ॥

तत्त्वथ । पु । सत्यार्थे ॥ सधावै ख याथ्त्व । सत्यवचनो वा ॥

तत्त्वम् । न । याथार्थ्ये । स्वरूपे । अनारोपितस्वरूपे ॥ परमात्मनि । ब्रह्मणि ॥ ब्रह्मभावे ॥ तदितिसर्वनाम सर्वञ्च ब्रह्म तस्यनाम तदिति । तद्भाव स्तत्त्व ब्रह्मणो याथात्म्य तत्त्वमिति पूज्यपादानां व्याख्यानम् ॥ आदिमध्यावसानेषु दु ख सर्वमिद यतः । तस्मात सर्वं परित्यज्य तत्त्वनिष्ठो भवानघेत्युपदेश' ॥ अथाहुर्गौडपादाचार्याः । तत्त्वमाध्यात्मिक दृष्ट्वा तत्त्व दृष्ट्वा तुवाह्यत. । तत्त्वीभूत स्तदारामस्तत्त्वाद् प्रच्युतोभवेदिति ॥ तत्त्व चागमसतिद्धु मिथ्या कुर्वेद

वादिन ॥ विलम्बितम्व्यत्वे ॥ तमर्न तत् । तनु० । क्लिप् । अन्येषामपीतिवः । न्वस्त्यादस्युपलचणंगीतवाद्ययो ॥ वाद्यप्रभेदे ॥ चेतसि ॥ वस्तुनि ॥ अवयवाने ॥ पारमार्थिके । धर्मिस्वरूपे ॥ मूलप्रकृत्यादिचतुर्विंशतिषु ॥ मूलप्रकृतिरविकृति र्महदाद्याःप्रकृतिविकृतयः सप्त । षोडशकस्तुविकारो नप्रकृतिर्नं विकृति पुरुषः ॥ तत्त्वभाव' । त्व. ॥*॥ वेदाका बहुतर्ककर्कशमतिग्रस्ता पर मायया भाट्टा कर्मकथाकुला इतधियो द्वैतेहि वैशेषिका. । अन्ये भेदरता विवादविकला स्ते तत्त्वतो वञ्चिता स्तस्मात् सिद्धमत स्वभावकमयंधीर. परंसश्रयेत् ॥ सत्त्वरजस्तमस्तु ॥ तत्त्वन्तु नानामुनिभिर्नानाविधमुक्तम् । विस्तरभिया तन्न सङ्गृहीतम् ॥*॥ सर्वस्मिन् दृश्येबाध्यमानेऽपि तद्बाधाधिष्ठानत्वे न स्वयमबाध्यमान मनारोपितं स्वरूप तत्वमितिविवरणकाराः । अथपर्याया अमृत सत्यं परमार्थं सतत्त्व मित्येते एकार्थवाचिन परमार्थतो ब्रह्मणोवाचका शब्दाइतिभाष्यकाराः ॥

तत्त्वन्यासम् । न । ब्रह्मन्यासे ॥ पूजेर्गुल्वविशेषे ॥ यथा । प्रमाणप्रमेयसंशय

प्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः। इतिगौतम॥ अनारोपितवस्तुप्रत्यये॥ इदंसर्वं द्वैतजातमद्वितीये चिदानन्दात्मनिमाययाकल्पितत्वान्मृषैव आत्मैवैकपरमार्थसत्यः सच्चिदानन्दोऽद्वयोऽहमस्मीतिपरिज्ञाने॥ तत्त्वज्ञानम्॥

तत्त्वज्ञानार्थदर्शनम्। न। तत्त्वज्ञानार्थस्यालोचने॥ तत्त्वज्ञानस्याहंब्रह्मास्मीतिसाक्षात्कारस्य वेदान्तवाक्यकरणकस्यामानित्वादिसर्वसाधनपरिपाकफलस्य अर्थः प्रयोजनमविद्यातत्कार्यात्मकनिखिलदुःखनिवृत्तिरूपपरमानन्दावाप्तिरूपश्च मोक्षः तस्यदर्शनम् आलोचनम्। तत्त्वज्ञानफलालोचनेहि तत्साधने प्रवृत्तिः स्यात्॥

तत्त्वतः। अ। यथावदर्थे॥

तत्त्वदर्शी। त्रि। वस्तुयाथात्म्यदर्शनशीले ब्रह्मविदि कृतसाक्षात्कारे॥ तत्त्वं वस्तुनो याथात्म्यम् तद्द्रष्टुं शीलं यस्य। णिनिः॥

तत्त्वभावः। पु। नेतिनेतीत्यादिश्रुतिनिर्दिष्टे विदिताविदिताभ्यामन्यस्मिन्नद्वयस्वभावे॥

तत्त्वविचारः। पुं। भूतार्थचिन्तायाम्॥

तत्त्ववित्-द्। त्रि। स्वरूपविदि। याथात्म्यविदि। ब्रह्मविदि॥ शैवे॥ शैवोहि आत्मविद्याशिवा इति सङ्क्षेपतस्त्रीणितत्त्वानि सर्वजगत्प्रवर्त्तकानीतिमन्यते॥ तत्त्वस्वरूपसकलसंसारधर्मविलक्षणसच्चित्सुखरूपब्रह्माहमस्मीतिवेत्तिजानातीतितत्त्ववित्॥

तत्पत्री। स्त्री। हिङ्गुतरुपत्र्याम्॥

तत्पदलक्ष्यार्थः। त्रि। अज्ञानादिसमष्ट्युपाध्युपहिताधारभूतेऽनुपहितचैतन्ये। चिदेकरसरूपिणि॥

तत्पदवाच्य। त्रि। तत्पदाभिधे॥

तत्पदवाच्यार्थ। त्रि। अज्ञानादिसमष्टि, एतदुपहितसर्वज्ञत्वादिविशिष्टचैतन्यम् एतदनुपहितचैतन्यञ्चैतत्त्रयं तप्तायःपिण्डवदेकत्वेनावभासमान तत्पदवाच्यार्थो भवतीति व्युत्पादितेऽर्थे॥

तत्पदाभिध। त्रि। तत्पदवाच्ये॥ मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः। पारोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधः इत्याहुः॥

तत्पदार्थः। पु। जगत्कारणे परमात्मनि॥ यज्जगत्कारणं तच्च तत्पदार्थः स उच्यते॥ तदिति पदस्यार्थः॥

तत्परः। त्रि। तद्रते॥ आसक्ते॥ तत्

परमुत्तमं यस्य। तेनपूर्यते वा । पृ माणनपूरणयो. । कर्द्दोरप्॥

तत्परायणः । त्रि । तदासक्ते ॥

तत्पुरुषः । पु । प्रायउत्तरपदार्थप्रधाने समासविशेषे ॥ सच द्वेधा।व्यधिकरणपदः समानाधिकरणपदः सङ्ख्या पूर्वपदश्चेति ॥

तत्फल । पु । कुवलये ॥ कुष्ठाख्यौषधौ ॥ चोरनामसुगन्धिद्रव्ये ॥

तत्र । अ । तस्मिन् । सप्तम्यर्थे ॥ सप्तम्यास्त्रल् ॥ तस्यामवस्थायाम् ॥

तत्रत्य । त्रि । तत्रभवे ॥ अव्ययात्त्यप् ॥

तत्रभवान् । त्रि । श्लाघ्ये । पूज्ये ॥ इतराभ्योपिदृश्यन्त इतिप्राग्दीव्यतीय. प्रथमार्थेत्रल् । सुप्सुपेतिसमास. ॥

तथा । अ । साम्ये ॥ अभ्युपगमे ॥ पृष्टप्रतिवाक्ये॥ समुच्चये ॥ निश्चये ॥ तेन प्रकारेण । प्रकारवचनेथाल् । विभक्तित्वात् त्यदाद्यत्वम् ॥

तथागत । पु । बुद्धमुनै । सुगते ॥ तथा सत्यगत ज्ञानं यस्य यथापुनरावृत्तिर्नभवति तथा तेनप्रकारेण गत इति तथागतः । सुप्सुपेतिसमासः । तथाच सुगतिसाधकताप्युक्ता भवति । तदुक्तंबौद्धागमे । यथागतास्तेसुगत. निर्वाणमिति तथागत;स्मृता पि ततस्तथागतइति ॥ त्रि । प्रकान्तगतिशालिनि ॥ तथाभूते ॥

तथाच । अ । पूर्वोक्तार्थदृढीकरणे ॥

तथाहि । अ । निदर्शने ॥ प्रसिद्धमेवेत्यर्थे ॥ तथाच त्रिच ॥

तथैव । अ । तद्वदेवेत्यर्थे ॥

तथ्यम् । न । सत्ये । ऋते ॥ त्रि । तद्वति ॥ तथासाधु' । तत्रसाधुरितियत् ॥

तद् । त्रि । पूर्वोक्ते । बुद्धिस्थस्य परामर्शे । से॰ इतिभाषा ॥ तद्देशकालाद्यवस्थादौ दृष्ट स इति कथ्यते ॥ विप्रकृष्टविषये ॥ स्त्री । सा ॥ न । तत् तद् । सत्यज्ञानादिलक्षणलक्षितस्य तत्त्वमस्यादिश्रुतिप्रसिद्धस्य ब्रह्मणो नाम्नि ॥ यथा । तदित्यनभिसन्धाय फलंयज्ञतप क्रियाः । दानक्रियाश्चविविधा. क्रियन्तेमोक्षकाङ्क्षिभिरिति॥ तदिति ब्रह्माभिधानमुच्चार्य अनभिसन्धायचकर्मणः फलमित्यर्थ. ॥ तनोति । तनु॰ । त्यजितनियजिभ्यो डिदित्यदिः ॥

तदनन्यत्वम् । न । तदभिन्नत्वे ॥ तस्मात अनन्यत्वं नाम पृथक्सत्ताराहित्यम् ॥

तदन्यबाधितार्थप्रसङ्ग । पु दोषविशेषे ॥ यथा । धूमो यदि वह्निव्यभि

तद्गुणः

चारी स्वातन्त्र्यकृत्यो न स्वादि- त्यादि' ॥

तदर्पणम् । न । वस्तुनःप्रत्यर्पणे । प्रतिदाने । स्वामिने नियोपार्पणे ॥ तस्य अर्पणम् ॥

तदा । अ । तस्मिन् काले ॥ तदोदाच ॥ सर्वैकान्येति वा दा ॥

तदात्मा । पु । ततस्वरूपे ॥ तस्यात्मा ॥

तदात्वम् । न । वर्त्तमानकाले ॥ तदेत्यस्यभाव । तस्यभावस्तत्त्वौ ॥

तदादि । त्रि । तदाप्रभृतौ ॥ सकाल आदिर्यस्य यस्मिन्वा ॥

तदानीम् । अ । तस्मिन्काले । तदार्थे ॥ तदोदाच । दानीम् ॥

तदामुखम् । न । आरम्भे ॥

तदेव । त्रि । सहोक्त्या प्रत्यक्षे वेत्यर्थे ॥

तत्रत । त्रि । तत्परे ॥

तद्गतमानस । त्रि । एकाग्रचित्ततये द्गताःकरणे ॥

तद्गुण । पु । काव्यालङ्कारभेदे ॥ स्वमुत्सृज्य गुण योगा दत्युज्वल गुणस्य यत् । वस्तु तद्गुणतामेति भणितेसतु तद्गुण ॥ वस्तुतिरस्कृत निजरूपकेनापिसमीपगतेनप्रगुणत या स्वगुणसम्पदा परस्य स्वातिभासमेव यत् समासादयति स तद्गुणः

तद्बुद्धिः

। तस्याऽप्रकृतस्य गुणोऽस्यास्तीति । उदाहरणम् । विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्या. परितः स्फुरन्त्या । रत्नै पुनर्यत्र रुचा रुचं स्वामानयिरे वंशकरीरनीलैः ॥ अत्र रविलुरगापेक्षया गरुडाग्रजस्य तद्रूपेक्षयाच हरिन्मणीनां प्रगणवर्णता ॥

तद्ग्रह । त्रि । तदभिनिवेशे ॥ तस्मिन् ग्रहस्तद्ग्रह' ॥

तद्दिनम् । अ । दिनमध्ये ॥ प्रतिदिने इतिहेमचन्द्र' ॥ न । पूर्वोक्तदिने ॥

तद्वल' । पि । कुमये ॥ इतिहेम.

तद्धर्मा । पु । विनापिशीलेन स्वधर्मो यमिति य' प्रवर्त्तते सतद्धर्मा ॥

तद्धित. । पु । वृत्तिविशेषे । तद्धिताद्यधिकारविहितप्रत्ययेषु ॥ तेचद्विविधा' । प्रकृत्यर्थभिन्नार्था' स्वार्थिकाश्च ॥ तेभ्य प्रयोगेभ्योहितः ॥

तद्वत् । पि । पूर्वोक्तवति ॥ सयथास्ति । मतुप् ॥ ततसदृशे ॥ तेनतुल्ये ॥ तुल्यार्थे वति. ॥

तद्वदा । स्त्री । वाद्यविशेषे ॥ इतिहेमचन्द्र' ॥

तद्बुद्धि' । स्त्री । परमात्मसाक्षात्कार परार्थावुद्धौ ॥ त्रि । सर्वदा निर्वीजसमाधिमाश्रितसाक्षात्कारे ॥ तस्मिन् ज्ञानप्रकाशिते परमात्मतत्त्वे

सच्चिदानन्दघने एव वाह्यसर्वविष यपरित्यागेन साधनपरिपाकात्- पर्यवसिता बुद्धिरन्तःकरणवृत्ति सा चाकारत्वचयायस्य स तथा ॥

तनय । त्रि । पुत्रे ॥ तनोति कुलम् तन्यते वा । तनु० । वलिमलितनि भ्य कयन् ॥

तनया । स्त्री । दुहितरि । पुत्र्याम् ॥ टाप् ॥ चक्रकुल्यायां लतायाम् ॥ घृतकुमार्याम् ॥

तनिका । स्त्री । तनी इति भाषाप्रसि द्धे वन्धनरज्जौ ॥ यथा । वितानत निका ॥

तनिमा । पु । तनुत्वे । तानवे ॥ तनो भाव । पृथ्वादित्वात् इमनिच् ॥

तनिष्ठ । त्रि । क्षुद्रे ॥ अयमेषां मतिश येनतनु । अ तशायने इष्ठन् ॥

तनीयान् । त्रि । अल्पे ॥ अयमनयोर तिशयेन तनु । द्विवचनविभज्येती यसुन् ॥

तनु । स्त्री । काये । शरीरे ॥ त्वचि ॥ स्त्रियाम् ॥ तन्व्याम् ॥ वोतोगुणवच नादिति पाक्षिकोऽङीषभाव. ॥ त्रि । अल्पे ॥ विरले ॥ कृशे ॥ तनोति तन्यतेवा । तनु० । भृमृशीत्यु ॥ उणने ॥

तनुकम् । न । त्वचे ॥ तनुत्वच इति

यावादिषु पाठात् कन ॥

तनुक्षीर. । पु । आम्रातके ॥

तनुच्छद । पु । वर्मणि ॥ तनुश्छाद्य ते ऽनेन । छद०। पुंसिसञ्ज्ञायामि तिघ ॥

तनुच्छाय । पु । जालवर्बुरकवृक्षे ॥ ॥ स्त्री । न । शरीरच्छायायाम् ॥ तनोश्छाया । विभाषासेनेति वाक्ली वत्वम् ॥

तनुज । पु । पुत्रे ॥ तनोर्जात । ड ॥

तनुजा । स्त्री । पुत्र्याम् ॥ टाप् ॥

तनुत्रम् । न । वर्मणि । सन्नाहे ॥ तनु त्रायते । चैङ्० । आतोनुपेतिक ॥

तनुत्राणम् । न । कवचे । तनुत्रे ॥ शरी ररक्षणे ॥

तनुत्वचा । स्त्री । क्षुद्राग्निमन्थे ॥

तनुपत्र । पु । इङ्गुदीवृक्षे ॥

तनुभस्त्रा । स्त्री । नासिकायाम् ॥ तनो र्भस्त्रेव ॥ तन्व्यांचर्मप्रसेविकायाम् । छोटी भाथी इति छोटीमसक इतिच भाषा ॥

तनुभृत् । पु । जीवे ॥

तनुमध्या । स्त्री । गायत्रीछन्द प्रभेदे ॥ त्यौचेत्तनुमध्या । य० । मूर्तिर्मुरश त्रो रत्यद्भुतरूपा । आस्तां ममचि त्ते नित्य तनुमध्या ॥

तनुरस । पु । घर्मे । स्वेदजले ॥ अल्प

रसे ॥ चि । तद्विशिष्टे ॥

तनुरट् । न । रोमणि ॥

तनुरुहम् । न । तनुरुहे ॥ त्रि । तनौ रूढे ॥

तनुवात । पु । नरकविशेषे ॥

तनुवारम् । न । वर्मणि । सन्नाहे ॥ तनुं वृणोति आवृणोति आच्छादयति । वृञ्० । कर्मण्यण् ॥

तनुवीजः । पु । राजवदरे ॥

तनुव्रण । पुं । वल्मीकरोगे ॥

तनुः । न । शरीरे ॥ तनोति तन्यते वा । तनु० । अर्त्तिपृवपियजितनिधनितपिभ्यो नित् इत्युसिप्रत्यय । तनुषी तनूंषि ॥

तनुसञ्चारिणी । स्त्री । बालिकायाम् ॥

तनुसर । स्वेदे ॥ तनो सरति । सृ० । अच् ॥

तनूः । स्त्री । काये । शरीरे ॥ तनोति तन्यते वा । तनु० । भृमृशीत्यु । प्राणिजातेरित्यूङ् ॥ कृषिचमितनिधनी त्यूर्वा ॥

तनूकृत । त्रि । तष्टे । सूक्ष्मीकृते ॥ अतनुस्तनुरकारि । कृञ् क्त ॥

तनूजः । पु । पुत्रे ॥ त्रि । शरीरजे ॥ तन्वाःजातः । पञ्चम्यामितिड ।

तनूजनि । पु । पुत्रे ॥ तन्वा जनिर्यस्य ॥

तनूजा । स्त्री । पुत्रिकायाम् ॥ टाप् ॥

तनूनपम् । न । आज्ये । घृते ॥ तन्वा ऊनकृशं पाति । पा० । क. ॥

तनूनपात् । पु । अग्नौ । पावके ॥ तनूं शरीरं न पालयति । नभ्राण्नपादिति निपातित । तनूनपातौ । तनूनपातः ॥ तनूस्वस्वरूप न पाति नरक्षति । आशुविनाशित्वात् इति तनूनपाच्छन्दस्य । उगिदचामिति नुमि तनूनपान् तनूनपान्तौ तनूनपान्तः इतिवा ॥ तन्वा ऊन कृश पाति । तनूनप घृतादि तत् अत्ति । अदोऽनन्नइतिविट् । तनूनपात् तनूनपादौ तनूनपादइतिवा ॥ चित्रके ॥

तनूरुहम् । न । रोम्णि ॥ पक्षिपक्षे । पतत्रे ॥ पुत्रे ॥ तन्वा रोहति । रुह० । इगुपधेतिकः । मू०कोषा ॥

तनूह्रदः । पु । पायौ । गुदे ॥

तन्तिः । स्त्री । प्रसारितरज्ज्वाम् ॥ दाम्न्याम् ॥

तन्तु । पु । सूत्रे ॥ ग्राहे ॥ अपत्ये ॥ सन्ततौ ॥ तनोति तन्यते वा । तनु० । सितनीतितुन् ॥

तन्तुकाष्ठम् । न । तूल्याम् । ताँतकाकाठ इति भाषा ॥

तन्तुकी । स्त्री । नाड्याम् ॥

तन्तुकीट । पु । कोषकारे । गुटिपोका इतिगौड भाषा । रेसमकाकीडा

इति भाषा ॥

तन्तुण । पुं । ग्राहे । घाँगर इतिगौ उभाषा ॥

तन्तुनाग, । पु । ग्राहे ॥

तन्तुनाभ । पु । लूतायाम् ॥

तन्तुनिर्य्यास । पु । तालवृक्षे ॥

तन्तुपर्व । न । परमेश्वरोपवीतदानतिथौ । श्रावण्या पूर्णिमायाम् ॥

तन्तुभ । पु । सर्षपे ॥ तन्तुना भाति । भा० । सुपीतिक ॥ वत्से ॥

तन्तुरम् । न । }
तन्तुलम् । न । } मृणाले ॥

तन्तुली । स्त्री । सितापाके । चासनी इतिभाषा ॥

तन्तुवाप । पु । तन्त्रवाये । कुविन्दे ॥ तन्तून् वपति । टुवपृ० । कर्मण्यण् ॥

तन्तुवाय । पु । लूतायाम् ॥ तन्तून् वयति । वेञ्० । ह्वावामश्चेत्यण् ॥ तन्त्रवाये । कुविन्दे । कोली इतितांती इतिचभाषा ॥

तन्तुविग्रहा । स्त्री । कदल्याम् ॥

तन्तुशाला । स्त्री । गर्त्तिकायाम् । तन्तुवपनगृहे ॥ तन्तूनां शाला ॥

तन्तुसन्ततम् । न । ऊते । स्यूते । वुना कपड़ा इतिभाषा ॥

तन्तुसार । पुं । गुवाकवृक्षे ॥

तन्त्रम् । न । कुटुम्बकृत्ये ॥ सिद्धान्ते ॥

उत्तमौषधे ॥ प्रधाने ॥ तन्तुवाये ॥ परिच्छदे ॥ हेतौ ॥ उभयार्थप्रयोजके । उभयोरेकेनसकृत्प्रवृत्तौ ॥ इतिकर्त्तव्यतायाम् ॥ राष्ट्रे ॥ परच्छन्दे ॥ करणे ॥ व्यर्थसाधके ॥ तन्तौ ॥ स्वराष्ट्रचिन्तायाम् ॥ परिजने ॥ वापसाधने । तन्तुवायशलाकायाम् ॥ तन्यन्ते तन्त्रो ऽस्मिन । ष्ट्रन् ॥ प्रबन्धे ॥ शपथे ॥ धने ॥ गृहे ॥ वपनसाधने ॥ कुले ॥ श्रुतिशाखाविशेषे ॥ शास्त्रविशेषे ॥ तल्लक्षणं यथा । सर्गश्च प्रतिसर्गश्च मन्त्रनिर्णयएवच । देवतानाञ्च संस्थान तीर्थाना चैव वर्णनम् ॥ तथैवाश्रमधर्मश्चविप्रसंस्थानमेवच । संस्थानञ्चैवभूतानां यन्त्राणाञ्चैवनिर्णय ॥ उत्पत्तिर्विधानाञ्च तरूणांकल्पसञ्ज्ञितम् । संस्थान ज्योतिषां चैव पुराणाख्यानमेवच ॥ कोषस्य कथनञ्चैव व्रतानां परिभाषणम् । शौचाशौचस्यचाख्यान नरकाणाञ्चवर्णनम् ॥ हरचक्रस्य चाख्यान स्त्री पुंसोश्चैवलक्षणम् । राजधर्मो दानधर्मो युगधर्म स्तथैव च ॥ व्यवहार कथ्यतेच तथाचाध्यात्मवर्णनम् । इत्यादिलक्षणैर्युक्तं तन्त्रमित्यभिधीयते ॥ *॥ अथतस्य माहात्म्यम् । विष्णुर्वरिष्ठोदेवाना ह

दानामुदधिस्तथा । नदीनाञ्चयथा गङ्गा पर्वतानांहिमालय ॥ अश्वत्थ सर्ववृक्षाणां राज्ञामिन्द्रोयथावर । देवीनाञ्चयथादुर्गा वर्णानां ब्राह्मणोयथा ॥ तथासमस्तशास्त्राणां तन्त्रशास्त्र मनुत्तमम् । सर्वकामप्रद पुण्य तन्त्र वैवेदसम्मितम् ॥ कीर्त्तनदेवदेवस्य हरस्यमतमेवच । पावन श्रद्दधानानामिहलोकेपरत्रचेति ॥ तच्च चतुःषष्टिसख्यकम् । यथा । सिद्धीश्वर महातन्त्र कालीतन्त्रंकुलार्णवम् । ज्ञानार्णवनीलतन्त्रं फेत्कारी तन्त्रमुत्तमम् ॥ देव्यागमम् त्तराख्य श्रीक्रम सिद्धियामलम् । मत्स्यसूक्त सिद्धसार सिद्धिसारस्वत तथा ॥ वाराहीतन्त्र देवेशि योगिनीतन्त्रमुत्तमम् । गणेशविमर्षिणी तन्त्र नित्यातन्त्र शिवागमम् ॥ चामुण्डाख्य महेशानि मुण्डमालाख्य तन्त्रकम् । हसमाहेश्वर तन्त्र निबन्धरमनुत्तमम् ॥ कुलप्रकाशक देविकल्पं गान्धर्वकशिवे । क्रियासार निबन्धाख्य स्वतन्त्रतन्त्रमुत्तमम् ॥ सम्मोहनं तन्त्रराज ललिताख्य तथाशिवे । राधाख्य मालिनी तन्त्रं रुद्रयामलमुत्तमम् ॥ वृहत्श्रीक्रम तन्त्रञ्च गवाक्ष सुकुमुदिनी । विशु

द्धेश्वरतन्त्रञ्च मालिनीविजयं तथा ॥ समयाचारतन्त्रञ्च भैरवीतन्त्रमुत्तमम् । योगिनी हृदय तन्त्रं भैरवं परमेश्वरि ॥ सनत्कुमारक तन्त्रयोनितन्त्र प्रकीर्त्तितम् । तन्त्रान्तरञ्च देवेशिनवरत्नेश्वरतथा ॥ कुलचूडामणितन्त्र भावचूडामणीयकम् । मन्त्रदेवप्रकाशञ्च कामाख्यानामक तथा ॥ कामधेनु कुमारीच भूतडामरसज्ञकम् । मालिनीविजय तन्त्रं यामल ब्रह्मयामलम् ॥ विश्वसारं महातन्त्र महाकाल कुलामृतम् । कुलोड्डीश कुब्जिकाख्य यन्त्रचिन्तामणीयकम् ॥ एतानितन्त्ररत्नानि सफलानियुगेयुगे । कालीविलासकादीनि तन्त्राणि परमेश्वरि ॥ कालकल्पे सुसिद्धानि अश्वक्रान्तासु भूमिषु । महाचीनादितन्त्राणि कलिकल्पे महेश्वरि ॥ सुसिद्धानि वरारोहे रथक्रान्तासु भूमिषु इति सिद्धिसारस्वतम् ॥ * ॥ अपिच । चतुःषष्टिश्च तन्त्राणि यामलादीनि पार्वति । सफलानीह वाराहे विष्णुक्रान्तासु भूमिषु ॥ कल्पभेदेन तन्त्राणि कथितानिच यानिच । पाषण्डमोहनायैव विफलानीह सुन्दरीति महाविश्वसारतन्त्रम् ॥ चि । आयत्ते

॥ साङ्ख्यादिशास्त्रविशेषे ॥ तन्त्यन्ते व्युत्पाद्यन्ते तत्त्वान्यनेनेति व्युत्पत्तेः ॥ तननम् । तन्यतेऽनेन वा । तनु० । ष्ट्रन् ॥ यद्वा । तन्त्रणम् । तन्त्र्यते वा । तत्रि कुटुम्बधारणे । घञ् ॥

तन्त्रकम् । न । अनाहते । नवीनवस्त्रे ॥ तन्त्रादचिरापहृते इति साधु ॥

तन्त्रकाष्ठम् । न । तन्त्रवायस्य तुर्य्याम् ॥

तन्त्रता । स्त्री । अनेकमुद्दिश्य सकृत्प्रवृत्तौ ॥ यथा । आग्नेयाष्टकपालैन्द्रद ध्यैन्द्रपयोयागानां यथा आग्नेया ष्टाकपालोपायुयागाग्नीषोमीयैका दशकपालयागानां च यथा सकृत् सकृदनुष्ठितेन प्रयाजादयङ्गेनोपका र सिद्धति । तथा नानाब्रह्मवधस म्बे सर्वोद्देशेन सकृत् प्रायश्चित्तेकृ- ते ब्रह्मवधजन्यमापनाश । तन्त्रता चाकृतस्य । अदृष्टार्थैकजातीयकर्म्म वा काळदेशकर्त्रादीनां प्रयोगानुब न्ध्यवैधहेतुभूतानामभेदे उद्देश्यवि शेषाग्रह इति । एवञ्च सालोऽधिका रीभवति दैवेपैत्र्ये च कर्मणि । पवि त्राणां तथाज्येन चविधिदर्शितें इति विष्णूक्तम् । अस्त्रानाचरेत्क र्मजपहोमादिकिञ्चनेति इत्योक्तञ्च क्रियाङ्गज्ञान कर्मसंस्कारद्वारैव तद्वि नकर्त्तव्याशेषकर्मार्थं मेकमेव नतु

प्रतिकर्मकर्त्तव्यम् । इति प्रायश्चित्तत त्त्वम् ॥

तन्त्रवाप । पु । तन्त्रवाये ॥ तन्त्रवोवि तन्यन्ते यत्र तत् तन्त्रम् । तद्वपति । टुवप० । कर्मण्यण् ॥

तन्त्रवाय । पु । कुविन्दे ॥ वर्णसङ्करजा तिरयम् ॥ अस्योत्पत्तिर्यथा । ताम्र कुट्टाच्छङ्खकार्य्यां मणिकारश्चजाय ते । मणिकारात् ताम्रकुट्ट्यां मणि बन्धो व्यजायत ॥ मणिबन्धान्मणि- कार्य्यां तन्त्रवायाश्च जज्ञिरे । इति पराशरपद्धति ॥ तन्तवो वितन्यन्ते यस्मिन् । तत् तन्त्रम् । तद्वयति । वेञ्० । ह्वावामश्चेति कापवादोऽण् ॥

तन्त्रिका । स्त्री । गुडूच्याम् ॥ तन्त्रयते । तत्रि० । ण्वुल् ॥ तन्त्र्येव वा । कन् । ह्रस्व ॥

तन्त्रिपालक । पु । जयद्रथनृपे ॥

तन्त्री । स्त्री । वीणागुणे ॥ अमृताया म् । गुडूच्याम् ॥ देहशिरायाम् ॥ ना ड्याम् ॥ रज्ज्वाम् ॥ नदीविशेषे ॥ युवतीप्रभेदे ॥ वीणाप्रभेदे । तन्त्र यते । तत्रि० । अवितृस्तृतन्त्रिभ्यईः ॥

तन्द्रा । स्त्री । निद्रायाम् ॥ आलस्ये । प्रमीलायाम् ॥ तथा निद्रान लच्च णञ्च । यथा । तमोऽशालकफात् त न्द्रेति ॥ इन्द्रियार्थेष्वसंवित्ति गौर

वं जृम्भां क्लमं । निद्रार्त्तस्येव यस्ये
हा तस्य तन्द्रां विनिर्दिशेदिति ॥ नि
द्रायां प्रवृत्तस्य क्लमाभावः । तन्द्रा
यान्तु प्रबोधितस्यापि क्लम इत्यनयो
र्भेद ॥ तत् राति । तत्पूर्वाद्रातेरा
तोऽनुपेतिकः । टाप् ॥ तत् द्रातिवा
। द्रा कुत्सायागतौ । सृघिगृष्टीत्या
दिना तदोनाल्लत्वं निपात्यते ॥ नि
द्रातन्द्रेतिवा निपात्यते ॥ तन्द्रा च
सुखस्य भार्या निद्राया कन्या प्रीतेर्भ
गिनी । यथा । निद्राकन्या च तन्द्रा
सा प्रीतिरन्या सुखप्रिये । याभ्यांव्याप्त
जगत्सर्वं विधिपुत्रविधेर्विधा विति ॥
तन्द्रालु । त्रि । निद्राली ॥ तत् द्राति
। द्रा० । स्पृहिगृहिपतिदयिनिद्रातन्द्रा
श्रद्धाभ्य आलुजितितच्छीलादिषु आ
लुच् । तच्छब्दस्य नान्तत्वं समासस्य
निपात्यते ॥

तन्द्रि । स्त्री । आलस्ये ॥ निद्रायाम् ॥ त
न्द्राया करणम् । तत्करोतीतिणय
न्तादिच् ॥ यद्वा । तदि बीचोधा
तु ॥ तस्मात् वड्क्यादयश्चेत्यौ
णादिकः क्रिन् ॥

तन्द्रिका । स्त्री । तन्द्र्याम् ॥

तन्द्रित । त्रि । अलसे ॥ तन्द्रा सञ्जाता
अस्य । ता० इतच् ॥

तन्द्री । स्त्री । अत्यन्तश्रमादिना सव-

न्द्रियासामर्थ्ये । प्रमीलायाम् ॥ त
न्द्र्या कृदिकारादिति ङीष् ॥ तत्
रातिवा । आतोऽनुपेतिकः । गौ० ङी
ष् ॥ तत् द्रातिवा । द्रा० । निद्रातन्द्रे
तितदोनात्त्वं निपात्यते ॥

तन्निष्ठः । त्रि । सर्वकर्मसन्न्यासेन ब्रह्मा
त्मैक्यविचारपरे ॥ तस्मिन्नेव ब्रह्मणि
सर्वकर्मानुष्ठानविक्षेपनिवृत्त्या स्थि
ति र्यस्येत्यर्थ ॥ तस्मिन्नुस्थिते ॥

तन्मयः । त्रि । तद्भावभाविते ॥ अभे
दे ॥

तन्मात्रम् । न । शब्दादीनां सूक्ष्मेषु ।
शब्दतन्मात्राणि स्पर्शतन्मात्राणीत्या
दिपदवाच्येषु ॥ नत्वेषां शान्तादिवि
शेषोऽस्ति । यथोक्तविष्णुपुराणे । त
स्मिंस्तस्मिंस्तु तन्मात्रा तेन तन्मात्रता
स्मृता । तन्मात्राण्यविशेषाणि अवि
शेषा स्ततोहिते ॥ न शान्तानापिघो
रास्ते न मूढाश्चाविशेषिणः इति ॥ सा
मात्रा यस्मिन् तत् । त्रि । तावन्मात्रे ॥

तन्यतुः । पु । वायौ ॥ निशि ॥ तनोती
। तनु० । ऋतन्यञ्जीत्यादिना यतुच्
॥ तन्यतुर्गर्जितमिति तन्यतुरशनि
रितिच वेदभाष्यम् ॥

तन्ववस्था । स्त्री । अभिव्यक्तस्यापि स
त्कार्यऽसत्त्वाभावात् कार्याजनने ॥

तन्वि । स्त्री । पृश्निपर्ण्याम् ॥

तन्वी । स्त्री । कृशाङ्ग्याम् ॥ वोतोगुणवचनादितिङीष् । तनुशब्दस्तनुत्वगुणमुक्त्वा तद्द्रव्यमभिधत्त इति गुणवचनः ॥ शालपर्ण्याम् ॥ सङ्कृति सप्तके चतुर्विंशत्यक्षरात्मके वृत्ते ॥ भूतमुनीनैर्यतिरिह भतना स्मौभनयाश्च गदिभवतितन्वी ॥ यथा । माधवमुग्धे मधुकरविरुते. कोकिलकूजितमलयसमीरे । कम्पमुपेसामलयजसलिले प्लावनतोप्यऽविरततनुदाहा ॥ पद्मपलाशैर्विरचितशयने देहजसज्ज्वरभरपरिदूने । निश्वसतीसा मुहुरतिपरुषध्यानखेलतवनिवसतितन्वी ॥ इति ॥

तपः । पु । ग्रीष्मे । ज्येष्ठाषाढयोः ॥ तपति । तपसन्तापे । पचाद्यच् ॥

तपःकरः । पु । तपस्वीमत्स्ये ॥ त्रि । तपस्याकारके ॥

तपःक्लेशसहः । त्रि । दान्ते ॥ तपसः क्लेशः । सहते । षह० । अच् । तपःक्लेशस्य सहः ॥

तपःस्थः । त्रि । तपसिस्थिते ॥ सुपिस्थ इतिकः ॥

तपस्विनी । स्त्री । काश्याम् ॥

तपती । स्त्री । छायानामसूर्यपत्न्याम् ॥ सूर्यसुतायाम् ॥ नदीविशेषे ॥

तपन । पु । सवितरि ॥ अरुष्करे । भल्लातवृक्षे ॥ निरयान्तरे ॥ ग्रीष्मे ॥ अर्कवृक्षे ॥ क्षुद्राग्निमन्थवृक्षे ॥ सूर्यकान्तमणौ ॥ तापे ॥ तपति । तप० । ल्यु ॥

तपनच्छद । पु । आदित्यपत्रवृक्षे ॥

तपनतनया । स्त्री । यमुनायाम् ॥ तपनस्य तनया ॥ शमीवृक्षे ॥

तपनमणि । पु । सूर्यकान्तमणौ ॥

तपनात्मजा । स्त्री । गोदावरीनद्याम् । यमुनायाम् ॥ तपनस्यआत्मजा ॥

तपनी । स्त्री । गोदावर्याम् ॥

तपनीयम् । न । स्वर्णे ॥ तप्यते ऽनेन । तप० । कृत्यल्युटइत्यनीयर ॥

तपनीयकम् । न । सुवर्णे ॥

तपनेष्टम् । न । ताम्रे ॥

तपाः । पु । माघमासे ॥ शिशिरे ॥ तपत्यस्मिन् । तप० । असुन ॥

तपः । न । जनलोकोपरिवर्त्तिनि लोकविशेषे ॥ यथा । तपो ऽर्ककोटिर्यत्रास्ते महायोगी सनन्दन । ऋभु. सनत्कुमारश्च सनकश्च महातपा इति ॥ चान्द्रायणादिव्रते ॥ अन्तर्यामिब्राह्मणदृष्ट्या तपस्यान्तापयती च्युतैः ॥ आलोचने ॥ ज्ञाने ॥ स्वधर्मे । स्वाश्रमविहितकर्मणि ॥ वैधक्लेशजनककर्मणि ॥ नवमभवने ॥ कामानश

ने ॥ तपोनानशनात्परम् ॥ क्षुत्पिपासाशीतोष्णादिद्वन्द्वसहने ॥ चित्तप्रसादहेतुभूते व्रतनियमोपासनादिकर्मणि ॥ काष्ठमौनाकारमौनादिव्रते ॥ कायेन्द्रियमनसां समाधाने ॥ शास्त्रीयमार्गेण कायेन्द्रियमनसां शोषणे ॥ कृच्छ्रचान्द्रायणप्राजापत्यादिरूपे प्रायश्चित्ते ॥ अग्नाद्रिशिलतलमिश्रारोहणादौ ॥ वानप्रस्थस्य धर्मे ॥ तच्च शारीरादिभेदात्त्रिविधम् । यथा । देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् । ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥ अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् । स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥ मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः । भावसंशुद्धिरित्येतत् तपो मानसमुच्यते ॥ तदपि सात्त्विकादिभेदात् त्रिविधं यथा । श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः । अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥ सत्कारमानपूजार्थं तपो दम्भेन चैव यत् । क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥ मूढग्राहेणात्मनो यत् पीडया क्रियते तपः । परस्योत्सादनार्थं वा तत्तामसमुदाहृतमि-ति ॥ मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः ॥ ब्राह्मणस्य तपो ज्ञानं तपः क्षत्रस्य रक्षणम् । वैश्यस्य तु तपो वार्त्ता तपः शूद्रस्य सेवनम् ॥ तपनम् तप्यतेऽनेन वा । तप० । तपति ईष्टे । तपत्यैश्वर्ये वा । असुन् ॥

तपस । पु । चन्द्रे ॥ तपति । तप० । अत्यविचमितमिनमीत्यादिना ऽसच् ॥ पक्षिणि ॥

तपस्तच । पु । इन्द्रे ॥ इति हेमचन्द्रः ॥

तपस्य । त्रि । तपसि स्थिते ॥ सुपिस्थ इति कः । खर्परे शरीति पाक्षिको विसर्गलोपः ॥

तपस्य । त्रि । फाल्गुनेमासि ॥ अर्जुने ॥ तपसि साधु । तत्र साधुरिति यत् ॥ न । कुन्दपुष्पद्रुमे ॥

तपस्या । स्त्री । नियमस्थितौ । व्रतचर्यायाम् । तपश्चर्यायाम् ॥ तपश्चरति तपस्यति । कर्मणो रोमन्थतपोभ्यां वर्तिचरोरिति क्यङ् । तपस्यति इति तपस्या । अप्रत्ययादिति स्त्रियामप्रत्ययः । टाप् ॥

तपस्वी । त्रि । तापसे । पारिकाङ्क्षिणि ॥ कृच्छ्रचान्द्रायणादितपःप्रधाने वानप्रस्थादौ ॥ अनुकम्प्ये । दीने ॥ प्रशस्तं तपसि ॥ तपो ऽस्यास्ति । तपःसहस्राभ्यामिति विनि' ॥ पु । ना

रङ्गे ॥ घृतकाण्डे ॥ तप्त्यामाच्
इति गौडभाषा प्रसिद्धे मत्स्ये । चे
छके ॥ इतिराजनिर्घण्ट. ॥
तपस्विनी । स्त्री । तपोयुक्तायाम् ॥
जटामांस्याम् ॥ कटुरोहिण्याम् ॥
महाश्रावणिकायाम् ॥ सन्तापव
त्याम् ॥ कन्नेभ्यइतिङीप् ॥
तपस्विपत्र' । पु । दमनकवृक्षे ॥
तपात्यय' । पु । वर्षाकाले ॥ तपस्या
त्ययो यस्मिन् ॥
तपित' । त्रि । तप्ते । तपा इतिभाषा ॥
तपिनी । स्त्री नक्षत्रे ॥
तपुः । न । सूर्ये ॥ अग्नौ ॥ शत्रौ ॥
तपति । तप० । अर्त्तिपृवपियजित
निधनितपिभ्योनिदित्युसि' । तपुषी
तपूषि ॥
तपोधन. । पु । तापसे । तपस्विनि ॥
दमनकवृक्षे ॥ तपोधनयस्य ॥
तपोधना । स्त्री । मुण्डीर्याम् ॥
तपोनिष्ठ । पु । सदाध्ययननिष्ठे ता-
पसविशेषे ॥
तपोयज्ञ । पु । तपस्विनि ॥ कृच्छ्र चा
न्द्रायणादितपएवयज्ञो ऽस्य ॥
तपोवट. । पु । ब्रह्मावर्त्तदेशे ॥
तपोवनम् । न । गुह्यकलोकवासफल
के तीर्थविशेषे ॥
तप्त' । त्रि । प्रज्वलिते ॥ तप्यतेस्म ।
तप० । क्त' ॥ तापयुक्ते । सन्तापिते ॥
तप्तकम् । न । तवा इति लोकप्रसिद्धे
पोलिकादिसाधने ॥
तप्तकुम्भ । पु । नरकविशेषे ॥
तप्तकृच्छ्र' । पु । व्रतविशेषे ॥ यथा ।
तप्तकृच्छ्रं चरन् विप्रो जलक्षीर
घृतानिलान् । प्रतित्र्यहं पिबेदुष्णा
न् सकृत्स्नायी समाहित'इति ॥ अथ
पराशरोक्तो विशेष ॥ यथा । षट्पल
न्तु पिबेदम्भ स्त्रिपलन्तु पय पिबेत् ।
पलमेकपिबेत्सर्पिस्तप्तकृच्छ्रं विधी
यते । इति ॥ पयो घृतमुदक वायुत
मप्रतित्र्यहं पिबेत् सतप्तकृच्छ्र । इ-
ति गौतम ॥
तप्तपाषाणकुण्डम् । न । नरक विशेषे ॥
तप्तबालुक । पु । नरकविशेषे ॥
तप्तमासकम् । न । पुण्यपापयो परी
क्षाविशेषे ॥
तप्तमुद्रा । स्त्री । शरीरधार्याग्नितप्त
धातुमयभगवदायुधचिह्ने ॥ यथा ।
आषाढशुक्लद्वादश्यां त्वरौभिशयि-
घोसति । वैष्णव पारणं कृत्वा तप्त
मुद्राश्च धारयेत् ॥ ब्राह्मण क्षत्रियो
वैश्य शूद्रश्चैकान्तितद्वये । कुर्वन्ता
त्मार्पणं तप्तमुद्राभि र्देह मङ्कयेत्
॥ * ॥ तप्तमुद्राधारणनिष्यतोक्ता
वायुपुराणे । अग्निनैवचसन्तप्त चक्र

माहाय वैष्णव । धारयेत् सर्ववर्णा
ना हरिसालोक्यसिद्धये ॥ ब्रह्माण्डे ।
कृत्वा धातुमयीं मुद्रां तापयित्वा स्व
कां तनुम् । चक्रादिचिह्नितां भूप धा
रयेद्वैष्णवो नर ॥ नारदीयपञ्च-
रात्रे । द्वादशारन्तु षट्कोण वलयञ्च
वसयुतम् । हरेः सुदर्शन तप्त धार
येत् तद्विचक्षण ॥ सैापर्णे च श्रीभ
गवद्गरुडसवादे तप्तमुद्राप्रकरणे ।
गरुतन्त्रविशेषेण सर्ववर्णेष्वयविधि' ।
विप्रोवा क्षत्रियो वापि वैश्य.शूद्रस्त-
थैवच ॥ पाद्मे । अग्निहोत्र यथानि
त्य वेदस्याध्ययन यथा । ब्राह्मणस्य त
थैवेद तप्तचक्रादिधारणम् ॥ किञ्च
तत्रैवोत्तरखण्डे श्रीशिवोमासंवादे ।
शङ्खचक्राङ्कनंकुर्याद्ब्राह्मणो बाहु-
मूलयो. । हुताग्निनैवसन्तप्य सर्वपा
पापनुत्तये ॥ चक्रवा शङ्खचक्रेवा त
थापञ्चायुधानिवा । धारयित्वैवविधि
वद् ब्रह्मकर्मसमारभेत् ॥ * ॥ कि
ञ्चतत्प्रसङ्गएव । अधृत्वाविधिना च
क्र ब्राह्मण प्राकृतो भवेत् । किञ्च ।
न तस्यकिञ्चिदश्नीयाद् दपिक्रतुसह-
स्रिण । सर्ववेदविदो वापि सर्वशा
स्त्रविशारद । अधृत्वाविधिना चक्र
ब्राह्मणः पतितो भवेत् ॥ किञ्च ।
तप्तेनैवाङ्कन कुर्याद्ब्राह्मणस्य विधा
नतः । श्रौतस्मार्त्तादिसिद्ध्यर्थंमन्त्र-
सिद्धौ तथैवच ॥ हरे पूजाधिकारा
र्थं चक्र धार्यं विधानत. । वैष्णवत्व
स्यसिद्ध्यर्थं भक्तिसिद्धौ विशेषत ॥
किञ्च । उपवीतादिवद्धार्या' शङ्ख
चक्रादयस्तथा । ब्राह्मणस्य विशेषेण-
वैष्णवस्य विशेषत. ॥ * ॥ अथ । यो
हवैसुश्लोकमैाले धर्मानमुतिष्ठमा-
नोऽग्निनाचक्र धत्ते । अग्निर्वैसह
स्रार' सहस्रारोनेमिर्नेमिना तप्त
नु सायुज्य सलोकतामाप्नोतीत्या
द्या श्रुतयो बह्व्यउदाहृताः सम्भि-
वेङ्कटाचार्यादिभि' । तद्भिन्नानि पुरा
णवचनानि चतानि गैारवभिया न लि
खितानि । मन्वादिस्मृतिषु रामाय-
णभारतादिष्वदृष्टत्वात् मन्वर्थविप
रीताया स्मृतेरप्रशस्तत्वाच्च ॥
तप्तरूपकम् । न । रैाप्ये ॥
तप्तसुराकुण्डम् । न । नरकान्तरे ॥
तप्तसूर्म्मिकुण्डम् । न । नरकविशेषे ॥
तप्ताङ्गार । पु । महानरकान्तरे ॥
तम । पु । तमोगुणे ॥ तमालवृक्षे ॥
स्वर्भानैा ॥ न । पादाग्रे ॥ अन्धकारे ॥
ताम्यति । तमुग्लानैा । पचाद्यच् ॥
तमनम् । भावेघञ्वा । नोदात्तोप
देशस्येतिनवृद्धि' ॥
तमपति. । पु । क्रियादक्षनिरोद्दुरिवा

मदेवनाथे ॥

तमःप्रधान । पु । तमोगुणप्रधानमा योपाधिके परमात्मनि ॥ त्रि । तमो गुणप्रधाने ॥

तमःप्रभ । पु । नरकविशेषे ॥

तमःप्रभा । स्त्री । नरकभूमिभेदे ॥

तमक । पु । श्वासरोगप्रभेदे ॥

तमकुक । पु । इन्द्रकोषे । मञ्चके ॥

तमत । त्रि । तृषिते । तृष्णापरे ॥ ताम्यति । तमुकाङ्क्षायाम् । भृम इशियजीत्यादिनाऽतच् ॥

तमप्रभ । पु । नरकविशेषे ॥

तमरम् । न । वङ्गे ॥ इतिहेम ॥

तमः । न । चक्षुर्दर्शननिरोधके शार्वरादिध्वान्ते ॥ शोके ॥ पापे ॥ कार्याकार्याविवेके ॥ अविद्यायाम् ॥ मन्दान्धकारे ॥ मोहान्धकारे ॥ विशेषदर्शनविरोधिदोषे ॥ सर्वदेहिनां मोहनेप्रकृतेर्गुणविशेषे ॥ प्रमादालस्यनिद्राभिस्तन्निबध्नाति ॥ गुरुवरणकमेवतमइष्ट साङ्ख्याचार्यैः । तमस्त्वयमविक्रियम् । यन्मोहहेतु स्तन्मोहात्मकं तम । भेदस्तमसोऽष्टविध । तमसोऽविद्याया अष्टविधोभेद । अष्टसु अव्यक्तमहदहङ्कारपञ्चतन्मात्रेष्वनात्मस्वात्मबुद्धिरविद्या तम स्तस्याष्टविधविषयत्वा

दष्टविधत्वम् ॥ मले ॥ ताम्यति तम्यतेऽनेनवा । तमुग्लानौ । असुन् ॥ पु । न । विधुन्तुदे ॥

तमसम् । न । अन्धकारे ॥ ताम्यतिग्लानिं प्राप्नोत्यनेनास्मिन्वा । तमु० । अत्यविचमितमीत्यादिनाऽसच् ॥

तमसा । स्त्री । नदीविशेषे ॥

तमस्तति । स्त्री । ध्वान्ते । अन्धकारसमूहे ॥ तमस स्तति ॥

तमस्विनी । स्त्री । क्षपायाम् । रात्रौ ॥ तमोऽस्त्यस्याम् । अस्मायामेधेतिविनि ॥ हरिद्रायाम् ॥

तमा । स्त्री । रजन्याम् ॥ तमालद्रुमे ॥ ताम्यत्यस्याम् । तमु० । अच् । टाप् ॥

तमाल । पु । तिलके । पुण्ड्रे ॥ खड्गे । असौ ॥ वरुणद्रुमे ॥ तापिच्छे । कालस्कन्धे ॥ तमाल, शालवदेशो हाइविस्फोटहृतपुन ॥ कृष्णखदिरे ॥ ताम्यति । तमु० । तमिविशिविडीतिकालन् ॥ न । पत्रके । तेजपात इतिभाषा ॥

तमालकम् । न । सुनिषण्णशाके ॥ पत्रके ॥ पु । न । तमालद्रुमे ॥

तमालपत्रम् । न । तापिच्छ । कालस्कन्धे ॥ तिलके ॥ पत्रके । तेजपात- इतिभाषा ॥ तमालस्य पत्रमिव तदा

कृतित्वात् ॥

तमालिका । स्त्री । ताम्रवल्ल्याम् ॥ भू
म्यामलक्याम् ॥ ताम्रलिप्तदेशे ॥

तमाली । स्त्री । ताम्रवल्ल्याम् ॥ वरुण
वृक्षे ॥

तमि । स्त्री । रात्रौ ॥

तमिस्रम् । न । कोपे ॥ तिमिरे । अ
न्धकारे ॥ तमोस्यास्ति भावप्रधानो
निर्देशः । ज्योत्स्नातमिस्रेति साधुः ॥
तमिस्राख्याअयनमास्येतिवा । अर्श
आद्य ॥

तमिस्रपक्षः । पुं । कृष्णपक्षे ॥

तमिस्रा । स्त्री । कृष्णपक्षनिशायाम् ॥
भूतरात्रौ ॥ दर्शयामिन्याम् ॥ तम
स्ततौ । तमसांसमूहे ॥ तमस्त्वय
बभूतानितमांसि विद्यन्ते । तमोबहु
लमस्यास्याम् । ज्योत्स्नातमिस्रेति
तमसउपधायाइत्वंरप्रत्ययश्चनिपा
तितः । टाप् ॥

तमी । स्त्री । यामिन्याम् । रात्र्याम्
॥ ताम्यन्त्यस्याम् । तमु० । इन् । कृ
दिकारादितिङीष् ॥ हरिद्रायाम् ॥

तमोगुण । पु । विषादात्मके । विषा
देमोह लक्षणरूपे ॥

तमोघ्न. । पु । सूर्ये ॥ वह्नौ ॥ चन्द्रे ॥
बुद्धे ॥ शङ्करे ॥ विष्णौ ॥ तमोहन्ति
। हन० । अमनुष्यकर्तृकेचेतिटक् ॥

तमोज्योति । पु । खद्योते ॥ तमसि
ज्योतिरस्य ॥

तमोनुद् । पु । चन्द्रे ॥ सूर्ये ॥ वह्नौ
॥ दीपे ॥ तमोनुदति । नुद० । -
क्विप् ॥

तमोनुदः । पुं । प्रकृते. मेरक्ते स्वयम्भु
वि ॥ आदित्ये ॥

तमोपह । पु । सर्वज्ञांशे ॥ चन्द्रमसि
॥ वह्नौ ॥ तमोऽपघ्नन्तीति विग्रहे
अपेक्लेशतमसोरित्यनेन अपपूर्वाद्ध
न्तेस्तमसिकर्मोपपदे कर्त्तरिडः ॥
जिने ॥

तमोभिद् । पु । तमोनुदर्थे ॥ खद्यो
ते ॥ तमोभिनत्ति । भिदिर्० । क्वि
पत्तुकौ ॥

तमोमणि । पु । खद्योते ॥ तमसोम
णिरिव ॥ गोमेदकमणौ ॥

तमोलिप्ती । स्त्री । तमोलुक इतिना
म्ना प्रसिद्धे देशे । ताम्रलिप्ते । वेला
कूले ॥

तमोविकार. । पु । रोगे ॥

तमोविशाल. । पु । मूलतःसर्गे पश्वादि
स्थावरान्ते ॥ मूलतः सर्गोपिमोहम
यस्मात्तमोबहुलः ॥

तमोहरः । पुं । चन्द्रे ॥ म । ज्योतिषि ॥
निर्गुणकामभागेष सत्यभागेऽहुता
शिना । मध्येभावःस्वयंज्योतिस्तम्यो

तिर्मेतमेोऽहरम् ॥ त्रि । तमसो हर यकर्त्तरि ॥ हरति । हृञ् । अच् । तमसोहरः ॥

तम्पा । स्त्री । } गवि । सौरभेय्याम् ॥ इतिहेमचन्द्र ॥

तम्वा । स्त्री । }

तम्बिका । स्त्री । तम्व्याम् ॥

तम्बी । स्त्री । तयी इति भाषाप्रसिद्धे कान्दविकभाण्डे ॥

तय० । पु । रक्षके ॥ तयति । तयरक्ष-णे गतौच । अच् ॥

तरः । पु । तरणे ॥ न । लोभे ॥ तरति । तृ० । अच् । तरण वा । कर्द्दोरप् ॥

तरक्षः । पु । तरख इति प्रसिद्धे तरक्षौ ॥

तरक्षु । पु । मृगादने । तेंदु वाबाघ इ-तितरक्ष इत्यादिनाव्याख्याते क्षघु व्याघ्रे ॥ तरगतिं मार्गं वा क्षिणोति । क्षिणु हिंसायाम् । क्षित० डु ॥

तरक्षुक । पु । तरक्षौ ॥ सवार्थकन् ॥

तरङ्ग । पुं । वायुना नद्यादिजलस्य ति-र्यगूर्द्धप्लवने । भङ्गे । ऊर्म्याम् । लह र हेड इत्यादि भाषा ॥ तरति । तृ प्लवनसन्तरणयो । तरत्यादिभ्यश्चे-त्यङ्गच् ॥ अश्वादिसमुत्काले ॥

तरङ्गिणी । स्त्री । नद्याम् । तटिन्या-म् ॥ तरङ्गा सन्त्यस्याम् । अतइनि । पुष्करादिभ्यादिनिर्वा । ऋन्नेभ्यो ङीप् ॥

तरङ्गितः । त्रि । अङ्गिमति । सञ्जात-तरङ्गे ॥ तरङ्गा सञ्जाताअस्य । ता० इतच् ॥ यथा । तरङ्गमतकूलः भञ्ज नात् तरङ्गोतीलिखितिकर्त्तरिङ्गः । वाक्षिष्टवङ्गावाभ्यतुपोऽतुक् ॥

तरणः । पु । भेलके । उडुपे । डेंगाइति भाषा ॥ स्वर्गे ॥ न । पारगमने । सन्त रणे ॥ प्लवनपूर्वकदेशान्तरगमने ॥

तरणिः । पु । घुमणौ । सूर्य्ये ॥ भेलके ॥ अर्के । किरणे ॥ ताम्रे ॥ स्त्री । नौकायाम् ॥ घृतकुमार्य्याम् ॥ तर-न्त्यनेनसंसारम् । तरन्त्यनयावा । तृ० । अर्त्तिसृधृधम्यश्यादिनातर तेरनि. ॥

तरणिपेटकः । पुं । काष्ठाम्बुवाहिन्याम् ॥

तरणिरत्नम् । न । माणिक्ये ॥

तरणी । स्त्री । नावि ॥ घृतकुमार्य्याम् ॥ पद्मचारिण्याम् ॥ कृदिकारादि तिङीष् ॥

तरण्ड । पु । न । वडिशीसूत्रवन्धन काष्ठे । छड इतिडगन इतिचभाषा ॥ प्लवे ॥ नौकायाम् ॥ कुम्भतुम्बीरम्भा दिजप्लवे ॥ पु । देशविशेषे ॥ तर-ति । तृ० । बाहुलकादण्डन् ॥

तरण्डपादा । स्त्री । } नावि ॥ इ-तिशब्दर-त्नावली ॥

तरण्डा । स्त्री । }

तरण्डी । स्त्री । }

तरतम । अ । न्यूनाधिकभावेनेत्यर्थे ॥

तरत्-द् । स्त्री । भेलके । प्लवे ॥ प्लवमाने ॥ कारण्डवविहङ्गमे ॥

तरद्दी । स्त्री । कण्टकिवृक्षविशेषे । तीक्ष्णायाम् । रक्तबीजकायाम् ॥

तरद्वटी । स्त्री । पक्वान्नविशेषे ॥ यथा । घृतेन मर्दितां दध्ना कणिक्कां फेनयेत् ततः । विधायवटिका स्तस्मा घृते मन्दाग्निना पचेत् ॥ प्रक्षिप्ता खण्डपाकेन कर्पूरेण विमिश्रयेत् । ततएताः समरिचा स्तरद्वस्तु ताः स्मृताः ॥ बल्या पुष्टिकरी हृद्या वृष्या पित्तानिलापहा । सुस्निग्धा कफदाप्यर्थं किञ्चित्तन्द्रामकृद्गिता ॥

तरन्त । पु । समुद्रे ॥ भेके ॥ आसारे । राक्षसे ॥ तीर्थने । तृ० । तृभूवहिवसीत्यादिनाझच् सचषित् ॥

तरन्ती । स्त्री । नौकायाम् ॥ तरति तीर्यतेऽनयावा । झच् पित्त्वान्ङीष् ॥

तरपण्यम् । न । आतरे । नद्यादिसन्तारशुल्के ॥ तरणम् । तृ० । कर्दोरप् । तरस्य पण्यम् ॥

तरम्बुजम् । न । तरबूज इति प्रसिद्धे फले ॥ यथा । ज्येष्ठमासि महेशानि पौर्णमास्यां निशार्द्धके । तृष्णातुरा महाकाली भ्रमन्ती पितृकानने ॥ तत्रचाप्याप्रकृया तस्यैफल दृष्टं तरम्बुजम् ॥ तत्फलम् ग्रहात् तृषावरदासिहरप्रिया ॥ योमेद्द्यात् फलं त्यं सचिरायुश्चतुर्युगमित्युत्तरकामाख्यातन्त्रम् ॥

तरल । पु । हारमध्यमणौ ॥ हारे ॥ तले ॥ त्रि । चञ्चले ॥ कामुके । षिड्गे ॥ भास्वरे ॥ मध्यशून्यद्रव्ये ॥ द्रवीभूते ॥ तरति । तृ० । अलच् ॥ तरलाति वा । आतइतिकः ॥ वृषादित्वाद्वा कलः ॥

तरलनयना । स्त्री । चञ्चलनेत्रायावनितायाम् ॥ तरलेलोलेनयनेयस्या ॥

तरलनयनि. । पु । वर्णवृत्तविशेषे ॥ द्विजवरगणयुग मुपनय सकुसुमन गणमिहरचय । सुदतिविमलमति फणिपतिनिगदितमरलनयनिरिति ॥ यथा । अपहर मुरहर मममद मभिनवकलियुगभयहर । हिमगिरिविहितशयनवर सुकृतसुलभमम भरधरेति ॥

तरललोचना । स्त्री । चञ्चललोचनायाम् ॥ तरले लोचने यस्या ॥

तरला । स्त्री । यवाग्वाम् ॥ सुरायाम् ॥ मधुमक्षिकायाम् ॥ तर लाति । ला० । क । टाप् ॥

तरलायित । पु । चञ्चलाचरिते ॥

तरलित । त्रि । आन्दोलिते । प्रेङ्खोलि

ते । कम्पिते । धूते । प्रेङ्खिते । क्षुभिते । त्त० इतच् ॥

तरवारि । पु । तरवार इतिप्रसिद्धे खड्गे ॥ इतिहेमचन्द्र ॥ चतुरङ्गारिपोसेनाम्छिन्दन्ती स्तरवारिभिरितितन्त्रराजः ॥ विशेषस्त्वस्यान्यत्र खड्गपरीक्षायांयुक्तिकल्पतरौ चद्रष्टव्य ॥

तरस् । न । बले ॥ रोगे ॥ जवे । वेगे ॥ सवेगगतिवचनेऽस्यप्रयोग ॥ तीरे ॥ कपौ । प्लवगे ॥ वेगाख्यगुणे ॥ तरन्त्यनेन । तॄ० । असुन् ॥

तरसम् । न । मांसे ॥ तरोबलमस्मिन् । अर्शआद्यच् ॥

तरसा । अ । झटित्यर्थे । शैघ्र्ये ॥

तरस्थानम् । न । घट्टे ॥ तरस्थानम् ॥

तरस्वी । पु । गरुडे ॥ वायौ ॥ त्रि । शूरे ॥ वेगिनि ॥ तरोबलं जवोवाऽस्यास्ति । अस्मायामेधेतिविनि ॥

तरान्धु । पु । नौविशेषे । डोङे । वहने ॥

तरालु । पु । नौकाविशेषे ॥

तरि । स्त्री । नौकायाम् ॥ वस्त्रादीनांपेटके ॥ दशायाम् ॥ तरन्त्यनया । तॄ० । अचइ ॥

तरिक । पु । प्लवे । भेलके ॥

तरिका । स्त्री । नावि ॥

तरिणी । स्त्री । नौकायाम् ॥

तरिता । स्त्री । तर्जन्याम् ॥ गाँजा इतिभाषाप्रसिद्धमञ्जर्याम् ॥ यथा । सविद्या कालकूटञ्च ताम्रकूटञ्च धुस्तुरम् । अहिफेन खर्जुरस स्तारिका तरिता तथेतितन्त्रम् ॥

तरिरथ । पु । अरित्रे ॥ इतिहारावली ॥

तरी । स्त्री । वस्त्रादिपेटके ॥ द्रोण्याम् ॥ वेडायाम् । नावि ॥ गदायाम् ॥ धूमे ॥ दशायाम् ॥ तरन्त्यनया । तॄ । अचइ । कृदिकारादिति ङीष् ॥ पचादौतरडितिपाठान् ङीष् वा ॥

तरी । स्त्री । नावि ॥ तरन्त्यनया । तॄ० । अवितॄस्तृतन्त्रिभ्यईः ॥

तरीष । पु । स्वर्गे ॥ महोदधौ ॥ शोभनाकारे ॥ भेले ॥ व्यवसाये ॥ समर्थे ॥ वोधे ॥ तरन्ति येन । तॄ० । तॄभ्यामीषन् ॥

तरीषी । स्त्री । शक्रकन्यायाम् ॥

तरु । पु । अगमे । द्रुमे ॥ तरन्ति नरकमनेन रोपका । तॄ० । भृमृशीतॄचरीति उप्रत्यय ॥

तरुकुक्षि । पु । पक्षिविशेषे । वागुदे । वागुड इतिभाषा ॥

तरुखण्ड । पु । तरूणां समूहे ॥ इच्छादिभ्य खण्ड ॥

तरुजीवनम् । न । द्रुममूले ॥

तरुण । पु । एरण्डे ॥ स्थूलजीरके ॥ न । कुब्जपुष्पे ॥ वि । यूनि । जाततारुण्ये ॥ नूतने ॥ तरति । तॄ० । चोरश्च लोपेश्चुनन् ॥

तरुणज्वर । पु । सप्ताहावधिज्वरे ॥ यथा । आसप्तरात्र तरुण ज्वरमाहुर्मनीषिण ॥

तरुणदधि । न । पञ्चदिनातीतदधिनि ॥

तरुणी । स्त्री । युवत्याम् । द्वितीयवय. प्राप्तायानार्याम् ॥ आषोडषाद्भवेद्बाला तरुणी त्रिंशता मतेत्युक्त ॥ तरति । तॄ० । चोरश्चलोपेश्चुनन् । वयसि चरमइतिङीप् । नञ्स्नञीकगिति वा ॥ गौरादिङीष वा । स्वरेविशेष ॥ घृतकुमार्याम् । सहायाम् । दन्तीवृक्षे ॥ चीडानामगन्धद्रव्ये ॥ सेवती इतिभाषाप्रसिद्धे पुष्पे । सहायाम् । गन्धाढ्यायाम् ॥

तरुणीकटाक्षमाल । पु । तिलकवृक्षे ॥

तरुतूलिका । स्त्री । }
तरुदूलिका । स्त्री । } वाल्गुल्याम् । वादुड पक्षीइति भाषा ॥

तरुनख । पु । कण्टके ॥

तरुभुक् । पुं । वन्दाके ॥

तरुमृग. । पु । वानरे ॥

तरुराग । पुं । नवीनपल्लवे । किसलये ॥

तरुराज । पुं । तालद्रुमे ॥

तरुरुहा । स्त्री । }
तरुरोहिणी । स्त्री । } वन्दाके ॥

तरुवल्ली । स्त्री । जतुकालतायाम् ॥

तरुविलासिनी । स्त्री । नवमल्लिकायाम् । सप्तलालतायाम् ॥ तरोर्विलासिनी ॥

तरुशायी । पु । खगे । पक्षिणि ॥

तरुसार. । पु । कर्पूरे ॥ इतिशारावली ॥

तरुस्था । स्त्री । वन्दाके ॥

तरूट. । पु । उत्पलकन्दे ॥

तर्क. । पु । काङ्क्षायाम् ॥ वितर्के । व्यभिचारशङ्कानिवर्त्तके ॥ सचपञ्चविध. । यथा । आत्माश्रय. १ । अन्योन्याश्रय २ । चक्रक ३ । अनवस्था ४ । प्रमाणबाधितार्थक ५ इति ॥ ऊहे । अविज्ञाततत्त्वेर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थे ऊहे ॥ अनुमाने ॥ व्याप्यारोपेण व्यापकारोपे । व्याप्यारोपात् व्यापकप्रसञ्जने । यथा । वह्निर्नस्यात् तर्हिधूमोपि न स्यात् ॥ मीमांसादितर्कशास्त्रे । आगमाविरोधिन्यायेन आगमार्थपरीक्षणे । विचारे ॥ बुद्धिसाध्ये । स्वप्नुद्धगूढ माणे ॥ हेतुदृष्टान्तात्मनि ॥ तर्कणम् ।

तर्कभावार्थश्चुरादौ पटपुटेतिदण्डके पठित । भावेघञ् ॥ तर्कोऽर्थवाद इति कर्कोपाध्याय । यथा । अक्ता शर्करा उपदधातीतिविधि श्रूयते । तत्राञ्जनसाधन घृत तैलं वा तन्मध्ये केनाक्ता इतिसंशये तेजो-वै घृतमित्यर्थवादात् घृतेनाक्ता इतिनिर्णीयते। अतस्तर्कोऽर्थवाद' ॥ तर्कोमीमासेति कल्पतरुकार ॥*॥ अचिन्त्या खलुयेभावा न तांस्तर्केण योजयेत् । नाऽप्रतिष्ठिततर्केण गम्भीरार्थस्यनिश्चय ॥

तर्कक । पु । याचके ॥ तर्ककारके ॥

तर्कयन् । त्रि । उत्प्रेक्षमाणे ॥

तर्कविद्या । स्त्री । आन्वीक्षिक्याम् ॥ तर्कस्य न्यायस्य विद्या ॥ तथाहि । चतुर्विधेभ्य पृथिव्यादिपरमाणुभ्योविश्वमुत्पद्यते त एवोपादानभूता नान्यत् । निमित्तकारणमीश कर्तृत्वात् कुलालवदिति तर्कविद्याया प्रमेयम् ॥*॥ अहोदुर्मतय. सर्वा पुरुषस्यनिरूपणे। तर्कविद्या न जानन्ति अमेय पुरुषोत्तमम् ॥ अमेयम् अभिन्ननिमित्तोपादानत्वात् । यतएतदपि न जानन्ति सर्वं प्रमेयजात घटादिवत् कार्यमिति परमाणूपादानकारणमप्यपेक्षणीयमेवेति । परमाणूनां प्रमेयत्वहेतुना कार्यत्वसिद्धौ तदुपादानमपेक्षणीयम् । एव तत्तदुपादानेष्वनवस्था स्यात् । अतोऽप्रमेय: परमात्मैवोपादान नान्यदन्यकल्पितम् अनपेक्षणात् । तथाहि । अम्भ शीतकराम्बरेचनगरस्वप्नेन्द्रजाला-दिवत कार्यं मेय ममत्वमेत दृढ यद्व्यस्तादियुक्त जगत् । शुक्तौ रूप्यमिव स्रजी भुजग स्वात्मावबोधे हरा वज्ञाते प्रभवत्यथास्तमयते तत्त्वावबोधोदयादिति प्रबोधचन्द्रोदय ॥

तर्क्कारी । स्त्री । जयाद्रुमे । अरणी इतिभाषा । जाडी इतिकश्चित् । तर्कमृच्छति । ऋगतौ । कर्मण्यण् । ङीप् । गौरादित्वान् ङीष् वा ॥

तर्क्किण । पु । } दद्रुघ्ने ॥ इतिरत्नमाला ॥
तर्क्किल । पु । }

तर्क्की । त्रि । तर्कविशिष्टे । मीमांसके ॥ यथा । त्रैविद्यो हेतुकस्तर्की नैरुक्तो धर्मपाठक । त्रयश्चाश्रमिण पूर्वे परिषत् स्याद्दशावरेतिमनु ॥

तर्क्कु । पु । कर्पासनालिकायाम् । तर्क्यताम् ॥ कृन्त्यतेनेन । कृतीवेष्टने । कृतेराद्यन्तविपर्ययश्चेत्यु । ककारतकारयोर्विनिमय । तकुआ इति भाषा ॥

तर्कुटम् । न । कर्त्तने । कातना इति भाषा ॥ इतित्रिकाण्डशेषः ॥

तर्कुटी । स्त्री । तर्कुः ॥ इतिशब्दावली ॥

तर्कुपिण्ड । पु । तर्कुस्थितसूत्पिण्डे । वर्त्तुलायाम् ॥ इतिशब्दावली ॥

तर्कुपीठी । स्त्री । तर्कुपिण्डे ॥ इति शब्दावली ॥

तर्कुलासक । पु तर्कुभ्रमणयन्त्रे । जलौले । चरखा इतिभाषा ॥ इ० श० ॥

तर्कुशाण । पु । तर्कुघर्षणपाषाणे । जामरे । सामके ॥ इतित्रिकाण्डशेषः ॥

तर्क्षु । पु । तरक्षुके ॥ इतिशब्० ॥

तर्क्ष्य । पु । यवक्षारे ॥

तर्ज्जनम् । न । भर्त्सने ॥ भयजनने ॥ तर्ज० । ल्युट् ॥

तर्ज्जनी । स्त्री । प्रदेशिन्याम् । अङ्गुष्ठनिकटाङ्गुलौ ॥ तर्ज्यते ऽनया । तर्जभर्त्सने । करणे ल्युट् ॥

तर्ज्जिक । पु । देशविशेषे । तायिके ॥

तर्ज्जित । त्रि । भर्त्सिते ॥ तर्ज्यते स्म । तर्जभर्त्सने । क्त ॥

तर्ण । पु । वत्से ॥ तृणोति तर्णोति वा । तृणु अदने । अच् ॥

तर्णक । पु । गोपुत्रे । वत्से । बच्छा इतिभाषा ॥ सद्योजातस्तु तर्णक ॥ तृणोति तर्णोतिवा । तृणु० । ण्वुल् ॥

तर्णि । पु । सूर्ये ॥ प्लवे ॥ इतिशब्दा० ॥

तर्त्तरीकम् । न । वहित्रे । पोते । जहाज इतियवनभाषा ॥ त्रि । पारगे ॥

तर्द्द । त्रि । हिंसके ॥ तर्दहिंसायाम् । अच् ॥

तर्द्दू । पु । दारुनिर्मितदर्व्याम् । दारुहस्तके । डोइ इतिभाषा ॥ जलतरणोपकरणे ॥ तरति० । तॄ० । चोदुट्चेत्यूदुडागमश्च ॥ तर्दति । तृणत्ति वा । तर्द० । उतृदिर् हिंसानादरयोर्वा । बाहुलकात् ऊ ॥

तर्प्पणम् । न । तृप्तौ ॥ प्रीणने ॥ यज्ञकाष्ठे ॥ महायज्ञविशेषे । पितृयज्ञे । पितृउद्देश्याम्बुदाने । पितॄणां कव्यवालादीनाञ्च विधिना जलान्नदाने न तृप्तिसम्पादने ॥ तद्द्विविधम् । प्रधानमङ्गञ्च ॥ तत्राद्यं यथा । तर्पणञ्च शुचि कुर्यात् प्रत्यहं स्नातको द्विज । देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम् ॥ विधवामधिकृत्य । तर्पणं प्रत्यहं कार्यं भर्त्तुः कुशतिलोदकैः । तत्पितुस्तत्पितुश्चापि नामगोत्रादिपूर्वकमिति ॥ * ॥ द्वितीयं यथा । नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते । तर्पणन्तु भवेत्तस्य अङ्गत्वेन व्यवस्थितम् ॥ तर्पणाकरणे दोषो यथा । नास्ति

कभावा यस्यापि न तर्पयति वै सु त'। पिबन्ति लोकनि.स्वान पितरो वै जलार्थिन इति ॥ जीवत्पितृकस्य तन्निषेधो यथा। दर्शस्नान गयाश्राद्ध तिलैस्तर्पण मेव च। न जीवत् पितृको भूप कुर्यात् कृत्वाघमाप्नुयादिति॥ तृपप्रीणने।भावेल्युट्॥

तर्पणी। स्त्री। गुरुस्कन्धद्रुमे॥

तर्पणेच्छु। पु। भीष्म॥ त्रि। तर्पणाकाङ्क्षे॥

तर्पिणी। स्त्री। चारव्याम्। पद्मचारिण्यामोषधौ॥

तर्म। न। यूपाग्रे॥ तरति। तृ०। सर्वधातुभ्योमनिन्॥

तर्हट। पु। वत्सरे॥ चक्रमर्द्दे॥

तर्ष। पु। लिप्सायाम्॥ उदन्यायाम्॥ भेलके॥ तर्षणम्। जितृषपिपासायाम्। घञ्॥ तरन्त्यनेन। तृ०। वृतृवदी तसोऽत्रा॥

तर्षणम्। न। तृषि। पिपासायाम्॥ जितृष०। ल्युट्॥

तर्षित। त्रि। सतृष्णे। तृषिते। तिसाया इति भाषा॥

तर्हि। अ। विशेषे॥ तदार्थे॥ तस्मिन् काले। अनद्यतनेर्हिलन्यतरस्याम्॥

तल। पु। तालमहीरुहे॥ चपेटे॥ त्सरौ॥ सव्येन पाणिना तन्त्रीघाते॥ आधारे॥ स्वभावे॥ पु। न। अधोभागे। अनूर्ध्वे। तले इति नीचे इति च। भाषा॥ स्वरूपे॥ यथा। महीतलम्॥ न। काननेः वने॥ कार्यबीजे॥ आलवाले। गर्त्ते॥ पादतलमध्ये॥ स्त्री। न। ज्याघातवारणे॥ तलति। तलप्रतिष्ठायाम्। पचाद्यच्॥

तलकम्। न। पुष्करिण्याम्। तलाव इति हिन्दू भाषा॥ इतिहारावली॥

तलप्रहार। पु। चपेटे। चर्बणे। तलाघाते॥

तलसारकम्। न। अश्वस्य वक्षस्थलबन्धनरज्जौ। वक्रपट्टे। तङ्ग इति भाषा॥

तलहृदयम्। न। पादतलमध्ये॥

तला। स्त्री। गोधायाम्। ज्याघातवारणे॥

तलाची। स्त्री। नलनिर्मितेकटे॥

तलातलम्। न। अतलादिषु पञ्चसेऽधोभुवने॥

तलिका। स्त्री। वक्रपट्टे। तलसारके॥

तलित्। स्त्री। विद्युति। तडिति॥ डलयोरेकत्वस्मरणात्वर्णविपर्यय॥

तलित। त्रि। आज्यादिभृष्टमासादौ॥

तलितमांसम्। न। पक्वमासप्रभेदे। भृष्टमासे॥ यथा। मुद्गमासविधानेन मांस सम्यक् प्रसाधितम्। पुनस्तदाज्ये सम्भृष्ट तलित प्रोच्यते बु-

द्वै ॥ तलितं वलमेधाग्निमांसौज शुक्रहृद्विकृत् । तर्पणं लघुसुस्निग्ध रोचनं दृढताकरम् ॥

तलिन । त्रि । विरले ॥ स्तोके ॥ स्वच्छे ॥ दुर्बले ॥ न । शय्यायाम् ॥ तलति तल्यते वा । तल० । तलि पुलिभ्यामिनन् ॥

तलिमम । न । कुट्टिमे ॥ तल्पे ॥ चन्द्रहासे ॥ विताने ॥

तलुन । पु । पवने ॥ यूनि ॥ तरति । तृ० । तॄरश्चलोवे च्युनन् ॥

तलुनी । स्त्री । युवत्याम् । तरुण्याम् ॥ वयस्यचरम इति नञ्जित्वि दा ङीप् । गौ० ङीष् वा ॥

तलेक्षण । पु । शूकरे ॥ इतिशब्दा० ॥

तलोदरी । स्त्री । भार्यायाम् ॥

तलोदा । स्त्री । नद्याम् ॥

तल्कम् । न । वने ॥ इतित्रिकाण्डशेष ॥

तल्पम । न । अट्टे ॥ कलत्रे । दारेषु ॥ शय्यायाम् ॥ तल्यतेऽस्मिन् । तल० । खष्पशिल्पशष्पेतिसाधु ॥

तल्पकीट । पु । मत्कुणे ॥

तल्पनम् । न । करिपृष्ठे ॥ पृष्ठवंशस्य मांसे ॥

तल्ल । पु । जलाधारविशेषे । तलाव इति हिन्दूभाषा ॥ न । विले । आलवाले ॥ त्रि । तस्मिन् लीने ॥

तल्लज । पु । मतल्लिकायाम् । प्रशस्ते ॥ लजति । लजकान्तौ । पचाद्यच् । तदल्लज । अयमजहल्लिङ्ग समासे उत्तरपदे भवति । यथा । प्रशस्ताकुमारी कुमारीतल्लज । तल्लजस्य रूढिशब्दत्वात प्रशसावचनैश्चेतिसमास ॥

तल्लिका । स्त्री । कुञ्चिकायाम् । कूर्चिकायाम् । कूची ताली इत्यादि भाषा ॥

तल्ली । स्त्री । तरुण्याम् ॥

तवक्षीरम् । न । पय क्षीरे । यवजे । तीखुर इतिभाषा ॥ तवक्षीरन्तुमधुरं शिशिरं दाहपित्तहृत । क्षयकासकफश्वासास्रदोषं हन्तिचसेवनात् ॥

तवक्षीरी । स्त्री । गन्धपत्रायाम् ॥

तवराज । पु । यवासशर्करायाम् ॥

तवराजोद्भवखण्ड । पुं । यवासशर्कराभवखण्डे । सितृमोदके ॥

तवर्ग । पु । तादिपञ्चवर्णेषु ॥

तवर्गीय । पु । तवर्गभवेवर्णे ॥ वर्गान्ताच्चेति ठक् ॥

तविष । पुं । स्वर्गे ॥ महोदधौ ॥ तवेतिसौत्रोधातु । तवेर्णिद्वेतिटिषच् ॥ सुवर्णे ॥ शोभनाकृतौ ॥ व्यवसाये ॥ भेले ॥

तविषी । स्त्री । शक्रकन्यायाम् ॥ धरित्र्याम् ॥ नद्याम् ॥ वैदिकनिघण्टौ तु बलेपि ॥ टित्वात् ङीप् ॥

तष्ट' । त्रि । तनूकृते ॥ तक्ष्यतेस्म । तक्ष् ० । क्त' । स्तोरितिकलोपेष्टुत्वम् ॥

तष्टि. । स्त्री । काष्ठतक्षणे ॥

तसर' । पु । वस्त्रजात्यन्तरे । टसर इति भाषा ॥ सूत्रवेष्टने । तासनी इति गौडभाषाप्रसिद्धे तन्तुवायोपकरणे ॥ तनोति । तनु ० । तनूपृषिभ्यांक्सरन् । अनुदात्तोपदेशेत्यादिनानुनासिकलोपः ॥

तस्कर । पु । चोरे ॥ द्विविधांस्तस्करान् विद्यात् परद्रव्यापहारकान् । प्रकाशांश्च प्रकाशांश्च चारचक्षुर्महीपति ॥ प्रकाशवञ्चका स्तेषां नानापण्योपजीविन । प्रच्छन्नवञ्चका स्त्वेते येस्तेनाटविकादय ॥ तत्करोति । दिवाविभेत्यत्र कियत्तदबहुष्विच्यच् ॥ तद्बृहतो करपत्यो रितिसुट्‌दलोपौ ॥ द्वमनवृत्ते ॥ पृक्काशाके ॥

तस्करस्नायु । पु । काकनासालतायाम् ॥

तस्करी । स्त्री । कोपनायां नार्य्याम् ॥

तस्थिवान् । त्रि । स्थितिमति । स्थिते ॥ ष्ठा० । छन्दसिलिट् । द्विस्वादिकार्यम् । लिट' कानजादेश. ॥ क्वसु-

श्वेतिक्वसुप्रत्ययोवा ॥

तस्थू । पु । स्थावरे ॥

ताच्छील्यम् । न । नियततत्स्वभावतायाम् ॥ भावेष्यञ् ॥

ताटङ्क' । पु । तालपत्रे । कर्णिकायाम् । ताडङ्के ॥ गुर्वक्षरे ऽ ॥

ताटस्थ्यम् । न । उदासीनत्वे ॥ निकटस्थत्वे ॥

ताड । पुं । ताडने ॥ घोषे । शब्दे ॥ मुष्टिमेयतृणादिषु ॥ अद्रौ ॥

ताडका । स्त्री । राक्षसीविशेषे ॥

ताडकान्तक । पु । श्रीरामे ॥

ताडकाफलम् । न । वृहदेलायाम् ॥

ताडकेय । पु । मारीचराक्षसे ॥ ताडकाया अपत्यम् । स्त्रीभ्योढक् ॥

ताडङ्क । पु । कर्णभूषायाम् । कर्णदर्पणे । कानतडका इतिभाषा ॥

ताडनम् । न । आघाते ॥ यथा । शतापराधे वनितां पुष्पेणापि न ताडयेत् । दोषान्न गणयेत् स्त्रीणां गुणानेव प्रकाशयेदितिमान्त्रिका' ॥ लालने बहवोदोषा स्ताडने बहवोगुणा । तस्मात् पुत्रञ्च शिष्यञ्च ताडयेन्नतु लालयेत् ॥

ताडनी । स्त्री । अश्वताडनयष्ट्याम् । कशायाम् ॥ ताड्यते ऽ नया । तड आघाते । णिच्. । ल्युट् । ङीप् ॥

ताडपत्रम् । न । ताडङ्के ॥

ताडागम् । न । तडागोदके ॥ यथा । प्रशस्तभूमिभागस्थो बहुसंवत्सरो षित । जलाशय स्तडाग. स्यात्ताडागंतज्जलं स्मृतम् ॥ ताडागमुदकं स्वादु कषायं कटुपाकि च । वातलं बहुवित्सूत्र मसृक्पित्तकफापहम् ॥ तडागस्येदम् । अण् ॥

ताडिः । स्त्री । ताडीद्रुमे । ताडियात इतिगौड भाषाप्रसिद्धे ॥

ताडी । स्त्री । पत्रद्रुमे । ताडियाल-इति गौडभाषा ॥ आभरण विशेष इतिदुर्गसिंह. ॥

ताड्यमान. । त्रि । पटहादिवाद्ये ॥ त्रि । तत्कालताडिते । हन्यमाने । ताडनयुक्ते ॥

ताण्ड । पुं । मुन्यन्तरे ॥

ताण्डव । पु । न । नाट्ये । नृत्ये ॥ पुन्नृत्य ताण्डवंप्राहु स्त्रीनृत्य लास्यमुच्यते ॥ तण्डुना प्रोक्तम् । तेनप्रोक्तमित्यण् ॥ तृणान्तरे ॥ उद्धतनृत्ये ॥ शिवमुनि (॥।) ॥

ताण्डवतालिक । पु । नन्दिनि । शिवद्वारिस्थि ॥

ताण्डवप्रिय. । पुं । शिवे ॥ त्रि । नृत्यप्रिये ॥ ताण्डव प्रियं यस्य ॥

ताण्डवितम् । न । नर्त्तिते ॥

ताण्डि । न । नृत्यशास्त्रे ॥

ताण्डी । पु । साम. शाखाविशेषा ऽध्यायिनि ॥

तात. । पु । जनके । पितरि ॥ अनुकम्प्ये ॥ त्रि । पूज्ये ॥ चतुष्काले (ऽ॥) आदिगुरौ ॥ तनोति । तनु॰ । दुतनिभ्यांदीर्घश्चेति क्त. । अनुदात्तेति नलोप ॥

तातगु॰ । पु । पितृव्ये । काका चाचा इतिभाषा ॥ त्रि । जनकस्यहिते ॥

तातजनयित्र्यौ । स्त्री । मातापित्रो. ॥ द्विवचनान्तोयम् ॥

ततातुल्य । त्रि । पितृसमे । मनोजवे ॥ तातेन तुल्य॰ ॥

तातन । पु । खञ्जने ॥

तातल. । पु । वह्नि । रोगे ॥ पाके ॥ लोहकूटे ॥ मनोजवे । तातसुल्ये ॥ त्रि । तप्तमाचे ॥

ताति । पु । पुत्रे ॥ इतिजटाधर: ॥

तात्कालिक । पुं । तत्कालभवे ॥

तात्कालिकविकार. । पु । विश्वासाख्ये भावे ॥ तात्कालिकविकार आदिवासो ऽकुप्रियादिषु ॥

तात्पर्य्यम् । न । तत्परतायाम् ॥ वक्तुरिच्छायाम् ॥ अभिप्राये ॥ तत्परस्य भाव: । ष्यञ् ॥

तादर्थ्यम् । न । तदर्थत्वे । तदर्थइदम्

तदर्थम् । तस्य भाव । ब्राह्मणादित्वात् ष्यञ् ॥

तादात्म्यम् । न । तत्स्वरूपे ॥ अभेद सम्बन्धे ॥ तस्य आत्मा तदात्मा । त दात्मनो भाव । ब्रा० ष्यञ् ॥

तादृक्ष: । त्रि । तादृशि ॥ स इव दृश्यते । तमिव पश्यति वा । दृशिर् प्रेक्षणे । त्यदादिष्विति क्सोपिवाच्य इति क्स. । आसर्वनाम्न. इत्यत्र दृग्दृशे तिवार्त्तिकेनात्वम्

तादृक् ग् । त्रि । तथाविधे । उपमान गोचरे । तादृशे ॥ तमिवेमपश्यन्ति सदृशार्थं पश्यति दृश्यते वा । त्यदादि षु दृशरनालोचने कञ् । आसर्वनाम्न इत्या त्वम् । ब्रश्चेतिष । झलाञ्जशोऽन्ते । कु त्वेनग । चर्त्वेपक्षे क. ॥

तादृश । पु । तादृशि ॥ स इव दृश्यते तमिवपश्यतिवा । त्यदादिर्ष्वाति कञ् ॥

तान. । पु । गानाङ्गविशेषे ॥ यथा । वि स्तार्यन्ते प्रयोगा यैर्मूर्च्छनाशेषसं श्रया । तानास्तेऽप्यूनपञ्चाशत् सप्त स्वरसमुद्भवा ॥ तेभ्य एव भवन्त्यन्ये कूटताना पृथक् पृथक् । तस्यपञ्च सहस्राणि चयस्त्रिंशच्छतानि च ॥ न । विस्तारे ॥ ज्ञानविशेषे ॥

तानवम् । न । तनुत्वे ॥ माघे तनुता याम् ॥ यथा । तानवं तनुतामाघे दैर्घ्ये स्थौल्यमभ्यादिकृत् ॥ तनोर्भाव । इगन्ताच्चेत्यण् ॥

तानूर । पुं । आवर्त्ते । पयसाभ्रमे ॥

तान्त । त्रि । ग्लाने ॥ क्लान्त । श्रान्ते ॥

तान्तव. । त्रि । प्रावरणान्तरे ॥ तन्तूना विकार । ओरञ् ॥

तान्त्रिक । त्रि । ज्ञातसिद्धान्ते । शास्त्र तत्त्वज्ञे । प्रज्ञादिनि कौशिके । य थानरेषु तत्त्वज्ञा. सरितां जाह्नवी यथा । यथाऽदर्शिदिवेशाना मागमा नामिदंतथा ॥ तन्त्रं सिद्धान्तमधीते वेद वा । उक्थादित्वाट्ठक् ॥ त न्त्रसम्बन्धिनि ॥

तान्दूरम् । न । मांसव्यञ्जनप्रभेदे ॥ यथा । अङ्गारपूर्णगर्त्ते बद्धच्छ म बलम्बितम् । सत्कृत मिश्रित मांस मर्दं तान्दूर मुच्यते ॥ सुस्वादुतान्दूर म् । पचेत्सैन्धवरीचर्यं शक्तिसम्भा रसम्भृतम् । चतुर्दिक्षुण्डलाकारे पार्श्वप्रज्वलितानले । विपक्व सुरभि स्वादु तान्दूरमिति कीर्त्तितम् ॥ अ न्यच्च । कोष्ठिकाया सुसम्भार मल- म्य मवलम्बितम् । मांसं पिधाय वा ष्पाग्निज्वालयास्वेदित वरम् ॥ ता न्दूर क्वचिद् बल्य मृदु पथ्यतम मु तम् । सद्योदत नव यूष मन्यथा

दोषनाशकमिति ॥

ताप । पु । सन्तापे ॥ कृच्छ्रे ॥ तपनम् । तपसन्तापे । घञ् ॥

तापक' । पुं । ज्वरे ॥ त्रि । तापकृति ॥ तापयति । तप० । ण्वुल् ॥

तापत्य । पु । अर्जुने ॥ इति पु० ॥

तापत्रयम् । न । आध्यात्मिकाधिभौतिकाधिदैविकदुःखत्रये ॥ आध्यात्मिकादिभेदेन त्रयात्मा तापत्रयं बुधः । उत्पन्नज्ञानवैराग्यःप्राप्नोत्यात्यन्तिकं फलम् ॥ तापानां त्रयम् ॥

तापन । पु । सूर्ये ॥ कामवाणे ॥ असुरविशेषे ॥ सूर्यकान्तमणौ । त्रि । तापके । तापयितरि ॥ तापयति । तप० । कर्त्तरि ल्युः ॥

तापनीय । पुं । निष्कपरिमिते सुवर्णे ॥ तपनीयस्य विकारःपरिमाणः । जातरूपेभ्य.परिमाण इत्यण् ॥

तापस' । पु । दमनकवृक्षे ॥ बकपक्षिणि ॥ न । तमालपत्रे । तेजपात इतिभाषा ॥ त्रि । तपस्विनि ॥ वानप्रस्थे ॥ तपोऽस्यास्ति । अण्चेत्यण् ॥ यद्वा । तप शीलमस्य । छत्रादिभ्योण' ॥

तापसतरु । पु । } इङ्गुदीवृक्षे । इंगुआ इतिभाषा ॥ तापसोपयुक्तस्तरु ॥
तापसद्रुम । पु । }

तापसद्रुमसन्निभा । स्त्री । गर्भदात्री क्षुपे ॥

तापसप्रिय' । पुं । पियालद्रुमे ॥

तापसप्रिया । स्त्री । द्राक्षायाम् ॥

तापसेष्टः । पु । पियाले । चारे ॥

तापहरी । स्त्री । ताहरी इति प्रसिद्धे व्यञ्जनपदार्थे ॥ यथा । घृते हरिद्रासंयुक्ते माषाणां भर्जयेद्वटीः । तण्डुलांश्चाऽपिनिर्दोषान् सद्भैवपरिभर्जयेत् ॥ सिद्धियोग्यं जलं तत्रक्षिप्य कुशलः पचेत् । लवणार्द्रकहिङ्गूनि मात्रया तत्रनि'क्षिपेत् ॥ एषासिद्धि समायाता प्रोक्ता तापहरीबुधैः' ॥ भवेत्तापहरीबल्या वृष्या श्लेष्मावलाधरेत् । इत्युक्तीतपैजीयत्यागुर्वी तत्र गुणा'स्मृताः ॥

तापिच्छ । पु । तमालवृक्षे ॥ तापिनं छादयति । छद० । कर्मण्यण् । पृषोदरादिः ॥ न । तमालपुष्पे ॥ तापिच्छस्यपुष्पम् । फलेलुगितितद्धितलुक् । किन्तीन प्रसवे सर्वमिति क्लीवता ॥

तापिञ्जम् । न । धातुमाक्षिके ॥ इति राजनिर्घण्टः ॥

तापित' । त्रि । पीडिते ॥ जातसन्तापे ॥ तपणया इति भाषा ॥ ताप'सञ्जातोऽस्य । ता० इतच् ॥

तापी । पुं । बुद्धे ॥ त्रि । तापवति ॥

तापोऽस्या ऽस्ति । अतइनिठनावि-
तीनि ॥

तापी । स्त्री । विन्ध्याद्रिप्रसिद्धायां पश्चिमवाहिन्यां सरिति ॥ यमुनायाम् ॥

तापीजम् । न । स्वर्णमाक्षिके ॥

ताप्यः । पु । न । धातुमाक्षिके ॥

ताप्यकम् । न । माक्षिके ॥

ताभ्रः । पु । भीषणे ॥ दोषे ॥

तामरम् । न । जले ॥ घृते ॥इ० चन्द्र ॥

तामरसम् । न । पद्मे ॥ ताम्रे ॥ काञ्चने ॥ तामरे जले सरति । सरस्त्वमे । अन्येभ्योपीतिड. ॥ यद्वा । तम्यते । तमु० । घञ् । नोदात्तोपदेशस्येतिनिषेधस्यानित्यत्वान्न वृद्धिनिषेधः । रस्यते । रस आस्वादे । चु० । अदन्त । एरच् । तामश्चतद्रसञ्च ॥ जगतीछन्दःप्रभेदे । यथा । इह वद तामरसं ननजाय ॥ स्फुटसुषमामकरन्दमनोज्ञं व्रजललनानयनालिनिपीतम् । तवमुखतामरसं मुरशत्रो हृदयतडागविकाशि ममास्तु ॥

तामलकी । स्त्री । भूम्यामलक्याम् ॥ तामस्या सा वामलकी च । पृषोदरादि ॥

तामलिप्तम् । न । } तमोलुकइति
तामलिप्ती । स्त्री । } प्रसिद्धे तामलिप्ते देशे । विष्णुगृहे ॥

तामस । पु । भुजगे ॥ खले ॥ उलूके ॥ भूतावहङ्कारे ॥ अधर्माज्ञानावैराग्यानैश्वर्याभिधानेषु चतुर्षु बुद्धिधर्मेषु ॥ चतुर्थमनौ ॥ न । कुत्सितधने ॥ यथा । पार्श्वकद्यूतचौर्यार्त्तिप्रतिरूपकसाहसैः । व्याजेनोपार्जितं यत्तु तत् कृष्णं समुदाहृतम् ॥ पार्श्वक अपात्र सम्पादतया योऽर्जयति । आत्मोपकारिउया । प्रतिरूपकेण कृत्रिमरत्नादिना । साहसेन समुद्रयानगिर्यारोहणादिना । व्याजेन ब्राह्मणवेषेणाद्दिना । कृष्णं तामसम् ॥ त्रि । तमसायुक्ते ॥ तमोवृत्तौ ॥

तामसकीलकः । पु । राहुसुतेषु केतुषु ॥ यथा । तामसकीलकसञ्ज्ञा राहुसुता केतवस्त्रयस्त्रिंशत् । वर्णस्थानाकारैस्तान् दृष्ट्वार्कफलं ब्रूयात् ॥ तेषार्कमण्डलगता पापफला चन्द्रमण्डले सौम्या । ध्वाङ्क्षकबन्धप्रहरणरूपा. पापा शशाङ्केऽपि ॥ तेषामुदये रूपाण्यम्भः कलुषं रजोवृतं व्योम । नगतरुशिखरामर्द. समर्करो वातिमारुतश्चण्ड. ॥ ऋतुविपरीतास्तरवो दीप्ता मृगपक्षिणो दिशादाहा. । निर्घातमहीकम्पाद्भयो भवन्त्यत्रचोत्पाताः ॥ अम्भःकलुषादीनामुत्पातानां नि

ष्फलत्वमाह । न पृथक् फलानि- तेषां शिखिकीलकराहुदर्शनानि यदि । तदुदयकारणमेषां केत्वादीनां फलक्रमाद् ब्रूयात् ॥*॥ तामसकीलाना दर्शनवशात् फलमाह। यस्मिन् यस्मिन् देशे दर्शन माया न्ति सूर्यविम्बस्था । तस्मिंस्तस्मिन् व्यसन महीपतीनां परिज्ञेयम् ॥ ॥ क्षुत्प्रम्लानशरीरा मुनयोप्युत् सृष्टधर्मसच्चरिता । निर्मांसबालह स्ता. कृच्छ्रेणायान्ति परदेशम् ॥ तस्करविलुप्तवित्त. प्रदीर्घनिःश्वास मुकुलिताक्षिपुटा' । सन्त सन्नश रीरा' शोकोद्भव वाष्परुद्धदृश ॥ चामा जुगुप्समाना स्वनृपतिपरचक्र पीडिता मनुजा ।स्वनृपतिचरितक र्मच पुराकृत प्राप्नुवन्त्यन्ये ॥ गर्भश्च विनिष्पन्ना वारिमुचो न प्रभूतवारि मुच । सरितो यान्ति तनुत्व क्वचित् क्वचिज्जायते सस्यम्॥*॥ तेषामाकृतिवशेनफलमाह । दण्डेनरेन्द्रमृत्यु र्व्याधिभय स्यात्कवन्धसंस्थाने । ध्वाङ्क्षेचतस्करभय दुर्भिक्ष कीलकेऽ र्कस्थे ॥ राजोपकरणरूपै श्छत्रध्वज चामरादिभिर्विद्धः । राजान्यत्वकृद र्क. स्फुलिङ्गधूमादिभिर्जनहा ॥ एकोदुर्भिक्षकरो द्वाधा.स्युर्नरपतेर्वि नाशाय । सितरक्तपीतकृष्णैस्तैर्विद्धोऽर्कोऽनुवर्णघ्न' ॥*॥ विशेषफलान्याह । दृश्यन्तेच यत स्तेरविविम्वस्योत्थितामस्योत्पाताः । आगच्छतिलोकानां तेनैवभयं प्रदेशेनेति वाराहीसंहिता ॥

तामसयज्ञ । पु । यज्ञविशेषे ॥ यथा । विधिहीन मसृष्टान्न मन्त्रहीन मदक्षिणम् । श्रद्धाविरहितं यज्ञं तामस परिचक्षते ॥ तामसानां यज्ञ. ॥

तामसाहारः । पु । तामसप्रकृतीनामाहारे ॥ यातयाम गतरस पूतिपर्युषितञ्चयत् । उच्छिष्ट मपिचामेध्य भोजनं तामसप्रियम् ॥

तामसिकः । त्रि । तामसे । तमोगुणकार्ये ॥

तामसी । स्त्री । निशायाम् ॥ दुर्गायाम् ॥ तमोन्वितायाम् ॥ जटामांस्याम् ॥

तामिस्र । पु । विपर्ययविशेषे ॥ सचाष्टादशधा । यथा । शब्दादयोदशविषया रञ्जनीया. स्वरूपत' । ऐश्वर्यञ्चाणिमादिक नस्वरूपतोरञ्जनीयम् । किन्तुरञ्जनीयशब्दाद्युपायः । तेचशब्दादय उपस्थिता. परेणोपहन्यमाना स्तदुपायाश्चाणिमादयः स्वरूपेणैव कोपनीया भवन्तीति श

ब्दादिभिर्दशभि सहाशिमाद्यष्टक-
मष्टादशेति। तद्विषयोद्वेषस्तामि
स्रो ऽष्टादशविषयत्वादष्टादशधेति
साङ्ख्या ॥ भोगेच्छाप्रतिघाते स
ति क्रोधे ॥ राक्षसे। तमिस्राचारि
णि ॥ न। अन्धकारमये नरके ॥ प
रवित्तापत्यकलत्रापहर्त्ता यमदूतै
र्यत्रनिपात्यते ॥ तमिस्र मस्मिन
स्त्यास्तिवा । ज्योत्स्ना तमिस्र-
त्त्यण् ॥

तास्मूलम्। न। क्रमुके। गुवाके ॥ना
गवल्लीदले। पानइति प्रसिद्ध ॥ ता
म्यति। तमु। पिञ्जादित्वात् ऊलच्
धातोर्वुक् दीर्घत्वञ्च ॥ ताम्बूल कटु
तिक्त मुष्णमधुर क्षार कषायान्वि
त वातघ्न क्रुमिनाशन कफहरं दुर्ग
न्धनिर्नाशनम्। वक्त्रस्याभरण विशु
द्धिकरण कामाग्निसन्दीपनं ताम्बूल
स्य सखे त्रयोदशगुणा स्वर्गेपिते दु
र्लभा ॥ अपिचाहु। ताम्बूल विश
द रुच्य तीक्ष्णोष्ण तुवर सरम्।
वश्य तिक्त कटु क्षार रक्तपित्तकरं
लघु ॥ बल्यश्लेष्मास्यदौर्गन्ध्यमलवा
तश्रमापहम् ॥ * ॥ अनिधाय मु-
खेपर्णं पूग स्वादयते नर। मतिभ्र
शो दरिद्र. स्यादन्ते न स्मरते हरि
म ॥ * ॥ पर्णमूले वसेद्व्याधि पर्णा
ग्रे पापसञ्चय। चूर्णपर्णं हरेदायु
शिरावुद्धिविनाशिनी ॥ नायुरग्र वि
षमूले मध्य ऽलक्ष्मी र्व्यवस्थिता।
तस्मादग्रञ्चमूलञ्च मध्य पर्णस्य वर्ज
येत् ॥ चूर्णाधिक हरतिगन्ध मथा-
धिपूग राग तथाधिकदलञ्च सुगन्धि
कारि। ताम्बूलमुक्तमिद रसना-
ग्रभिन्नपर्णनिशास्वधिकखण्डित पर्ण
मह्नि ॥ ताम्बूल न हित प्रोक्त शरी
रे रूक्षदुर्बले। ज्वरास्यशोषपित्ता
स्रमदमूर्च्छाक्षिरोगिषु ॥ ताम्बूला
त्युपयोगात् स्याच्छोष पित्तानिला
स्रता। देहदृक्केशदन्ताग्निश्रोत्रव
र्णबलक्षय. ॥ * ॥ विना पर्णं मुखे
दत्त्वा गुवाक भक्षये यदि। ताव द्भ
वति चण्डालो यावद्गङ्गा नगच्छति
॥ * ॥ ताम्बूल विधवास्त्रीणा यती
नां ब्रह्मचारिणाम्। तपस्विनाञ्चवि
प्रेन्द्रगोमाससदृश ध्रुवम् ॥ इति ब्र
ह्मवैवर्त्तपुराणम् ॥

ताम्बूलकरङ्क। पु। पानवट्टा इतिप्रसि
द्धे ताम्बूलपात्रे। स्यग्याम् ॥

ताम्बूलद.। त्रि। वाग्गुलिके। ताम्बूल
दातरि॥ इतित्रिकाण्डशेष.॥ ताम्बूल
ददाति। ददाञ्। आतइतिक. ॥

ताम्बूलपत्र। पु। पिण्डालौ ॥

ताम्बूलराग.। पु। मसूरे ॥ ताम्बूल

रक्ते ॥

ताम्बूलमल्लिका । स्त्री । ताम्बूल्याम् ॥

ताम्बूलवल्ली । स्त्री । ताम्बूल्याम् ॥ ताम्यति । तमु० । क्विप् । अनुनासिकस्येतिदीर्घः । वेल्लति । वुकमज्जने । चुरादीनामिण्वा । इगुपधेतिक. । ताम् चासौवुलश्च । पृषोदरादि. । ताम्बूलाख्यावल्ली । शाकपार्थिवादिः ॥

ताम्बूलिक । पुं । ताम्बूलिनि ॥

ताम्बूली । त्रि । राज्ञां ताम्बूलाधिकृते । तंबोली इति प्रसिद्धे जात्यन्तरे ॥

ताम्बूली । स्त्री । ताम्बूलवल्ल्याम् ॥ ताम्बूलात् गौरादिङीष् ॥

ताम्रम् । न । तांबा इतिप्रसिद्धे तैजसधातुविशेषे । शुल्वे । म्लेच्छमुखे । नैपालिके ॥ अस्योत्पत्त्यादयो यथा । शुक्रं यत् कार्त्तिकेयस्य पतितं धरणीतले । तस्मात् ताम्रं समुत्पन्नमिदमाहुः पुराविदः ॥ जपाकुसुमसङ्काशं स्निग्धं मृदुघनक्षमम् । लोहनागोज्झितं ताम्रं मारणाय प्रशस्यते ॥ कृष्णं रूक्षमतिस्तब्धं श्वेतञ्चापिघनासहम् । लोहनागयुतञ्चेति शुल्वं दुष्टं प्रकीर्त्तितम् ॥ ताम्रं कषाय मधुरं सतिक्तं मम्लञ्च पाके कटु सारकञ्च । पित्तापहं श्लेष्महरञ्च शीतं तद्रोपणं स्याल्लघु लेखनञ्च ॥ पाण्डूदराशोंज्वरकुष्ठकासश्वासक्षयान् पीनसमम्लपित्तम् । शोथं कृमिं शूलमपाकरोति प्राहुः परे बृंहणमल्पमेतत् ॥ एकोदोषो विषं ताम्रेत्वसम्यङ्मारिते ऽष्टते । दाहःस्वेदोरुचिर्मूर्च्छा क्लेदोरेको वमिर्भ्रमः ॥ तस्यशोधनविधिर्यथा । पत्तलीकृतपत्राणि ताम्रस्याग्नौ प्रतापयेत् । निषिञ्चेत् तप्ततप्तानि तैले तक्रे च काञ्जिके ॥ गोमूत्रे चकुलत्थानां कषायेच त्रिधात्रिधा । एवं ताम्रस्य पत्राणां विशुद्धिः सम्प्रजायते ॥ तस्य मारणविधिः यथा । सूक्ष्माणि ताम्रपत्राणि कृत्वा संस्वेदयेद्बुध. । वासरत्रयमम्लेन ततःखल्ले विनिः क्षिपेत् ॥ पादांशं सूतकं दत्त्वा यामम्लेनमर्दयेत् । तत उद्धृत्य पत्राणि लेपयेद् द्विगुणेनच ॥ गन्धकेनाम्लपिष्टेन तस्य कुर्याच्च गोलकम् । ततः पिष्ट्वाचमीनाक्षीं चाङ्गेरीं सपुनर्नवाम् ॥ तत्कल्केन वहिर्गोलं लेपयेद् द्व्यङ्गुलोन्मितम् । धृत्वातद्गोलकं भाण्डशरावेणावरोधयेत् ॥ वालुकाभिः प्रपूर्याथ विभूतिलवणाम्बुभिः । दत्त्वाभाण्डमुखेमुद्रांततस्तच्चुल्ल्यां विपा

चयेत्॥ क्रमवृद्ध्याग्निना सम्यक् याव यामचतुष्टयम्। स्वाङ्गशीतं समुद्धृत्य मर्दयेच्छूरणद्रवे ॥ यामैकं गोलकं तच्च निःक्षिपेच्छूरणोदरे । मृदालेपस्तु कर्त्तव्यः सर्वतोऽङ्गुष्ठमात्रकः ॥ पाच्यं गजपुटे चास्य मृतं भवतिनिश्चितम्। वमनञ्च विरेकञ्च भ्रम क्लममथारुचिम् ॥ विदाहं स्वेदमुत्क्लेदं न करोति कदाचनेति ॥ अरुणे । शुल्वनिभे ॥ पु । कुष्ठरोगप्रभेदे ॥ त्रि । अरुणवर्णवति ॥ ताम्यति तम्यतेवा । तमु॰। अमितम्योर्दीर्घश्चेति रक्‌दीर्घौ ॥

ताम्रकम् । न । ताम्रे ॥ स्वार्थेकः ॥

ताम्रकर्णी । स्त्री । अञ्जननामपश्चिमदिग्हस्तिकरिण्याम्॥ ताम्रौ कर्णौ यस्याः । पाककर्णेति नासिकेति वा ङीष् ॥

ताम्रकारः । पु । ताम्रकुट्टके । शौल्विके । कसेरा इति भाषा प्रसिद्धे वर्णसङ्करजातौ ॥ उत्पत्ति कंसकारे द्रष्टव्या । ताम्रं करोति । डुकृञ्॰ । कर्मण्यण् ॥

ताम्रकुट्टकः । पु । कांस्यकारे ॥ ताम्रं कुट्टयति । पु । कुट्टच्छेदे । कर्मण्यण् । स्वार्थेकः ॥

ताम्रकूटः । तमाखु इति प्रसिद्धे क्षुपे ॥ यथा । सविद्याकाकूटञ्च ताम्रकूटञ्च धुस्तुरम् । अहिफेनं खर्जुरसस्तारिकातरिता तथा ॥ इत्यष्टौ सिद्धिद्रव्याणि यथा स्युरिष्टकप्रिये इति कुलार्णवतन्त्रम् ॥

ताम्रकृमिः । पु । इन्द्रगोपकीटे ॥

ताम्रगर्भम् । न । तुत्थे ॥

ताम्रचूडः । पु । कुक्कुटे ॥ ताम्रा चूडाऽस्य ॥ कुकुरद्रुमे ॥

ताम्रत्रपुजम् । न । कांस्ये ॥

ताम्रदुग्धा । स्त्री । गोरक्षदुग्धायाम् ॥

ताम्रपट्टम् । न । ताम्रनिर्मितेलेखनपत्रे ॥ यथा । दत्त्वा भूमिं निबन्धं वा कृत्वालेख्यन्तुकारयेत् । आगामिभद्रनृपतेः परिज्ञानाय पार्थिव ॥ पटेवा ताम्रपट्टेवा समुद्रोपरिचिह्नितमिति मिताक्षरा ॥

ताम्रपत्रः । पु । जीवशाके ॥ न । ताम्रनिर्मितपत्रे ॥

ताम्रपर्णः । पु । भारतवर्षीयोपद्वीपे ॥

ताम्रपर्णी । स्त्री । चोलदेशवर्त्तिन्यां सरिद्वारायाम् ॥

ताम्रपल्लवः । पुं । अशोकतरौ ॥

ताम्रपाकी । पु । गर्दभाण्डवृक्षे ॥

ताम्रपादी । स्त्री । हंसपद्याम् ॥

ताम्रपुष्पः । पु । भूमिचम्पके । भूंचांपा इति भाषा ॥ के । विदारे । रक्तकाञ्चने ॥

ताम्रपुष्पिका । स्त्री । जपाकुसुमे ॥ रक्तत्रिवृति ॥

ताम्रपुष्पी । स्त्री । धातक्याम् ॥ पाटलावृक्षे ॥ जपायाम् ॥

ताम्रफल: । पु । अङ्कोठवृक्षे ॥

ताम्रमूला । स्त्री । दुरालभायाम् ॥ लज्जालौ ॥ कच्छुरायाम् । खिराइ इतिगौडभाषा ॥

ताम्रवर्ण. । पु । पक्षिवायवृक्षे ॥

ताम्रवर्णा । स्त्री । जवायाम् ॥

ताम्रवल्ली । स्त्री । चित्रकूटादिदेशप्रसिद्धायां ताम्रायां लतायाम् । ताल्याम । तमाल्याम् ॥ मञ्जिष्ठायाम् ॥

ताम्रबीज. । पुं । कुलत्थे ॥

ताम्रवृक्ष: । पु । कुलत्थे ॥ रक्तचन्दने ॥

ताम्रवृन्त. । पुं । कुलत्थे ॥

ताम्रवृन्ता । स्त्री । कुलत्थिकायाम् ॥

ताम्रशिखी । पु । कुक्कुटे ॥

ताम्रसारम् । न । रक्तचन्दने ॥ इतिरत्नमाला ॥

ताम्रसारकम् । न । रक्तचन्दने ॥ पु । रक्तखदिरे ॥ इतिराजनिर्घण्ट: ॥

ताम्रा । स्त्री । ताम्रवल्ल्याम् ॥ सैंहल्याम् ॥ ताम्रवर्णायाम् ॥

ताम्राकु. । पु । उपद्वीपभेदे ॥

ताम्राक्ष । पु । कोकिले ॥ ताम्रे अक्षिणी यस्य ॥ त्रि । ताम्रनयने ॥

ताम्राभम् । न । रक्तचन्दने ॥

ताम्राक्षा । स्त्री । तीर्थविशेषे ॥

ताम्रार्धम् । न । कांस्ये ॥

ताम्राश्मा । पुं । पद्मरागमणौ ॥

ताम्रिक । पु । कांस्यकारे ॥ त्रि । ताम्रसम्भवे ॥ ताम्रस्यायम् । अध्यात्मादित्वात् ठञ् ॥ ताम्रघट्टनं शिल्पमस्य वा शिल्पमिति ठक् ॥

ताम्रिका । स्त्री । गुञ्जायाम् ॥ मानरन्ध्रावाद्ये ॥

ताम्री । स्त्री । वाद्यविशेषे । मानरन्ध्रायाम् ॥ विकारिकायाम् ॥

तायनम् । न । स्फीततायाम् । समृद्धौ ॥ तायृसन्तानपालनयो: । ल्युट् ॥

तायिक: । पु । तर्जिकाभिधदेशे ॥

तार: । पुं । वानरविशेषे ॥ मुक्ताविशुद्धौ ॥ शुद्धमौक्तिके ॥ देवीप्रणवे ॥ यथा । काश्यां विश्वेश्वरोऽहं गिरिपतितनया संयुता वामभागे शुण्डादण्डेन दक्षे त्रिपथगतटिनीतीरशुद्धाम्बुभागे । मायाबीजञ्च कर्णे सुरमुनिसहितो ध्यानयुक्तं वदामि प्रीत्या लोकस्य तस्मात् सुरमुनिगणा कैवच्यते तारनामेति ॥ प्रणवे ॥ गर्भजन्मजरामृत्युलक्षणाद्भयात्तारयतीतितार. ॥ तरणे ॥ शिरोभवध्वनौ ॥ स्त्री । न । नक्षत्रे ॥ नेत्र

मध्ये । कनीनिकायाम् ॥ न । रूप्ये ॥ अध्ययनरूपायांसिद्धौ ॥ त्रि । स्फुरितदीधितौ ॥ अत्युच्चनादे ॥ निर्मले ॥ अत्युच्चे. ॥ तारयति अतिक्रामति अन्यान् शब्दान् । तॄ० । बहुलमेतन्निदर्शन मितिचुरादिगणाद्धात् स्वार्थेणिच् । पचाद्यच् ॥ यद्वा । तार्यते ऽनेनवा । घञ् घोषा ॥

तारक । पु । दैत्यविशेषे ॥ कर्णधारे ॥ भेलके ॥ न । दृशि ॥ स्त्री । कनीनिकायाम् ॥ ऋक्षे ॥ त्रि । त्रातरि ॥ संसारसमुद्रस्य तरणकारणे तारयितरि ॥ अतिजगतीप्रभेदे वृत्तविशेषे । यथा । यदि तोटकवृत्त पदे गुरुरन्त्यम् भवतीह तदा कि-ल तारकवृत्तम् । फणिनायकपिङ्गलवर्णित मेत द्धर पण्डितमण्डलिका हृतचित्तम् ॥ यथा । अतिभारतरं हृदि चन्दनपङ्क मनुते सरसीपव न विषशङ्कम् । तवदुस्तरतारवियोगपयोधे र्नहि पारमसौ भविता परमार्थे. ॥ तारयति । तॄ० । ण्वुल् ॥

तारकजित् । पु । कार्त्तिकेये । षडानने ॥ तारक जयति । जि० । क्विप् । तुक् ॥

तारकराज । पु । चन्द्रे ॥

तारका । स्त्री । न । नेत्रकनीनिकायाम् ॥ ऋक्षे । नक्षत्रे ॥ तारकाज्योतिषीत्यत इत्वम् ॥ स्त्री । इन्द्रवारु-ण्याम् ॥

तारकारि । पु । कार्त्तिकेये । महासेने ॥ तारकस्य दैत्यविशेषस्य अरिः ॥

तारकिणी । स्त्री । निशायाम् ॥

तारकितम् । न । नभसि ॥ तारका सञ्जाता अस्य । तदस्यसञ्जाततार-कादिभ्यइतच् ॥

तारण । पु । भेलके ॥ अष्टादशेवत्सरे ॥ अतिवृष्टिश्च जायेत धान्यस्याग्रपीडनम् । शस्यभवति सामान्य तारणे सुरवन्दिते ॥ त्रि । तरणकारयितरि ॥ तारयति । तॄ० । ल्यु. ॥ सन्तारणे ॥

तारणि । स्त्री । नावि ॥

तारतण्डुल । पु । धवलयावनाले ॥

तारतम्यम् । न । तरतमयोर्भावे । न्यूनाधिक्ये ॥ यथा । निर्धन निधनमेतयोर्द्वयोस्तारतम्यविधिमुग्धचेतसाम् ॥ बोधनाय विधिना विनिर्मितो रेफएवजयवैजयन्तिका ॥

तारतारम् । न । आगमाविरोधिना न्यायेन आगमार्थपरीक्षणरूपे ऊहे । तृतीयायांसिद्धौ ॥

तारदी । स्त्री । तरदीवृक्षे ॥

तारपुष्प । पु । कुन्दवृक्षे ॥

तारमाक्षिकम् । न । रूप्यमाक्षिके । रजतोपधातौ ॥ तारमाक्षिकमन्यत्तु तद्भवेद्रजतोपमम् । किञ्चिद्रजतसाहित्यात् तारमाक्षिकमीरितम् ॥ अनुकल्पतया तस्य ततोहीनगुणा स्मृता. । न केवलं रूप्यगुणा वर्त्तन्ते तारमाक्षिके ॥ द्रव्यान्तरस्य संसर्गात् सन्त्यन्येपि गुणा यत.॥ स्यात् तारमाक्षिकं स्वादु तिक्तं वृष्यं रसायनम् । चक्षुष्यं वस्तिरुक्कुष्ठपाण्डुमेहविषोदरम् ॥ अर्शः शोथ चयं कण्डु त्रिदोष मपिनाशयेत् ॥ मन्दानलत्व वलहानि मुग्रां विष्टम्भितां नेत्रगदान् सकुष्ठान । तथैव मालां व्रणपूर्विकाञ्च करोत्यशुद्धं रजताख्यमाक्षिकम् ॥ शोधनन्तु । कर्कोटीमेषशृङ्ग्युत्थैर्द्रवैर्जम्बीरजैर्दिनम् । भावयेदातपे तीव्रे विमला शुद्ध्यतिध्रुवम् ॥ विमला तारमाक्षिकम । कर्कोटी खुखसा । मारणन्तु कुलत्थस्य कषायेण घृष्टा तैलेन वा पुटेत् । तैलेन वाजमूत्रेण म्रियते तारमाक्षिकम् ॥

तारल । पु । विटे ॥ इतिभूरिप्रयोगः॥

तारवायु । पु । अत्युच्चशब्दवतिपवने॥

तारविमला । स्त्री । तारमाक्षिके ॥

तारशुद्धिकरम् । न । सीसके ॥

तारा । स्त्री । बुद्धदेवताभेदे ॥ पञ्चकन्यान्तर्गतकन्यायाम् । वालिसुग्रीवयोर्भार्यायाम् ॥ सुरगुरोर्भार्यायाम् ॥ कनीनिकायाम् ॥ नक्षत्रे ॥ यथा । एकतारनभोदृष्ट्वा स्मर्त्तव्यो नारदो मुनिः । तावद्भवति चण्डालो यावदन्य न पश्यति ॥ तत्रविशेषानुशासनं यथा । हस्ता स्वाती श्रवणा अश्लोषे मृगशिरा नपुंसि स्यात् । पुंसि पुनर्वसुपुष्यौ मूलन्त्वस्त्री स्त्रियां शेषा. ॥ शेषा. ताराइतिसम्बन्ध. ॥ चीडायाम् ॥ मुक्तायाम् ॥ शिवशक्तेद्वयाम् ॥ द्वितीयायां महाविद्यायाम् ॥ यथा । लीलया वाक्प्रदा यस्मात् तेनलीलसरस्वती । तारकत्वात् सदा तारा सुखमोक्षप्रदायिनी ॥ उग्रापत्तारिणी यस्मा दुग्रतारा प्रकीर्त्तितेति॥ तरन्त्यनया । तॄ० । भि० अङ् । ऋदृशोङीतिगुणः । णिपातनाद्दीर्घः । अदन्तत्वचाट्टाप् ॥

ताराकूटम् । न । तृतीयेयोटके । तारामैत्र्याम् ॥ यथा । वर्णादिपिकन्यर्त्तं कन्यर्क्षादरभावधि । पृथगङ्के हृते शेष त्रिपञ्चसप्तभन्नत्वसदिति ॥

तारापति. । पु । शिवे ॥ चन्द्रे ॥ बृहस्पतौ ॥ वालिनि ॥ सुग्रीवे ॥

तारापथः । पु । आकाशे ॥

तारापीड । पु । निशाकरे । चन्द्रे ॥

ताराभूषा । स्त्री । रात्र्याम् ॥

ताराभ्र । पु । कर्पूरे ॥

तारामण्डल । पु । ईश्वरगृहविशेषे ॥

तारामार्ग । पुं । आकाशे ॥

ताराराचि । स्त्री । आगमोक्ते पर्ववि शेषे ॥ यथा । भाद्रे मासि कृष्णपक्षे भौमवारे कुलर्क्षगे । अर्द्धरात्रौ स-क्रमश्च सा तारा रात्रिरीरितेति ॥

तारारि । पु । विटमाक्षिके ॥

तारावती । स्त्री । कालिकापुराण-प्रसिद्धायां चन्द्रशेखरभूपपत्न्याम् ॥

तारिकम् । न । तरमूल्ये ॥

तारिका । स्त्री । ताडीतिख्याते ताल रसे ॥

तारिणी । स्त्री । बुद्धदेव्यन्तरे । लोके श्वरात्मजायाम् ॥ * ॥ शिवपत्न्याम् । द्वितीयाया महाविद्यायाम् ॥

तारुण्यम् । न । यौवने ॥ तरुणस्य भाव । ब्राह्मणादित्वात् ष्यञ् ॥

तारेय । पु । वालिवानरपुत्रे । अङ्गदे ॥ ताराया अपत्यम् । ढक् ॥

तार्क्षवम् । न । तर्क्षविकारे ॥ तद वयवे ॥ कोपधाच्चेत्यण् ॥

तार्किक । त्रि । तर्कतत्परे । तर्कशा स्त्रविदि ॥ तर्कमधीते । ठक् ॥ सच षड्विधो यथा । स्याद्वादवादार्हतः शून्यवादीतु सौगत. १ । नैयायिकस्त्वक्षपादो २ । योग साङ्ख्यस्तु कापिल ३ । वैशेषिक स्यादौलूक्यो ४ । बार्हस्पत्यस्तु नास्तिक. ५ । चार्वाकोलौकायतिकश्चै ६ ते षड तार्किका ॥ आत्मनोऽचिद्रूपवादिनोऽनात्मशास्त्रेते स्वबुद्धिपरिकल्पित यदिच्छन्ति तद्वदन्ति ॥

तार्क्ष । पु । कश्यपे ॥

तार्क्षी । स्त्री । पातालगरुडीलतायाम् ॥

तार्क्ष्य । पु । अश्वे ॥ सर्पे ॥ गरुडाग्रजे ॥ गरुडे ॥ तार्क्षस्य कश्यपस्यापत्यम् । गर्गादित्वात् यञ् । बहुत्वे तार्क्षा. ॥ एकस्मिन्कल्पे तृक्षस्य मुनेरपत्यत्वात्तार्क्ष्योगरुड । गर्गादित्वात् यञ् । बहुत्वेयञञोश्चेतिलुकि तृक्षाइत्यन्ये ॥ सुवर्णे ॥ स्यन्दने ॥ अश्वकर्णाख्यतरौ ॥ न । रसाञ्जने ॥

तार्क्ष्यजम् । न । रसाञ्जने ॥

तार्क्ष्यध्वजः । पु । हरौ । विष्णौ ॥ इति हेमचन्द्र. ॥

तार्क्ष्यनायक । पु । गरुडे ॥ इतिराजनिर्घण्ट ॥

तार्क्ष्यप्रसव । पु । अश्वकर्णवृक्षे ॥

तार्क्ष्यशैलम् । न । सतुत्थया दार्व्या कृताञ्जने । रसगर्भे । रसाञ्जने ॥ तर्क्ष

शैले भवम्। अण्॥

तालिकम्। त्रि। हस्तनिर्मिते॥

तालीयीक। त्रि। हतीये॥ तीया ट्टीकक् स्वार्थे वा वाच्यः॥

ताल। पु। करतले॥ अङ्गुष्ठमध्यमाभ्यां समिते। विस्तृताभ्यामङ्गुष्ठमध्यमाभ्यां सम्मिते दीर्घपरिमाणविशेषे॥ तलस्येदम्। तल०। इत्यस्मेतिवण्॥ करास्फाले। करास्फोटे॥ कांस्यमयवाद्यभाण्डे॥ त्सरौ॥ तालद्रुमे। दीर्घपादपे। लेख्यपत्रे॥ पक्व तालफल पित्तरक्तश्लेष्मविवर्द्धनम्। दुर्जरं बहुमूत्रञ्च तन्द्राऽभिष्यन्दशुक्रदम्॥ तालमज्जा तरुणाः किञ्चिन्मदकरो लघुः। श्लेष्मलो वातपित्तघ्नः सस्नेहोमधुरः सरः॥ तालमज्जा तालफलवीजमज्जा। तालज तरुणं तोय मतीवमदकृन्मतम्। अम्लीभूतं तदा तत् स्यात् पित्तकृद्वातदोषहृत्॥*॥ मानविशेषे॥ यथा। तालो द्वादशभिर्जानुपरिणाहपरिभ्रमैरिति। हस्तेन जानुमण्डलपरिभ्रमणं यावत्या कालमात्रया क्रियते तावतीभिर्द्वादशभिस्तालाख्यः कालांशोज्ञेय॥*॥ गीतकालक्रियामाने। अयंस्वर इयत् कालगेयः इयत्कालं विलम्बितम् इयत्कालद्रुतम् इयत्काल मध्यमिति बोधयितुम् ईदृशैर्हस्तैरङ्गुल्याकुञ्चनप्रसारणादिक्रियाभि र्नर्त्तितव्यं गातव्यञ्चेत्ये वरूपेकालक्रिययोर्माने॥ कालस्य एकद्वित्रिमात्राद्युच्चारणा नियमितस्य क्रियायाः परिस्पन्दात्मिकायाः परिच्छेदहेतुस्तालः॥*॥ तस्योत्पत्तिर्यथा। गौरीश्वरयोर्नृत्येन तालो बभूव। तत्प्रकारश्च। क्रिया कालस्य। ईश्वरनृत्यस्य ताण्डवम् गौर्य्यानृत्यस्य लास्यमितिसंज्ञा। अर्थात् पुरुषनृत्यस्य ताण्डवम् नार्य्यानृत्यस्य लास्य मितिनाम। ताण्डवलास्ययो रादक्षरयो मेलनेनतालइतिसंज्ञा॥*॥ आदिगुरुत्रिकले (ऽ।)॥ तालयतितल्यते वा। चु०। पचाद्यच्। घञ् वा॥ न। हरिताले॥ तालीशपत्रे॥ दुर्गासिंहासने॥ तालफले॥ धनुषि॥ तालस्यविकारः। तालादिभ्योण्। तालाद्धनुषि। अन्यत्तालमयम्॥

तालकम्। न। द्वारपिधानसाधनयन्त्रे। ताला इतिभाषा॥ हरिताले॥ तुवरिकायाम्

तालकाभ. । पु। हरितवर्णे॥ त्रि। तद्वति॥

तालक्षीरकम्। न। तालसम्भूतशर्करायाम्…

तालकी । स्त्री । } तालजसुरायाम् ।
तालती । स्त्री । } ताडी इतिभाषा॥

तालध्वज । पु । बलदेवे ॥ तालो ले-
ख्यपचो ध्वजो ऽस्य ॥

तालनवमी । स्त्री । भाद्रशुक्लनवम्याम्॥

तालध्वजा । स्त्री । पुरीविशेषे ॥

तालपत्रम् । न । ताडङ्के । कर्णाभरण-
विशेषे । कर्णिकायाम् ॥ तालस्य प
त्रम् । स्वर्णरचितस्या पीदमेवनाम
॥ तालतरो पर्णे ॥

तालपत्रिका । स्त्री । तालमूल्याम् ॥

तालपत्री । स्त्री । मूषिकपर्ण्याम् । र
ण्डायाम् ॥ मधुरौषधौ ॥

तालपर्णम् । न । मुरानामगन्धद्रव्ये ॥

तालपर्णी । स्त्री । मुरानामनि गन्धव
स्तुनि । गन्धिन्याम् ॥ ताल.पर्णमस्या
। तालशब्द तालपर्णसदृशे लाच-
णिक । पाककर्णेतिङीष ॥ मधुरि
कायाम् ॥

तालपुष्पम् । न । प्रपौण्डरीके ॥ ता-
लद्रुकुसुमे ॥

तालभृत् । पु । बलदेवे ॥

तालप्रलम्बम् । न । तालजटायाम् ॥

तालमूलिका । स्त्री । तालमूल्याम् ।
मुसल्याम् ॥ तालोमूलमस्या । ताल
शब्दस्तालमूलसदृशे लाचणिक ।
पाककर्णेतिङीष् । स्वार्थे कन् ॥

तालमूली । स्त्री । तालमूलिकायाम् ।
दीर्घकन्दायाम् । मुसल्याम् ॥ ताल
मूलीतु विद्वद्भि मुसलीति निगद्य
ते । मुसली मधुरा वृष्या वीर्योष्णा
बृहणी गुरु. । तिक्ता रसायनी ह-
न्ति गुदजान्यनिल तथा ॥ ॥

ताललक्ष्मा । पु । बलदेवे ॥

तालवन्तम् । न । तालपत्रनिर्मिते व्य
जने ॥ यथा । परे ब्रह्मणिविज्ञाते
समस्तैर्नियमैरलम् । तालवृन्तन
किङ्कार्यं लब्धे मलयमारुते ॥ अस्य
वायोर्गुणा यथा । त्रिदोषशमनोवा
युर्लघुरस्य प्रकीर्त्तितइति ॥

तालवृन्तकम् । न । व्यजने ॥ तालस्ये
वहन्तमस्य । तालेकरतले वृन्तमि
ववन्धनमस्यवा ॥

ताल्यम् । त्रि । तालुजाते ॥ शरी
रावयवत्वात् यत् ॥

तालाख्या । स्त्री । मुरायाम् ॥

तालाङ्क । पु । बलभद्रे । प्रलम्बघ्ने ॥ ता
लोदृचविशेषो ऽङ्को ध्वजो ऽस्य॥
करपत्रे ॥ शाकभेदे ॥ महालक्षण
सम्पूर्णपुरुषे ॥ पुस्तके ॥ हरे ॥

तालावचर । पु । नटे ॥ इ०त्रि० ॥

तालि. । स्त्री । भूम्यामलक्याम् ॥

तालिक । पु । प्रसारिताङ्गुलिपाणौ ।
चपेटे । प्रतले ॥ लिखितस्यनिबन्ध

ने। काचनक्याम् ॥

तालिका। स्त्री। चपेटे ॥ तालमूल्याम् ॥ ताम्रवल्ल्याम् ॥

तालितम्। न। वाद्यभाण्डे ॥ तुलितपटे ॥ गुणे ॥

तालिश.। पु। शैले। पर्वते ॥

ताली। स्त्री। जटायाम्। वितुन्नकौषधौ। भुजआवला इतिभाषा ॥ तालद्रुमे ॥ आढक्याम्। तुवरिकायाम्। अरहर इतिभाषा ॥ द्वारोद्घाटनयन्त्रे ॥ तालमूल्याम्। ताम्रवल्ल्याम् ॥ तालजातसुरायाम्। ताडी इति भाषा ॥*॥ मध्याख्यच्छन्दोभेदे ॥ यथा। ताली सा निर्दिष्टा। उद्दिष्टो मो यत्र ॥ यथा। ज्ञानी ते जानीते। सासारूप्यं वैरूप्यम् ॥ अस्यनारीत्यपि सप्रोक्ताच्छन्दोमञ्जर्याम्। मोनारी ॥ तालयति। तल०। ण्यन्तादच्। गौरादित्वाज्जातित्वाद्वाङीष् ॥

तालीपत्रम्। न। तालीशे ॥

तालीशम्। न। तालीशपत्रे ॥ तालीशं लघु तिक्तोष्णं श्वासकासकफाऽनिलान्। निहन्त्यरुचिगुल्मामवह्निमान्द्यक्षयामयान् ॥ भूम्यामलक्याम् ॥

तालीशपत्रम्। न। तालीशख्याते वृक्षविशेषे। धात्रीपत्रे। शुकोदरे ॥ भूम्यामलक्याम् ॥

तालु। न। काकुदे। जिह्वेन्द्रियाधिष्ठाने स्वनाम्नैव प्रसिद्धे ॥ तदन्त्य नेन वर्णाः। तृ०। चोरश्चल इति ज्ञेयाः ॥ तालयति। तल०। चु०। मृगय्वादित्वात् कुर्वा ॥

तालुकम्। न। तालुनि ॥ स्वार्थेयावादित्वात् कन् ॥

तालुजिह्वः। पु। कुम्भीरे ॥

तालूर.। पु। आवर्त्ते ॥

तावक'। त्रि। त्वदीये ॥ तवायम्। तस्येदमित्यण्। तवकममकावेकवचने इति तवकादेश.। स्त्रियां तावकी ॥

तावकीन'। त्रि। त्वदीये ॥ तवायम्। युष्मदस्मदोरन्यतरस्यांखञ्चेति खञ्। पश्चात्तवकादेश' ॥

तावत्। अ। माने ॥ अनुक्रमे ॥ अवधारणे ॥ सम्भ्रमे ॥ परिच्छेदे ॥ कार्त्स्न्ये ॥ अधिकारे ॥ अवधौ ॥ तत् परिमाणमस्य। तद्धिता इति बहुवचनेनान्येऽनुक्ताअपि तद्धिता ज्ञापिता'। तेन डावतुप्रत्यय ॥ तदाद्यर्थे ॥ यथा। भर्त्तापितावत् क्रथकैशिकानामितिरघु ॥

तावान्। त्रि। तत्परिमाणविशिष्टे ॥ ॥ तत् परिमाणमस्य। यत्तदेतेभ्य

परिमाणे इति वतुप्। आसवं नान्दृक्ष्यामम् ॥
तावतिथ । त्रि । तावताम् पूरणे ॥ डट् । वतोरिथुक् ॥
तावरम् । न । चापगुणे ॥ इतिभूरि० ॥
ताविष । पुं । स्वर्गे ॥ समुद्रे ॥ काञ्चने ॥ तवेति सौत्रो धातुः । तवेर्णिद्वेतिटिषच् ॥
ताविषी । स्त्री । चन्द्रकन्यायाम् ॥ भूमौ ॥ नद्याम् ॥ देवकन्यायाम् ॥ टित्त्वान्ङीप् ॥
तावुरि । पु । वृषराशौ ॥ इतिश्ब्द० ॥
तालून. । पु । ऋणे ॥
तिक्त । पु । तीता इतिप्रसिद्धे रसे ॥ तिक्तः शीतः तृषामूर्च्छाज्वरपित्तकफान् जयेत् । रुच्यः स्वयमरोचिष्णुः कण्ठकन्यासशोधनः ॥ सुगन्धे ॥ वरुणद्रुमे ॥ कुटजे ॥ न । पर्पटौषधौ ॥ त्रि । तिक्तरसान्विते ॥ तेजयति । तिज० । सामान्यापेक्षज्ञापकात् क्षुरादीनाणिजभावे गत्यर्थाकर्मके तिक्तः ॥
तिक्तक । पु । पटोले ॥ भूमिनिम्बे । चिरतिक्ते । चिरायता इतिभाषा ॥ कृष्णखदिरे ॥ निम्बे ॥ इङ्गुदीवृक्षे ॥ तिक्तार्थे ॥ तिक्तएव । स्वार्थे कन् ॥
तिक्तकन्दिका । स्त्री । गन्धपत्रायाम् ॥
तिक्तकर्कोटकी । स्त्री । वन्ध्याकर्कोटिकायाम् । नागदन्त्याम् । बाँझककरोल इतिभाषा ॥
तिक्तका । स्त्री । तिक्तालाबाम् । कटुतुम्ब्याम् ॥
तिक्तगन्धिका । स्त्री । वराहक्रान्तायाम् ॥
तिक्तगुञ्जा । स्त्री । करञ्जे । क्षुद्ररसायाम् ॥
तिक्ततण्डुला । स्त्री । पिप्पल्याम् ॥
तिक्ततुण्डी । स्त्री । कटुतुण्डीलतायाम् ॥
तिक्ततुम्बी । स्त्री । कटुतुम्ब्याम् ॥ तिक्ताचासौतुम्बीच ॥
तिक्तदुग्धा । स्त्री । अजशृङ्ग्याम् ॥ क्षीरिण्याम् ॥
तिक्तद्रुम । पु । पञ्चतिक्ते ॥
तिक्तधातु । पु । पित्ते ॥
तिक्तपत्र । पु । कर्कोटके ॥ तिक्तानि पत्राणि यस्य ॥
तिक्तपर्वा । स्त्री । हिलमोच्याम् ॥ गुडूच्याम् ॥ मधुयष्ट्याम् ॥ दूर्वायाम् ॥
तिक्तपुष्पा । स्त्री । पाठायाम् ॥
तिक्तफल । पु । कतकवृक्षे ॥
तिक्तफला । स्त्री । यवतिक्तायाललतायाम् ॥ वार्त्ताक्याम् ॥ षड्भुजायाम् ॥

इति राजनिर्घण्टः ॥

तिक्तभद्र । पु । पटोले ॥

तिक्तमरिच । पु । कतकवृक्षे ॥

तिक्तरोहिणिका । स्त्री । } कटुका
तिक्तरोहिणी । स्त्री । } याम् । क
टुक्याम् ॥ तिक्ताचासौरोहिणीच ॥

तिक्तवल्ली । स्त्री । मूर्वालतायाम् ॥

तिक्तबीजा । स्त्री । कटुतुम्ब्याम् ॥

तिक्तशाक । पु । खदिरवृक्षे ॥ वरुण द्रुमे ॥ तिक्तःशाकोऽस्यपत्राणाम् । वरुणस्य शाकमध्ये पाठात् ॥ पत्रसु न्दरवृक्षे ॥

तिक्तसार' । पुं । खदिरे ॥ तिक्त'सारो ऽस्य ॥ न । दीर्घरोहिषकतृणे ॥

तिक्ता । स्त्री । कटुक्याम् ॥ पाठायाम् ॥ यवतिक्तायां लतायाम् ॥ षड्भु जायाम् ॥ छिक्कन्याम् ॥ टाप् ॥

तिक्ताख्या । स्त्री । कटुतुम्ब्याम् ॥

तिक्ताङ्गा । स्त्री । पातालगरुडीलता याम् ॥

तिग्मम् । न । तीक्ष्णे । पैना इतिभाषा ॥ त्रि । तद्वति ॥ तेजयति । तिज० । युजिरुचितिजां कुश्चेतिमक् कवर्ग श्चान्तादेश ॥

तिग्मरश्मि । पु । सूर्ये ॥ तिग्मारश्म योऽस्य॥

तिग्मांशु. । पु । सूर्ये ॥ तिग्मा खराः अंशवोऽस्य ॥

तिजिल । पु । चन्द्रे ॥ तेजते । तिज० । गुपादिभ्य किदितीलच् ॥

तितउी । स्त्री । निवृत्ति ॥ सतीलायाम् ॥

तितउ । पु । चालन्याम् ॥ तनोति तन्यते वा । तनु० । तनोतेर्डउ स न्वच्च । सन्वद्भावाद्द्वित्वमभ्यासस्ये त्वञ्च । चुरच्छिद्रसमोपेत चालन तितउस्मृतमित्युक्तो क्लीवत्वमपि ॥

तितिक्षा । स्त्री । क्षान्तौ । क्षमायाम् । परापराधसहने ॥ सर्वद्, खसह ने । शीतोष्णमानापमानलाभाला भशोकहर्षादिद्वन्द्वसहिष्णुतायाम् ॥ अहोतितिक्षामाहात्म्यमश्नोदानफ ल मवत् । यदागतोहरिश्चन्द्रोम हेन्द्र स्यसलोकताम् ॥ तिजेः क्षमा यां सन्नन्तादमप्रत्ययेटाप् ॥

तितिक्षित: । त्रि । क्षान्ते । सोढे ॥ ति तिक्षासञ्जाताऽस्य । तारकादित्वा त् इतच् ॥

तितिक्षु । त्रि । क्षमान्विते । क्षान्ते । सहिष्णौ । जीवनविच्छेदव्यतिरि क्तशीतादिद्वन्द्वसोढव्यावितिक्षाख्या तार ॥ तितिक्षते । तिजे क्षमाया म् । गुप्तिज्किद्भ्य.सन् । शितिक्षया शीत । सनाशंसभिक्ष, ॥

तितिभ. । पु । इन्द्रगोपकीटे ॥ इ०हे० ॥

तितीर्षु । त्रि । तरितुमिच्छौ ॥ तर ते सन्नन्तादुप्रत्यय ॥

तिन्तिडीक । पु । वृक्षविशेषे ॥ औषधिविशेषे ॥ तिम्यति । तिम आर्द्रीभावे । पर्फरीकादयश्चेति तिमेर्मकारस्यडकारोऽभ्यासस्यनुक ईकन् प्रत्ययश्च । तिन्तिडीचिञ्चाम्लिकेत्यमरेतुशब्दान्तरम् । तथाच । तिन्तिडी चाम्लिका चिञ्चा तिन्तिडीका कपिप्रियेति वाचस्पति ॥

तित्तिर । पु । तित्तिरिपक्षिणि । तीतर इतिभाषा ॥ तित्ति इतिशब्द राति । रा० । आतोनुपेतिक ॥

तित्तिरि । पु । तित्तिरे ॥ तित्तिरि कृष्णवर्णः स्यात् सतुगौर कपिञ्जलः ॥ तित्तिरिर्वर्णदो ग्राही हिक्का दोषत्रयापह । श्वासकासज्वरहरस्तस्माद्गौरोऽधिको गुणै. ॥ तित्ति इति शब्दं रौति । रु० । बाहुलकात् कि ॥ मुनिविशेषे ॥ यजुश्शाखाविशेषे ॥

तिथ । पु । कामे ॥ काले ॥ अनले ॥ तेजयति । तिज० । तिथपृष्ठगूथयूथप्रोथा इतिथक् तिजेर्जलोपश्च निपातनात ॥

तिथि. । स्त्री । पु । प्रतिपदादिपञ्चदशसु । चन्द्रकलाक्रियारूपायाम् । चन्द्रकलाक्रियोपलक्षिते वा काले ॥ अतति । अत० । ऋतन्यञ्जीत्यतेरिथिन् । पृषोदरादित्वात् अलोप ॥ यद्वा । तनोति विस्तारयति चन्द्रकलाय कालविशेष सा तिथि ॥ चन्द्रकलया तन्यते इति वा ॥ उक्तञ्च । तन्यन्ते कलया यस्मात् तस्मात् तास्तिथय स्मृता इति ॥ अमादिपौर्णमास्यन्ता याएव शशिन कला । तिथयस्ता समाख्याता षोडशैववरानने ॥ तत्रप्रथमकलाक्रियारूपा प्रतिपत् । एवद्वितीयादिकलाक्रियारूपाद्वितीयादि । साचवृद्धिरूपाचेत् शुक्ला ह्रासरूपाचेत् कृष्णा । यथा । तत्रपक्षावुभौ मासे शुक्लकृष्णौ क्रमेणहि । चन्द्रवृद्धिकर शुक्ल कृष्णश्चन्द्रक्षयात्मक ॥ पक्षयोस्तास्तु तिथय क्रमात् पञ्चदश स्मृता । दर्शान्ता कृष्णपक्षे ता पूर्णिमान्ताश्च शुक्लके ॥ * ॥ गोभिलोक्ताभावास्या घटकडपर्यंषोभावापन्नसमस्तपातन्यायेन राश्येकावच्छेदेन सहावस्थानयुक्ताकोमण्डला चन्द्रमण्डलस्य राशिद्वादशांशद्वादशांशभोगात्मकनिर्गमरूपवियोगेन शुक्ला या प्रतिपदादितत्तत्तिथेरुत्पत्ति । एवगोभिलोक्तपौर्णमासीघटकस-

समराश्यवस्थानरूपपरमनियोगा-नन्तरमर्कमण्डलप्रवेशाय चन्द्रम-ण्डलस्य राशिद्वादशांशद्वादशा शभो गात्मकप्रवेशरूपसन्निकर्षेण कृष्णा या स्तत्तिथेश्चोत्पत्तिरिति। यथा । अर्कादिनि' सृत प्राचीं यद्याच्य हरह शशी। भागैर्दादशभि स्तत् स्यात् तिथिश्चान्द्रमसदिनम्॥ चि शांशक स्तथाराशेभोग इत्यभिधी यते। आदित्यादिप्रकृष्टस्तु भागद्वा दशक यदा॥ चन्द्रमा स्यात तदा-रामतिथिरित्यभिधीयते॥ * ॥ सा देवकृत्ये पूर्वाह्णयुताशाह्या। एका दश्युपवासातिरिक्तस्थले सर्वत्रास्त न्यव्यापिनीग्राह्या॥ * ॥ पञ्चदश-सङ्ख्यायाम॥ पञ्चदशाङ्के॥

तिथिक्षय. । पु। अमावास्यायाम्॥ इ तिशब्दार्थकल्पतरु॥ तिथे क्षये॥

तिथिप्रणी । पु। निशाकरे। चन्द्रे॥

तिथी। स्त्री। प्रतिपदादितिथिषु॥

तिनाशक । पु। तिनिशवृक्षे॥

तिनिश।पु। स्यन्दनद्रुमे। अतिमुक्त के। वञ्जुले। तिनास इतिसाद्दन इतिच प्रसिद्धे वृक्षे॥ तिनिश श्लेष्म पित्तास्रमेद कुष्ठप्रमेहजित्। तुव र. श्वित्रदाहघ्नो व्रणपाण्डुकृमिप्रणु त्॥ अतिशयेन नेशति। णिशसमा धौ। इगुपधेतिक'॥ यद्वा। अति-क्रान्तोनिशा। अत्यादय इतिसमास। पृषोदरादि॥

तिन्तिड। पु। दैत्यविशेषे॥ चिञ्चा याम्॥ वृक्षाम्ले॥

तिन्तिडिका। स्त्री। चिञ्चायाम्॥ वृ क्षाम्ले॥

तिन्तिडी। स्त्री। चिञ्चायाम्। अम्लिका याम्। अम्ली इति इम्ली इतिचभाषा॥ अम्लिकाया'फल पक्वं मर्दितं वारिणा दृढम्। शर्करामरिचोन्मिश्रं लवङ्गे न्दुसुवासितम्॥ अम्लिकाफलसम्भूतं पानक वातनाशनम्। पित्तश्लेष्मकरं किञ्चित् सुरुच्य वह्निबोधकम्॥ डि क्ले॥ चुक्रे॥ तिम्यति। तिम आर्द्रीभा वे। अलीकादयश्चेतिनिपातित'॥

तिन्तिडीकम्। न। वृक्षाम्ले। चुक्रे॥ तिम्यति। तिम०। अलीकादयश्चेति साधु॥ वह्न्यम्बरे॥ तिन्तिड्याम्॥

तिन्तिडीका। स्त्री। चिञ्चायाम्॥

तिन्तिडीचूतम्। न। चुञ्चुर्याम्। ति न्तिडी वीजैर्विहितैश्चूते। आकरी वाकरी इतिभाषा॥

तिन्तिला। स्त्री।
तिन्तिलिका। स्त्री।
तिन्तिली। स्त्री।
तिन्तिलीका। स्त्री। } चिञ्चायाम्। तिन्तिड्याम्॥

तिन्दिश. । पु । डिण्डिशे ॥

तिन्दु । पु । तिन्दुके । तेंदू इतिभाषा ॥ तिम्यति । तिम० । मृगय्वादित्वात् कु ॥

तिन्दुक । पु । स्फूर्जके । कालस्कन्धे । शितिसारके । तिन्दौ । तेंदू इति भाषा ॥ स्यादामं तिन्दुकं ग्राहि वातलं शीतलं लघु । पक्वं पित्तप्रमेहास्रश्लेष्मघ्नं मधुरं गुरु ॥ ततसारं चिररोगजित् ॥ विश्वतिन्दुकमप्येवं विशेषात् ग्राहिशीतलम् ॥ न । कर्षपरिमाणे । इति वैद्यकपरिभाषा ॥ तिन्दौ संज्ञायां कन् ॥

तिन्दुकि । स्त्री । तिन्दुके ॥

तिन्दुकिनी । स्त्री । आवर्त्तक्याम् ॥

तिन्दुकी । स्त्री । तिन्दुके ॥ तिम्यति । तिम० । बाहुलकात् दुकष् गुणाभावश्च । ङीष् ॥

तिन्दुल । पु । तिन्दुकवृक्षे ॥

तिमि । पु । समुद्रे ॥ महाकाये सामुद्रे मत्स्यविशेषे ॥ अस्तिमत्स्य स्तिमिर्नाम शतयोजनविस्तरइतिदर्शनात् । अन्तरामायणे रामवाक्यम् । अस्तिमत्स्यस्तिमिर्नाम तथाचास्ति तिमिङ्गिलः । तिमिङ्गिलगिलोप्यस्ति-तद्गिलोप्यस्तिराघवेति ॥ ताम्यति । तमुकाङ्क्षायाम् । क्षमितमिशति- स्तम्भामतइश्चेति इन् ॥

तिमिकोष । पु । अब्धौ ॥

तिमिङ्गिल । पु । मत्स्यविशेषे ॥ तिमिंगिरति । गॄनिगरणे । मू० क. । अचिविभाषेतिलत्वम् । गिलेऽगिलस्येतिमुम् ॥

तिमिङ्गिलगिल । पु । महामत्स्यविशेषे ॥ गिरति । गॄ० । मूलविभुजादित्वात् क । लत्वम् । गिलङ्गिलतीतिगिलगिल । तिमीनां गिलगिल । गिलेगिलेचेतिमुम् ॥

तिमित । त्रि । निश्चले ॥ क्लिन्ने ॥ तिम्यतिस्म । तिम० । अकर्मकत्वात् कर्त्तरिक्त ॥

तिमिरम् । न । अन्धकारे । ध्वान्ते ॥ नेत्रामयान्तरे ॥ तल्लक्षणं । यथा । तिमिराख्य. सवैदोषश्चतुर्थं पटलङ्गत । रुणद्धि सर्वतोदृष्टिं लिङ्गनाशमत परम् ॥ * ॥ भुक्त्वा पाणितलंघृष्ट्वा चक्षुषोर्यदि दीयते । अचिरेणैवतद्वारि तिमिराणि व्यपोहति ॥ तिम्यति । तिम० । इषिमदीतिकिरच् ॥

तिमिरच्छित् । पु । }
तिमिररिपु. । पु । } सूर्य्ये ॥
तिमिरशात्रव. । पु । }

तिमिष । पु । ग्राम्यकर्कट्याम् ॥ इति

विकारविशेष ॥ नाटके ॥

तिमी । स्त्री । तिमिमत्स्ये ॥ इ०वि० ॥

तिरश्ची । स्त्री । पशौ पक्षिणश्चस्त्रि याम् ॥

तिरश्चीन । त्रि । तिर्य्यग्भते ॥ विभाषा ञ्चेरदिक्स्त्रियामिति स्वार्थे ख ॥

तिरस् । अ । अन्तर्द्धौ ॥ तिर्य्यगर्थे ॥ अवज्ञायाम् । तिरस्कारे ॥ तरति । तॄ० । असुन् । क्वचिदपवादविषये प्युत्सर्गोऽभिनिविशते इति गुणविषये इर् ॥

तिरस्करिणी । स्त्री । जवनिकायाम् । व्यवधानपट्याम् । कनात चिकसिर् की इत्यादिभाषा ॥ तिरस्करोति तिरस्क्रियते ऽनया वा । ग्रह्यादित्वा णिनि. । निपातनाद् वृद्ध्यभाव । स ञ्ज्ञापूर्वकत्वाद्वा ॥ देवीविशेषे ॥

तिरस्कार । पु । अधिक्षेपे । अनादरे ॥

तिरस्कृत. । त्रि । अनादृते ॥

तिरस्कृति । स्त्री । दोषस्मृत्याधिक्कारे । उपेक्षायाम् । अनादरे ॥

तिरस्क्रिया । स्त्री । अनादर ॥ तिरस्करणम् । कृञ शश्चेति भावे श । तिरसोऽन्यतरस्यामिति सत्वम् ॥

तिरिटि । पु । इक्षुग्रन्थौ ॥

तिरिम । पु । शालिविशेषे ॥

तिरिय । पु । शालिभेदे ॥

तिरीट । पु । लोध्रे ॥ न । स्वर्णे ॥ किरीटे ॥ तीर्य्यते मस्तमनेन । तॄ० । कृतॄकृपिभ्य कीटन् । इत्त्वरपरत्वे ॥

तिरीटक । पु । रक्तलोध्रे ॥ स्वार्थे क ॥

तिरोधानम् । न । अन्तर्द्धाने । व्यवधायाम् । अपिधाने ॥ तिर पूर्वाड्डुधाञो ल्युट् । तिरोन्तर्द्धाविति गतित्वेकुगतीतिसमास ॥

तिरोभाव । पु । पिधाने ॥ प्रलये ॥

तिरोभूत । त्रि । अन्तर्हिते ॥

तिरोहित । त्रि । अन्तर्हिते ॥ छन्ने ॥ नष्टे ॥ तिरोधीयतेस्म हितेतिस्मवा । डुधाञ धारणपोषणयो हिग तौ वा । गत्यर्थेति कर्त्तरि क्त । धाञस्तु कर्मणि क्त । भावक्तान्ताभ्यामर्श आद्यच्वा ॥

तिर्य्यक्पाती । त्रि । मार्गविप्रसारिणि । कुटिलवर्त्ती ॥

तिर्य्यक्स्रोता । पु । पशुपक्ष्यादौ ॥ सच ब्रह्मणोऽष्टम सर्ग । यथा । तिरश्चामष्टम सर्ग सोऽष्टाविंशद्विधोमत ॥ तेषां लक्षणं यथा । अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनइति । अविद स्वसनादिज्ञानशून्या । भूरितमस आहारादिमात्रनिष्ठा । घ्राणज्ञा घ्राणेनैवेष्टमर्थं जानन्ति । हृदि अवेदिन दीर्घानुसन्धानशून्या -

॥ अष्टाविंशतिभेदा यथा । गौ रजोमहिष. कृष्ण. शूकरो गवयो-रुरु । द्विशफा पशवश्चेमे अविरुष्ट्रश्चसत्तम ॥ खरो श्वो १श्वतरो गौर शरभश्चमरीतथा । एते चैकशफा चत्त शृणुपञ्चनखान् पशून् ॥ श्वाशृगालोवृकोव्याघ्रोमार्जार शशशल्यकौ । सिंह कपिर्गज कूर्मौ गोधाच मकरादय ॥ कङ्कगृध्रवकश्येनभासभल्लूकवर्हिण । हंससारसच क्राह्वकाकोलूकादय खगा. ॥ इति श्री भागवतम् ॥ गवादयउष्ट्रान्ताद्विशफाद्विखुरान३ । खरादयश्चमर्यन्ता एकशफा षट् । श्वादयोगोधान्ता पञ्चनखाद्श । एते भूचरा सप्तविंशति । मकरादयोजलचरा कङ्कादय खगा अभूचरस्त्वेनैकीकृत्यगणिता । एवमष्टाविंशति भेदान् वदन्ति । अन्येषामपितिर्यक्प्राणिनामयथाय थमेतेष्वन्तर्भाव । इतिश्रीधरस्वामिन ॥

तिर्य्यगुड्डीनम् । न । पक्षिणांतिर्यग्गमने ॥

तिर्य्यग्यान । पु । कर्कटे । कुलीरे ॥

तिर्य्यङ्मुख । पु । नक्षत्रविशेषेषु ॥ अश्विनी रेवती हस्ताचित्रे स्वातिपुनर्वसू । ज्येष्ठामृगा नुराधाश्च नव तिर्य्यङ्मुखा स्मृता ॥

तिर्य्यक् । अ । वक्रे । साचि ॥ निरुद्धार्थे ॥ तिरोर्थे ॥

तिर्य्यञ्च् । त्रि । विहङ्गादौ ॥ पशौ ॥ वक्रगामिनि ॥ तिर्यगञ्चति । तिरस स्तिर्यलोप इति तिरि ॥ स्त्रियां तिरश्ची ॥

तिर्य्यक् । पु । पशौ ॥ खगादौ ॥

तिल । पु । स्वनामाख्यप्रसिद्धे होमधान्ये । पापघ्ने । पितृतर्पणे ॥ तिल कृष्ण सितो रक्त सवर्णोन्यस्तिल स्मृत ॥ तिलो रसेकटु स्तिक्तो मधुर स्तुवरो गुरु । विपाके कटुक स्वादु स्निग्धोष्ण कफपित्तकृत् ॥ वल्य केश्यो हिमस्पर्शस्त्वच्य स्तन्योव्रणेहित' । दन्त्यो ऽल्पमूत्रकृद् ग्राही वातघ्नो ऽग्निमतिप्रद ॥ कृष्ण श्रेष्ठतम स्तेषु शुक्लो मध्यम सित । अन्य हीनतरा प्रोक्तास्तज्ज्ञै रक्तादयस्तिला ॥ तिलस्यफलम् तिल । अवयवेचप्राणीत्यण् । तस्यफलपाके तिलुपि युक्तवद्भाव ॥ तिलकाल्के ॥

तिलक । पु । पुष्पवृक्षविशेषे । क्षुरके । श्रिरपुष्प्याम् । छिन्नरुहे । मृतजीवे । वासन्तसुन्दरे ॥ तिलक कटुक पाके रसेचोष्णो रसायन । कफकुष्ठकृमीन् वस्तिमुखदन्तगदान्

हरेत् ॥ तिलति । तिलस्नेहने । क्वुन् भिल्लिपसन्नयो । तिलइवेति वा। कन् ॥ तेलति । तिलगतौ वा । इगुपधेतिक । स्वार्थेकन् वा ॥ अश्वविशेषे ॥ रोगविशेषे ॥ तिलकालके ॥ ध्रुवकप्रभेदे ॥ यथा । पञ्चविंशति वर्णाड्घ्रिस्तिलकोध्रुवको भवेत् । इष्टाञ्चतपुटे तालेरसेवीरे ऽद्भुते पिवेति ॥ मरुवके ॥ न । सैावर्चले ॥ क्लोम्नि ॥ रुचके । मातुलुङ्गे ॥ पु । न । स्वनामाप्रसिद्धे विशेषके । चन्दनादिना ललाटादिद्वादशाङ्गेषु कृते चिह्नविशेषे । तमालपत्रके ॥ शिवागमेदीक्षितैस्तु धार्यंतिर्यक्त्रिपुण्ड्रकम् । विष्णवागमेदीक्षितस्तु ऊर्द्ध्वपुण्ड्रंविधारयेत् ॥ ऊर्द्ध्वपुण्ड्रंद्विजः कुर्यात् क्षत्रियाणांतथैवच । वैश्यानांतुतथाविप्र शूद्रादेर्मण्डलाकृतम् ॥ अच्छिद्रमूर्द्ध्वपुण्ड्रन्तु ये कुर्वन्ति-जनाधमाः । तेषांललाटे सततंशुन पादो न सशय ॥ इष्टाभाले-द्विजातीनामच्छिद्रमूर्द्ध्वपुण्ड्रकम् । कार्ष्णैः कृष्णस्मृतिकृत्त्वावल्लेयाच्छाद्येन्मुखम् ॥ ललाटे दक्षिणे ब्रह्मा वसेद्वामे महेश्वर । मध्येविष्णुर्वसेन्नित्य तस्मान्मध्यं न लेपयेत् ॥ * ॥ काम्य नैमित्तिक नित्यं यत्किञ्चित्कर्मनारद । वर्णाश्रमाणां तन्नास्ति स्नानान्ते तिलकं विना ॥ त्रि । प्रधाने ॥

तिलकटम् । न । तिलानांरजसि ॥ अलाबूतिलोमाभ्राम्योरजस्युपसङ्ख्यानमितिकटच् ॥

तिलकल्क । पु । पिण्याके । खल इति भाषा ॥

तिलका । स्त्री । हारप्रभेदे ॥ गायत्रीछन्दोभेदे । सगणद्वितयं भवतीह यदा । रसवर्णपदातिलकेतिसदा ॥ यथा । वनमालिकया सकलालितया । पुनरेतिकथ ममदृष्टिपथम् ॥

तिलकालक । पु । गात्रस्थतिले ॥ तिलइवकालकः ॥ रोगविशेषे । कृष्णानितिलमात्राणि नीरुजानिसमानि च । वातपित्तकफोद्रेकात् तान्विद्यात् तिलकालकान् ॥

तिलकाश्रय । पु । ललाटे ॥

तिलकिट्टम् । न । पिण्याके । खल इति खली इतिच भाषा ॥

तिलकी । स्त्री । सतिलके । तिलकयुक्ते ॥ शिखीतिलकी कर्मकुर्य्यादिति स्मृतिः ॥

तिलचित्रपत्रक । पु । तैलकन्दे ॥

तिलचूर्णम् । न । चूर्णीकृततिलेषु । तिलकल्के । पलले । तिलकुट इति

भाषा ॥

तिलतण्डुलकम् । न । आलिङ्गने ॥ तिलमिश्रिततण्डुलेषु ॥

तिलतैलम् । न । तिलानां स्नेहे ॥ स्नेहे तैलच् ॥ पश्चात्सगुणाँ स्नेहे ॥

तिलधेनु । स्त्री । दानाय तिलनिर्मितायां धेनौ ॥

तिलपर्ण । पु । श्रीवेष्टे ॥ न । चन्दने ॥ तिलतरुपर्णे ॥

तिलपर्णिका । स्त्री । रक्तचन्दने ॥

तिलपर्णी । स्त्री । रक्तचन्दने ॥ श्रीवासे ॥ सिह्लके ॥ मलयजे ॥ इति हेमचन्द्रः ॥ तिलस्येवपर्णान्यस्या । पाककर्णेतिङीष् ॥ यद्वा । तिलपर्णीमदीआकारोऽस्या ॥

तिलपिञ्ज । पु । निष्फलतिलवृक्षे । तिलपेजे ॥ निष्फलस्तिलः । तिलान्निष्फलात्पिञ्जपेजौ ॥

तिलपेज. । पु । तिलपिञ्जे ॥ निष्फलस्तिलः । पेज ॥

तिलमयूर । पु । मयूरविशेषे । गुरुपटके ॥

तिलरस । पु । } तिलतैले ॥
तिलस्नेह । पु । }

तिलाङ्कितदल । पु । तैलकन्दे ॥

तिलापत्या । स्त्री । कृष्णजीरके ॥

तिखितस. । पु । सर्पविशेषे । गोनसे ॥

तिलगतौभ्वादिः । तिलस्नेहने तुदादि । तेलनम् तिल् । स० क्विप् । तिलमेति । इण्० । क्विप् तुक् । तिलित् तिलित इति । षोन्तकर्मणि । क ॥ यद्वा । तेलनम् तिलिः । कृष्यादित्वादिक् । तिलि त्सरति । त्सरच्छद्मगतौ । अन्येभ्योपीतिड ॥

तिलोत्तमा । स्त्री । स्वर्वेश्यायाम् ॥ अस्या नामकारणं महाभारते । तिलतिलं समानीय रत्नानां यद्विनिर्मिता । तिलोत्तमेति तत् तस्याना मचक्रे पितामह ॥

तिलोदनम् । न । कृशरे ॥

तिल्यम् । न । तैलीने । तिलक्षेत्रे ॥ तिलानाश्चवनङ्क्षेत्रम् । विभाषा तिलमाषोमाभङ्गाणुभ्य इतिपक्षेयत् ॥ तिलेभ्योहितं वा । खलयवमाषतिल इषब्रह्मणश्चेति यत् ॥

तिल्व । पु । लोध्रे ॥ तिलच्यनेनाङ्गम् । तिलस्नेहने । उल्वादयश्चेतिसाधु ॥ श्वेतरक्तलोध्रयो ॥

तिल्वक । पु । लोध्रे ॥ स्वार्थे क ॥

तिष्ठद्गु । अ । दोहनकाले ॥ तिष्ठन्तिगावो यस्मिन् काले । तिष्ठद्गुप्रभृतीनिचेत्यव्ययीभावोनिपातनाच्छत्रादेश. प्रथमासमानाधिकरणे शत्रादेशस्या सम्भवात् ॥

तिष्य । पु । पुष्यनक्षत्रे ॥ तुष्यन्त्यऽस्मिन् । तुष० । सूर्यतिष्येतिनिपातनात्क्यप् उपधायाह्रस्वश्च ॥ त्विषति वा । त्विषदीप्तौ । अघ्न्यादित्वात् यक् ॥ कलियुगे ॥ यथा । सत्सम्प्रदायप्रथनाय तिष्ये शिष्यैश्च तुभिं सहयोवतीर्णः । उक्तो बृहत् शङ्करतन्त्रराजे श्रीशङ्कराचार्यगुरुतमीडेइति ॥ त्रि । तिष्येजाते ॥ अणोलुक् ॥

तिष्यक । पु । पौषमासे ॥

तिष्यपुष्या । स्त्री । आमलक्याम् ॥

तिष्यफला । स्त्री । धात्र्याम् । आमलक्याम् ॥ नित्यमामलकैर्लक्ष्मीरितिश्रवणात् तिष्ये मङ्गल्यं फलमस्या । अजादित्वात् टाप् ॥ तिष्ये कलियुगे फलमस्या सेवयेतिवा ॥

तिष्या । स्त्री । आमलक्याम् ॥

तीक्ष्ण । पु । यवाग्रजे । यवक्षारे ॥ श्वेतकुशे ॥ कुन्दुरुके ॥ न । सामुद्रलवणे ॥ विषे ॥ लौहे ॥ आजौ । युद्धे ॥ मरणे ॥ खरे । तिग्मे ॥ चव्यके ॥ शस्त्रे ॥ शीघ्रे ॥ मुष्कके ॥ नक्षत्रविशेषाणां गणे ॥ शक्राह्विशिवमूलाश्च मन्दाश्च तीक्ष्ण दारुणे ॥ त्रि । तिग्मे मुखिनि ॥ आत्मत्यागिनि ॥ निरालसे ॥ सुबुद्धौ ॥ योगिनि ॥ तेजयति । तेज्यते अनेनवा । तिज० । तिजेर्दीर्घश्चेति क्स्नप्रत्ययो दीर्घश्च ॥ क्रूरहृदये ॥

तीक्ष्णक । पु । गौरसर्षपे ॥ मुष्कके ॥

तीक्ष्णकण्टक । पु । कितवद्रुमे । धत्तूरे ॥ इङ्गुद्याम् ॥ करीरे ॥ बर्बुरे ॥

तीक्ष्णकण्टका । स्त्री । कन्थारीवृक्षे ॥

तीक्ष्णकन्द । पुं । पलाण्डौ ॥

तीक्ष्णकर्म्मा । त्रि । तीक्ष्णचेष्टे । आयःशूलिके ॥

तीक्ष्णकल्क । पुं । तुम्बुरुवृक्षे ॥

तीक्ष्णकान्ता । स्त्री । मङ्गलचण्डिका प्रभेदे ॥

तीक्ष्णगन्ध । पुं । शोभाञ्जने ॥ कुन्दुरौ ॥ रक्ततुलस्याम् ॥ तीक्ष्णोगन्धोऽस्य ॥ गन्धके ॥

तीक्ष्णगन्धक । पुं । शोभाञ्जने ॥ तीक्ष्णोगन्धोऽस्य । शेषाद्विभाषेति कप ॥

तीक्ष्णगन्धा । स्त्री । वचायाम् ॥ राजिकायाम् ॥ श्वेतवचायाम् ॥ कन्थार्याम् ॥ सूक्ष्मैलायाम् ॥ जीवन्त्याम् ॥ तीक्ष्णोगन्धोयस्या ॥

तीक्ष्णतण्डुला । स्त्री । पिप्पल्याम् ॥ तीक्ष्णास्तण्डुला यस्या ॥

तीक्ष्णतैलम् । न । सुरायाम् ॥ स्नुहीक्षीरे ॥ सर्जरसे ॥

तीक्ष्णत्वम् । न । आशुकारित्वे । तीक्ष्णतायाम् ॥ भावेत्व. ॥

तीक्ष्णदंष्ट्र । व्याघ्रे ॥ भैरवे ॥ त्रि । तिग्मदंष्ट्रावति ॥

तीक्ष्णपत्र । पु । तुम्बुरुवृक्षे ॥

तीक्ष्णपुष्पम् । न । लवङ्गे ॥

तीक्ष्णपुष्पा । स्त्री । केतक्याम् ॥

तीक्ष्णफल । पु । तुम्बुरुवृक्षे ॥

तीक्ष्णमूल । पु । कुलञ्जने ॥ शिग्रौ ॥

तीक्ष्णरस । पुं । यवक्षारे ॥ तीक्ष्णो रसोऽस्य ॥

तीक्ष्णशूक । पु । यवे ॥ तीक्ष्ण शूकोऽस्य ॥

तीक्ष्णसारा । स्त्री । शिंशपायाम् ॥

तीक्ष्णा । स्त्री । वचायाम् ॥ सर्पकङ्कालिकौषधौ ॥ कपिकच्छ्वाम् ॥ महाज्योतिष्मत्याम् । अत्यम्लपर्ण्याम् ॥

तीक्ष्णायसम् । न । तीखाइतिगौड प्रसिद्धे लोहविशेषे । शस्त्रायसे ॥

तीर. । पु । त्रपुणि । सीसके ॥ न । कूले । रोधसि ॥ गङ्गातीरे ॥ यथा । साद्धहस्तशत यावद्गर्भतस्तीरमुच्यते- ॥ भाद्रकृष्णचतुर्दश्यायावदाक्रमते जलम् । तावद्गर्भं विजानीयात् तद्न्यत् तीरमुच्यते ॥ शस्त्रविशेषे । सायके ॥ तीरयति । पारतीरकर्म समाप्तौ । पचाद्यच् ॥

तीरभुक्ति । पु । तिरहुत इति प्रसिद्धे विदेहदेशे ॥ तीरे भुक्तिरस्य ॥

तीरित: । त्रि । शास्त्रव्यवस्थानिर्णीते ॥ न । कर्मणा समाप्तौ ॥ तीर० । भावेक्त ॥

तीर्ण. । त्रि । अभिभूते ॥ प्लुते ॥ उत्तीर्णे ॥ यथा । तीर्णा पूर्णा कति न सरितोलङ्घिता केनशैला नाक्रान्तावाकतिवनभुव क्रूरसञ्चारघोरा । पापैरेतै किमिवदुरितकारितो नास्ति कष्टयद्दृष्टा स्तेधनमदमसीम्लानवक्त्रादुरीशा ॥ एतै परिग्रहै ॥ तरते कर्त्तरिक्त ॥

तीर्णपदी । स्त्री । तालमूल्याम् ॥

तीर्णा । स्त्री । प्रतिष्ठाख्यवृत्तविशेषे ॥ यथा । यस्मिन्वृत्ते कर्णं कर्णं । वेदैर्वर्णै साक्षात् तीर्णा ॥ यथा । वंशीवादैर्दत्तोन्मादै । कृष्णाचेत कासीयात ॥ अस्या. कन्येत्यपिसंज्ञा । मगौचेत्कन्येतिलक्षणात् ॥

तीर्थम् । न । शास्त्रे ॥ शास्त्रानुत्थाविषये ॥ अध्वरे । यज्ञे ॥ क्षेत्रे । पुण्यक्षेत्रे ॥ उपाये ॥ नारीरजसि ॥ अवतारे । जलावतारे ॥ ऋषिजुष्टाम्बुनि ॥ पात्रे ॥ विद्याया पात्रे ॥ यथा । ब्रह्मचारी धनदायी मेधावी श्रोत्रिय प्रिय । विद्ययाविद्याय प्राह्मता

नितीर्थानि यद्मनमेति विद्यावचनम् ॥ उपाध्याये ॥ गुरौ ॥ मन्त्रिणि ॥ इतिमेदिनिकर ॥ सचिवि ॥ इति हेमचन्द्र ॥ योनौ ॥ दर्शने ॥ निपाने । नद्यवतारप्रदेशे । घट्टे ॥ उपकूपजलाशये ॥ मखे ॥ विप्रे ॥ तीर्य्यते ऽनेन वा तरन्त्यनेनवा । तॄ० पातॄ तुदिवचिरिचिसिचिभ्यस्थक् ॥ जङ्गमतीर्थानि यथा । अङ्गुल्यग्रे दैव तीर्थं स्वल्पाङ्गुल्यो मूलेकायम् । मध्येङ्गुष्ठाङ्गुल्यो' पैत्र मूलेत्वङ्गुष्ठस्य ब्राह्मम् ॥ तीर्थं त्रिविधम् । जङ्गम मानसस्थावरभेदात् । तथाहि । ब्राह्मणा जङ्गमतीर्थं निर्म्मलं सार्वकामिकम् । येषांवाक्योदकेनैव शुद्ध्यन्तिमलिनोजना ॥ * ॥ अगस्त्यवाच । शृणु तीर्थानि गदतो मानसानिममानघे । येषु सम्यङ् नरः स्नात्वा प्रयातिपरमाङ्गतिम् ॥ सत्य तीर्थं क्षमातीर्थं तीर्थमिन्द्रियनिग्रहः । सर्वभूतदयातीर्थं सर्वत्रार्जवमेवच ॥ दानं तीर्थं दमस्तीर्थं सन्तोषस्तीर्थमुच्यते । ब्रह्मचर्यं परं तीर्थं तीर्थञ्चप्रियवादिता ॥ ज्ञानं तीर्थं धृतिस्तीर्थं पुण्यंतीर्थं मुदाहृतम् । तीर्थानामपितत् तीर्थं विशुद्धिर्मनसः परा ॥ एतत्तेकथितं देविमानसतीर्थं लक्षणम् ॥ * ॥ भौमानामपितीर्थानां पुण्यत्वेकारणं शृणु ॥ यथा शरीरस्योद्देशाः केचिन्मेध्यतमाःस्मृताः । तथापृथिव्या मुद्देशाः केचित् पुण्यतमाः स्मृताः ॥ प्रभावादद्भुताद्भूमेः सलिलस्यचतेजसा । परिग्रहान्मुनीनाञ्च तीर्थानां पुण्यतास्मृता ॥ तस्माद्भौमेषुतीर्थेषु मानसेषुच नित्यशः । उभयोरपि यः स्नाति स याति परमांगतिम् ॥ * ॥ तीर्थागमनेदोषो यथा । अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्यच । अदत्त्वा काञ्चनं गाञ्च दरिद्रोनाम जायते ॥ * ॥ गमने फलं यथा । अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः । न तत्फलमवाप्नोति तीर्थाभिगमनेन यत् ॥ तीर्थान्यनुस्मरन्धीरः श्रद्दधानः समाहितः । कृतपापोविशुद्ध्येत किंपुनः शुद्धकर्मकृत् ॥ तिर्य्यग्योनिं नवै गच्छेत् कुदेशेनच जायते । न दुःखीस्यात् स्वर्गभाक्च मोक्षोपायञ्चविन्दति ॥ * ॥ तीर्थफलभागिनोयथा । यस्यहस्तौच पादौ च मनश्चैव सुसंयतम् । विद्यातपश्च कीर्त्तिश्चस तीर्थफलमश्नुते ॥ प्रतिग्रहादुपावृत्तः सन्तुष्टो येनकेनचित् । अहङ्कारविमुक्ताश्च सतीं० ॥

अदाम्भिको निरारम्भो लघ्वाहारो जितेन्द्रिय । विमुक्त सर्वसङ्गैर्य स ती० ॥ अकोपनोऽमलमति सत्य वादी दृढव्रत । आत्मोपमश्चभूतेषु सती०॥ अश्रद्दधान पापात्मा नास्तिकोऽच्छिन्न संशय । हेतुनिष्ठश्च पञ्चैते नतीर्थ फलभागिन ॥ इति काशीखण्डम्॥ कृतेतु पुष्करं तीर्थं त्रेतायानैमिष तथा । द्वापरेतुकुरुचेच कलौ गङ्गासमाश्रयेत् ॥

तीर्थकर । पु । जिने ॥ करोति इति कर' । तीर्थस्यकर ॥ कपिलकणभुगादिशास्त्राकारेषु ॥

तीर्थकृत् । पु ।
तीर्थङ्कर' । पु । } जिने ॥

तीर्थराजि । स्त्री ।
तीर्थराजी । स्त्री । } अविमुक्ते । काश्याम् ॥

तीर्थवाक । पु । केशे ॥ इतिहेमचन्द्र ॥

तीर्थसेवी । पु । बकपक्षिणि ॥ इतिराजनिर्घण्ट ॥ त्रि । तीर्थवासिनि ॥

तीवर' । पु । अम्बुधौ ॥ व्याधे ॥ तेओर इति गौडप्रसिद्धे वर्णसङ्करजातिविशेषे ॥ सतुराजपुत्रस्त्रिया चत्रियाज्जात इति ब्रह्मवैवर्त्तपुराणम्॥ चूर्णकभार्यायां पुण्ड्रकाज् जात इति पराशरपद्धति ॥ तरति तीर्यतेवा । तॄ० । छित्वरच्छत्वरेत्यादिनाष्वरजन्तोनिपातित' ॥

तीवरी । स्त्री । तीवरस्त्रियाम्॥ षित्त्वान् ङीष् ॥

तीव्र' । पु । शिवे ॥ न । लोहे॥ तीरे ॥ त्रपुणि । सीसके ॥ तीक्ष्णे॥ त्रि । दुःसहे ॥ अत्युष्णे ॥ नितान्ते । अतिशये ॥ अद्रव्येवर्त्तमान क्लीवे । द्रव्यगामितु वाच्यलिङ्ग । यथा । तीव्र भुङ्क्ते । तीव्रोनर । कटौ । कटुरसादौ ॥ तीक्ष्णे ॥ तीवति । तीवस्थौल्ये । वाहुलकात् रक् । यद्वा । तेजति । तिजनिशाने । वाहुलकाद् रन् दीर्घौ जस्यच व. ॥

तीव्रकण्ठ । पु । शूरणे ॥

तीव्रगन्धा । स्त्री । यवान्याम् ॥

तीव्रज्वाला । स्त्री । धातक्याम् ॥

तीव्रवन्ध' । पु । तामसवृत्तौ ॥

तीव्रवेदना । स्त्री । यातनायाम् ॥ तीव्राचासौ वेदनाच ॥

तीव्रा । स्त्री । कटुरोहिण्याम्॥ राजिकायाम् ॥ गण्डदूर्वायाम् ॥ नदीविशेषे ॥ महाज्योतिष्मत्याम् ॥ तरदीवृक्षे ॥ तुलस्याम् ॥

तु । अ । पादपूरणे ॥ भेदे ॥ समुच्चये ॥ अवधारणे ॥ पक्षान्तरे॥ नियोगे ॥ प्रशंसायाम् ॥ विनिग्रहे ॥ उक्ताशङ्कानिवृत्त्यर्थे ॥ तुदति । तुद

व्यथने। मितद्वादिभ्यः डुः ॥

तुकाचीरी। स्त्री। वंशरोचनायाम्॥

तुगा। स्त्री। वंशरोचनायाम्॥

तुगाचीरी। स्त्री। वंशरोचनायाम्॥ तङ्गेदेर्घीसिकञ्चित्॥

तुङ्ग। पु। पुन्नागद्रुमे॥ पर्वते॥ बुधग्रहे॥ नारिकेले॥ गण्डके॥ योगविशेषे॥ यथा। अजवृषभमृगाङ्गनाकुलीरा झषवणिजौ च दिवाकरादितुङ्गाः। दशशिखिमनुयुक्तिथीन्द्रियांशैस्त्रिनवकविंशतिभिश्च तेऽस्तनीचाः॥ अपिच। सूर्यांशुमान् क्रियवृषमृगकन्याकुलीरान्त्ययूके दिगवलीन्द्रदयतिथिशरान् सप्तविंशांश्च विंशान्। अंशानेतान् वदति यवनश्चान्यतुङ्गान् सुतुङ्गास्तानेवांशान् मदनभवनेष्वाह नीचान् सुनीचानिति॥ न। किञ्जल्के॥ त्रि। उन्नते॥ उग्रे॥ प्रधाने॥ तुञ्ज्यते। तुजिहिंसायाम्। घञ्। न्यङ्क्वादिः॥

तुङ्गक। पु। पुन्नागवृक्षे॥

तुङ्गकारण्यम्। न। तीर्थविशेषे॥

तुङ्गभद्र। पु। मदोत्कटे॥

तुङ्गभद्रा। स्त्री। दक्षिणदेशप्रसिद्धे सरिद्विशेषे॥ अस्या जलगुणा यथा। तज्जलं निर्मलं स्निग्धं स्वादु प्रोक्तं तथा गुरु। कण्डुपित्तास्रदं प्रायः साल्य

मेधाकरं मतमिति॥

तुङ्गशेखर। पुं। पर्वते॥

तुङ्गा। स्त्री। वंशलोचनायाम्॥ शम्याम्॥ अनुष्टुप्छन्दोभेदे॥ द्विगुणनगणकर्णैं सुललितवसुवर्णैं। रसिकविदितरङ्गा भवति किल तुङ्गा॥ यथा। विहरसि मम चित्ते मदनविशिखकृत्ते। न नयनविषयस्त्वं व्रजसि तदपि मे त्वम्॥

तुङ्गी। पु। उच्चस्थानस्थिते ग्रहे॥

तुङ्गिनी। स्त्री। महाशतावर्याम्॥

तुङ्गी। स्त्री। हरिद्रायाम्॥ शाकभेदे॥ वर्बरायाम्॥ तुञ्जति। तुजि०। अच्। न्यङ्क्वादि। गौरादि ङीष्॥ निशायाम्॥

तुङ्गीपति। पुं। चन्द्रे॥ दृ० त्रि०॥

तुङ्गीश। पु। शिवे॥ कृष्णे॥ सूर्ये॥

तुच्छ। त्रि। शून्ये॥ अल्पे॥ हीने॥ न। तुषाकणे। भुसइतिभूसा इति च भाषा॥ तोदन तुद्। सम्पदादित्वाद्भावे क्विप्। तुदा व्यथया छ्यति। छोछेदने। मूलविभुजादित्वात् कः॥ तुदं श्यति वा। आतदृतिक॥

तुच्छद्रु। पु। एरण्डवृक्षे॥

तुच्छधान्यकम्। न। पुलाके॥

तुच्छा। स्त्री। तुत्थायाम्। नीलीवृक्षे॥

तुञ्ज। पु। दैत्ये॥ तुञ्जते। तुजिहिं

सायाम् । पचाद्यच् ॥

तुन्नेट् । पु । दैत्यभ्योपिप्रक्ते ॥ ईश० । क्विप् । तुन्नेभ्य' ईट् ॥

तुटुमः । पु । रन्ध्रबभ्रौ । उन्दुरौ ॥ इतिचिकाण्डशेषः ॥

तुडि' । स्त्री । तोडने ॥ तोडति । तुडृतोडने । सर्वधातुभ्य इन् ॥

तुणि । पु । नन्दिवृक्षे । तूणी इतिभाषा ॥ तूणयति । तूणसङ्कोचे । अच् इ' । पृषोदरादि' ॥ तूणीकृच्च कटु पाके कषायो मधुरोलघु । तिक्तो ग्राहीहिमोवृष्यो व्रणकुष्ठास्रपित्त-जित् ॥

तुण्डम् । न । आनने । वक्त्रे ॥ तुण्डति । तुडितोडने । पचाद्यच् ॥

तुण्डकेरिका । स्त्री । कार्पास्याम् ॥

तुण्डकेरी । स्त्री । विम्बिकायाम् । कुन्दुरु इतिकंदूरीइतिचख्यातौषधौ । तेलाकुचा इतिगौडभाषा ॥ प्रशस्त तुण्डम् । प्रशसार्थ कन् । तुण्डकमीर्त्ते । कर्मण्यण् ॥

तुण्डि' । पु । मुखे ॥ चञ्चौ ॥ तुन्दकूप्याम् ॥ स्त्री । नाभौ ॥ तुण्डेरिन् ॥

तुण्डि । स्त्री । विम्बफलायाम् ॥ उन्नतायां नाभौ । टूडीइतिसूंडी इतिचभाषा ॥ तुण्डते । तुडि० । सर्वधातुभ्यइन् ॥

तुण्डिका । स्त्री । विम्बिकायाम् ॥ नाभौ । तुन्दकूप्याम् । टूंडी इतिसूंडी इतिचभाषा ॥

तुण्डिकेरी । स्त्री । कार्पास्याम् । समुद्रान्तायाम् । कपास इतिभाषा ॥ विम्बिकायाम् ॥ तुण्डंचञ्चुरस्तियस्या । अतइतिठन् । तुण्डिकान् शरीराणि ईरयति । ईर० । कर्मण्यण् ॥

तुण्डिकेशी । स्त्री । विम्बिकायाम् ॥

तुण्डिभ । त्रि । उन्नतनाभौ ॥ अतिशयिता तुण्डि उन्नतानाभि रस्य । तुन्दिवलिवटेर्भइतिसूत्रे मूर्द्धन्योपधोयतुण्डिरिति माधव ॥

तुण्डिल । त्रि । उन्नतनाभौ ॥ तुण्ड्यते । तुडि० । सर्वधातुभ्यइन् । तत सिध्मादित्वाल्लच् ॥ मुखरे ॥ तुण्ड्यते । तुडि० । सलिकल्यौति इलच् ॥

तुत्थ । पु । अग्नौ ॥ न । अञ्जनभेदे । मयूरके । शिखिग्रीवे ॥ तुत्थ ताम्रोपधातुर्हि किञ्चित्ताम्रेणसङ्कवेत् । किञ्चित्ताम्रगुणा तस्मात्तच्यमाणगुणञ्चतत् ॥ तुत्थक कटुक चार कषाय वामक लघु । लेखन भेदन शीत चचुष्य कफपित्तहृत् ॥ विषाश्मकुष्ठकण्डूघ्न खर्परञ्चापि तद्गुणम् । अस्यशोधनम् । विष्ठया मर्दये त्तुत्थ माजोरककपोतयो । दशांश टङ्कणं दत्त्वा पचे ल्लघुपुटे तत ॥ पुटद

भ्रा पुट चौद्रे दैर्घ्यं तुत्थविशुद्धये ॥
तुत्थति । तुद व्यथने । पातृतुदीति थक ॥ तुत्थयतिवा । तुत्थ आवरणे । अच् ॥ कर्परीतुत्थे ॥
तुत्थकम् । न । तुत्थे ॥
तुत्था । स्त्री । नील्याम् ॥ सूक्ष्मैला याम् ॥ महानील्याम् ॥
तुत्थाञ्जनम् । न । अञ्जनप्रभेदे । शिखिग्रीवे । वितुन्नके ॥ तुत्थयति तुत्थतेवा । तुत्थ० । अच् एरच्वा । तुत्थञ्च तदञ्जनञ्च ॥
तुत्तुभ । पु । सर्षपे ॥ तुदति । तुद० । बाहुलकादुभच् । पृषोदरादि ॥
तुन्दम् । न । उदरे । कुक्षौ ॥ तुदति । तुद० । इगुपधेतिक । आच्छीन द्योरित्यत्र नुमिति योगविभागान्नुम् ॥ यद्वा । तर्णोत्यत्तम् । तृणु अदने । अब्दादयश्चेतिसाधु ॥ त्रि । तुन्दिले ॥ तुन्दमस्त्यस्य । अर्शआदिभ्योच् ॥
तुन्दकूपिका । स्त्री । } नाभौ ॥
तुन्दकूपी । स्त्री । }
तुन्दपरिमृज । त्रि । अलसे । मन्दे ॥ तुन्दमुदरं परिमार्ष्टि । मृजूशुद्धौ । तुन्दशोकयोः परिमृजापनुदोरिति क ॥
तुन्दवान् । त्रि । तुन्दिले ॥ अतिशयित तुन्दमुदरमस्य । तुन्दादिभ्य इलच्चेति चान्मतुप् ॥
तुन्दि । पु । गन्धर्वविशेषे ॥ न । उदरे ॥ स्त्री । नाभौ ॥
तुन्दिक । त्रि । वृहत्कुक्षौ । तुन्दिले ॥ अतिशयिततुन्दमुदरमस्य । तुन्दादिभ्य इलच्चेतिचकाराट्ठन् ॥
तुन्दिका । स्त्री । नाभौ ॥
तुन्दी । त्रि । पीनकुक्षौ । पिचण्डिले । तुन्दिले ॥ अतिशयित तुन्दमस्यास्य । तुन्दादिभ्यइलच्चेति चकारादिनि ॥
तुन्दिभः । त्रि । तुण्डिभे ॥ तुन्दिर्वृद्धा नाभिरस्यास्य । तुन्दिवलिवटेर्भः ॥
तुन्दिल । त्रि । वृहत्कुक्षौ । पिचिण्डिले ॥ अतिशयित तुन्दमस्यास्य । तुन्दादिभ्यइलच्चेति इलच् ॥
तुन्दिलफला । स्त्री । त्रपुष्याम् ॥
तुन्न' । पु । नन्दीवृक्षे ॥ तुद्यते । तुद० । क्त' ॥ त्रि । छिन्ने । द्विधाकृते ॥ व्यथिते ॥
तुन्नक । पु । तुन्ने ॥
तुन्नवत् । त्रि । बहुच्छिद्रे ॥
तुन्नवाय. । पु । सौचिके । सूजी इति भाषाप्रसिद्धे ॥ तुन्नच्छिन्नवयति । वे ञ्तन्तुसन्ताने । ह्वावामश्चेत्यण् ॥
तुभ । पु । छागे ॥ तोभते । तुभहिंसायाम् । इगुपधेतिक ॥

तुमुल । पु । कलिद्रुमे ॥ व्याकुलेरणे ॥ न । रणसङ्कुले ॥ तवनम् तौति वा । तु सौत्र । बाहुलकान्मुलक ॥ सङ्कीर्णे । सङ्कुले ॥

तुम्ब । पु । तुम्ब्याम् । अलाब्वाम् ॥ तुम्बतिरुचिम् । तुबिअर्दने । अच् ॥

तुम्बक । पु । तुम्बे ॥ स्वार्थेक. ॥ राजालावौ ॥

तुम्बा । स्त्री । वृहत्फलायांतुम्ब्याम् ॥ वर्तुलालाब्वाम् ॥ गवि ॥

तुम्बि । स्त्री । अलाब्वाम् ॥ तुम्बतिरुचिम् । तुबि० । सर्वधातुभ्यइन् ॥

तुम्बिका । स्त्री । अलाब्वाम् ॥ कटुतुम्ब्याम् ॥

तुम्बिनी । स्त्री । कटुतुम्ब्याम् ॥

तुम्बी । स्त्री । अलाब्वाम् । तूंबी इति भाषा ॥ तुम्बतिरुचिम् । तुबिअर्दने । अच् । गौ० ङीष् ॥ इकन्तात् कृदिकारादितिङीष्वा ॥ कुलिकवृक्षे-इतिरत्नमाला ॥

तुम्बीपुष्पम् । न । अलाबूपुष्पे । लतामूले ॥

तुम्बुकम् । न । अलाबूफले । तूंबा इतिभाषा ॥ पु । अलाब्वाम् ॥

तुम्बुरी । स्त्री । शुन्याम् । कुक्कुर्याम् ॥ धन्याके ॥ इतिमेदिनी ॥

तुम्बुरु. । पु । अर्हदुपासकविशेषे ॥ गन्धर्वप्रभेदे । स्वर्गगायके ॥ वृक्षविशेषे । शूलघ्ने । तीक्ष्णफले ॥ सप्ताह्वि (।ऽ) विफले ॥ न । कुस्तुम्बुरुणि ॥ तिन्दुकीफले ॥ तुम्बुरु प्रथित तिक्त कटु पाकेपित्तकटु । रुक्षोष्णदीपन तीक्ष्ण रुच्य लघु विदाहि च ॥ वातश्लेष्मक्षिकर्णौष्ठशिरोरुग्गुदजकृमीन् । कुष्ठशूलारुचिश्वासप्लीहकृच्छ्राणि नाशयेत् ॥

तुरम् । न । तूर्णे । शीघ्रे ॥ वेगे ॥ त्रि । तद्वति ॥ तुतोर्त्ति । तुरत्वरणे । क ॥

तुरग. । पु । चित्ते ॥ वाजिनि ॥ तौरयाम् । तुरत्वरणे । घञर्थेक. । बाहुलकाद् घव्वा । सप्तापूर्वकत्वाद्गुण । तुरेण तुरया वा गच्छति । अन्येभ्योपीतिड ॥

तुरगगन्धा । स्त्री । अश्वगन्धायाम् ॥

तुरगब्रह्मचर्य्यकम् । न । अभावात् स्त्रीपरित्यागे ॥

तुरगलीलक । पु । तालप्रभेदे ॥ द्रुतद्वन्द्व विरामान्त लघुस्तुरगलीलके ॥

तुरगस्कन्ध । पु । तुरगाणां समूहे ॥ नरकरितुरगाणांस्कन्धः ॥

तुरगी । त्रि । सादिनि । अश्वारोहे ॥

तुरगी । स्त्री अश्वगन्धायाम् ॥ वडवायाम् ॥

तुरङ्ग । पु । अश्वे । घोटके ॥ चित्ते ॥ तुरेण गच्छति । गमे सुपिवाच्य इति खच् । खच्चवाडित् । अरुर्द्विषदिति मुम् ॥ चतुष्कले (।ऽ।) मध्यगुरौ सगणे ॥ ... याम् ॥

तुरङ्गक । पु । हस्तिघोषायाम् । घोषकाकृतौ ॥

तुरङ्गद्वेषिणी । स्त्री । महिष्याम् ॥

तुरङ्गप्रिय । पु । यवे ॥

तुरङ्गमः । पु । अश्वे ॥ तुरेण गच्छति । गमः । गमेरितिखच् । अरुर्द्विषदजन्तस्यमुम् ॥

तुरङ्गवक्त्र । पु । किन्नरे ॥ तुरङ्गस्येव वक्त्रमस्य ॥

तुरङ्गवदन । पु । किन्नरे । किम्पुरुषे ॥ तुरङ्गस्येव वदन मस्य ॥

तुरङ्गारि । पु । करवीरे ॥

तुरङ्गारोह । त्रि । अश्वारोहे । सादिनि ॥ तुरङ्गमारोहति । रुहे कर्मण्यण् ॥

तुरङ्गिका । स्त्री । देवदालीलतायाम् ॥

तुरङ्गी । त्रि । अश्वारोहे ॥ मत्वर्थेइनि ॥

तुरङ्गी । स्त्री । अश्वगन्धायाम् ॥ घोटिकायाञ्च ॥ वडवायाम् ॥

तुरायणम् । न । यज्ञविशेषे ॥ असङ्गवचने ॥ तुतोर्षि । तु । त्वरणे । क । तुरस्यायनम् । पूर्वपदादितिणत्वम्

। त्वरितस्यहि गमनमसङ्गं भवति ॥

तुराषाट् ड् । पु । आखण्डले । इन्द्रे ॥ तुतोर्ति । तुर० । इगुपधज्ञाप्रीकिरःक । तुरवेगवन्तं साहयति अभिभवति अथै मसहने प्रसहनमभिभवइतिहत्ते । तस्मात् सहे क्विप् । सहेःसाडःसइतिषत्वम् । अन्येषामपीतिपूर्वपदस्यदीर्घः । आङ्प्रश्लेषोवा ॥

तुरि । स्त्री । तुर्याम् ॥ तुतोर्ति । तुर० । इन् ॥

तुरी । स्त्री । तन्तुवायस्य काष्ठनिर्मिते उपकरणविशेषे । तुल्याम् ॥ कृदिकारादितिङीष् ॥

तुरीयम् । न । ब्रह्मणि । सर्वाधारभूतेऽनुपहितचैतन्ये ॥ वनहृचतद्वच्छिन्नाकाशयोर्जलाशय जलतद्गतप्रतिबिम्बाकाशयोर्वा आधारानुपहिताकाशवद्ज्ञयोरज्ञानतदुपहितचैतन्ययोराधारभूत यदनुपहितचैतन्य तत् तुरीयमित्युच्यते । आधारश्चासौ अनुपहितश्चासौ आकाशश्च सतथा तद्वदितियावत् । यद्यप्याकाशस्य वनाश्रयत्वं जलाश्रयत्वञ्च वा नास्ति तदनारम्भकत्वात् तथाप्यवकाशमन्तरेण तयोःस्थित्यनुपपत्तेस्तदाधारत्ववचनमितिद्रष्टव्यम् । अस्य

चैतन्यस्य तुरीयत्त्वं विश्वाद्यपेक्षया द्रष्टव्यम् ॥ त्रि । चतुर्थे ॥ यथा तुरीयवाचो मनुष्या वदन्तीति । वाचस्तुरीयत्त्वं पराद्यपेक्षया कुलगुरोरुपदेशात् ज्ञातव्यम् ॥ चतुर्णां पूरणः चतुरश्छयतावाद्यक्षरलोपश्चेतिछ ॥

तुरीयवर्ण । पु । शूद्रे ॥ तुरीयश्चासौ वर्णश्च ॥

तुरुष्क । पु । गन्धद्रव्यविशेषे । धूम्रे । सिल्हके । पीतसारे । शिलारस इति भाषा ॥ म्लेच्छजातिविशेषे । तुरक इति भाषा ॥ देशविशेषे । तुरकस्थान इतिभाषा ॥ श्रीवासे ॥ तुतोर्त्ति । तुर० । बाहुलकादुस् गुणाभावश्च । स्वार्थे कन् ॥ सरलद्रुमे इतिकश्चित् ॥

तुर्य्य । त्रि । तुरीये । चतुर्थे ॥ चतुर्णां पूरणः । चतुरश्छयतावितियत् आद्यक्षरलोपश्च ॥

तुर्वसु । पु । म्लेच्छानांराज्ञि । म्लेच्छाचारपरे । ययातिराजस्य पुत्रविशेषे ॥

तुलजापुरम् । न । दक्षिणदेशप्रसिद्धे दुर्गास्थाने ॥

तुलसी । स्त्री । स्वनामाप्रसिद्धायां वैष्णव्याम् । वृन्दायाम् । पर्य्यासे ॥ तुलसी कटुका तिक्ता हृद्योष्णा दाहपित्तकृत् । दीपनी कुष्ठकृच्छ्रास्रपार्श्वरुक्कफवातजित् ॥ शुक्ला कृष्णा च तुलसी गुणैस्तुल्या प्रकीर्त्तिता ॥ तुलांस्वसादृश्यम् स्यति । असुक्षेपणे । कर्मण्यण् । ङीप् । शकन्ध्वादि ॥ यस्माद्देव्या स्तुलाना स्ति विश्वेषु चाखिलेषु च । तुलसी तेनविख्याततितिदेवीभागवतम् ॥ * ॥ यद्दमेकर्म्म कुरुते मनुज पृथिव्यां नारायणप्रियतमां तुलसीं विनाऽ। तत् सर्व्वमेव विफल भवतिद्विजेन्द्र धर्मेश्वरो पिनहितुष्यति देवदेव ॥ * ॥ तुलसीकाष्ठनिर्म्माणमालां गृह्णाति यो नरः । पदेपदे ऽश्वमेधानां लभन्तेनिश्चित फलम् ॥ प्रभाते तुलसीं दृष्ट्वा स्वर्णदानफल लभेत् । मालतीं यूथिका कुन्द माधवीं केतकीं तथेत्यादि ब्रह्मवैवर्त्त पुराणे श्रीकृष्णजन्मखण्डे १०२ अध्यायः ॥

तुलसीदेवा । स्त्री । बर्बर्याम् । सुरसायाम् ॥

तुला । स्त्री । सादृश्ये ॥ माने ॥ गृहाणां दारुबन्धाय पीठिकायाम् । उपरिस्थाप्यदारवाधारभूते स्तम्भाग्रपीठे ॥ पलशते ॥ भाण्डे ॥ सप्तमराशौ । यूके । घटे ॥ जन्मकालीनचन्द्राश्रितैतद्राशिफलम् । हषतुरङ्गगणक्रयविक्रये द्विजसुराचनदानमना, पु

मान् । यस्मिन् तौलिगते बहुदार भाग् विभवसञ्चितचित्रितविक्रम ॥ तुलालग्नजातस्यफलम् । तुलालग्ने पुमान्जात. सुधी सत्कर्म्मतत्पर । विद्वान् सर्वकलाविज्ञो धनाढ्यो जन पूजित ॥ तोल्यतेऽनयावा तोल न वा । तुलउन्माने । भिदाद्यङ् । अतुलोपमाभ्यामिति निर्देशात्तुला भाव: ॥ * ॥ परीक्षाविशेषे ॥ यथा "इनारद्" । ब्राह्मणस्यधटोदेय क्षत्रि यस्यहुताशन । वैश्यस्यसलिल देय शूद्रस्यविषमेवतु ॥ साधारण. स मस्तनाकोष प्रोक्तो मनीषिभि । विषवर्ज्जं ब्राह्मणस्य सर्वेषान्तुतुला स्मृता ॥

तुलाकोटि । स्त्री । मानभेदे ॥ अर्बुदे ॥ नूपुरे ॥ तुलां तुलयावा कोटयति । कुटपरितापे । घु० । अच्च ॥ तुलाग्रकोटिरग्रमस्यवा ॥

तुलाकोटी । स्त्री । तलाकोटि ॥

तुलाकोष । पु । तुलापरीक्षायाम् ॥

तुलाधर । पु । तुलाराशौ ॥ तुलागुणे ॥ त्रि । वाणिजके ॥ तुलाया धरो धारक ॥

तुलापुरुषदानम् । न । तुलादान इतिलो कप्रसिद्धे दाने । यथा । आदत्तु सर्वेदा नाना तुलापुरुषसञ्चितमिति ॥ षोड शमहादानान्तर्गतदानविशेषे ॥

तुलामानम् । न । स्वर्णादीनापरिच्छेदार्थक्रियमाणे । काँटा इतिभाषाप्रसिद्धे ॥

तुलाबीजम् । न । गुञ्जायाम् ॥

तुलि । स्त्री । तुर्य्याम् ॥

तुलिका । स्त्री । खञ्जनिकायाम् ॥

तुलिकायन्त्रम् । न । ज्योतिर्विदांयन्त्र विशेषे ॥

तुलित. । त्रि । तुलया परिच्छिन्ने । तुलाइति तुलगया इतिचभाषा ॥ उपमिते ॥ समीकृते ॥ तुलयतेस्तल्क रोतेर्वाण्यन्तात् कर्मणिक्त ॥

तुलिनी । स्त्री । } शाल्मलिद्रुमे ॥
तुलिफला । स्त्री । }

तुली । स्त्री । तुर्य्याम । तन्त्रवायकाष्ठ विशेषे ॥

तुल्य: । त्रि । सदृशे । समे । समाने ॥ तुलया सम्मित । नौवयोधर्म्मेत्या दिना यत् ॥

तुल्यपानम् । न । बहुभिरात्मीयैर्जनै. सहमिलित्वा एककालेकृते पाने । सपीतौ ॥ इत्यमर. ॥ तुल्यञ्चतत् पानञ्च ॥

तुल्ययोगिता । स्त्री । अलङ्कारविशषे ॥ यथा । नियतानां सकृद्धर्म सा पुनस्तुल्ययोगिता ॥ नियतानाप्राक-

रणिकानामेवाप्राकरणिकानामेव-
वा । क्रमेणोदाहरणम् । पाण्डुच्छा
मवदन हृदय सरस तथालसञ्च व
पु । आवेदयति नितान्त चेत्रियरो
ग सखिहृदन्त ॥ कुमुदकमलनील
नीरजालि ललितविलासजुषोर्दृ
शो पुर का । अमृतममृतरश्मिरम्बुज
न्मप्रतिहतमेकपदे तवाननस्य ॥ अ
न्यदपि । प्रस्तुताना तथान्येषां केव
ल तुल्यधर्मत । औपम्य गम्यते यत्र
सा मता तुल्ययोगितेति ॥

तुवर । पु । न । कषायरसे ॥ तवति
छिनत्ति रोगान् । तुरितिसौत्रोधातु
। छित्वरच्छत्वरेत्यादिना ष्वरच् ॥
धान्यविशेषे । तुवरयावनाले ॥ त्रि ।
कषायरसवति ॥

तुवरयावनाल । पु । धान्यविशेषे । तु
वरे । रक्तयावनाले ॥ तुवरोयावना
लस्तु कषायोष्णो विरेचक । सङ्ग्रा
ही वातशमनो विदाही शोषका-
रक ॥

तुवरिका । स्त्री । तुवर्याम् । आढक्या
म् । तुवर इति अरहर इतिच भाषा
॥ तुवरोऽस्त्यस्या । अतइनिठनावि
तिठन् । टाप् ॥ सुराष्ट्रजमृत्तिका-
याम् । फिटकरी इतिभाषा ॥

तुवरी । स्त्री । आढक्याम् । अरहर इ
ति तूर इतिचभाषा ॥ काक्ष्याम् । सौ
राष्ट्रमृदि । फिटकरी इतिभाषा ॥
तोरी इतिप्रसिद्धे धान्ये ॥ यथा । तु
वरी ग्राहिणी शीता लघ्वी कफवि
षास्रजित् । तीक्ष्णोष्णा वह्निदा क
ण्डूकुष्ठकोठकृमि प्रणुत् ॥

तुवरीतैलम् । न । तुवर्या स्नेहे ॥ स्ने
हे तैलच् । तीक्ष्णोष्ण तुवरीतैल ल
घु ग्राहि कफास्रजित् । वह्निकृ द्वि
षहृत् कण्डूकुष्ठकोष्ठकृमिप्रणुत् ॥
मेदोदोषापहश्चापि व्रणशोधहर
परम् ॥

तुवरीशिम्ब । पु । रक्तचक्रमर्दके ॥

तुवि । स्त्री । तुम्ब्याम ॥ इ०श०सा ॥

तुष । पु । धान्यत्वचि ॥ विभीतकद्रुमे
॥ तुष्यति । तुषतुष्टौ । इगुपधेति क' ॥

तुषग्रह' । पु । वह्नौ ॥

तुषधान्यम् । न । मुद्गादिषु ॥ मुद्गो-
माषो राजमाषो निष्पावश्च मकु-
ष्ठक । चणकाढकिमङ्गल्या खितुट'
सकुलायक ॥ तुषधान्यानिप्रोक्तानि
वैद्यशास्त्रे भिषग्वरै ॥

तुषसार । पु । अग्नौ ॥ इतिशब्द-
माला ॥

तुषानल । पु । तुषजाग्नौ । कुकूले ॥

तुषाम्बु । न । तुषोदके ॥

तुषार । पु । शीकरे ॥ हिमे ॥ देश

विशेषे ॥ हिमभेदे ॥ कर्पूरभेदे ॥ त्रि । शीतले ॥ तोषयति । तुषैरन्न भावितत्वादर्थात् कर्मे कििदित्यनु वृत्तौ तुषारादयश्चेत्यारन् ॥

तुषारकाल । पु । हेमन्ते ॥

तुषारकिरण । पु । चन्द्रे ॥

तुषाराम्बु । न । तोषारे ॥

तुषित. । पु । गणदेवताप्रभेदे ॥ वचे स्तनयस्य यज्ञाख्यस्य विष्णो द्वादश- सुपुत्रेषु ॥ तेयथा । तोष.प्रतोष सन्तोषो भद्र शान्तिरिडस्पतिः । इ ध्म' कवि विभु स्वह्न. सुदेवो रोच नो द्विषट् ॥ तुषितानामतेदेवा आसन् स्वायम्भुवान्तरे ॥ तुष्यति । तुष० । इ चिवचिकुचिकुटिभ्य. कि तजिनि वाहुलकात् कितच् ॥ यद्वा । तोषणं तुट् । सपदादित्वात् क्वि प् । ततस्तारकादित्वादितच् ॥ प्राणा पाना वुदानश्च समानो व्यानएवच । चक्षुः श्रोत्ररसो घ्राणं स्पर्शोवुद्धि र्मनस्तथा । द्वादशैते हि तुषितादेवा स्वारोचिषेन्तरे ॥ केषाञ्चिन्मते षट् त्रिंशत् तुषितामता ॥

तुषोत्थम् । न । तुषोदके ॥ इतिरानि० ॥

तुषोदकम् । न । काञ्जिके ॥ काञ्जि- कप्रभेदे ॥ अस्यलक्षणं यथा । तुषो दकयवैरामै सतुषै शकली कृतै । यवैरुदकसहितै सन्धानवर्गोक्त त्वात् । तुषाम्बुदीपन हृद्य पाण्डु कृमिगदापहम् । तीक्ष्णोष्णं पाचन पित्तरक्तकृद्वस्तिशूलनुत ॥

तुष्ट । त्रि । परितृप्ते । सन्तोषविशिष्टे । प्राप्तपरितोषे ॥ स्त्रियोजारेणतु ष्यन्ति गाव स्वच्छन्दचारत. । कुञ्ज रा पांशुवर्षेण ब्राह्मणा. परनिन्दया ॥ तुष्यतेस्म । तुष० । क्त ॥

तुष्टि । स्त्री । तोषे । अधिगतार्था द न्यत्र तुच्छत्वबुद्धौ ॥ भोगेष्वेतावता लमितिवुद्धौ ॥ साचानन्तपत्नी । य था । अनन्तपत्नीतुष्टिश्चपूजितावन्दि ताभवत् । ययाविना नसन्तुष्टा सर्व- लोकाश्चसर्वतइति श्रीदेवीभागव तम् ॥ नवधातुष्टि । ता परिगणय ति । आध्यात्मिकास्तस्त्र प्रकृत्युपा दानकालभागाख्या । वाह्याविषयो परमात् पञ्चचनवतुष्टयोऽभिमता ॥ प्रकृतिव्यतिरिक्त आत्मास्तीति य श्रुततोऽस्यश्रवणमननेस्त । ततोवि वेकसाक्षात्कारायतु असदुपदेशतु ष्टो न प्रयतते तस्यचतस्र आध्या त्मिकास्तुष्टयो भवन्ति । प्रकृतिव्यति रिक्तमात्मानमधिकृत्य यस्मात् ता स्तुटयस्तस्मादाध्यात्मिका । कास्ता इत्यतआह । प्रकृत्युपादानकालभा

गाख्या । प्रकृत्यादिराख्यायासां ता स्तथोक्ता । प्रकृत्याद्यर्थविभागश्चैत त्तच्छब्दार्थं निरूपणे यथास्थानं द्रष्ट व्यं ॥ वाह्या दर्शयति । वाह्याविषयो परमादित्यादिना । वाह्यास्तुष्टयो विषयोपरमात् पञ्च । या खलु नात्मनः प्रकृतिमहदहङ्कारादीना त्मेत्यभिमन्यमानस्य वैराग्ये सति तुष्टयस्ता वाह्या आत्मज्ञानाभावेऽ नात्मानमधिकृत्यप्रवृत्ता ताश्चवै राग्येसतिभवन्तितुष्टयइतिवैराग्यहे तुपञ्चकत्वाद्वैराग्याणि पञ्च तत् पञ्च त्वात् तुष्टयपञ्चेति । उपरम्यतेऽ नेनेत्युपरमोवैराग्यम् विषयादुप रमोविषयोपरमस्तस्मात् । विषया भोग्या शब्दादय पञ्च उपरमाअपि पञ्च । तथाहि अर्जनरक्षणक्षयभोग हिंसादोषदर्शनहेतुजन्मान एका पारपारापारपारत पारानुत्तमाम्भो त्तमाम्भसंज्ञका पञ्चोपरमाभवन्ति । एकापाराद्यर्थविभागश्चयथास्थानं द्रष्टव्य । तदेवमाध्यात्मिकाभिश्चत सृभिर्वाह्याभिश्चपञ्चभिर्नव तुष्टयो ऽभिहिता साङ्ख्याचार्यैं ॥ तोषणं म् । तुष० । क्तिन् ॥ तुष्टिर्नुरकृत र्थस्यकृतार्थोऽस्मीतियामति ॥

तुष्टिदानम् । न । पारितोषिके ॥ तुष्टि दानमेव चाराणां हिवेतनम् तेहि तल्लाभात् स्वामिकार्येष्वतीव त्वरय न्ते इति नीतिवाक्यामृतम् ॥

तुष्टु । पु । कर्णमणौ ॥ इति शब्दच न्द्रिका ॥

तुष्टुषित । त्रि । स्तोतुमभिप्रेते ॥

तुहिनम् । न । हिमे ॥ चन्द्रतेजसि ॥ तोयति तुह्यतेऽनेनवा । तुहिर्अ र्दने । केपितुह्योर्ह्स्वश्चेतीननप्र त्यय लघूपधगुणे कृतेह्रस्वश्च ॥

तुहिनांशु । पु । चन्द्रे ॥ कर्पूरे ॥

तुहिनांशुतैलम् । न । कर्पूरतैले ॥

तूण । पु । उपासङ्गे । तूणीरे । निष ङ्गे ॥ तूण्यतेऽनेन । तूणसङ्कोचने । चु० । घञ् ॥ तूणयति वा । अच् ॥

तूणकम् । न । अतिशर्करीसञ्ज्ञकच्छन्दो विशेषे ॥ यथा । तूणकं समानिका पदद्वयं विनान्तिमम् ॥ यथा । सा सुवर्णकेतक विकाशि भृङ्गपूरितप ञ्चबाणबाणजालपूर्णहेमतूणकम् । राधिकावितर्क्य माधवाद्यमासिमाध वे मोहमेति निर्भरं त्वया विनाक लानिधे ॥

तूणा । स्त्री । इषुधौ । तूणे ॥ टाप् ॥

तूणी । पु । नन्दीवृक्षे । पीतके ॥ त्रि । तूणयुक्ते ॥

तूणी । स्त्री । तूणे ॥ नील्याम् ॥ तूणय

तेऽनग । तूणपूरणे । इत्यस्येतिघ ञ् । गौरादित्वात् ङीष् ॥

तूणीक । पु । नन्दीवृक्षे ॥

तूणीर । पु । तूणे । निषङ्ग ॥ तूणीं प्रति सङ्कोचं राति । रादाने आदा नेच । आतोनुपेतिक ॥ यद्वा । तूण्यते । तूण० । वाहुलकादीरन् ॥

तूतकम् । न । तूत्थे । तूतिया इति भाषा ॥

तूद । पु । तूदे । अश्वत्थाकारे पार्श्वे पिप्पल इति ख्याते तूत इतिच प्रसिद्धे वृक्षे ॥ अस्यफलगुणा । तूदं पक्वं गुरु स्वादु हिमं पित्तानिलापहम् । तदेवाम गुरु सरं मल्लोष्णं रक्तपित्तकृत् ॥ तुदति । तुदव्यथने । इगुपधेतिक । पृषोदरादि ॥

तूरम् । न । वाद्यसामान्ये ॥ ताड्यमाने पटहादौ ॥

तूरी । स्त्री । धत्तूरे ॥ इतिभावप्रकाश ॥

तूर्णम् । न । शीघ्रे । सत्वरे ॥ त्रि । त इति ॥ त्वरतेस्म । ञित्वरासम्भ्रमे । गत्यर्थाकर्मकेतिकर्त्तरिक्त रुष्यमत्वरसङ्घुषास्वनामितीड्भावप क्षे ज्वरत्वरेत्यूठ् । रदाभ्यामितिन त्वम् ॥

तूर्णि । पु । मले ॥ त्वरायाम् ॥ त्वरते त्वरयत वा । ञित्वरा० । वहिश्रि श्रुयुद्रुग्लाहात्वरिभ्यो नित्तिनिः ॥

तूर्य्यम् । न । वाद्ये ॥ वाद्यप्रभेदे ॥ आदिगुरु (ऽ।) चिकले ॥

तूर्य्यखण्ड । पु । दुगडवाद्ये ॥

तूलम् । न । ब्रह्मदारुणि । ब्राह्मणेष्टे । तूदे ॥ आकाशे ॥ पु । न । पिच्चौ । निर्वीजकार्पासे । रुयी इति भाषा ॥ तूलयति तूल्यते वा । तूलनिष्कर्षे इगुपधेतिक घोवा ॥

तूलकम् । न । तूले ॥

तूलकार्म्मुकम् । न । तूलस्फोटनार्थे धनुषि । पिञ्जले । तूलधनुषि ॥

तूलचाप । पु । } तूलकार्मुके । धुनक इति भाषा ॥
तूलधनु । न । }

तूलनालिका । स्त्री । पिञ्जिकायाम् । पांइज इति गौडभाषा ॥

तूलनाली । स्त्री । तूलनालिकायाम् ॥

तूलपिचु । पु । तूले ॥

तूलवृक्ष । पु । शाल्मलीवृक्षे ॥

तूलशय्या । स्त्री । तूलिकायाम् ॥ तूलस्यशय्या । तूलेननिर्मिताशय्यावा । शाकपार्थिवादि ॥

तूलशर्करा । स्त्री । कार्पासवीजे । विनौरा इति विनौला इति कपासिआ इतिचभाषा ॥

तूलसेचनम् । न । कर्त्तने । सूत्रकर्त्तने । कातना इतिभाषा ॥ इ० श० स्त्रा ॥

तूला । स्त्री । कार्पास्याम् ॥ वर्त्याम् ॥

तूलि । स्त्री । तूल्याम् ॥ स्वनाम्नाख्या ते चित्रकरोपकरणे । ईषिकायाम् ॥ तूलति । तूल० । इगुपधात्किदिःतीन् ॥

तूलिका । स्त्री । शय्योपकरणे । तोसक इति भाषा ॥ आलेख्यलेखन्याम् । कूर्चिकायाम् ॥ यथा । जगच्चित्रं समालिख्य स्वेच्छातूलिकयात्मनि । स्वयमेव समालिख्य प्रीणाति भगवान् शिव ॥ आत्ममये महति पटे विविधजगच्चित्रमात्मनालिखितम् । स्वयमेव केवल मसौ पश्यन् प्रमुद प्रयाति परमात्मेति ॥ ईषिकायाम् । वीरणादिशलाकायाम् ॥ सुवर्णादेरावर्त्तनपरीक्षणार्थं निक्षिप्य मायायां शलाकायाम् ॥ तूलति भूष्यते वा । तूल० । कुन् ॥

तूलिनी । स्त्री । शाल्मलिद्रुमे ॥ लच्छणाकन्दे ॥

तूलिफला । स्त्री । शाल्मलौ ॥

तूली । स्त्री । नील्याम् ॥ वर्त्याम् ॥ तूलिकायाम् ॥ चित्रलेखन्याम् । चित्रसाधनद्रव्ये । कूर्चिकायाम् ॥ ङीष् ॥

तूवर । पु । काले ऽश्मश्रुपुरुषे ॥ प्रौढाशृङ्गानडुहि । काले ऽजातशृङ्गे गवि ॥ पुरुषव्यञ्जनरच्युक्ते ॥ कषाय रसे ॥ तौति । तु वौचोगत्यादौ । बाहुलकादरोदीर्घश्च ॥ यद्वा । तनोति । बाहुलकात् डू । तूष्चासौ वरश्च आच्छादक ॥

तूवरी । स्त्री आढक्याम् ॥ सौराष्ट्रमृत्तिकायाम् ॥

तूष्णींशील' । त्रि । तूष्णीके । मौनयुक्ते ॥ तूष्णीं शील यस्य ॥

तूष्णीक । त्रि । मौनयुक्ते । मौनशीले ॥ तूष्णींशील । शीलेकोमलोपश्च । केश इति ह्रस्वोनमलं पसामर्थ्यात् अन्यथाठपमेवविदध्यात् । ठपि अव्ययानामितिटिलोपेन सिद्धत्वात् ॥

तूष्णीकाम् । अ । मौने ॥ अकच्प्रकरणे तूष्णीम.काम्वक्तव्य' । भित्त्वादन्त्यादच पर. ॥

तूष्णीम् । अ । मौने ॥ तोषणम् । तुषतुष्टौ । बाहुलान् नीम् उपधाया ऊत् ॥ घटाकाश महाकाशइवात्मान परात्मनि । विलाप्याखण्डभावेन तूष्णीं भव महामुने इत्युपदेश' ॥

तूस्तम् । न । रेणौ ॥ जटायाम् ॥ तोसति । तुसशब्दे । बाहुलकात् तन् धातोर्दीर्घश्च ॥

तृखम् । न । जातीफले ॥

तृणम् । न । अर्जुने । तृणमात्रे ॥ तृ

णविशेषे नडादौ ॥ तृण्यते । तृणु अदने । घञ् । संज्ञापूर्वकत्वाद्गुणो न ॥ यद्वा । तृहति । तृहूहिंसायाम् । तृहे. ओष्ठलोपश्च ॥ अग्निचौरभय रोगो राजपीडा धनक्षति । संक्रूहे तृणकाष्ठानां कृते । वस्त्रादिपक्वके ॥

तृणकन्द. । पुं । कशेरुणि ॥

तृणकाण्डम् । न । तृणानां समूहे ॥ दूर्वादिभ्यःकाण्ड ॥

तृणकुङ्कुमम् । न । सुगन्धद्रव्यप्रभेदे । तृणपुष्पे । गन्धाधिके ॥ कटुत्वमुष्णत्वं कफमारुतशोफकण्डूतिपामाकुष्ठामदोषनाशित्व परमभास्वरत्वञ्चास्यस्य गुणा ॥

तृणकुटी । स्त्री । कायमाने । तृणौकसि ॥

तृणकूर्म. । पु । तुम्ब्याम् ॥

तृणकेतु । पु । } वंशे ॥
तृणकेतुक । पु । }

तृणगोधा । स्त्री । चित्रकोले ॥ कृकलासे ॥

तृणग्रन्थि । स्त्री । स्वर्णजीवन्त्याम् ॥

तृणग्राही । पु । नीलमणौ ॥ कपूर इति प्रसिद्धे मणिविशेषे । तृणमणौ ॥

तृणजाति' । स्त्री । उलपादौ ॥

तृणज्योतिः । न । रात्रौ प्रकाशशालिनि

लताविशेषे ॥

तृणता । स्त्री । कार्मुके । धनुषि ॥ तृणत्वे ॥ भावेतल् ॥

तृणद्रुम । पु । नारिकेलादिवृक्षेषु ॥ ताले ॥ गुवाके ॥ ताल्याम् ॥ केतक्याम् ॥ खर्जूरे ॥ खर्जूर्याम् ॥ हिन्ताले ॥

तृणधान्यम् । न । नीवारे । श्यामाकादौ । उडिधान इतिगौडभाषा ॥ तृणमिवधान्यम् अकृष्ट्योत्पन्नत्वात् ॥

तृणध्वज । पु । वंशे ॥

तृणनिम्ब । पु । नेपालनिम्बे ॥

तृणपत्रिका । स्त्री । इक्षुदर्भायाम् ॥

तृणपर्णी । स्त्री । गुण्डाशिन्याम् ॥

तृणपुष्पम् । न । तृणकुङ्कुमे ॥

तृणपुष्पी । स्त्री । सिन्दूरपुष्पीवृक्षे ॥

तृणपूली । स्त्री । चाँच इतिगौडेषु प्रसिद्धे । चञ्चायाम् ॥

तृणमणि । पु । तृणग्राहिणि ॥

तृणमत्कुण । चि । लग्नके । आमिन् इतिभाषा ॥ इतित्रिकाण्डशेष ॥

तृणराज । पु । नारिकेले ॥ तालवृक्षे ॥ तृणाना राजा । ट ॥

तृणराजाह्व । पु । तालद्रुमे ॥ तृणराजाह्वयाह्वायस्य ॥

तृणराजाह्वय । पु । तालवृक्षे ॥ तृण

राजदन्त्याञ्चयोयस्य ॥

तृणवल्वजा । स्त्री । वल्वजायाम् ॥

तृणबीज. । पु ।
तृणबीजोत्तमः । पु । } श्यामाके ॥

तृणशीतम् । न । गन्धतृणे । कतृणे ॥

तृणशीता । स्त्री । जलपिप्पल्याम् ॥

तृणशून्यम् । न । मल्लिकायाम् ॥ केतकीशाखिन फले ॥ तृणशून्येस्या नेसाधु । तत्रसाधुरितियत् ॥ त्रि । तृणरहिते ॥

तृणषट्पद । पु । वरोले । वरटायाम् । वरडै इति तत्तैया इतिचभाषा ॥

तृणसारा । स्त्री । कदल्याम् ॥ तृणानिसारमस्याम् ॥

तृणसिंह' । पु । कुठारे ॥

तृणहर्म्य. । पु । मयटे । तृणनिर्मिता ट्टालिकायाम् । मैडा इतिभाषा ॥

तृणाग्नि । पु । वत्सले । तृणोत्थवह्नौ ॥

तृणाङ्घ्रिप । पु । मन्थानकतृणे ॥

तृणाञ्जन । पु । कृकलासे ॥

तृणाढ्यम् । न । पर्वततृणे । मृगप्रिये ॥

तृणाम्लम् । न । लवणतृणे । लूणियाशाक इतिभाषा ॥

तृणाह्वक । पु । तृणकुङ्कुमे ॥

तृणेक्षु' । पु । वल्वजायाम् ॥

तृणोत्तम । पु । उखर्वलतृणे ॥

तृणोद्भव । पु । नीवारे ॥

तृणौक४ । न । कायमाने । तृणनिर्मितगृहे ॥

तृणौषधम् । न । एलवालुकाख्यगन्धद्रव्ये ॥

तृण्या । स्त्री । तृणसमूहे । तृणानां सहतिः ॥ तृणानांसमूह । पाशादिभ्योयः ॥

तृतीय. । त्रि । त्रयाणां पूरणे । तीसरा इतिभाषा ॥ चे सम्प्रसारणञ्चेतितीयप्रत्यय सम्प्रसारणञ्च ॥

तृतीयक' । पु । तृतीयकस्तृतीयेऽह्नी तिलक्षणलक्षितेज्वरविशेषे ॥ तृतीयेऽह्नीत्यागमदिनगणनेच्छा । यतउक्तम् । दिनमेकमतिक्रम्य योभवेत् सतृतीयक इति ॥ तृतीयेऽह्निभव' । कालप्रयोजनाद्रोगइतिकन् ॥ त्रिके ॥ तृतीयेन रूपेण ग्रहणम् । तावतिथग्रहणमितिलुग्वाइतिकन् ॥

तृतीयप्रकृति । स्त्री । क्लीबे ॥ स्त्रीपुंसावपेक्ष्य तृतीयाचासौप्रकृतिश्चेति विग्रह ॥

तृतीया । स्त्री । तिथिविशेषे । चन्द्रमण्डलस्य तृतीयकलाक्रियारूपायाम् । तत्क्रियोपलक्षिते कालेवा ॥ सकलगुणगभीरो भूमिपालानुरागी परनगरविनाशी सर्वलोकोपकारी । परविषयनिवासी कौतुकी सत्य

वादी भवति निखिलविद्यो यस्तृतीयाप्रकृत ॥ टा भ्याम् भिस् इति चिके ॥ टाप् ॥

तृतीयाकृतम् । त्रि । त्रिगुणाकृते। त्रिवारकृष्टेक्षेत्रे ॥ तृतीयकृतम् । कृञो द्वितीयतृतीयेतिडाच् ॥

तृतीयाप्रकृति । स्त्री । नपुंसके ॥ स्त्रीपुंसावपेक्ष्य तृतीया प्रकृति तृतीय प्रकार' । असमस्तमेतत् । समासेतु तृतीयप्रकृतिरेव ॥

तृपत् । पु । चन्द्रे ॥ छत्रे ॥ तृप्यति तृपत्प्रीणने । सम्वत्तृपद्दृदिति अतिप्रत्ययान्तोनिपातित ॥

तृपला । स्त्री । लतायाम् ॥ तृप्यति । तृप० । कलस्तृपश्चेति तृपते.कल प्रत्यय. ॥

तृप्त । त्रि । हृष्टे । प्रमुदिते । प्रीते । तृप्तियुक्ते॥तृप्यतिस्म।तृप०। क्त.॥

तृप्ति । स्त्री । तर्पणे । सौहित्ये। भक्ष्यादिनाकाङ्क्षानिवृत्तौ ॥ सर्वेकामावाप्तौ। अलम्प्रत्ययेनेच्छाविच्छित्तौ ॥ तर्पणम् । तृप० । स्त्रियाक्तिन् ॥

तृप्र । पु । घृते ॥ पुरोडाशे ॥ तृप्यतेऽनेन । तृप०। स्फायितञ्चीतिरक् ॥ न। काष्ठे ॥ दुःखे ॥

तृप्रालु' । त्रि । तृप्रं न सहते । आलु' ॥

तृफला । स्त्री । त्रिफलायाम् ॥ तृफति । तृफतृप्तौ । कलस्तृपश्चेतिचकारात् तृफतेरपि कल. ॥

तृफु । पु । सर्पजातौ ॥

तृट् । स्त्री । लिप्सायाम् । वाञ्छायाम् ॥ उदन्यायाम् ॥ स्मरपुत्र्याम् । कामकन्यायाम् ॥ तर्षणम् । ञितृषपिपासायाम । सम्पदादि क्विप् ॥

तृषा । स्त्री । तृषि ॥ भागुरिमते टाप् । तृषापि न कृशाममेति प्रयोग. ॥ लाङ्गलिकीवृक्षे ॥

तृषाभू । स्त्री । क्लोमनि । फोँपडा इतिभाषा ॥

तृषाह्म् । न । जले ॥

तृषाह्वकम् । न । मधुरिकायाम् ॥

तृषाह्वा । स्त्री । मधुरिकायाम् ॥

तृषित । त्रि । सतृषि । तृषयायुक्ते ॥ तृट्सञ्जाताऽस्य । तारकादित्वादितच् ॥

तृषितोत्तरा । स्त्री । असनपर्ण्याम् ॥

तृष्णक् । त्रि । लुब्धे ॥ तृष्यति । ञितृष० । तच्छील ।स्वपितृषोर्नजिङ्॥

तृष्णा । स्त्री । तर्षे । पिपासायाम् । प्यास इतिभाषा ॥ लिप्सायाम् । अप्राप्ताभिलाषे। अनात्मीयस्वीकारेच्छायाम् ॥ इदं मे न चीयतामितीच्छायाम् ॥ उचितव्यापारत्यागेनापि

धनरक्षणेच्छारूप कार्पण्यमपि तृष्णाभेद ॥ लोभे ॥ यादुस्त्यजा दुर्मतिभि र्जीर्यतो या न जीर्यति । तां तृष्णां दुःखनिवहां शर्मकामो द्रुतं त्यजेत् ॥ तर्षणम् । जितृष० । तृषि शुषिरसिभ्य कित् इति न ॥ विशेषो भावप्रकाशेचतजलतृष्णायाम् ॥

तृष्णाक्षय । पु । शान्तौ ॥ परमानन्दप्राप्तिहेतौ ॥ तथाचवेदव्यास । यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् । तृष्णाक्षयसुखस्यैते नार्हन्त षोडशींकलामिति ॥ पिपासानाशे ॥ तृष्णाया. क्षय ॥

तृष्णारि । पु । पर्पटे ॥ इतिराजनिर्घण्ट ॥

ते । अ । त्वयेत्यर्थे ॥

तेज कार्य्यम् । न । घृतादिकार्ये स्वधितिमज्जवाच्च ॥ तेजस कार्यम् ॥

तेजफल । पु । तेजफल इति तेजवल इतिचप्रसिद्धे वृक्षविशेषे । गन्धफले । वहुफले ॥ अस्यगुणास्तु । तेजफल. कटुस्तीक्ष्ण सुगन्धिर्दीपनोमत । वातश्लेष्माश्चिमश्वासकासरुचाकर स्मृतइति ॥

तेजन । पु । वंशे ॥ मुञ्जे ॥ भद्रमुञ्जे ॥ तेजयति शस्त्र मञ्जिवा । तिजनिशाने । चु० । नन्द्यादिल्यु र्युञ्चा ॥

तेजनक । पु । गुन्द्रे । शराभिधतृणे ॥

तेजयति । तिज ग० चु० । खल् कुन्चा ॥

तेजनी । स्त्री । मूर्वायाम् ॥ ज्योतिष्मत्याम् ॥ तेजति । तिजपालने । ल्युट् । गौरादिङीष् ॥

तेजपत्रम् । न । गन्धजाते । पत्रके । त्वक्पत्रे । तेजपात इति प्रसिद्धे वृक्षे ॥

तेजल. । पुं । कपिञ्जलपक्षिणि ॥

तेजवती । स्त्री । गजपिप्पलिकायाम् ॥

तेजः । न । दीप्तौ ॥ प्रभावे ॥ पराक्रमे ॥ रेतसि ॥ नवनीते ॥ अग्नौ ॥ तापकेज्योतिषि ॥ शरीरगतायांकान्तौ ॥ सुवर्णे ॥ मज्जनि ॥ पित्ते ॥ असहने ॥ यथा । अधिक्षेपापमानादे प्रयुक्तस्य परेणयत् । प्राणात्ययेप्यसहन तत्तेज समुदाहृतम् ॥ प्रागल्भ्ये ॥ पराभिभवसामर्थ्ये ॥ परैरनभिभाव्यत्वे ॥ अप्रतिहताशक्त्वे ॥ चैतन्यात्मकेज्योतिषि ॥ स्त्रीवालकादिभिर्मूढैरनभिभाव्यत्वे ॥ लिङ्गदेहे ॥ अश्ववेगे ॥ तेजोनाम दर्पापरनामा सत्त्वगुणविकार प्रकाशकोऽन्त सारविशेष । यथाहभोजराज । तेजो निसर्गज सत्त्व वाजिनां स्फुरण रज । क्रोधस्तम इतिच्छेया स्त्रयोपिसहजा गुणाः ॥ तच्चद्विविधम् । सततोत्थित भयोत्थितञ्चेति

। यथाहसएव। धारासुयोजितानाञ्च निसर्गात् प्रेरया विना। अविच्छिन्न मिवाभाति तत् तेज सततोत्थित म्॥ कशापादादिघाते यत् साध्वसा त् स्फुरितन्तुतदिति ॥ *॥ शब्दस्प र्शतन्मात्रसहिताद्रूपतन्मात्रादुत्पन्ने शब्दस्पर्शरूपगुणे तृतीयेमहाभूते ॥ यथा। तृतीय ज्योतिरित्याहुश्च क्षुरध्यात्ममुच्यते। अधिभूत ततोरूप सूर्यस्तत्राधिदैवम्॥ उष्णस्पर्शवत्ते- ज। तद्द्विविधम्। नित्यमनित्यञ्च। नित्यंपरमाणुरूपम्। अनित्यका र्यरूपम्। पुनस्त्रिविधम्। शरीरेन्द्रिय विषयभेदात्। शरीरमादित्यलोके। इन्द्रियंरूपग्राहकचक्षु:कृष्णतारा ग्रवर्त्ति। विषयश्चतुर्विध। भौमदि व्योदर्याकरजभेदात्। भौमवह्न्या दिकम्। अविन्धन दिव्यविद्युदादि। भुक्तान्नस्यपरिणामहेतुरौदर्यम्। आ करज सुवर्णादीतितर्कसङ्ग्रह ॥ स्प र्शउष्ण स्तेजसस्तु स्याद्रूप शुक्लभास्व रम्। नैमित्तिकं द्रवत्वन्तु नित्यतादि चपूर्ववत्॥ इन्द्रिय नयन वह्निस्वर्णादि विषयोमतइतिभाषापरिच्छेद. ॥ तेजयति तेज्यते ऽनेन वा। तिज०। असुन्॥ तेजोजलमितिच्छन्दोनि घण्टु ॥

तेजस्कर'। त्रि। तेजोवृद्धिकारकेद्रव्ये ॥

तेजस्वी। त्रि। तेजोयुक्ते ॥ त्वक्कान्तिमति ॥ तेजोस्यस्यास्मिन्वा। विनि ॥

तेजस्विनी। स्त्री। ज्योतिष्मत्याम्॥ महाज्योतिष्मत्याम्॥ तेजवती तेजवल्कल तेजवलइत्यादिनामाख्याते तेज.फले ॥ तेजस्विनी कफश्वासकासाऽऽस्यामयवातहृत्। पाचन्युष्णाकटुस्तिक्ता रुचिवह्निप्रदीपनी ॥ नाम्तलक्षणोडीप् ॥

तेजित। त्रि। शाते। शाणादिना तीक्ष्णीकृते। शाणिते। निशिते ॥ तेज्यतेस्म। तिज०। चु०। क्त' ॥

तेजीयान्। त्रि। तेजोयुक्ते ॥ तेजीयसानदोषायवह्नेः सर्वभुजोयथा ॥

तेजोमन्थ। पु। गणिकारिकायाम्॥ तेजोमथ्नाति। मथ्य०। कर्मण्यण् ॥

तेजोमय। पु। तेज प्रचुरे चैतन्य प्रधानेज्योतिर्मये। अन्न करणोप हितत्वात् वासनामये स्वप्ने ॥

तेजोमात्रा। स्त्री। इन्द्रिये ॥ तेजसो मात्रा ॥

तेजोरूपम्। न। प्रकाशरूपे ब्रह्मणि ॥ त्रि। प्रभारूपे ॥

तेजोवती। स्त्री। गजपिप्पल्याम्॥ चव्ये ॥ महाज्योतिष्मत्याम्॥ वह्नि

पुर्य्याम् ॥ यथा । रक्तपीतमणिप्रायहे मप्राकारगोपुरा । वङ्के स्तेजोवतीव क्षितुल्यभूतनिषेविता ॥ तेजवत्ता स्यकाष्ठे ॥

तेजोरुच । पु । चुद्राग्निमन्थे ॥

तेन । पु । गानाङ्गविशेषे ॥ यथा । तेनेतिशब्दस्तेन स्वान्मङ्गलानाप्रद र्शक' । तेशब्देनोच्यतेगौरी नशब्दे नोच्यतेहर । तेनमाङ्गलिकश्चाय शब्दस्तेनइतिस्मृतइतिसङ्गी० ॥

तेम' । पु । समुन्दने । आर्द्रीभावे ॥ तेमनम् । तिमआर्द्रीभावे । घञ् ॥

तेमनम् । न । आर्द्रीकरणे ॥ निष्ठाने । व्यञ्जने । तींवण इति तेवण इति चभाषा ॥ तिम०। ल्युट् । तिम्यते ऽनेन वा करणे वा ल्युट् ॥

तेमनी । स्त्री । चुल्लिप्रभेदे ॥

तेवनम् । न । केलिकानने ॥ क्रीडाया म् ॥ तेवनेन वनगत्वा नदीस्तीर्त्वा बहूदकाइतिरामायणम् ॥

तैक्ष्णयम् । न । तीक्ष्णतायाम् ॥

तैजस । पु । इन्द्रियाणां कारणे । राज साहङ्कारे ॥ तेजोमयान्त करणोपहि तत्वात् स्थूलप्रपञ्चलयस्थाने स्वप्नव्य ष्ट्युपहितचैतन्ये ॥ तेजसि परमा त्मनि स्थिते ॥ न । धातुद्रव्ये । सर्व धातु ॥ घृते ॥ तेजसोविकार' । त स्यविकारइत्यण् ॥ यद्वा । तेजो ऽस्यास्य । ज्योत्स्नाण् ॥ तीर्थविशेषे ॥ यत्रब्रह्मादिभि सैनापत्ये कार्त्ति केयोऽभिषिक्त ॥

तैजसावर्त्तिनी । स्त्री । मूषायाम् ॥ ते जसोधिकार सुवर्णादि रावर्त्यते ऽस्याम् । वृतुवर्त्तने । णयन्त । अधि करणेल्युट् । ङीप् ॥

तैतिल । पुं । गण्डकपशौ ॥ न । चतु र्थकरणे ॥ कलासुदक्षो ललनाभि- लाषी सुमूर्त्तिसन्तर्जितकामदेव । वक्ता गुणाढ्य कुशल सुशीलश्चेत्ते- तिलाख्यकरण प्रसूतौ ॥

तैत्तिडीकम् । न । तिन्तिडीकस्यावय वे ॥ तद्विकारे ॥ कोपधाच्चेत्यण् ॥ तिन्तिडीकै संस्कृते ॥ कुलत्थकोप- धादण् ॥

तैत्तिर । पु । तित्तिरिखगे ॥ न । ति त्तिरीणांगणे ॥ तित्तिरीणा समूह. । अनुदात्तादेरञ् ॥

तैत्तिरिक । पु । शाकुनिकविशेषे ॥ तित्तिरान्हन्ति । ठक् ॥

तैत्तिरीयक । पु । यजुर्वेदीयशाखा- विशेषस्याध्येतरि ॥

तैत्तिरीया । स्त्री । यजुर्वेदस्यशाखावि शेषे ॥

तैमिरिक. । त्रि । तिमिररोगग्रस्तचक्षुषि ॥

तैरणी। स्त्री। कुनीलाम्। रागदेषु पविशेषे॥

तैर्थिक.। पु। तीर्थकरे। कपिलकणा भुगादिषु॥

तैर्य्यग्योन। पु। त्रिविधभूतादिसर्गेष्वे कस्मिन् सर्गे॥ सत्त्वपशुमृगपक्षि-सरीसृपस्थावरभेदात् पञ्चविधोभवति॥

तैलम्। न। तिलसर्षपादिजनितस्नेहे। प्रचणे। स्नेहे। तेल इतिभाषा॥ तिलस्यविकार.। तस्यविकारइत्य ऽण्॥ तिलादिस्नेहवस्तूनां स्नेह स्तैल मुदाहृतम्। तत्तुवातहरसर्वंविशे षात्तिलसम्भवम्॥ नास्तितैलात्परं किञ्चिद्भेषजमारुतापहम्॥ तिल तैल गुरुस्थैर्यबलवर्णकरं सरम्। ह व्य विकाशि विशद मधुर रसपाक यो॥ सूक्ष्म कषायानुरस तिक्त वातकफ पहम्। वीर्य्यणोष्णहिमस्प र्शे वृंहण रक्तपित्तकृत्॥ लेखन ब द्धविण्मूत्रं त्वग्गर्भाशयशोधनम्। दी पन बुद्धिद मेध्य व्यवायि व्रणमेहनु त्॥ श्रोत्रयोनिशिर शूलनाशनं ल घुताकरम्। त्वच्यकेश्यञ्च चक्षुष्य मभ्यङ्गे भोजने ऽन्यथा॥ छिन्नभि न्नच्युतोत्पिष्टमथितक्षतपिच्छिते। भ ग्नस्फुटितविद्धाग्निदग्धविश्लिष्टदारि

ते॥ तथाभिहितनिर्भग्नमृगव्या-ग्रादिविक्षते। वस्तौ पानेन्नसस्कारे नस्येकर्णाक्षिपूरणे॥ सेकाभ्यङ्गावगा हेषु तिलतैल प्रशस्यते।*। ननुलेख नवृंहणयो कथ सामानाधिकरण्य मित्याह। सूक्ष्मादिदुष्ट पवन स्त्रो त सङ्कोचये यदा। रसोऽसम्यग्व हन् कार्श्यं कुर्याद्धत्तद्यवर्द्धयन्॥ ते षुप्रविष्टसरतासौक्ष्म्यस्निग्धत्वमार्द-वै.। तैलयम रस नेतु कृशानां ते न वृंहणम्॥ व्यवायि सूक्ष्मतीक्ष्णो ष्णसरत्वैर्मेदस क्षयम्। शनै. प्रकु रुते तैलं तेन लेखन मीरितम्॥ हृत पुरीष बध्नाति स्खलित तत् प्र वर्त्तयेत्। ग्राहक सारक चापि तेन तैलमुदीरितम्॥ घृत मब्दात्परं पक्क हीनवीर्यं प्रजायते। तैल पक्क मपक्क वा चिरस्थायिगुणाधिकम्॥ तैलं स्वयोनिगुणकृद्वाग्भटेनाखिलं मतम्। अत. शेषस्यतैलस्यगुणाज्ञे या स्वयोनिवत्॥ तैलानासार्षपादी ना यथास्थान गुणेरणम्॥ *॥ प्रात: स्नाने कृते श्राद्धे द्वादश्यां ग्रहणे तथा। मद्यलेपसम तैल तस्मात्तैल विव र्जयेत्॥ घृतञ्च सार्षपतैल यत्तैलपु ष्पवासितम्। अदुष्टपक्कतैलञ्च तैला भ्यङ्गेच नित्यश॥*॥ अर्केनूनंदृ

तिश्चद्य कीर्त्तिलाभश्चसोमे भौमे मृत्युर्भवति नियत चन्द्रजेपुत्रलाभ । अर्थग्लानिर्भवतिचगुरौ भार्गवेशो कयुक्त स्तैलाभ्यङ्गात् तनयमरणंसूर्यजेदीर्घमायु ॥ सिद्धके ॥

तैलकन्द । पु । तिलाङ्कितदले । द्रावककन्दे ॥ लोहद्राविल्व कटुत्वमुष्णत्व वातापस्मारविषशोफनाशित्वरसवन्धकारित्व देहसिद्धिकारित्व श्चेत्यस्यगुणा इतिराजनिघंट ॥

तैलकार । पु । तेली इति प्रसिद्धे वर्णसङ्करजातिप्रभेदे । धूसरे । चाक्रिके । तैलिनि ॥ कोटकस्त्रीगर्भे कुम्भकाराज्जातोयमिति । ब्र० ब्र० ख ॥

तैलकिट्टम् । न । खल इति भाषाप्रसिद्धे तैलमले । पिण्याके ॥

तैलङ्ग । पु । अन्ध्रदेशे ॥ श्रीशैलन्तुसमारभ्य चोलेशान्मध्यभागत । तैलङ्गदेशोदेवेशि ध्यानाध्ययनतत्पर ॥

तैलचौरिका । स्त्री । तैलपायिकायाम् ॥

तैलद्रोणी । स्त्री । काष्ठपर्यन्तमज्जनार्थं तैलपूर्णा काष्ठादिनिर्मितपात्रविशेषे ॥ तत्रावस्थितिगुणा । वातरोगव्याकुष्ठरोगपङ्गुबाधिर्यमिन्मिनगद्गदधन्वङ्गत्वप्रष्ठग्रचलितपवनगात्रकम्पकपाटीग्रीवा भङ्गापतन्त्रचयत्वधिरभवमूत्रकृच्छ्रवस्तिरोगेषु शस्तत्व

मितिराजवल्लभ ॥

तैलधान्यम् । न । तिलादिषु ॥ तिलातसीचतोरीचत्रिविधश्चापिसर्षप । द्विधाराजीखाखसञ्चवीज कौसुम्भसम्भवम् । एतानितैलधान्यानिप्रोक्तानिपूर्वसूरिभि ॥

तैलपर्ण । पु । पर्वतविशेषे ॥ न । ग्रन्थिपर्णे ॥

तैलपर्णकम् । न । ग्रन्थिपर्णवृक्षे ॥

तैलपर्णिकम् । न । हरिचन्दने ॥ तिलपर्णीवृक्षविशेषे जातम् । तत्रजातइत्यण् । ङीप् । स्वार्थेकन् । केशवइतिह्रस्व ॥ तैलपर्णीगिरिस्तत्राकारइतिस्वामी ॥ पु । चन्दनविशेषे ॥

तैलपर्णी । स्त्री । मलयजे चन्दने ॥ श्रीवासे ॥ सिल्हके ॥ तिलपर्णीवृक्षेजाता । तत्रजातइत्यण् । ङीप् ॥

तैलपा । स्त्री । तैलपायिकायाम् ॥

तैलपायिका । स्त्री । सपक्षकीटविशेषे । घरोच्छयाम् । तिलचटा इति भाषा ॥ तैल पिबति । पापाने । ण्वुल् ॥

तैलपिपीलिका । स्त्री । पिपीलिकाप्रभेदे । कपिजाङ्गिकायाम् ॥

तैलफल । पु । इङ्गुद्याम् ॥ बिभीतके ॥

तैलभाविनी । स्त्री । जातीपुष्पवृक्षे ॥

तैलमाली । स्त्री । वर्त्याम् ॥ दीपकू

ष्याम् ॥

तैलम्याता । स्त्री । स्वधायाम् ॥ पतन म् घात । तिलस्यघात । तिलपातो ऽस्याम् । घञ'स्वार्थाञ्चियेतिञ । घञन्तात् क्रियावाचिन. प्रथमान्ता दस्यामित्यर्थेञ स्यात् तदन्तस्त्रिया म् । श्येनतिलस्येतिमुम् ॥

तैलसाधनम् । न । गन्धद्रव्यविशेषे । काकोले । कक्कोले । काकला इति गौडेषु प्रसिद्धे कोषफले ॥

तैलस्फटिक. । पु । द्रव्यमणौ ॥ इ.०है ॥

तैलाक्त. । त्रि । तैलेनसिक्ते ॥

तैलागुरु । न । दाक्षागुरुणि ॥

तैलाटी । स्त्री । वरटायाम् ॥

तैलाम्बुका । स्त्री । तैलपायिकायाम् ॥

तैलिक. । पु । तैलकारे । तैलार्थंतिला दिबीजानां पेष्टरि ॥

तैली । पु । तैलकारे । चाक्रिके ॥ त्रि । तैलसम्बन्धिनि ॥

तैलिनी । स्त्री । दशावर्त्ताम् । तैल कीटे । घटिकायाम् ॥

तैलिशाला । स्त्री । तैलिकगेहे । य न्त्रगृहे ॥

तैलीनम् । न । तिल्ये । तिलक्षेत्रे । तिलानां भवन क्षेत्रम् । विभाषाति लेतिपक्षेखञ् ॥

तैष. । पु । पौषमासे ॥ तिष्येणयुक्ता पौर्णमासी अस्मिन् । सास्मिन् पौर्णमासीत्यर्थे सन्धिवेलाद्यृतुनक्ष त्रेभ्योणित्यण् । तिष्यपुष्ययोर्नक्षत्रा णियलोप । ङीप् ॥ तत सास्मिन पौर्णमासीत्यण् ॥

तैषी । स्त्री । पौष्याम् ॥ तिष्येण यु क्ता पौर्णमास्यस्मिन् । नक्षत्रेणयुक्ते ण् । तिष्यपुष्ययोर्नक्षत्राणियलोप' । ङीप् ॥

तोकम् । न । अपत्ये । पुत्रदुहित्रो' ॥ तौति । तु वृत्तो हिंसाद्युतिपूर्त्तिषु । बाहुलकात्क ॥

तोक्म' । पु । हरिते ॥ हरियवे । अ पक्वयवे ॥ पल्लवाङ्कुरे इति श्रीधर स्वामी ॥ हरिद्वर्णे ॥ न । कर्णमले ॥ तकति तक्यते वा । तकहसनेऽसहने च । बाहुलकान्मन् ओत्वञ्च ॥ मेघे ॥ इत्युज्वलदत्त' ॥

तोटकम् । न । द्वादशाक्षरपादे जगती छन्दोभेदे ॥ यथा । विनिधेहि चतु सगण रुचिर रविसङ्ख्यकवर्णकृत सुचिरम् । फणिनायकपिङ्गलसंकथि त ननु तोटकवृत्तमिद रुचिरम् ॥ यथा । सकलं मनसा क्रियया जनि त समवेक्ष्यविनाशिनतानुजवत् । प रिचितकश्चिद् इतोनिखिला इवि नाशियुतेन न कश्चिमितीति ॥

तोड । पु । भेदे ॥ तोडनम् । तुडतोडने ॥ घञ् ॥
तोडनम् । न । दारणे ॥ हिंसने । भेदे ॥
तोत्रम् । न । प्रतोदे । प्राजने । गवादिपशूनां ताडनदण्डे ॥ वेणुके । हस्तिन स्ताडनदण्डे ॥ तुद्यतेऽनेन । तुद्व्यथने । दाम्नीतिष्ट्रन् ॥
तोद । पु । व्यथायाम् ॥ तोदनम् । तुद० । घञ् ॥
तोदनम् । न । व्यथने ॥ तोत्रे । वृषभादि प्रेरणदण्डे ॥ तुद० । ल्युट् ॥
तोदित. । त्रि । प्रेरिते ॥
तोमर' । पु । न । शर्वलायाम् । गडाँसाइति सवली इतिवा ख्याते ऽस्त्रे ॥ हस्तक्षेप्यसशल्यदण्डे । रायबास इतिभाषा ॥ स्थूलाग्रगदायाम् ॥ छन्दादि (।ऽ) विकल्पे ॥ द्वत्तीछन्दोभेदे ॥ यथा । प्रथमकर विनिधाय जगद्वयन्विनिधाय । कुरु तोमर सुखकारि फणिराजवरविहारि ॥ यथा । सखि मादके मधुमासि व्रजसत्वर किमिहासि । सहतेनकि विहरामि किमुपावकं प्रविशामीति ॥
तोमरधर । पु । अग्नौ ॥ इतिशब्दा० ॥
तोमरिका । स्त्री । आढक्याम् । तुवर इतिभाषा ॥
तोयम् । न । अम्बुनि । जले ॥ एकहस्तोधृत तोय मभक्ष्य सर्वसम्मतम् ॥ उद्धृत वामहस्तेन यत्तोय पिवतिद्विज । सुरापानेन तुल्य स्यात्मनुराह प्रजापति ॥ अगन्धमव्यक्तरस शीत लघु तृषापहम् । अच्छ लघुच पथ्यञ्च तोयगुणवदुच्यते ॥ तौति । तु वौषआचरणार्थे' । औणादिकोय ॥ पूर्वाषाढायाम् ॥
तोयकाम । पु । अम्बुवेतसे । परिव्याधे ॥ त्रि । जलाभिलाषिणि ॥
तोयकृच्छ्रम् । न । जलमात्रपानरूप व्रतविशेषे ॥ इतिमिताक्षरा ॥
तोयडिम्भ । पु । घनोपले ॥ श०श० ॥
तोयद. । पुं । मेघे ॥ मुस्तके ॥ न । आज्ये ॥ त्रि । जलदातरि ॥ जलदान माहात्म्यमहाभारते दानधर्मे । अन्नेदत्तेनरेन्द्र प्राणादत्ताभवन्त्युत । प्राणदानाद्धि परमनदान मिह विद्यते ॥ अन्न वाप्यिभवति पानीयात् कुरुसत्तम । नीरजातेन हि विना न किञ्चित् सम्प्रवर्त्तते ॥ अन्नौषध्योमहाराज वीरुधश्चजलोद्भवा । यत. प्राणभृतां प्राणा सम्भवन्ति विशाम्पते ॥ तस्मात्पानीयदानाद्वै न परं विद्यते क्वचित् । तद्ददस्वाम्बरो निष्क्रयदीच्छेद्भूतिमात्मन' ॥ धन्य यशस्य मायुष्य जलदान मिहोच्यते

। अयं श्वाप्यधि कौन्तेय सदा तिष्ठति तोयदः ॥ सर्वकामानवाप्नोतिकीर्त्तिं चैवेह शाश्वतीम् । प्रेत्य चानन्त्यमश्नाति पापेभ्यश्चप्रमुच्यते ॥ तोयदो मनुजव्याघ्र स्वर्गं गत्वा महाद्युते । अक्षयान् समवाप्नोतिलोकानित्यब्रवीन्मनुरिति ॥ तोयं ददाति । डु दाञ्° । क ॥

तोयधर. । पु । मुस्तायाम् ॥ सुनिषण्णाख्यभेषजे ॥ घने । मेघे ॥ तोयस्यधर ॥

तोयधि । पु । उदन्वति । समुद्रे ॥ तोयानि धीयन्तेऽत्र । डुधाञ्° । कर्मण्यधिकरणेचेतिकि. । आतोलोप. ॥

तोयधिप्रियम् । न । लवङ्गे ॥

तोयनिधि. । पु । अब्धौ । समुद्रे ॥ तोयानि निधीयन्तेऽत्र । डुधाञ् कि: ॥ तोयानां निधिर्वा ॥

तोयपिप्पली । स्त्री । लाङ्गल्याम् । अकुलादन्याम् । गौडभाषया काँचडा इतिप्रसिद्धे जलजशाके ॥ तोयस्य पिप्पलीव ॥

तोयपुष्पी । स्त्री । पाटलावृक्षे ॥

तोयप्रसादन. । पु । न । कतके ॥ षष्ठीसमास ॥

तोयप्रसादनफलम् । न । कतकफले ॥

तोयफला । स्त्री । इर्वारौ ॥

तोयवल्ली स्त्री । कारवेल्ले ॥

तोयशाला । स्त्री । प्रपायाम् ॥

तोयशुक्तिका । स्त्री । जलशुक्तौ ॥

तोयसूचक । पु । भेके ॥ इ०शब्दा० ॥

तोयात्मा । स्त्री । विष्णौ ॥ यथा । यस्य केशेषुजीमूता नद्य सर्वाङ्गसन्धिषु । कुक्षौसमुद्राश्चत्वार स्तस्मै तोयात्मनेनमइति ॥

तोयाधिवासिनी । स्त्री । पाटलावृक्षे ॥

तोयेश । पु । वरुणे ॥ शतभिषायाम् ॥

तोरण. । पु । न । बहिर्द्वारे । द्वारवाह्यभागे ॥ स्तम्भोपरि चिते सिंहद्वाराख्ये ॥ तुरन्त्यत्र । तुरत्वरणहिंसयो । अधिकरणे ल्युट् गुणा ॥ तोलयन्त्यत्रेतिवा । तुलउन्माने । रलयोरेकत्वम् ॥ तुतुरत्यनेनवा । तुरत्वरणे । जौहोत्यादिक. ॥ न । कन्धरायाम् ॥ कन्धरातोरण कण्ठीतिहारावली ॥

तोल । पु । न । गुञ्जाशीतिसम्मित । तोलके ॥

तोलक । पु । न । कोले । द्रङ्क्षणे । वटके । कर्षार्द्धे । अशीतिगुञ्जामिते ॥ षोडशमाषके पञ्चवतिरक्तिकापरिमाणे । तोला इतिभाषा । कर्षे ॥ इतिवैद्यकपरिभाषा ॥

तोष. । पु । तुष्टौ ॥

तौक्षिक । पुं । धनूराशौ ॥

तौतातिकम् । न । तुतातभट्टकृतमीमांसाशास्त्रे ॥

तौतिक । पु । शुक्तौ ॥ न । मुक्तायाम् ॥

तौरङ्गिक । पु । अश्वारोहे । सादिनि ॥

तौरायणिक । पु । यजमाने ॥ तुरायणं यज्ञविशेष निर्वर्त्तयति । पारायण तुरायणेत्यादिनाठञ् ॥

तौर्य्यम् । न । तुर्यंमुरजादैा भवेशब्दरूपे ॥

तौर्य्यत्रिकम् । न । नृत्यगीतवाद्येषु समुदितेषु ॥ तुरीत्वरायाम् । त्वरत्तोरग्रन् । गुण बाधित्वा बाहुलकादुणिचेतिदीर्घ । तूर्यंमुरजादि तत्रभव तौर्य्यंशब्द । त्रयोरा यस्य तत् त्रिकम् । सङ्ख्याया अतिशदन्ताया कन् । तौर्य्योपलक्षित त्रिकमिति विग्रह ॥

तौल । पु । तुलाराशौ । तौलिनि ॥ त्रि । तुलासम्बन्धिनि ॥

तौलिक । पु । चित्रकारे ॥

तौलिकिक । पु । चित्रकारे । रङ्गाजीवे ॥

तौल्यम् । त्रि । तुलया परिच्छिन्ने ॥ तुल्यमेव । स्वार्थे ष्यञ् ॥

तौषारम् । न । हिमोदकविशेषे । तुषारजले ॥ अपिनद्यः समुद्रान्ते वह्निरापस्तदुद्भवाः । धूमावयवनिर्मुक्तास्तौषाराख्यास्तुता स्मृता ॥ अपथ्या प्राणिना प्रायो भूरुहाणान्तु ताहिता ॥ तुषाराम्बु हिम रूक्ष स्यादातत्त मपित्तलम् । कफोरुस्तम्भकण्ठाग्निमेहोगण्डादिरोगनुत् ॥ नदीमारभ्य समुद्रपर्यन्तवह्निरापस्तद्भवा वह्निभवा धूमावयवनिर्मुक्ता धूमांशरहिता आप तुषाराख्याइत्यर्थ ॥ तुषारस्येदम् । तस्येदमित्यण् ॥

त्यक्त । त्रि । हीने । विधूते । समुज्झिते । कृतत्यागे । छोडा इतिभाषा ॥ त्यज्यतेस्म । त्यजहानौ । क्त ॥

त्यक्तव्य । त्रि । त्यजनीये ॥

त्यक्तसर्वपरिग्रह । त्रि । समस्तभोगोपकरणरहिते विरक्ते ॥ त्यक्ता सर्वे परिग्रहा येन ॥

त्यजनम् । न । त्यागे । वर्ज्जने ॥

त्य । त्रि । तच्छब्दार्थे ॥ सर्वादि । त्यजति । त्यज० । त्यजितनियजिभ्यो डिदित्यदि ॥ स्त्रियां त्या । क्लीबे त्यत् ॥ वाच्याकाशयो ॥

त्याग । पु । दाने । अर्थिषु मुक्तहस्ततायाम् । धर्मेणोपार्जितार्थस्य सत्पात्रे विनियोगे ॥ वर्ज्जने ॥ सर्वकर्मफलाभिसन्धिवर्जने । कर्माधिकारिक

त्यागः

र्वकफलाभिसन्धिपूर्वककर्मत्यागे ॥ स च सात्त्विकादिभेदात् त्रिविधोभवति ॥ यथा । नियतस्यतु सन्न्यास कर्मणो नोपपद्यते । मोहात्तस्यपरित्याग स्तामस परिकीर्त्तित ॥ १ ॥ दु खमित्येवयत्कर्म कायक्लेशभयात् त्यजेत् । स कृत्वाराजसत्याग नैवत्यागफललभेत् ॥ २ ॥ कार्यमित्येवयत्कर्म नियत क्रियते ऽर्जुन । सङ्ग त्यक्त्वा फलञ्चैव स त्याग सात्त्विकोमत ॥ ३ ॥ अपिच । विशेषणाभावात् विशेष्याभावात् उभयाभावाच्च त्रिविधो भवति । तथाहि । फलाभिसन्धिपूर्वककर्मत्याग सत्त्यपिकर्मणि फलाभिसन्धित्यागादेक. १ । सचसात्त्विकत्वादादेय ॥ सत्त्यपिफलाभिसन्धौ कर्मत्यागात् द्वितीय २ । सचदु खबुद्ध्याकृतोराजस विपर्यासेनकृतस्तामस इतिभेदात् द्विविधोहेयो भवति ॥ फलाभिसन्धे. कर्मणश्चत्यागात् तृतीय. ३ । स च कर्मानधिकारिकर्त्तृकोनैर्गुण्यरूप. ॥ सोपिसाधनफलभेदेन द्विविध । तत्रसात्त्विकेन फलाभिसन्धित्यागपूर्वककर्मानुष्ठानरूपेण त्यागेन शुद्धान्त करणस्योत्पन्नविविदिषस्य आत्मज्ञानसाधनश्रवणाख्य वेदान्तविचा-

त्यागी

राय फलाभिसन्धिरहितस्यान्त करणशुद्धौ सत्यां तत्साधनस्य कर्मणो वैतृष्ण्येजातद्वारा ऽवहननस्य परित्याग स एक साधनभूतो विविदिषासन्न्यास उच्यते ॥ द्वितीयस्तु जन्मान्तरकृतसाधना ऽभ्यासपरिपाकादस्मिन् जन्मनि आदावेवोत्पन्नात्मबोधस्य कृतकृत्यस्य स्वतएवफलाभिसन्धे कर्मणश्चपरित्याग. फलभूत सविद्वत्सन्न्यासइत्युच्यते ॥ * ॥ त्याग प्रपञ्चरूपस्य चिदात्मत्त्वावलोकनात् । त्यागोहि महतां पूज्य. सद्योमोक्षमयोयत ॥ * ॥ त्यागेन युक्तादिवमुत्पतन्ति त्यागेनहीना नरकं व्रजन्ति । न त्यागिना दुष्करमस्ति किञ्चित् त्यागोहि सर्वव्यसनानिहन्ति ॥ त्यजनम् । त्यजदानौ । घञ् ॥ विवेकिपुरुषे ॥ इतिशब्दरत्नावली ॥ उपेक्षायाम् ॥

त्यागफलम् । न । ज्ञाननिष्ठायाम् ॥

त्यागी । त्रि । दातरि ॥ शूरे ॥ वर्जनशीले ॥ सात्त्विकत्यागेनयुक्ते ॥ न द्वेष्ट्यकुशल कर्म कुशलेनानुसज्जते । त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशय ॥ नहि देहभृता शक्य त्यक्तु कर्माण्यशेषत. । यस्तुकर्मफलत्यागी सत्यागीत्यभिधीयते ॥

त्यजति तच्छील । सम्पृचानुरुधे तिघिनुण् ॥

त्यागिन । त्रि । त्यागज्ञे ॥ त्यागेन निवृत्त । भावप्रत्ययान्तादिमप् ॥

त्याजित । त्रि । विसर्जिते ॥ त्यजेर्ण्यन्तात् द्विकर्मकात् कर्मणिक्त । ग्यन्ते कर्त्तुश्च कर्मणामित्युक्ते ॥

त्याज्य । त्रि । त्यागयोग्ये । वर्जनीये । वर्ज्ये ॥ तीरे प्रतिग्रहस्त्याज्यो त्याज्योधर्मस्य विक्रय ॥ अपिच । पिश्वतिशयमस्य शोधित वाप्यशोधितम् । त्याज्यो भवति कौना दण्डनीयो ऽपिभूभृत इति ॥ त्यजेश्चेति ण्यति कवर्गादेशाभाव ॥

त्रङ्ग । पु । प्रतिमार्गे ॥

त्रङ्गा । स्त्री । प्रतिमार्गे । उद्रङ्गे ॥

त्रप । पु । सलज्जे ॥ त्रपते । त्रपूष्लज्जायाम् । षित्त्वादङ् ॥

त्रपा । स्त्री । लज्जायाम् ॥ कुलटायाम् ॥ त्रपते ऽनया । त्रपूष्० । षिद्भिदादिभ्योऽङ् । टाप् ॥ कुले ॥ कीर्त्तौ ॥ इति शब्दरत्नावली ॥

त्रपाक । पु । म्लेच्छविशेषे ॥

त्रपारण्डा । स्त्री । वेश्यायाम् ॥

त्रपिष्ठ । त्रि । तृप्रतमे ॥ अयमेषामतिशयेनतृप्र । अतिशायने इष्ठन् । प्रियस्थिरेति तृप्रस्यत्रबादेश ॥

त्रपीयान् । त्रि । तृप्रतरे ॥ अतिशयेन तृप्र । द्विवचनविभज्येति ईयसुन् ॥ प्रियस्थिरेति तृप्रस्यत्रबादेश ॥

त्रपु । न । सीसके ॥ रङ्गे ॥ अग्निदृष्ट्वा त्रपते लज्जतइव । त्रपूष० । शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिवन्धिमनिभ्यश्चेत्यु ॥

त्रपुकर्कटी । स्त्री । त्रपुष्याम् ॥

त्रपुटी । स्त्री । सूक्ष्मैलायाम् ॥ इ०र०॥

त्रपुलम् । न । रङ्गे । राँग इति भाषा ॥

त्रपुषम् । न । कर्कटीप्रभेदे । सुधावासे । सुशीतले । लघुखीरा बालनखीरा इत्यादिभाषा ॥ त्रपुष लघु नीलञ्च नव तृट्क्लमदाहजित् । स्वादुपित्तापह शीत रक्तपित्तहरं परम् ॥ तत् पक्व मन्लमुष्णञ्चात् पित्तल कफवातनुत् । तद्दृन्मूत्रल शीत रुक्ष पित्तास्रकृच्छ्रजित् ॥

त्रपुषी । स्त्री । कर्कट्याम् । खीरा इति भाषा ॥

त्रपु० । न । } रङ्गे ॥
त्रपुसम् । न । }

त्रपुसी । स्त्री । महेन्द्रवारुण्याम् ॥ कर्कट्याम् ॥ लताविशेषे । पीतपुष्पायाम् । खीरा इति भाषा ॥

त्रयम् । न । त्रितये ॥ त्रयो ऽवयवा अस्य । सङ्ख्यायाअवयवेतयप् । द्वि

त्रिर्भ्यांतयस्यायन्त्या ॥

त्रयी । स्त्री । त्रिवेदाम् । ऋग्यजुः सामा ख्यश्रुतिचये ॥ ब्रह्माऽथपुरुषो रुद्र स्त्रयमेतत् त्रयीमयम् । सर्गादावृ ग्मयोब्रह्मा स्थितौविष्णुर्यजुर्मयः । रुद्रःसाममयोऽन्ताय तस्मात् तस्या शुचिर्ध्वनि ॥ पुरन्ध्याम् ॥ सुमतौ ॥ सोमराजीवृक्षे ॥ भवान्याम् । दुर्गा याम् ॥ यथा । ऋग्यजुःसामभागेन साङ्गवेदगतापिया । त्रयीति पठ्यते लोकेदृष्टादृष्टार्थसाधिनीति देवी पुराणम् ॥ चितये ॥ टिड्ढेतिङीप् ॥

त्रयीतनु । पु । सूर्ये ॥ त्रयी तनुर्य स्य ॥

त्रयीधर्म्म । पु । त्रय्या विधीयमाने ज्यो तिष्टोमादिकर्मणि ॥ त्रय्या धर्म त्र यीधर्म ॥

त्रयीमुख । पु । ब्राह्मणे ॥ त्रयी मुखे यस्य ॥

त्रयोदश । त्रि । त्रयोदशानाम्पूरणे ॥ तस्यपूरणेडट् ॥

त्रयोदश । चि । सङ्ख्याविशेषे १३ । ते रह इति भाषा ॥ सङ्ख्येये ॥ त्रय श्च दशच । त्र्यधिकादशेति वा । चे लय इतिवयस् । रत्वोत्त्वगुणा ॥

त्रयोदशी । स्त्री । तिथिविशेषे ॥ सा चन्द्रस्य त्रयोदशकलाक्रियारूपा च योदशकलाक्रियावच्छिन्नकालरूपा वेति तिथ्यादितत्त्वम् ॥ रूपान्वित सात्त्विकभावहीन सुखीचबाल्ये ज ननीप्रियश्च । सदालस शिल्पगुणै कवेत्ता त्रयोदशी जन्मतिथिर्यदि स्यात् ॥

त्रय्यात्मा । पु । सूर्ये ॥ त्रयीआत्मास्व रूपंयस्य ॥

त्रसम् । न । वने ॥ त्रि । जङ्गमे ॥ त्रस ति । त्रसीउद्वेगे । पचाद्यच् ॥

त्रसन । त्रि । सन्त्रासयुक्ते ॥

त्रसर । पु । तन्त्रवायोपकरणविशेषे । सूत्रवेष्टने । तासनी इति गौडभा षा ॥ त्रसनम् । त्रसी० । अरन् ॥

त्रसरेणु । पु । परमाणुषट्के । सयु क्ताद्व्यणुकत्रये ॥ जालान्तरगतेभानौ यत्सूक्ष्मं दृश्यते रजः । प्रथमं तत् प्रमाणानां त्रसरेणुं प्रचक्षते ॥ वैद्य कपरिभाषया त्रिंशत् परमाणुप रिमाणे । ध्वस्याम् ॥ यथा । जाला न्तरगतेसूर्यकरे ध्वंसीविलोक्यते । त्रसरेणुस्तु विज्ञेय स्त्रिंशता परमाणु भिरिति ॥ स्त्री । सूर्यपत्न्याम् ॥

त्रस्त । चि । भीते ॥ चकिते ॥ न । शीघ्रे ॥

त्रस्नु । त्रि । त्रासशीले । भीरौ ॥ त्रस्य ति । त्रसी० । त्रसिगृधिधृषिक्षिपे

क्तु । नेड्वशीतिनेट् ॥

त्राणम् । न । त्रायमाणाया मोषधौ ॥ र चणे ॥ त्रि । रक्षिते ॥ त्रायतेस्म । त्रैङ् पालने । क्त । नुदविदेति पक्षेनत्वम् ॥ रक्षके ॥ त्रायते । कर्त्तरिल्युटवा ॥

त्राणा । स्त्री । त्रायमाणाय म् ॥

त्रात । । रक्षिते ॥ त्रायतेस्म । त्रै । नुदविदोन्दत्राघ्राह्रीभ्यो न्यतर॰ ग्मितिपक्षेनत्वाभाव ॥

त्राता । त्रि । पालयितरि ॥ त्रायते । त्रैङ्॰ । तृच् ॥

त्रान्त । पु । त्रावसाने शब्दे ॥ चोन्तेय स्य । यथा । यावान् कश्चित् त्रान्त शब्दोऽय नपुसकेतु बोद्धव्य ॥ यथा । पत्रच्छत्रछत्रमित्रकलत्रादयो न-पुसका प्रचक्षते ॥

त्रापुषम् । त्रि । त्रपुणोविकारे ॥ त्रपुज तुनो षुगित्यण् ॥

त्रायन्ती । स्त्री । वार्षिके । त्रायमाणा याम् । बलभद्रिकायाम् ॥ त्रायमा याम् । सपदादित्वात् क्विप् । त्राम् अयति । इगतौ । शतृप्रत्यय । उगितश्चे तिङीप् ॥ त्रायन्ती तुवरा तिक्ता सरा पित्तकफापहा । ज्वरहृद्रोगगु ल्मास्रभ्रमशूलविषप्रणुत् ॥

त्रायमाणा । त्रि । रक्ष्यमाणे ॥

त्रायमाणा । स्त्री । वला इति वहुला इतिच गौडभाषाप्रसिद्धायां देवव लायाम् । वार्षिकौषधौ । त्रायन्त्या म् ॥ अस्यागुणा यथा । शीतत्वम धुरत्व गुल्मज्वरकफास्रभ्रमतृष्णा क्षयग्लानिविषच्छर्दिविनाशित्वमि तिराजनिर्घण्टः ॥ त्रायते । त्रैङ्॰ । शानच् त्रामश् वा ॥

त्रास । पु । भये ॥ त्रसीउद्वेगे । घञ् ॥ मणिदोषे ॥

त्रासजिह्म । त्रि । भयक्लिष्टे ॥ त्रासेन जिह्म ॥

त्रासदायी । त्रि । भयदातरि । शङ्करे ॥ इति हेमचन्द्र ॥

त्रासन । त्रि । भयावहे ॥

त्रय । पु । त्रिसङ्ख्यायाम् । तीनइति भाषा ॥ त्रि । सङ्ख्येये । त्रिसङ्ख्या विशिष्टे ॥ यथा त्रयोदेवा नतुदेवा नांत्रय ॥ तरति । तॄ॰ । तरतेड्रिः । त्रय त्रीन् त्रिभ्यइत्यादिरूपाणि ॥ तिस्रोभार्या स्त्रियाञ्च त्रयोभृत्या श्च वान्धवा । श्रुतवेदविरुद्धाश्च नद्यो ते मङ्गलप्रदा. इतिब्रह्मवैवर्त्तपुरा णम् ॥

त्रिश । त्रि । त्रिंशत्तमे । तीसवाँ इति भाषा ॥ त्रिंशत पूरण । तस्यपूरणे डट् ॥

त्रिंशकः । त्रि । त्रिंशद्भिःक्रीतै ॥ त्रिंश

तित्रिंशद्भ्यां डवुन्सञ्ज्ञायामित्यसं
ज्ञायामार्हीयेष्वर्थेषु ड्वुन् । टि
लोपः ॥

त्रिंशत् । स्त्री । सङ्ख्याविशेषे । तीस
इतिभाषा ॥ सङ्ख्येये ॥ त्रयोदश
त परिमाणमस्य । पङ्क्ति विंशति
त्रिंशच्चत्वारिंशदितिनिपातनात् प्र
कृतेस्त्रिन् भाव शच्च प्रत्ययः ॥

त्रिंशत्पत्रम् । न । कुमुदे । कैरवे ॥ त्रिंश
त्सङ्ख्यकानिपत्राणि यस्मिन् तत् ॥

त्रिंशांश । पु । त्रस्यत्रिंशदंशे ॥ यथा ।
पञ्चपञ्चाष्टद्विबाणा त्रिषमेत्रिंशदंश
का । माहेयशनिजीवज्ञशुक्राणां व्यु
त्क्रमात् समे ॥ विषमराशौ कुज-
शनिगुरुबुधशुक्राणां पञ्चपञ्चाष्टसप्त
पञ्चमितास्त्रिंशदंशकाः क्रमात् ज्ञेयाः
। समराशौ व्युत्क्रमात तेषां विपर्यये
णत्रिंशांशाज्ञेयाः ॥ यथा मेषोविष
मराशि तत्र प्रथमावधिपञ्चांशा भौ
मस्य । षष्ठांशमारभ्य दशमांशपर्य
न्तं पञ्चांशाः शनेः । एकादशांशमा
रभ्याष्टादशांशपर्यन्तमष्टांशागुरोः
। ऊनविंशांशमारभ्य पञ्चविंशांश-
पर्यन्तं सप्तांशाबुधस्य । ततः षड्विंशा
शमारभ्य त्रिंशांशपर्यन्तं पञ्चांशाः
शुक्रस्यत्रिंशांशाः क्रमात् ज्ञेयाः । मि
थुनसिंहतुलाधनुः कुम्भेष्वप्येवम् ॥

समराशौ व्युत्क्रमाद्यथा । वृषेप्रथ
मांशमारभ्य पञ्चांशाभृगोः । ततो
द्वादशांशपर्यन्तं सप्तांशाबुधस्य । त
तोविंशांशपर्यन्तं अष्टांशागुरोः । त
तः पञ्चविंशांशपर्यन्तं पञ्चांशाः शनेः
। ततस्त्रिंशदंशपर्यन्तं पञ्चांशाः कुज
स्यत्रिंशांशाः ॥ एवंकर्कटकवृश्चिक-
मकरमीनेष्वपिबोध्याः

त्रिकम् । न । पृष्ठाधरे । पृष्ठवंशाधोभागे
। कटिभागे ॥ त्रये ॥ त्रिपथसंस्थाने
॥ त्रिफलायाम् ॥ त्रिकटौ ॥ त्रिम
दे ॥ यथा । गुडूचीसारसयुक्तात् त्रि
कत्रयसमन्वयात् । वातरक्तं निह-
न्त्याशु सर्वरोगहरन्त्वयं ॥ त्रयाणां
सङ्घः । सङ्ख्यायाः सञ्ज्ञासङ्घसूत्रा
ध्ययनेष्वितिकन् ॥ तृतीयके ॥ तृ
तीयेनरूपेण ग्रहणं ग्रन्थस्य । तावति
थं ग्रहणमितिलुग्वेति कन् पूरणप्र
त्ययस्यच लुक् ॥ पु । गोक्षुरे ॥

त्रिककुत् । पु । त्रिकूटाचले ॥ त्रीणि
ककुत् सदृशानि शृङ्गाण्यस्य ॥

त्रिककुद्धामा । पु । विष्णौ ॥ ऊर्द्धाधो
मध्याभेदेन तिसृणां ककुभां धाम
आश्रयोयः ॥ तिसृणां ककुभां दिशा
समाहार इतिविग्रहे तद्धितार्थोत्त
रपदसमाहारेचेति समाहारे द्विगु
रेकवचनमित्येकवद्भावे समपुम-

कमितिनपुंसकत्वेन त्रिककुप् तस्य धाम अधिष्ठानं प्रकाशो वेति। इदञ्च समासात्मकमेकनाम। त्रिसर्गांक कुभामितिभाष्य नविग्रहप्रदर्शकं किन्तु फलितार्थकथनम्॥

त्रिकट। पु। गोक्षुरके॥

त्रिकटु। न। कटुत्रिके। त्र्यूषणे। व्योषे॥ विश्वोपकुल्यामरिच त्रय त्रिकटुकथ्यते॥ त्र्यूषणं दीपनं हन्ति श्वास कासत्वगामयान्। गुल्ममेहकफ स्थौल्यमेद श्लीपदपीनसान्॥ चयाणां कटूनां मरिचशुण्ठिपिप्पलीनां समाहार॥

त्रिकण्ट। पु। गोक्षुरके॥ मत्स्यभेदे। तिकांटा खुड्डू इतिभाषा॥ टेङ्गरा इतिगौडप्रसिद्धे मत्स्ये॥ न। कण्टकत्रये। मिलित ९ ह्न्स्व मिद्नमनीदुस्पर्शात्रयरूपे॥ चीणि कण्टकानि यस्य यस्मिन्वा॥

त्रिकण्टक। पु। गोक्षुरकवृक्षे॥ खघुगर्गमत्स्ये॥

त्रिकर्मकृत्। पु। इज्याध्ययनदानानां कर्त्तरि॥

त्रिकशूलम्। न। वातजन्यव्यथाविशेषे॥ स्फिगस्थ्नो पृष्ठवंशास्थ्नो य सन्धिस्तत्त्रिकं स्मृतम्। तत्र वातेन या पीडा त्रिकशूलं तदुच्यते॥

त्रिका। स्त्री। कूपस्थनेमौ। कूपस्यान्तरज्ज्वादिधारणयन्त्रे॥ तिस्रोऽस्य योऽस्या। सङ्ख्याया सञ्ज्ञासङ्घसूत्राध्ययनेष्विति कन्॥

त्रिकाय। पु। सुगते॥ त्रयः कायाअस्य॥

त्रिकार्षिकम्। न। मिलितनागराऽतिविषामुस्तात्रयरूपे॥

त्रिकालम्। न। कार्यकालतत्पूर्वापरकालेषु॥

त्रिकालज्ञ। त्रि। सर्वज्ञे॥ पु। बुद्धे॥ त्रिकालं जानाति। ज्ञा०। आतइति क॥

त्रिकालदर्शी। पु। मुनौ॥ त्रि। सर्वज्ञे। भूतभविष्यद्वर्त्तमानवेत्तरि॥ त्रिकालं पश्यति। दृशिर्०। ग्रहादित्वाणिनि॥

त्रिकालवित्। पु। बुद्धे॥ त्रि। त्रिकालज्ञे॥ त्रिकालं वेत्ति। विद्०। क्विप्॥

त्रिकूट। पु। त्रिककुत्पर्वते। लङ्काधारे। सुवेले॥ क्षीरोदार्णवतीरवर्त्तिनिशैलविशेषे। यत्र गजेन्द्रो गरुडगामिना श्रीनारायणेनोद्धृत। अस्य वर्णनं वामनपुराणे द्रष्टव्यम्॥ न। सामुद्रलवणे॥

त्रिकूटपर्वत। पु। तीर्थविशेषे॥

त्रिकूटलवणम्। न। द्रोणीलवणे॥

त्रिकोणम् । न । तस्मात् नवमपञ्चम स्थानयोः ॥ योनौ ॥ कामरूपपीठे ॥ करतोयां समारभ्य यावद्दिक्करवासिनी । शतयोजनविस्तारं त्रिकोणं सर्वसिद्धिदम् ॥ त्रि । व्यस्रे ॥

त्रिकोणफलम् । न । शृङ्गाटके ॥

त्रिक्षारम् । न । क्षारत्रये ॥

त्रिक्षुर । पु । कोकिलाक्षवृक्षे ॥

त्रिखम् । न । त्रपुषे ॥

त्रिखट्वम् । न । खट्वात्रये ॥ तिसृणां खट्वानां समाहारः ॥

त्रिखट्वी । स्त्री । त्रिखट्वे ॥ द्विगोरिति ङीप् ॥

त्रिगङ्गम् । न । तीर्थविशेषे ॥

त्रिगण । पु । त्रिवर्गे ॥ त्रयाणांधर्मार्थकामानां गणः ॥

त्रिगर्त्त । पु । सुशर्माख्यन्नृपतेर्देशे । जालन्धरे ॥ तद्देशजे त्रिगर्त्ताः ॥ गणितान्तरे ॥

त्रिगर्त्तक । पु । त्रिगर्त्ते ॥ त्रिगर्त्तएव । स्वार्थे क ॥

त्रिगर्त्ता । स्त्री । कामुकाङ्गनायाम् ॥ घुर्घुरिकायाम् ॥

त्रिगुणम् । न । प्रधाने ॥ प्रकृतौ ॥ त्रयो गुणा सुखदुःखमोहा अस्येतिव्युत्पत्ते । तदनेन सुखादीनामात्मगुणत्व पराभिमतं पराकृत भवति ॥ व्यक्ते ॥ सत्त्वरजस्तमस्सु ॥ त्रयाणां गुणानां समाहारः ॥ त्रि । गुणत्रययुक्ते ॥

त्रिगुणा । स्त्री । तुल्यगुणत्रयात्मिकायां प्रकृतौ ॥

त्रिगुणाकृतम् । न । त्रिहल्ये । त्रि कृष्टक्षेत्रे ॥ त्रिगुणाकृतम् । सङ्ख्यायाश्चगुणान्ताया इतिडाच् ॥

त्रिगुणात्मकम् । न । अज्ञाने ॥ गुणा लोहितशुक्लकृष्णा अज्ञानकार्येषु तेजोवन्नेष्व वान्तरप्रकृतिषु श्रुतिप्रसिद्धाः । तथाच कार्यगतत्रिरूपेण कारणमप्यज्ञान मव्याकृतात्मक त्रिरूपेण त्रिगुणात्मकम् । यद्वा रजस्सत्त्वतमो लक्षणास्त्रयोगुणा स्तद्गुणमज्ञान गुणगुणिनो रभेदविवक्षयात्रिगुणात्मक भवति ॥ त्रयोगुणा आत्मानो यस्य ॥

त्रिगुणित । त्रि । त्रिरावृत्तकृते ॥

त्रिजटा । स्त्री । राक्षसीविशेषे ॥ सीतापक्षपातिनीय रावणालये ॥ विल्ववृक्षे ॥

त्रिजातम् । न । समानतया मिलिते षुत्वगेलापत्रेषु ॥ यथा । एलात्वचिभिरुद्दिष्ट त्रिजातंत्रिसुगन्धिकम् ।४ चतुर्जात सनागन्तु इयवातकफापहमिति ॥

त्रिजातकम् । न । त्रिसुगन्धौ । तुल्येषु त्वगेलापत्रकेषु ॥ एतच्च रोचन रू क्ष तीक्ष्णोष्ण मुखगन्धहृत् । लघु पित्ताग्निकृ द्वर्ण्यं कफवातविषापह म् ॥ त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम् । नागकेशरसयुक्त चा तुर्जातक मुच्यते ॥

त्रिणता । स्त्री । धनुषि ॥ त्रिषुस्थानेषु न ता । पूर्वपदादितिणत्वम् ॥ टाप्च ॥

त्रिणाचिकेत । पु । अध्वर्युव्रते ॥ तद्यो गात् पुरुषे ॥ त्रि कृत्वो नाचिकेतो ऽग्नि श्चितोयेन तस्मिन् ॥ तद्विद्या न स्तदध्ययन स्तदनुष्ठानवान् वा य स्तस्मिन् ॥

त्रिणेत्र । पु । त्र्यम्बके । हरे ॥ त्रि । नेत्रत्रयविशिष्टे ॥ त्रीणिनेत्राणियस्य । पूर्वपदात् सञ्ज्ञायामग इति गिरिन द्यादीनांवेति वा णत्वम् ॥

त्रितक्षम् । न । तक्ष्णा त्रये ॥ त्रयाणा तक्ष्णा समाहार ॥

त्रितयम् । न । त्रये ॥ त्रयोऽवयवा अस्य । सङ्ख्याया अवयवेतयप् ॥

त्रिदण्डम् । न । चतुरङ्गुलगोवालवेष्ट नादन्योन्यसम्बन्धे यतेर्दण्डविशेषे ॥ पु । सन्न्यासाश्रमे ॥ यथा । यस्त्वस यतषड्वर्गं प्रचण्डेन्द्रियसारथि. । ज्ञा नवैराग्यरहित स्त्रिदण्ड मुपजीवती ति विष्णुभागवतम् ॥ त्रयाणां दण्डानां समाहार ॥ त्रिदण्डमस्त्यस्य । अच् ॥

त्रिदण्डी । पु । त्रिदण्डधारिणि सन्न्या सिविशेषे ॥ वाङ्मन कायाना निषि द्धाभिधानासतङ्कल्पप्रतिषिद्धव्यापार त्यागवति ॥ यथा ह्मनु । वाग्दण्डो ऽथ मनोदण्ड कायदण्ड स्तथैवच । यस्यैते निहितावुद्धौ त्रिदण्डीतिसउ च्यते इति ॥ त्रिदण्डमस्यास्ति । इनि ॥

त्रिदला । स्त्री । गोधापदीलतायाम् ॥

त्रिदलिका । स्त्री । चर्मकषायाम् ॥ इति शब्दचन्द्रिका ॥

त्रिदश । पु । देवे । निर्जरे ॥ तृती या यौवनाख्या दशा यस्य स । त्रिश ब्दस्तृतीयार्थता त्रिविभागवत् । त्रिदशयो सङ्ख्याव्ययेतिवहुव्रीहि । वहुव्रीहौसङ्ख्येयेडजवहुगणात इतिडच् ॥ त्रीन् तापान् दशति । दं शदशने । मूलविभुजादित्वात् क । पृ॰नलोप इति वा ॥ जन्मसत्ताविना शाख्यास्तिस्रोदशा यस्य । नतुम र्त्यानामिव वाल्ययौवनवार्द्धक्याख्या ॥ त्रयस्त्रिंशद्देवमुख्यगणे ॥ त्र्यधिका त्रिंशत्त्रिदश त्रिदशा । अधिकाच्च सङ्ख्यार्थान्तर्भावेनैकार्थीभाव । ते च अर्कादादश रुद्राएकादश वसवो ष्टौ विश्वेदेवौद्वाविति ॥ एकएवचि

शब्दस्तन्त्रेणोभयार्थे इतिवृत्ताधिका रात्त्रिदशाद्व्यव्यख्यात.॥

त्रिदशगोप । पु । इन्द्रगोपकीटे ॥

त्रिदशदीर्घिका । स्त्री । स्वर्गङ्गायाम् ॥

त्रिदशमञ्जरी । स्त्री । तुलस्याम् ॥

त्रिदशवर्त्म । न । नभसि ॥ त्रिदशानां वर्त्म॥

त्रिदशाचार्य्य । पु ।जीवे।सुरगुरौ ॥ त्रिदशानाम् आचार्य. ॥

त्रिदशाधिप । पु । शक्रे ॥

त्रिदशाध्यक्ष । पु।विष्णौ॥गुणावेशेन सञ्जातानांतिसृणां दशानां जाग्रदा दीनां मध्यक्ष स्वामी ॥ त्रिदशानां देवानां वा अध्यक्ष ॥

त्रिदशायुधम् । न । वज्रे ॥

त्रिदशारि । पु । दैत्ये॥ त्रिदशानाम् अरि. ॥

त्रिदशालय । पु।स्वर्लोके॥ त्रिदशानाम् आलय ॥ सुमेरुपर्वते ॥

त्रिदशावास । पु । त्रिविष्टपे।स्वर्गे ॥ त्रिदशानाम् आवास ॥

त्रिदशाहार । पु । अमृते।पीयूषे ॥

त्रिदशेश्वरी । स्त्री । दुर्गायाम्॥

त्रिदाखिका । स्त्री । चर्मकषायाम् ॥

त्रिदिनव्रतम् । न। नैमित्तिकेव्रतविशे षे॥यथा।खरकुक्कुटकोलांश्च विक्री याणोद्विजातय । नीचहन्ति चरन्ते पिशुद्ध्येयु स्त्रिदिनव्रतात् ॥ दिनमेक निराहारो द्वितीय कणभोजन । तृतीयन्तु नयेदद्भि स्त्रिदिनव्रतम स्विकेइतिकुलार्णवसेतु ॥

त्रिदिनस्पृक् । पु । त्र्यहस्पर्शे। अह्नस्ति थित्रयस्पर्शने ॥ यथा । त्रिदिनस्पृक् दिनत्रयस्पर्शनादह्न । तथाहोरा- त्रस्य वारद्वयेन तिथ्यन्तद्वयवद्वि- स्पृश्यते तदा त्रिदिनस्पृक् स्यादि त्यर्थ ॥

त्रिदिव. । पुं । स्वर्गे ॥ त्रयोब्रह्मविष्णुरु द्रा दीव्यन्त्यत्रेति त्रिदिव । हलश्चे ति घञ् । सञ्ज्ञापूर्वकत्वान्नगुण. ॥ यद्वा । सात्त्विकराजसतामसभेदेन त्रिविधा दीव्यन्ति व्यवहरन्तिप्रकाश न्ते वा । इगुपधत्वात्क ॥ यद्वा तृती यायौ । घञर्थेकविधानम् । वृत्ति विषये सङ्ख्याशब्दस्य पूरणार्थत्व म् ॥ न । खे । नभसि ॥ सुखे ॥

त्रिदिवा । स्त्री । नदीविशेषे ॥

त्रिदिवेश । पु । देवे । निर्जरे ॥ त्रि दिवस्य ईश ॥

त्रिदिवोद्भवा । स्त्री । स्थूलैलायाम् ॥

त्रिदिवौका । पु । देवे । सुरे ॥

त्रिदृक् । पु । शिवे । महादेवे ॥ त्रि । त्रिनेत्रे ॥

त्रिदोष: । पु । सन्निपाते ॥ न । वात-

पित्तकफरूपे दोषत्रये ॥

त्रिदोषज । पु । त्रिदोषजनिते सन्निपातरोगे ॥ अस्य पूर्वरूपम् । सर्वलिङ्गसमावाय सर्वदोषप्रकोपजे ॥ सर्वदोषप्रकोपजे पूर्वसर्वलिङ्गसमावाय । क्वतिश्रयितजृम्भानेत्रदाहाश्वारुचिसञ्चितानां श्रमादीनां समवायो भवति ॥ * ॥ त्रिज्वरे वातकफोल्बणे वा त्रिदोषजे वाद्रमूलमिश्र । किराततिक्तादिगण प्रयोज्य शुद्ध्यर्थिने वा त्रिवृताविमिश्र ॥

त्रिधा । अ । त्रिप्रकारे ॥ यथा । त्रिधा करोति ॥

त्रिधातु । पु । गणेशे ॥ न । धातुत्रये ॥

त्रिधामा । पु । विष्णौ ॥ शिवे ॥ अग्नौ ॥ मृत्यौ ॥ त्रीणि धामानि स्थानानि भूरादीनि सत्त्वादीनि वा यस्य स ॥ न । स्त्री । धामत्रये ॥

त्रिधारक । पु । गुण्डतृणे ॥

त्रिधारस्नुही । स्त्री । त्र्यस्रे । स्नुहीविशेषे ॥

त्रिधाविशेष । पु । सूक्ष्मादिविशेषे ॥ यथा । सूक्ष्मामातापितृजा सहप्रभूतै स्त्रिधाविशेषा स्यु । सूक्ष्मास्तेषांमध्ये सूक्ष्मानियता माता पितृजानिवर्त्तन्ते कीटान्ता वा भस्मान्ता वा विडन्ता वेति ॥ त्रिप्रकारको विशेष ॥

त्रिधासर्ग । पु । भूतादिसर्गे ॥ अष्टविकल्पो दैव स्तैर्यग्योनश्च पञ्चधा भवति । मानुष्यश्चैकविध समासतोऽय त्रिधासर्ग ॥ ब्राह्म प्राजापत्य ऐन्द्र पैत्र गान्धर्व याक्ष राक्षस पैशाच इत्यष्टविकल्पो दैव सर्ग । १ ॥ पशुमृगपक्षिसरीसृपस्थावरा इति पञ्चविधस्तैर्यग्योन सर्ग । २ ॥ मानुष्यश्चैकविध । ३ ॥ ब्राह्मणाद्यवान्तरजातिभेदाविवक्षया संस्थानस्य चतुर्ष्वपि वर्णेष्वविशेषात् ॥

त्रिनयन । पु । विषमनयने । शिवे ॥ त्रीणि नयनान्यस्य । क्षुभ्नादिषु चेति निषेधात् पूर्वपदात् संज्ञायामग इति णत्वाभाव ॥ त्रि । नेत्रत्रयवति ॥

त्रिनयना । स्त्री । उमायाम् ॥ टाप् ॥

त्रिनेत्र । पु । शिवे । हरे ॥ त्रीणि नेत्राणि यस्य ॥ त्रि । नेत्रत्रयविशिष्टे ॥

त्रिनेत्रचूडामणि । पुं । शशाङ्के । चन्द्रे ॥

त्रिनेत्रा । स्त्री । वाराहीकन्दे ॥ नेत्रत्रययुक्तायाम् ॥

त्रिपञ्च । त्रि । त्रिगुणितपञ्चसु । पञ्च

दशसु ॥

त्रिपञ्चाङ्गम । न । पञ्च दशसङ्ख्याक ङ्गेषु निदिध्यासनाङ्गिसाधकसाधन-विशेषेषु ॥ तानि यथा । यमोऽपि नियम स्त्यागो मौन देशश्च काल ता । आसन मूलबन्धश्च देहसाम्य ञ्च दृक्स्थिति ॥ प्राणसयमनञ्चैव प्रत्याहारश्च धारणा । आत्मध्यानस माधिश्च प्रोक्तान्यङ्गानिवैक्रमात् ॥ एषातुलक्षण स्वस्वस्थानेज्ञेय मनी-षिभि ॥

त्रिपताकम । न । रेखात्रयाङ्कितभाले॥

त्रिपत्र । पु । विल्वे ॥ न । दलत्रयवति विल्वपत्रे ॥ यथा । विष्णुरुवाच । ऊर्ध्व पत्रहरोज्ञेय पत्र वाम विधि स्वयम् । अहदक्षिणपत्रञ्चत्रिपत्रदलमित्यु तेतिवृहद्धर्मपुराणे ११ अध्याय ॥

त्रिपत्रक । पु । किंशुकवृक्षे । पलाशे॥

त्रिपत्री । स्त्री । पत्रत्रये ॥ द्विगोरिति ङीप् ॥

त्रिपथम् । न । त्रिमार्गीम् ॥ त्रयाणा पथा समाहार । तद्धितार्थेतिसमा स । ऋक्पूरिति समासान्त । पथ सङ्ख्याव्ययादेरितिक्लीवता ॥

त्रिपथगा । स्त्री । भागीरथ्याम् । गङ्गा याम् ॥ त्रीन्पथोगच्छति । त्रिभि प थिभिर्गच्छतिवा । गम्लृ० । अन्येष्वो

पीतिड ॥ यद्वा । त्रिपथेन गच्छति । ड. ॥ टाप् ॥ क्षितौतारयते मर्त्या न् नागाँस्तारयतेऽप्यध । दिवितारय तेदेवाँ स्तेनत्रिपथगास्मृता ॥

त्रिपदा । स्त्री । ऋग्विशेषे ॥ त्रय. पा दा अस्या । सङ्ख्यासुपूर्वस्येति पा दस्यान्तलोप । टाडृचीतिटापि भ स्वात् पाद पत् ॥ हसपदीवृक्षे ॥

त्रिपदिका । स्त्री । तिपाई इति प्रसिद्धे आधारविशेषे ॥ अर्घ्यार्थधातुनिर्मिते त्रिपाद्युक्ते शङ्खादिपात्राधारे ॥

त्रिपदी । स्त्री । गोधापदीलतायाम् । हसपद्याम् ॥ हस्तिगात्रबन्धे ॥ त्रि पदी पादबन्धनमितियादव ॥ अ र्घ्यादिपात्राधारे ॥ त्रय पादाअस्या सङ्ख्यासुपूर्वस्येति पादशब्दस्यान्त लोप । पादोऽन्यतरस्यामितिङीपि भत्वात् पाद पदिति पद्भाव ॥ पा दत्रययुक्तायाम् ॥ भाषाकवितायां च्छन्दोविशेषे । यथा । पञ्चकटिका न्ता यदियमकान्ता द्वादशपरिणत-मात्रा । किन्नरगीतिस्तदितिनिवी ति स्यार्द्धसमाचरणात्रा ॥ स्पपादा न्तउदाहृत ॥ सैषा सङ्गीतकेनि त्य निर्वीति किन्नराख्यिका ॥ सैव स्यात् प्राकृतेगाने त्रपदीतिपरिश्रु ता ॥ इतिकाव्योदय ॥

त्रिपर्णः । पु । किंशुके ॥

त्रिपर्णा । स्त्री । वनकार्पास्याम् ॥

त्रिपर्णिका । स्त्री । कन्दविशेषे । अग्निवल्ल्याम् । कन्दालौ ॥

त्रिपर्णी । स्त्री । शालपर्ण्याम् ॥ वनकार्पास्याम् ॥ पृश्निपर्णीभेदे ॥

त्रिपात् द् । पु । विष्णौ ॥ ज्वरे ॥ त्रयः पादा अस्य । सङ्ख्यासुपूर्वस्येतिपादस्यान्तलोपः ॥

त्रिपादिका । स्त्री । हंसपदीलतायाम् ॥

त्रिपित्रन् । पु । वार्ध्रीणसे ॥ नद्यादौ पय पिबतोयस्य त्रीणिजलं स्पृशन्ति कर्णौजिह्वाच । त्रिभिः पिबति । पा० । शतृ ॥

त्रिपिष्टपम् । न । स्वर्गे ॥ त्रिदशानांपिष्टपम् । पृषोदरादित्वाद्दशशब्दलोपः ॥ तृतीयं पिष्टपम् त्रिपिष्टपम् । पूरणप्रत्ययस्तु वृत्तौ गतार्थत्वान्न प्रयुज्यते त्रिभागवत् । मर्त्यपातालापेक्षया तृतीयं पिष्टपं भुवनम् ॥

त्रिपिष्टपसद् । पु । देवतायाम् ॥ त्रिपिष्टपेदिवि सीदतिवर्त्तते । सदॢ० । क्विप् ॥

त्रिपुटः । पु । सतीनके । खिसारीति प्रसिद्धे कलाये ॥ त्रिपुटोमधुरःस्निग्धस्तुवरोरूक्षणो भृशम् । कफपित्तहरोरुच्योग्राहकः शीतलस्तथा ॥ कि

नुःखञ्जत्वपङ्गुत्वकारी वातातिकोपनः ॥ तीरे ॥ तालके ॥ इक्षुभेदे ॥ गोक्षुरे ॥

त्रिपुटा । स्त्री । मल्लिकायाम् ॥ सूक्ष्मैलायाम् ॥ त्रिवृदोषधौ ॥ त्रयः पुटा यस्याः ॥ कर्णस्फोटायाम् ॥ रक्तत्रिवृति ॥ स्थूलैलायाम् ॥ देवीविशेषे ॥

त्रिपुटी । पु । एरण्डे ॥

त्रिपुटी । स्त्री । त्रिवृतायाम् ॥ त्रयःणां पुटानां समाहारे ॥ त्रयाणां ज्ञातृज्ञानज्ञेयादिरूपाणां पुटानामाकाराणांसमाहारः । द्विगोरितिङीप् ॥

त्रिपुटीफलः । पु । एरण्डे ॥ त्रिपुटीफले यस्य ॥

त्रिपुण्ड्रम् । न । भालस्थतिर्यग्रेखात्रितये ॥ ऊर्ध्वपुण्ड्रं द्विजः कुर्यात् क्षत्रियस्त्रिपुण्ड्रकम् । अर्द्धचन्द्रञ्च वैश्यस्य वर्त्तुलं शूद्रयोनिजः ॥ * ॥ विनाभस्मत्रिपुण्ड्रेण विनारुद्राक्षमालया । पूजितोपिमहादेवो न स्यात् तस्यफलप्रदः ॥ तस्मान्मृदापिकर्त्तव्यं ललाटे तुत्रिपुण्ड्रकं मितिस्मृतिः ॥ मृत्स्नया भस्मना वापित्रिपुण्ड्रं बिन्दुसंयुतम् । ललाटेतिलकं कुर्याद्गायत्र्या बहुकुत्सलं इतिमहानिर्वाणतन्त्रम् ॥ येषांवपुर्मनुष्याणांत्रिपुण्ड्रे

…णविनाशितम् । श्मशानसदृशं तत्-
स्थानमेवं पुण्यकृज्जनैरिति देवी-
भागवतम् ॥ अपि च तत्रैव नारदं प्रति
नारायणवाक्यम् । त्रिपुण्ड्रये विनि
न्दन्ति निन्दन्ति शिवमेव ते । धारयन्ति
च ये भक्त्या धारयन्ति तमेव ते ॥ तिर्य
ग्रेखाः प्रदृश्यन्ते ललाटे सर्वदेहिना
म् । तथापि मानवा मूर्खा न कुर्वन्ति
त्रिपुण्ड्रकमिति ॥ त्रयाणां पुण्ड्राणां
समाहारः ॥ तद्धितार्थेत्यादिना स
मासः ॥

त्रिपुण्ड्रकम् । न । त्रिपुण्ड्रे ॥ ललाटगास्तिस्रो भस्मरेखास्त्रिपुण्ड्रकमि
तिहारावली ॥ त्रिपुण्ड्रमेव । स्वा-
र्थे कः ॥

त्रिपुरः । पु । असुरविशेषे ॥ न । मय
दानवविरचिते कामचारिणि पुरत्र
ये ॥ त्रयाणां पुराणां समाहारः त्रि
पुरम् । तद्धितार्थेति समासः । पात्रा
दित्वात् स्त्रीत्वाभावः ॥

त्रिपुरदहन । पु । शिवे । हरे ॥

त्रिपुरभैरवी । स्त्री । देवीविशेषे ॥

त्रिपुरमल्लिका । स्त्री । पुष्पवृक्षविशेषे
। स्वक्षणायाम् । त्रिपुरमालिकेति
गौडेषु ख्यातायाम् ॥

त्रिपुरमालिका । स्त्री । मोहिन्याम् ।
वटपत्रायाम् ॥

त्रिपुरा । स्त्री । चतुर्वर्गप्रदाया परदे
वतायाम् ॥ ब्रह्मविष्णुमहेशाद्यैस्त्रि
दशैरर्चिता पुरा । त्रिपुरेति तदा ना
म कथितं दैवतैस्तव ॥ अपि च । त्रि
कोणं मण्डलञ्चास्यास्त्रिपुरन्तु त्रिरे
खकम् । मन्त्रन्तु त्र्यक्षरं प्रोक्तं तथारू
पत्रयं पुनः ॥ त्रिविधा कुण्डली शक्ति
स्त्रिदेवानाञ्च सृष्टये । सर्वं त्रयं त्रयं
यस्मात् तस्मात्तु त्रिपुरा मतेति ॥

त्रिपुरान्तक । पु । महेश्वरे । शूलिनि
। शिवे ॥ त्रयाणां सुवर्णरौप्यलोहा-
नामयादिनामकानां दैत्यत्रयाणां
वा पुराणि तेषामन्तको नाशकः । त्र्य
वयवं पुरं त्रिपुरं तस्यान्तकः ॥ त्रया
णां पुराणां समाहारः । पात्रादिरि
ति कश्चित् तन्न । तथा सति पञ्चपा-
त्रीतिवत् त्रिपुरीति प्रयोगाभावः
स्यात् ॥

त्रिपुरारि । पु । सदाशिवे ॥

त्रिपुरी । स्त्री । चेदिपुर्याम् । त्रिपुरा
इति प्रसिद्धदेशे ॥

त्रिपुषा । स्त्री । कृष्णत्रिवृति ॥

त्रिपुष्करम् । न । ब्रह्मकृततीर्थविशेषे ।
ज्येष्ठमध्यमकनिष्ठेषु त्रिषु पुष्कराभि
धह्रदेषु ॥ पु । योगविशेषे ॥ यथा ।
वारा क्रूरा स्तिथिर्भद्रा नक्षत्र भग्न
पादकम् । जातेऽत्र जारजो योगो

मरणे ऽत्रत्रिपुष्करइति ॥

त्रिपुष्टः । पु । राजभेदे । प्राजापत्ये॥

त्रिपृष्ठ । पु । त्रयाणांलोकानामुपरिस्थि ते सत्यलोके ॥

त्रिफला । स्त्री । हरीतक्यादिफलत्रिके ॥ पथ्याविभीतधात्रीणाफलैः स्यात् त्रिफला समैः । फलत्रिकञ्च त्रिफला सावराच प्रकीर्त्तिता ॥ त्रिफला क फपित्तघ्नी मेहकुष्ठहरीसरा । चक्षु ष्या दीपनी रुच्या विषमज्वरनाशि नी॥ त्रयाणा फलाना समाहार । अ जादित्वात् द्विगोरिति न ङीप् ॥

त्रिफली । स्त्री । त्रिफलायाम् । इति राजनिर्घण्ट ॥

त्रिवलीकम् । न । पायौ ॥

त्रिभङ्गी । स्त्री । मात्रावृत्तान्तरे ॥ यथा । प्रथम यदि दशम वदति विरामं त दनु निकाम वसुवसुकम् वसुविमल तुरङ्गम मतिहृदयङ्गम कृषितभुज ङ्गम नृपतिलकम् । त्रिशद्धिकलास विहितनिवास सततविलास हृदय मुदे मदमुदितभुजङ्गी मोहनरङ्गी वदति त्रिभङ्गीवृत्तमद ॥ यथा । विविधायुधखण्डितसङ्गरपण्डितर णखण्डितपाखण्डभटे चण्डासुरख ण्डिनि सुरपुरमण्डिनि शशधरख ण्डनिवद्धजटे । भवसागरतारि-

णि दुर्गतिहारिणि मङ्गलकारिणि मयिसुचिरम गिरिराजनिवासिनि शैलविलासिनि शम्भुविलासिनि दे हिवरमिति ॥

त्रिभण्डी । स्त्री । त्रिवृतायाम । श्वेत त्रिधारेतिख्यातौषधौ ॥ त्रीन्दोषा न्भण्डते । भडिपरिभाषणे। कर्म ण्यण् । ङीप् ॥

त्रिभद्रम् । न । सुरते ॥ इतित्रिकाण्ड शेष ॥

त्रिभुवनम् । न । स्वर्गमर्त्यपातालात्म के लोकत्रये। त्रिलोक्याम् ॥ त्रयाणां भुवनानां समाहार ॥ तद्धितार्थेत्या दिना समास ॥

त्रिमद । पु । मुस्ताचित्रकविडङ्गेषु ॥

त्रिमदोत्पथ । त्रि । त्रिभिर्मदैरुवृत्ते॥ विद्यामदो धनमदस्तथैवाभिजनो मद.। एते मदा मदान्धानां त एव हिसतां दमा ॥

त्रिमधु । पु । ऋग्वेदैकदेशे ॥ मधु वातायृक्त्रयवेत्तरि ॥ यथा । त्रि- णाचिकेत स्त्रिमधुस्त्रिसुवर्ण षडङ्ग विदिति ॥ न । मधुत्रये । मिलित सितामाक्षिकसर्पी.षु ॥ यथा । दुग्धसिता माक्षिकञ्च विज्ञेय मधुर त्रयम् ॥

त्रिमार्गगा । स्त्री। गङ्गायाम् ॥ त्रिभि

र्मार्गैर्गच्छतीतिविग्रहः ।

त्रिमार्गी । स्त्री । त्रिपथे ॥ त्रयाणां मार्गाणां समाहारः ॥ ङीप् ॥

त्रिमुकुट । पु । त्रिकूटाचले ॥

त्रिमुख. । पु । बुद्धविशेषे ॥

त्रिमुखा । स्त्री । बुद्धदेवीविशेषे । मायादेव्याम् । वज्रवाराह्याम् ॥

त्रिमूर्त्ति । पु । बुद्धभेदे ॥ ब्रह्मविष्णुशिवाख्यमूर्त्तित्रयवति ॥ यथा । त्रिमूर्त्तिर्यः सर्गस्थितिविलयकर्माणितनुते । इतिगङ्गेशोपाध्याय. ॥ तिस्रोमूर्त्तयोयस्य ॥ स्त्री । देवीविशेषे ॥ तिस्रोमूर्त्तयोयस्याः । त्रयोब्रह्मादयोवामूर्त्तयो यस्याः ॥ एकमूर्त्तिरपि भिन्नरूपिणी या जगज्जननपालनक्षये । काप्युतेश्वरतया विवर्त्तते ब्रह्मशक्ति मह मानतोस्मिताम् ॥

त्रियष्टि । स्त्री । भेकपर्ण्याम् ॥

त्रियामकम् । न । पापे ॥ इतिशब्दमाला ॥

त्रियामा । स्त्री । रात्रौ ॥ त्रयोयामा यस्याः । आद्यन्तयोरर्द्धयोश्चेष्टाकालत्वेन दिनप्रायत्वात् ॥ हरिद्रायाम् ॥ यमुनायाम् ॥ नील्याम् ॥ कृष्णत्रिवृतायाम् ॥

त्रियुगः । पु । यज्ञपुरुषे ॥ कृतयुगेयज्ञाभावात् । कलौछन्नत्वाद्वा ॥

त्रियूह । पु । कपिलाश्वे ॥

त्रिरात्रम् । न । रात्रित्रये । तिसृणां रात्रीणां समाहारे ॥

त्रिरुक्तम् । त्रि । विषादादिना त्रिवारोच्चारिते ॥ विषादे विस्मये हर्षे खेदे दैन्ये ऽवधारणे । प्रसादने सम्भ्रमेपि द्वित्रिरुक्तानदुष्यति ॥

त्रिरेख' । पु । शङ्खे ॥ त्रि । रेखात्रयविशिष्टे ॥ तिस्रोरेखायस्य' ॥

त्रिलव' । पु । तृतीयांशे ॥

त्रिलवणम् । न । लवणत्रये ॥ यथा । सैन्धवञ्च विडञ्चैव रुचकञ्चतृतीयकम् । मिलितैस्तैतत् त्रिलवणं वैद्यशास्त्रेनिरूपितम् ॥

त्रिलोकात्मा । पु । अन्तर्यामिणि ॥ त्रयाणां लोकाना मात्मा ॥

त्रिलोकधृक् । पु । विष्णौ ॥ त्रीन्लोकान् धारयति इति । धृञ् । क्विप् ॥

त्रिलोकी । स्त्री । स्वर्गमर्त्यपातालेषु ॥ त्रयाणां लोकानां समाहारः । द्विगोरितिङीप् ॥

त्रिलोकेश । पु । सूर्ये ॥ सदाशिवे ॥ त्रयाणां लोकानामीशो ऽधिष्ठाता ॥ त्रयोलोका सदाऽस्मात् स्वेषुकर्मसु वर्त्तन्त इतिवा ॥

त्रिलोचन । पु । त्र्यम्बके । शिवे ॥ त्रीणि लोचनानि यस्यस' । त्रिषु कालेषु

लोकेषु गुणेषु वेदेषु वा लोच न स्थान यस्येतिवा। त्रयोवेदा वर्णा वा अकारोकारमकारा लोचनानि यस्यवा॥

त्रिलोचना। स्त्री। दुर्गायाम्॥ बुद्धदेवी प्रभेदे॥

त्रिलोचनाष्टमी। स्त्री। गौणचान्द्रज्येष्ठस्य कृष्णाष्टम्याम्॥

त्रिलोहकम्। न। सुवर्णरजतताम्राभिधे धातुत्रये॥

त्रिलोही। स्त्री। त्रिलोहघटितमुद्राविशेषे॥

त्रिवर्ग। पु। धर्मकामार्थेषु॥ धर्मार्थकामा सममेव सेव्या योह्येकसक्तः सजनोजघन्य॥*॥ यथाऽऽनुकूल्य हृष्यन्त्यो त्रिवर्गस्तत्रवर्द्धते॥ त्रिफलायाम्॥ कटुत्रिके॥ वृद्धिस्थानक्षये॥ क्षय स्थान च वृद्धिश्चत्रिवर्गो नीतिवेदिनाम्॥ सत्त्वरजस्तमस्सु॥ त्रयाणांवर्ग समूह॥ सुनीतौ॥ इति शब्दरत्नावली॥

त्रिवर्णक। पु। गोक्षुरके॥ न। त्रिफलायाम्॥ त्र्यषणे। कटुत्रिके॥ ब्राह्मणक्षत्रियविट्सु॥

त्रिवर्षिका। स्त्री। त्रिवर्षायाङ्गवि। त्रिहायण्याम्॥ त्रीणिवर्षाणि वयोयस्या.सा त्रिवर्षा। तत.स्वार्थेक:॥

त्रिविक्रम। पु। विष्णौ॥ बलिबन्धनार्थं भूव्योमस्वर्गेषु त्रिषुलोकेषु गुणेषुवा त्रयोवा विक्रमा:पादन्यासा यस्यस। त्रिरित्येवत्रयोलोकाःकीर्त्तितामुनिसत्तमै। क्रमतेतांस्त्रयासर्वांस्त्रिविक्रमोजनार्दन॥इतिहरिवंश॥ त्रींल्लोकान् विशेषेण क्रामति क्रमतेतिवा। क्रमु०। अच्॥

त्रिविध। त्रि। त्रिप्रकारे॥ तिस्त्रोविधायस्यस॥

त्रिविधसर्ग। पु। त्रिधासर्गे॥

त्रिविष्टपम्। न। स्वर्गे। सुरलोके॥ विशन्त्यस्मिन् सुकृतिन इति विष्टपम्। विटपपिष्टपविशिपोलपा इति विशेरौणादिक कपन्प्रत्यय. तस्य तुट्। त्रश्चेतिषत्वम्। सूत्रेपिष्टपेतिपाठउज्वलदत्तरीत्योक्त। अन्येतु विष्टपेतिदन्त्योष्ठादिमेव पठन्ति। युक्तञ्चैतत्। यत त्रभूस्यविष्टपमित्यादौ तथादर्शनात्। अमरकोषेपि विष्टप भुवन जगदितिप्रचुरपाठाच्च॥ तृतीयं विष्टपम्॥ त्रिभुवने॥

त्रिविष्टपसद्। पु। देवे। सुरे॥

त्रिवीज। पु। श्यामाके॥ इतिराजनिघण्ट॥

त्रिवृत्। स्त्री। त्रिवृतायाम्। सुवहायाम्। श्वेतत्रिधारा इति प्रसिद्धौषधौ

॥ श्वेतात्रिवृद्रोचनी स्यात स्वादुरुष्णा समीरहृत् । रूक्षा पित्तज्वरश्लेष्मपित्तशोथोदरापहा ॥ श्वेतकृष्णप्रभेदेन द्विविधा त्रिवृदुच्यते । श्यामात्रिवृत्ततोहीनगुणा तीव्राविरेचिका ॥ मूर्च्छादाहमदभ्रान्तिकण्ठोत्कर्षणकारिणी ॥ त्रीन् अवयवान् वृणोति । वृञ० । क्विप् तुक् ॥

त्रिवृता । स्त्री । त्रिवृदोषधौ ॥ त्रिभिरवयवैर्वृता ॥

त्रिवृत्करणम् । न । तेजोबन्नानां मिश्रीकरणे ॥ तत्प्रकारो यथा । तेजोबन्नानांत्रयाणां मध्ये एकैकद्विधा सम विभज्यपुनरेकैकभागस्य द्विधाविभागकृत्वास्वस्वद्वितीय स्थूल भाग परित्यज्यान्यदीयस्थूलभागयोरेकैकस्य भागस्यसयोजनमिति ॥

त्रिवृत्पर्णी । स्त्री । हिलमोचिकायाम् ॥

त्रिवृद्वेद । पु । त्रयाम् । ऋग्यजु सामात्मके वेदे ॥ प्रणवे ॥ ऋचोयजूंषिचान्यानि सामानि विविधानिच । एषज्ञेय स्त्रिवृद्वेदो योवेदैन सवेदवित् ॥ आद्य यत् त्र्यक्षर ब्रह्म त्रयी यस्मिन् प्रतिष्ठिता । सगुह्योन्य स्त्रिवृद्वेदो यस्तवेद सवेदवित ॥ कृणात्मनात्रिरावर्त्तते इति त्रिवृत् स चासौवेदश्चेति कर्म्मधारय. ॥

त्रिवेणी । स्त्री । स्थानविशेषे ॥ साद्विधा । युक्तवेणीमुक्तवेणीतिभेदात् । तत्र प्रयागे युक्तवेणी गङ्गया यमुना सरस्वत्यो सङ्गमात् ॥ दक्षिणप्रयागे मुक्तवेणी गङ्गया यमुनासरस्वत्योर्वियोगात् ॥ दक्षिणप्रयागस्यसीमानिर्णयो यथा । प्रद्युम्नस्य ह्रदाद्याम्ये सरस्वत्यास्तथोत्तरे । तद्दक्षिण प्रयागस्तु गङ्गातो यमुना गतेति ॥ * ॥ सगरसन्ततिसन्तरणेच्छया प्रचलितातिजवेन हिमालयात् । द्रुतमन्दमुपैति सरस्वतीयमुनयोर्विरहादिव जाह्नवीतिनदियाधिपतिकृष्णचन्द्रराजस्यसभास्थो वाणेश्वरविद्यालङ्कार ॥

त्रिवेणु । पु रथमुखस्थेऽवयवविशेषे॥

त्रिवेद । पु । वेदत्रयवेत्तरि ॥

त्रिवेदी । पु । त्रिवेदज्ञे ॥

त्रिवेदी । स्त्री । वेदत्रये ॥ त्रयाणांवेदाना समाहारे । द्विगोरिति ङीप् ॥ ऐष्टिकपाशुकसौमिकवेदिकात्रये ॥

त्रिवेला । स्त्री । त्रिवृति ॥

त्रिशक्तिधृक् । पु । भगवति ॥ त्रिशक्ति र्माया तां धरतीतिविग्रह ॥

त्रिशङ्कु । पुं । सूर्य्यवंशीयनृपविशेषे ॥ शलभे ॥ वृषदंशके । मार्जारे ॥ चातके ॥ खद्योते ॥

त्रिशङ्कुज । पु । हरिश्चन्द्रन्वपे ॥
त्रिशङ्कुयाजी । पु । विश्वामित्रे ॥
त्रिशरण । पु । बुद्धे । जिने ॥
त्रिशर्करा । स्त्री । मिलितगुडोत्पन्ना हिमोत्थामधुरेति राजनिघण्टः ॥
त्रिशला । स्त्री । वृत्ताईन्मातृविशेषे । वर्द्धमानमातरि ॥
त्रिशाखपत्र । पु । बिल्वे । मालूरे ॥
त्रिशिख । पु । राक्षसान्तरे । रावणपुत्रे ॥ बिल्वे ॥ न । त्रिशूले ॥ मण्डलान्तरे ॥ किरीटे ॥ त्रि । शिखात्रय वति ॥
त्रिशिखिदला । स्त्री । मालाकन्दे ॥
त्रिशिरा8 । पु । ज्वरे ॥ कुबेरे ॥ रावणपुत्रविशेषे ॥ खरसेनापतौ ॥ त्री णिशिरांसि यस्य ॥
त्रिशीर्षक । न । त्रिशूले ॥
त्रिशूलम् । न । अस्त्रविशेषे । त्रिशिखे॥ त्रयाणां शूलाना समाहार ॥
त्रिशूली । पु । शिवे ॥ त्रि । त्रिशूलधारिणि ॥
त्रिशृङ्ग । पु । त्रिकोणे ॥ त्रिकूटाद्रौ ॥ त्रीणि शृङ्गाण्यस्य ॥
त्रिशृङ्गी । पु । रोहितमत्स्ये ॥
त्रिष्टुप् । स्त्री । एकादशाक्षरायां वृत्तौ ॥
त्रिसन्ध्य । त्रि । परदेवतायाम् । परमेश्वरे ॥ त्रिष्वपिकालेषु सृष्टे. पूर्वप्रलयानन्तर स्थितिसमये च सन्ध्योऽव्यभिचारेण वर्त्तमानत्व.त् ॥
त्रिसन्धि । स्त्री । पुष्पविशेषे । सन्ध्य कुसुमे । फागनिया इतिभाषा ॥ पूर्वापरमध्यसन्धौ ॥
त्रिसन्ध्यम् । न । प्राह्णापराह्णमध्याह्ने । त्रिकाले ॥ प्रात सूर्योदय काले मध्याह्नस्तदनन्तरम् । सायह्न-र्थास्तसमय त्रिकालानामयङ्क्रमइ तिनिर्णीतत्वम् ॥ तिसृणां सन्ध्यानांसमाहार । आवन्तोवेतिपाक्षिकीङीवता ॥ पुष्पविशेषे ॥
त्रिसन्ध्या । स्त्री । जपापुष्पे ॥ देवी विशेषे ॥ अस्या स्थान कुरुक्षेत्रीर्थम् ॥
त्रिसमम् । न । समभये । समहरीतकीनागरगुडरूपे ॥
त्रिसर । पु । कृशरे ॥ इतिहेमचन्द्र ॥
त्रिसरकम् । न । त्रिवारमधुपाने ॥ त्रयाणां सरकाणा समाहार । तद्धितार्थेत्यादिना समाहारेद्विगु । पात्रादिभ्यान्नपुंसकत्वम् ॥
त्रिसवनम् । न । त्रिकाले । त्रिसन्ध्ये ॥
त्रिसामा । स्त्री । नदीविशेषे । महेन्द्राद्रे. चरन्त्यां स्रवन्त्याम् ॥
त्रिसिता । स्त्री । त्रिशर्करायाम् ॥
त्रिसीत्यम् । न । त्रि कृष्टक्षेत्रे । त्रिह

ल्पे ॥ त्रिवार सीतया समितम्। नै।
वयोधर्मेत्यादिनायत् ॥

त्रिसुगन्धि । न । त्रिजातके ॥ त्वगेला
पत्रकैस्तुल्यै स्त्रिसुगन्धि त्रिजात
कम् ॥

त्रिसुपर्ण । पु । वह्वृचानां वेदभागे ते
षाव्रतेच ॥ तद्योगात् पुरुषे ॥

त्रिस्रोता ऽ। स्त्री । गङ्गायाम् ॥ त्रीणि
स्रोतांसियस्याः ॥ नद्यन्तरे ॥

त्रिस्त्यम् । न । त्रिगुणाकृते । तृतीया
कृते। त्रिसीत्ये ॥ त्रिवार हलेन कृ
ष्टम्। मतजनहला.तकरणजल्पकर्षे
ष्वितियत् ॥

त्रिहायणी । स्त्री । त्रिवर्षाया गवि । त्र्य
ब्दायाम् ॥ त्रयोहायना यस्याः । दाम
हायनान्ताच्चेतिङीप् ॥ त्रिचतुर्भ्योहा
यनस्येतिणत्वम्॥ द्रौपद्याम् ॥ यथा ।
कृते युगे वेदवती त्रेतायां जनकात्म
जा । द्वापरे द्रौपदीछाया तेनकृष्णा
त्रिहायणीति ब्रह्मवैवर्त्ते श्रीकृष्णज
न्मखण्डम् ॥

त्रुटनम् । न । विच्छेदे । टूटना इति
भाषा ॥

त्रुटि । स्त्री । संशये ॥ लेश । स्वल्पे॥
सूक्ष्मैलायाम् ॥ कालमाने । क्षणद्व
ये ॥ द्वयोर्निमेषयोः ॥ त्रुट्यते ऽने
नवा । त्रुटच्छेदने । इगुपधात्किदि

तीन् ॥

त्रुटित. । त्रि । छिन्ने ॥

त्रुटिवीज । पु । कच्व्याम् ॥ इति श-
ब्दमाला ॥

त्रुटी । स्त्री । त्रुट्यर्थमात्रे ॥ कृदिकारा
दितिङीष् ॥

त्रेता । स्त्री । द्वितीययुगे । सत्ययुगान
न्तरयुगे ॥ अस्यपरिमाणं यथा । त्रि
चत्वारिंशल्लक्षेश्च विंशत्सहस्राधिके
नच । चतुर्युग परिमित नरमान
क्रमेणच ॥ द्विषड्लक्षपरिमितं च
ण्णवतिसहस्रकम्। त्रेतायुग परिमि
त कालविद्भिः प्रकीर्त्तितमिति ब्रह्म
वैवर्त्ते प्रकृतिखण्डम् ॥ * ॥ तद्धर्मो
यथा ॥*॥ त्रेतायुगे समायाते धर्म पा
देनता गत । अल्पक्लेशान्विताले।
का केचित् केचिद्दयाश्रया ॥ वि-
ष्णुध्यानरतालोका यज्ञदानपराय-
णा । वर्णाश्रमाचाररता सुखिन
सुस्थचेतस ॥ त्रताभूमिस्पृश शूद्रा
सर्वे ब्राह्मणसेविन । ब्राह्मणाश्चमहा
त्मानो वेदवेदाङ्गपारगा ॥ प्रतिग्रह
निवृत्ताश्च सत्यसन्धाजितेन्द्रिया
। तपोव्रतपरानित्य दातारो विष्णु
सेविन ॥ कालवर्षीतडित्त्वाश्चक्षि
य सर्वा पतिव्रता । वसुन्धराचप्रस्या
ढ्या पुत्राश्चपितृसेविन इतिपाद्मेक्रि

यायोगसार ॥ * ॥ अथाद्याया भगवतीजीवाना निष्कृति यथा ॥ कृते व्यतीते त्रेतायादृष्ट्वा धर्मव्यतिक्रमम् । वेदोक्तकर्मभिमर्त्या न शक्ता स्वेष्टसाधने ॥ बहुक्लेशकर कर्म्मवैदिक भूरिसाधनम् । कर्त्तु न योग्या मनुजाश्चिन्ताव्याकुलमानसा ॥ त्यक्तुंकर्त्तुं नचार्हन्तिसदाकातरचेतस । वेदार्थयुक्तशास्त्राणि स्मृतिरूपाणि भूतले ॥ तदाच प्रकटीकृत्य तपस्वाध्यायदुर्बलान् । लोकानतारय पापात् दु खशोकामयप्रदात् ॥ त्वा बिनाको ऽस्तिजीवानां घोरससारसागरे । भर्त्ता पाता समुद्धर्त्ता पितृवत् प्रियकृत् प्रभु रितिश्रीमहानिर्वाणतन्त्रे जीवो द्धारणहेतवेजगन्मातु सदाशिवं प्रतिवाक्यम् ॥ त्रीन् भेदानयति । पृ० ॥ त्रेताये ॥ एकोक्त्या दक्षिणाग्निगार्हपत्याहवनीयात्मके अग्नित्रये ॥ त्राणं त्रा' सदासम्बुद्धाम् । त्राभिता ॥ यद्वा । त्रायन्ते ऽस्माहुतय । त्राभिरिता । त्रिस्त्वमितेतिवा । पृषोदरादि ॥ त्रीणिइता वा । पृषोदरादित्वादेत्त्वम् ॥

त्रेताय । पु । द्यूतक्रीडासाधनीभूताच भाच्छितस्य यस्मिन्भागे त्रयोङ्का भवन्ति तस्मिन् ॥ त्रेतासंज्ञकोऽयः ॥

त्रेधा । अ । त्रिधा । त्रिप्रकारे ॥ सङ्ख्यायाविधार्थेधा । एधाच्चेतिधाप्रत्ये तस्यएधाजादेश ॥

त्रैककुदम् । न । सौवीराञ्जने ॥

त्रैकाल्यम । न । कार्यकालतत्पूर्वोऽपरकाले ॥

त्रैगुणिक । पु । वार्द्धुषिके ॥ त्रिगुणार्थं द्रव्य त्रिगुणम् । तत् प्रयच्छति त्रिगुण गृहीतुमेकगुण ददातीत्यर्थ । प्रयच्छतिगर्ह्यमितिठक् ॥

त्रैगुण्यम । त्रि । त्रिगुणात्मके । सकामे ॥ न । त्रिषुगुणेषु ॥ त्रयोगुणाएव । ष्यञ् ॥ गुणत्रयकार्यपुण्यपापव्यामिश्रकर्मफलसमाहारलक्षणे ससारे ॥

त्रैगुण्यविपर्य्यय । पु । त्रिगुणान्यथात्वे॥

त्रैगुण्यविषय । पु । कर्मकाण्डात्मके वेदे ॥ त्रयाणां गुणानां कर्म त्रैगुण्यङ् काममूल ससार स एव प्रकाश्यत्वेनविषयोयस्यस ॥

त्रैदशिक । पु । दैवे ॥

त्रैधम । अ । त्रैविध्ये । त्रिधा ॥ त्रिप्रकारम् । द्वित्र्योश्चधमुञ् ॥

त्रैधर्म्यम् । न । हौत्राध्वर्यवौद्गात्रधर्मवार्हेज्योतिष्टोमादिकेकाम्यकर्मणि॥

त्रैपुर । पु । त्रिपुरदेशे । चैद्ये । ढाहले ॥ इतिहेमचन्द्र ॥

त्रैलोक्यम् । न । स्वर्गमर्त्यपातालात्म

के लोकत्रये ॥ त्रयाणां लोकानां समाहार । त्रिलोकम । तदेव । चतुर्वर्णादित्वात्स्वार्थेष्यञ् ॥

त्रैलोक्यविजया। स्त्री। भङ्गायाम् ॥ इति शब्दचन्द्रिका ॥

त्रैविद्य । पु । वेदत्रयवेत्तरि ॥ ऋग्वेदयजुर्वेदसामवेदलक्षणा हैाषा व्ययैवोज्ञानप्रतिपत्तिहेतुत्वात्तिस्रोविद्या यस्य स त्रिविद्य । स्वार्थेतद्धित ॥ तिस्रोविद्यावेद । तदधीतेतद्वेदेत्यण् वा ॥ याज्ञिके ॥ त्रैविद्याख्यव्रते ॥

त्रैविष्टप । पु । अमरे । देवे ॥ त्रिविष्टपे वसति । अण् ॥

त्रैष्टुभम् । न । छन्दोविशेषे ॥ त्रिष्टुवेव । स्वार्थेऽण् ॥

त्रोटकी । स्त्री । रागिणीविशेषे ॥

त्रोटि । स्त्री । कट्फले ॥ चञ्च्वाम् ॥ खगान्तरे ॥ मीनविशेषे ॥ त्रोट्यते । त्रुटच्छेदने चु० । अचइ ॥

त्रोटिहस्त । पु । पक्षिणि ॥ त्रोटिर्हस्तो यस्य ॥

त्रोटी । स्त्री । त्रोट्यर्थमात्रे ॥

त्रोत्रम् । न । प्राजने । तोदने । गवादिपशुताडनदण्डे ॥ त्रायते । त्रैङ् पालने । अशित्रादिभ्यइत्रोत्रा विति उत्र ॥

त्र्यच । पु । शिवे ॥ त्रीणि अक्षीणि यस्य ॥

त्र्यक्षर । पु । प्रणवे ॥ अकारादीनित्रीण्यक्षराणियस्मिन् ॥ घटके ॥ इ० त्रि० ॥

त्र्यङ्कटम् । न । शिक्यप्रभेदे ॥ शैलान्यान्याम् ॥

त्र्यङ्कट । पु । त्र्यङ्कटे ॥ ईश्वरे ॥

त्र्यङ्गुलम् । न । प्रमाणविशेषे ॥ तिस्रोऽङ्गुल्य प्रमाणमस्य । तद्धितार्थेति समास । द्विगोर्नित्यमितिद्वयसचोलुक् । तत्पुरुषस्याङ्गुलेरित्यच् ॥

त्र्यञ्जनम् । न । कालाञ्जनपुष्पाञ्जनरसाञ्जनात्मकेऽञ्जनत्रये ॥

त्र्यध्वगा । स्त्री । गङ्गायाम ॥

त्र्यनीका । स्त्री । सेनाविशेषे ॥ त्रयाणामनीकानां समाहार । अजादेराकृतिगणत्वात् टापाद्विगोरिति प्राप्तोङीप् वाध्यते ॥

त्र्यब्दा । स्त्री । त्रिहायण्याम् ॥ त्रयोऽब्दा वय प्रमाणमस्या । आर्षीय ष्ठक् । तस्याध्यर्द्धेतिलुक् ॥

त्र्यस्रतयोग । पु । तिथिवारर्चात्मक योगे ॥ नन्दाभौमार्कवारे पवनशतभिषार्द्रास्यचित्राश्रिमूलासार्पैन्द्राः समेता श्रमिनिभृगुसुते फल्गुयुग्माद्रयुग्मे । सौम्याहेवैजयाख्यान्मृगगुरुहरिमैन्द्राश्विवाम्याभिजिद्भि र्जीवे रिक्तार्चविश्वादितिवरुणविशाखा

नुराधामघाभि ॥ सौरेपूर्वाधनिष्ठा करकमलजन्मर्चयुक्ता यदिस्याद्योगं चाहुस्त्रिपूर्वं सततशुभकरं चामृता स्य मुनीन्द्रा ॥

व्यम्बक । पु । महेश्वरे । शिवे ॥ त्रीणि अम्बकानि नयनान्यस्य ॥ त्रयाणां लोकानाम् अम्बक पितेति वा ॥ त्रीन्वेदान् अम्बते शब्दायते वा। अविशब्दे । आषध्योपध । कर्मण्यण् । सञ्ज्ञायामितिक ॥ त्रिषुलोकेषु कालेषुवा अम्ब शब्दोवेदस्त्रय णोयस्येतिवा॥ अम्बनम् अम्ब शब्द । त्रयोऽकारोकारमकारा अम्बा शब्दा प्रतिपादका वाचकावा अस्ये तिवा ॥ त्रीणिपृथिव्यन्तरीक्षद्युलोका ख्यानि अम्बकानि स्थानानि यस्येति वा । लोकत्रयव्याप्तोहि महेश्वर ॥

व्यम्बकसख । पु । कुवेरे ॥ व्यम्बकस्य सखा । राजाह सखिभ्यष्टच् ॥

व्यम्बका । स्त्री । त्रिलोकजनन्यामाद्या याम् ॥ सोमसूर्यानलाचिन्त्वात् व्यम्बकासास्मृतावुधै ॥

व्यहस्पर्श. । पु । त्रिदिनस्पृशि । तिथि त्रयस्पर्शयुक्तेऽहनि ॥

व्यहस्पृक् । पु । वारत्रयेप्येकस्यातिथौ ॥ तिथिर्वारत्रये चैकाव्यहस्पृग्समुदाहृतम् ॥ अन्यच्च । एकादशी द्वादशी च रात्रिशेषे त्रयोदशी । व्यहस्पृक् तदहोरात्रमुपोष्यासासदातिथि. ॥

व्यहस्पृशम् । न । व्यहस्पर्शे ॥ यथा । एकस्मिन् सावनेत्वह्नि तिथीनांत्रित य यदा । तदा दिनत्रय प्रोक्त स्तत्र साहस्त्रिकफलम् ॥ अपिच । एकंदिन यत्रतिथित्रयञ्चस्पृशेत्तमाहुर्मुनयोऽवमाख्यम् । एकातिथि स्त्रीणि दिनानियत्र स्पृशेत्तदाहुस्त्रिदिनस्पृशन्तु ॥ व्यहस्पृश नामयदेतदुक्त तत्र प्रयत्न कृतिभिर्विधेव । विवाहयात्रा शुभपुष्टिकर्म सर्वन कार्य त्रिदिन स्पृशेतु ॥

व्यहैहिक । पु । दिनत्रयनिर्वाहोचितधने ब्राह्मणे ॥ ईहाचेष्टा तस्यां भवम् ऐहिकम् । व्यहपर्याप्तम् ऐहिकधन यस्य ॥

व्याहिक । त्रि । तृतीयेह्निभवेज्व रादौ ॥

व्युषणम् । न । त्रिकटुनि ॥ ओषति । उषदाहे । ल्युट् । त्रयाणाम उषणाना समाहार । पाचादित्वात् स्त्रीत्वन ॥

व्यूषणम् । न । व्युषणे । व्योषे ॥ ऊषति । ऊषदाहे । ल्युट् । त्रयाणामूषणाना समाहार. । पाचादित्वात् स्त्रीत्व न ॥

क्षेणी। स्त्री शल्लक्याम्। श्वाविल्लोमनि ॥ क्षीरश्रेणान्यस्यामितिबहुव्रीहौ व र्णादनुदात्तादिति ङीपि तकारस्य नकारादेशे पर्वपदादितिणत्वम् ॥

त्व। त्रि। भिन्ने। अन्यस्मिन् ॥ तनो ति। तनु०। तनोतेरनश्च्व। चा त्क्विप्। आगमानित्यत्वात् तुग्वै कल्पिक। केचित्तु चाद्दविचमनुव र्त्तयन्ति ॥

त्वक्कण्डुर। पु। व्रणे ॥ इ०चा० ॥

त्वक्क्षीरम्। न। वंशरोचनायाम् ॥ त्वचोवंशात् क्षीरमस्य ॥

त्वक्क्षीरी। स्त्री। वंशरोचनायाम्॥ गौरादित्वात् ङीष् ॥

त्वक्छद। पु। क्षीरीशवृक्षे। क्षीर काम्बुको इतिगौडभाषा ॥

त्वक्पञ्चकम्। न। पञ्चवल्कले ॥ न्य ग्रोधोदुम्बराश्वत्थपारिशप्लक्षपादपा। पञ्चैते क्षीरिणोदृष्टा स्तेषा त्वक् पञ्चवल्कलम् ॥ केचित्तु पारिशस्था ने शिरीष वेतसपरे। वदन्तीतिशे ष ॥ त्वक्पञ्चक हिमं ग्राहि व्रणशो थविसर्पजित्। तेषांपत्र हिमंग्राहि व्रणशोथविसर्पजित् ॥ विष्टम्भाध्मा नजित् तिक्त कषाय लघु लेखनम् ॥ पथ्य क्षीरिवृक्षपञ्चकम् ॥

त्वक्पत्रम्। न। वराङ्गके। गुडत्वचि ॥ त्वगिव पत्र मस्य ॥

त्वक्पत्री। स्त्री। कारव्याम्। हिङ्गुप त्र्याम् ॥

त्वक्पुष्पम्। न। सेहुवाँ इति प्रसिद्धे किलासरोगे ॥ रोमाञ्चे ॥

त्वक्पुष्पिका। स्त्री। किलासे ॥

त्वक्पुष्पी। स्त्री। किलासे ॥ त्रि। कि लासयुक्ते ॥

त्वक्सार। पु। वंशे ॥ गुडत्वचि ॥ र न्ध्रवंशे ॥ शोणहृक्षे ॥ त्वक् त्वचिवा सारोऽस्य ॥

त्वक्सारभेदिनी। स्त्री। क्षुद्रचञ्चुवृक्षे

त्वक्सारा। स्त्री। वंशरोचनायाम् ॥

त्वक्सुगन्ध। पु। नारङ्गे। नारङ्गी इ तिभाषा ॥

त्वक्सुगन्धा। स्त्री एलवालुकाख्यग न्धद्रव्ये ॥

त्वक्स्वादी। स्त्री। दारुसितायाम् ॥

त्वगङ्कुर। पु। रोमाञ्चे ॥

त्वगक्षीरी। स्त्री। वंशरोचनायाम् ॥

त्वग्गन्ध। पु। नारङ्गे ॥

त्वग्जम्। न। रुधिरे ॥ रोमणि ॥

त्वग्दोष। पु। कोठरोगे ॥

त्वग्दोषापहा। स्त्री। वाकुच्याम् ॥

त्वग्दोषारि। पु। हस्तिकन्दे ॥ इति- राजनिर्घण्ट ॥

त्वक्। स्त्री। वल्कले ॥ गुडत्वचि। दा

तचीनी इतिभाषा ॥ चर्मणि । स्पर्शग्रहणलिङ्गे देहव्यापिनीन्द्रिये ॥ त्वचति । त्वचसंवरणे । क्विप् ॥ यद्वा । तनोति तन्यतेवा । तनु० । तनोतेरनश्च व चाच्चिक् प्रत्यय ॥

त्वचम् । न । त्वचि । चर्मणि ॥ वल्कले ॥ त्वक्पत्रे ॥ यथा । त्वच लघूष्ण कटुक स्वादु तिक्तञ्च रूक्षकम् । पित्तल कफवात घ्न कण्डूमारुचिनाशनम् ॥ हृद्बस्तिरोगवातार्श कृमि पीनसशुक्रहृदिति ॥ प्रशस्तात्वगस्यअस्ति । अर्शआद्यच् ॥ त्वचति । त्वचसंवरणे । पुसीतिघ' ॥

त्वचनम् । न । संवरणे ॥ त्वचो ग्रहणे ॥

त्वचा । स्त्री । त्वचि ॥

त्वचापत्रम् । न । त्वक्पत्रे ॥

त्वचिष्ठ　चि । त्वचीयसि । अतिशयत्वग्विशिष्टे ॥

त्वचिसार । पु । वंशे ॥ हलदन्तादितिसप्तम्या अलुक् ॥

त्वचिसुगन्धा । स्त्री । क्षुद्रैलायाम् ॥

त्वत् । त्रि । भिन्ने । अन्यस्मिन् ॥ तनोति । तनु० तनोतेरनश्च । चात् क्विप्तुक् ॥

त्वदीय । चि । भवदीये ॥ तवायम् । छ' । प्रत्ययोत्तरपदयोश्चेतिमपर्यन्तस्यत्वदादेश. ॥

त्वद्विधः । चि । त्वत्सदृशे ॥ तवेव विधा प्रकारोयस्य ॥

त्वम्पदलक्ष्यार्थ । पु । अज्ञानादिव्यष्ट्युपाध्युपहिताधारभूते अनुपहित प्रत्यगानन्दतुरीयचैतन्ये ॥

त्वम्पदवाच्य　। चि । त्वम्पदाभिधे ॥ देहादिभि परिच्छिन्नोजीवस्तुत्वम्पदाभिध ॥

त्वम्पदवाच्यार्थ　। त्रि । अज्ञानदिव्यष्टि । एतदुपहितात्पज्ञत्वादिविशिष्ट चैतन्यम् । एतदनुपहितचैतन्यञ्च । एतत्त्रय तप्ताय पिण्डवदेकत्वेनावभासमान त्वम्पदवाच्यार्थो भवति ॥

त्वम्पदाभिध । पु । त्वम्पदवाच्ये । जीवे ॥ आलम्बनतया भाति योऽस्मत् प्रत्ययशब्दयो । अन्त करणसम्भिन्नबोध स त्वम्पदाभिध ॥ त्वम्पद मभिधायस्य ॥

त्वरणम् । न । त्वरायाम् ॥

त्वरा । स्त्री । वेगे । सम्भ्रमे । आवेगे ॥ त्वरणम् । ञित्वरा० । घटादय षितइतिषित्त्वातिदेशात् अङ् । टाप् ॥

त्वरि. । स्त्री । त्वरायाम् । सवेगे ॥

त्वरितम् । न । शीघ्रे ॥ त्वरतेस्म ञि त्वरासम्भ्रमे । गत्यर्थाकर्मकेति क

र्भीरि क्त । रुष्यम्त्वरसङ्घुषास्वनामिति वेट् ॥ त्रि । तद्विशिष्टे । तरस्विनि ॥ त्वरते । कर्त्तरि क्त ॥ त्वरास्यजातास्येतिवा । तारकादित्वादितच् ॥ शीघ्रार्थेयं क्रियाविशेषणत्वाद्द्रव्येवर्त्तमान क्लीवे । यथा । त्वरितगच्छति ।द्रव्यवाचीतुत्रिलिङ्ग । यथा । त्वरितोऽश्व । उतावलाघोडा इतिभाषा ॥

त्वरितगति । स्त्री । पङ्क्तिवृत्तप्रभेदे ॥ त्वरितगतिश्चनजनगै । यथा । त्वरितगतिव्रजयुवति स्तरणिसुताविपिनगता । मुररिपुणा रतिगुरुणा परिरमिताप्रमदमितेति ॥

त्वरितोदित । त्रि । निरुक्ते । शीघ्रोच्चारितेवचसि ॥ त्वरितम् उदित ॥

त्वष्ट. । त्रि । तष्टे । तनूकृते । छीला इतिभाषा ॥ त्वक्ष्यतेस्म । त्वक्षूतनूकरणे । क्त ॥

त्वष्टा । पुं । देवशिल्पिनि । विश्वकर्मणि ॥ आदित्यविशेषे ॥ तक्षणि । शिल्पिनि । तरवाणइतिखाती इतिच भाषा ॥ वर्णसङ्करविशेषोयम् । शूद्रागर्भे विश्वकर्मण औरसेन जात । इति ब्र० वै० ब्र० ख० ॥ चित्रानक्षत्रदेवतायाम् ॥ त्विषति । त्वक्ष्यते वा । त्वक्षू० । त्वेषतिवा । त्विष० । नप्तृ

नेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ इतिसाधु' । त्विषेर्देवतायामकारश्चोपधाया अनिट्त्वञ्चेतितृन् वा ॥

त्वा । अ । वितर्के ॥ विशेषे ॥

त्वाचप्रत्यक्षम् । न । स्पर्शज्ञाने । द्रव्यादे स्पर्शद्वाराबोधे ॥ यथा । अथज्ञानमात्रे त्वङ्मन सयोगस्य यदि कारणत्व तदा रासनचाक्षुषादिकाले त्वाचप्रत्यक्षं स्यात् । इतिसिद्धान्तमुक्तावली ॥

त्वादृक् । त्रि । त्वत्तुल्ये ॥

त्वाष्ट्र । पु । वृत्रासुरे । त्वष्टुरपत्ये ॥ अपत्येऽण् ॥

त्वाष्ट्रम् । न । चित्रानक्षत्रे ॥ त्वष्टादेवता अस्य । सास्यदेवतेत्यण् ॥

त्वाष्ट्री । स्त्री । सज्ञानाम्नसूर्यपत्न्याम् ॥ क्षुद्ररथे । रथिकायाम् ॥ चित्रानक्षत्रे ॥

त्विट् । स्त्री । शोभायाम् । कान्तौ ॥ वाचि ॥ रुचौ । प्रभायाम् ॥ जिगीषायाम् ॥ व्यवसाये ॥ त्वेषति । त्वेषणमनयावा । त्विषदीप्तौ । सपदादित्वात् क्विप् ॥

त्विषा । स्त्री । त्विडर्थे ॥ भागुरिमते न टाप् ॥

त्विषाम्पति. । पु । सूर्ये ॥ अलुक् ॥

त्विषि। पु। किरणे॥ इति हेमचन्द्रः॥

त्वे। अ।
त्वै। अ। } वितर्के॥ विशेषे॥

त्सरु। पु। खड्गादिमुष्टौ। आदिनाक टितखड्गछुरिकादिग्रहः। मूठ इति भाषा॥ त्सरति। त्सरच्छद्मगतौ। भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्यउः॥

त्सरुक। त्रि। त्सरौकुशले॥ आकर्षादिभ्यः कन्॥

थ

थः। पु। शिलोच्चये। पर्वते॥ भयरक्षके॥ व्याधिभेदे॥ भयचिह्ने॥ भक्षणे॥ न। रक्षणे॥ मङ्गले॥ साध्वसे॥ इतिमेदिनीकरः॥ थुडेई॥

थुत्कारः। पु। निष्ठीवनव्यापारानुकरणशब्दे॥

थूथू। अ। निष्ठीवनव्यापारानुकरणशब्दे॥ यथा। थूथूकृत्यवमङ्गिरध्वमजनैरिति सूक्तिकर्णामृतम्॥

थैथै। अ। वाद्यानुकरणशब्दविशेषे॥

थोडनम्। न। संवरणे॥ थुडसंवृतौ। ल्युट्॥

धैार्णेयः। पुं। स्थौणेये॥

द

द। पु। अचले। शैले॥ दत्ते॥ खण्डने॥ न। भार्यायाम्॥ इत्येकाक्षरकोषः॥ त्रि। दातरि॥

दंश। पु। वनमक्षिकायाम्। डाँस इतिभाषा॥ दंशति। दंशदंशने। अच्॥ वर्मणि॥ मर्मणि॥ दोषे॥ खण्डने॥ भुजगक्षते॥ दशने॥ दन्तइतिहेमचन्द्रः॥

दंशक। पु। दंशे॥ त्रि। दंशनकर्तरि॥

दंशनम्। न। दंशे। दन्तेन खण्डने। काटखानाइति काटना इतिचभाषा॥ कवचे। वर्मणि॥ दृश्यतेऽनेन। दशिर्दंशनस्पर्शनयोः। करणेति ल्युट्॥

दंशभीरु। पु। स्त्री। कासरे। महिषे॥ इतित्रिकाण्डशेषः॥

दंशमूल। पु। शिग्रौ॥

दंशितः। त्रि। कवचाचिते। धृतसन्नाहे। वर्म्मिते॥ दष्टे॥ दंश सञ्जातोऽस्य। ता० इतच्॥ यद्वा। दृश्यते स्म। दंशि०। क्त॥

दंशी। मशक इतिख्याते क्षुद्रदंशे॥ दंश

ति। दंश०। अच्। गौ० ङीष् ॥

दंष्ट्रा। स्त्री। दन्तविशेषे। दाढायाम्। दाढ इति भाषा॥ दन्तपङ्क्तिद्वयप्रान्ते चतस्रश्चतस्रोदन्तविशेषा दंष्ट्रा। द्विगुणीकृतादन्तावलिरिति भावप्रकाश॥ दश्यते ऽनयेत्यर्थे दाम्नीशसयुयुजेत्यादिनाकरणेष्ट्रन्। टाप्। गौरादिषु मातामहीशब्दस्य पाठादनित्य' षित्वाङीष्॥

दंष्ट्राल। पु। शूकरे॥

दंष्ट्रिका। स्त्री। दाढिकायाम्॥

दंष्ट्री। पु। घृष्टौ। शूकरे॥ सर्पे॥ त्रि। दंष्ट्राविशिष्टे॥ यथा दंष्ट्रिभिः शृङ्गिभिर्वापि हता म्लेच्छैश्च तस्करैः। ये स्वाम्यर्थे हता यान्ति राजन् स्वर्गं न संशयः। इत्यग्नि पुराणम्। प्रशस्ता दंष्ट्राअस्ति अस्य। व्री०इनि॥

दकम्। न। वारिणि। जले॥

दक्ष। पु। ब्रह्मणो दक्षिणाङ्गुष्ठाज्जाते प्रजापतिविशेषे। ततएवमैथुनेन प्रजा जाता॥ ताम्रचूडे। कुक्कुटे॥ मुनिविशेषे॥ हरवृषे॥ वृक्षविशेषे॥ त्रि। चतुरे। ज्ञातव्येषु कर्त्तव्येषुवोपस्थितेषु सद्यएवज्ञातुङ्कर्त्तुञ्च समर्थे। शिक्षिते। अनलसे॥ दक्षते। दक्षवृद्धौ शीघ्रार्थेच। पचाद्यच्॥

दक्षकन्या। स्त्री। भवान्याम्। दुर्गायाम्॥ दक्षस्यप्रजापतेः कन्या॥ ता.पञ्चाशत्सङ्ख्यका वह्निपुराणे गणभेद नामाध्याये प्रसिद्धा॥

दक्षजा। स्त्री। दुर्गायाम्॥ दक्षाज्जाता। पञ्चम्यामितिड॥

दक्षजापति। पु। शिवे॥ चन्द्रे॥

दक्षता। स्त्री। क्षिप्रकारित्वे॥

दक्षसावर्णि। पु। नवमे मनौ। भाविषु सप्तमनुषु द्वितीये॥

दक्षसुत। पु। देवे॥

दक्षा। स्त्री। भूमौ॥

दक्षाध्वरध्वंसक। पु। शिवे॥ वीरभद्रे॥ दक्षाध्वरस्य ध्वंसक॥

दक्षाध्वरध्वंसकृत्। पु। हरे॥ वीरभद्रे॥ दक्षाध्वरध्वंसकरोति। कृञ०। क्विप्। तुक्॥

दक्षाय्य। पु। गरुडे॥ गृध्रे॥ दक्षते। दक्ष०। श्रुदक्षिस्पृहिगृहिभ्य आय्य॥

दक्षिण। त्रि। दक्षिणोद्भूते॥ सरले॥ परच्छन्दानुवर्त्तिनि। पराभिप्रायवर्त्तिनि॥ अपसव्ये। अवामे॥ दक्षे॥ औदार्यवति॥ पु। चतुर्धा पत्यन्तर्गतपतिविशेषे॥ सकलनायिकाविषयसमसहजानुरागो दक्षिण इति लक्षणात्॥ दक्षते। दक्ष०।

दक्षिणा

द्दुदक्षिभ्याभिनन् ॥

दक्षिणकालिका। स्त्री। आद्यायांशक्तौ॥

दक्षिणतः। अ। दिशि ॥ देशे ॥ वसत्यागतो वा। कालेदक्षिर्नास्ति। दक्षिणोत्तराभ्यामतसुजिति स्वार्थेऽतसुच् ॥

दक्षिणतारम्। न। दक्षिणतीरे ॥

दक्षिणमार्गे। पुं। पितृयाणे। गतागतलक्षणे कर्मिणामार्गे ॥ यथोक्तमीशोपनिषद्भाष्ये। निर्विशेषदक्षिणेनमार्गेण गतागतलक्षणेनेति ॥

दक्षिणसिन्धु। पु। सोमतीर्थविशेषे॥

दक्षिणस्थ। पु। सारथौ ॥ चि। दक्षभागस्थिते ॥ दक्षिणे तिष्ठति। छा० सुपीतिक ॥

दक्षिणा। अ। दिशि ॥ देशे ॥ वसति रमणीय वा। दक्षिणस्यादिशि दक्षिणादिग्वा। दक्षिणादाजिति स्वार्थे आच् ॥ दक्षिणाहि इत्यर्थे ॥

दक्षिणा। स्त्री। अवाच्यांदिशि। याम्यदिशि ॥ यज्ञादिविधिदाने ॥ यज्ञपत्न्याम् ॥ यथा। दक्षिणा यज्ञपत्नी च दीक्षा सर्वत्रपूजिता। ययाविनाहिविश्वेषु सर्वंकर्महिनिष्फलमिति भागवते ९ स्कन्धे १ ऽध्याय ॥ प्रतिष्ठायाम् ॥ देव्यन्तरे ॥ कचित्प्रजापतेस्तनयायाम् ॥ परिक्रयद्रव्ये ॥ नायिकाविशेषे ॥ यथा। या गौरव भय प्रेम सद्भाव पूर्वनायके। नमुञ्चत्यन्यसक्तापि सा ज्ञेया दक्षिणा बुधैरितिश्रीधरस्वामी ॥

दक्षिणाग्नि। पु। अन्वाहार्यपचनाख्ये यज्ञाग्निविशेषे ॥ दक्षिणाग्नेर्हि योनिर्विकल्प। यतोवैश्यकुलाद्विरत वतो भ्राष्ट्राद्वा गार्हपत्याद्वानीयते ॥ दक्षिणोऽग्नि। दिक्संख्ये संज्ञायामितिसमास ॥

दक्षिणाचल। पु। मलयपर्वते ॥

दक्षिणाचार। पु। वामेतराचारे ॥ यथा। स्वधर्मनिरतोभूत्वा पञ्चतत्त्वेन पूजयेत्। सएवदक्षिणाचारः शिवोभूत्वा शिवांयजेदित्याचारभेदतन्त्रम् ॥ यत्र। चतुर्मकारा सन्त्येव पञ्चमोविजयारस इतिकश्चित् ॥

दक्षिणात्। अ। दिशि ॥ देशे ॥ काले ॥ वसत्यागतो रमणीय वा ॥ दक्षिणस्यांदिशि दक्षिणस्या दक्षिणा वा। उत्तराधरदक्षिणादाति ॥

दक्षिणापथ। पु। देशविशेषे ॥ यथा। एतेगच्छन्तिबहव पन्थानो दक्षिणापथम्। अवन्तीमृक्षवन्तञ्चसमतिक्रम्यपर्वतमितिमहाभारते नलोपाख्यानम् ॥

दक्षिणापथजन्मा। पुं। जातिविशेषे॥

यथा ॥ दक्षिणापथजन्मान सर्वेनर वराश्वका । गुहा पुलिन्दा शवराश्चुचुकामद्रपैः सह ॥ उत्तरापथजन्मान कीर्तयिष्यामितानपि । यौनका स्वोजगान्धारा किरातावर्वरैः सह ॥ एतेपापकृतस्तातचरन्ति पृथिवीमिमामिति महाभारते मोक्षधर्मे ॥

दक्षिणापथदेशः । पु । देशविशेषे ॥ यथा । तथापरेजनपदा दक्षिणापथवासिनः । पाण्ड्याश्च केरलाश्चैव चोलाः कुल्या स्तथैवच ॥ सेतुकामुष्काश्चैव कुपथावारवासिकाः । नवराष्ट्रामाहिषकाः कलिङ्गाश्चैवसर्वशः ॥ कावेराश्च सहैषीकैराटव्या शवरास्तथा । पुलिन्दा विन्ध्यमूषीका वैदर्भादण्डकैः सह ॥ कुलीयाश्च शिरालाश्च रूपसा स्तापसैःसह । तथातैत्तिरिकाश्चैव सर्वेकारस्करास्तथा ॥ नासिकाद्याश्चयेचान्ये येचैवान्तरनर्मदाः । भानुकच्छा समाहेया सहसारस्वतैस्तथा ॥ कच्छीयाश्च सुराष्ट्राश्च आनर्तास्त्वर्बुदैः सह । इत्येतेअपरान्तास्शृणुयेविन्ध्यवासिनः ॥ इति मत्स्यपुराणम् ॥

दक्षिणामुखः । पु । दक्षिणादिगभिमुखे ॥ यथा । अमावास्या गयाश्राद्ध दक्षिणामुखभोजनम् । न जीवत् पितृक कुर्यात् कृतेच पितृहा भवेत् ॥

दक्षिणामूर्त्तिः । पु । परशिवे ॥ मोक्षेच्छाखमहावटद्रुमतटे योगासनस्थ प्रभुं प्रत्यक्तत्त्वबुभुत्सुभिः प्रतिदिश प्रोदीक्ष्यमाणाननम् । मुद्रा तर्कमयीं दधान ममल कर्पूरगौर शिवद्दृदयन्त कलये स्फुरन्तमनिशं श्री दक्षिणामूर्त्तिकम् ॥ चित्रवटतरोर्मूले वृद्धा शिष्या गुरुर्युवा । गुरोस्तु मौनं व्याख्यान शिष्यास्तुच्छिन्नसंशया ॥

दक्षिणायनम् । न । देवानांरात्रौ । कर्कटेऽर्कसङ्क्रमे । श्रावणादिषट्सु मासेषु ॥ माघादिमासयुग्मैस्तु ऋतवः षट् क्रमादितः । उत्तरायणमाद्यैस्तैस्त्रिभिः स्याद्दक्षिणायनम् ॥ याम्यायने यस्य भवेत् प्रसूतिः शठः कठोरः पिशुनस्वभावः । चतुष्पदाढ्यः कृषिमानहंयुर्वाचामशान्तो मनुज प्रतापी ॥

दक्षिणारुः । पु । व्याधकर्तृकदक्षिणाङ्गकृतव्रणे मृगे । दक्षिणेर्मणि ॥ दक्षिणे अरुर्यस्य ॥

दक्षिणार्हः । त्रि । दक्षिणायै ॥ दक्षिणामर्हति । अर्हपूजायाम् । अर्हद्रव्यच ॥

दक्षिणावर्त्तः । त्रि । दक्षिणे आवर्त्तविशिष्टे ॥

दक्षिणावर्त्तकी। स्त्री। वृश्चिकाल्याम्॥

दक्षिणाशापति । पु। यमे । वैवस्वते। धर्मराजे ॥ दक्षिणाशाया पति ॥

दक्षिणाहि। अ। दक्षिणदिशि ॥ दक्षिणदेशे॥ दक्षिणात्। आहिचदूरे इतिस्वार्थे आहिर्दूरे चेदवधिमान्। वसति रमणीयवा ॥

दक्षिणीय । त्रि। दक्षिणार्हे ॥ दक्षिणामर्हति। कडङ्करदक्षिणाच्छचेति छ.। तस्य ईयादेश ॥

दक्षिणेन। अ। दक्षिणदिशि ॥ दक्षिणदेशे॥ एनबन्यतरस्यामदूरेपञ्चम्या' । दक्षिणेन वसति रमणीयवा ॥

दक्षिणेर्म्मा। पु। दक्षिणारौ । सव्रतमृगे ॥ दक्षिणे ईर्मं व्रणमस्य।दक्षिणेर्मालुब्धयोगइति अनिजन्त.साधु:॥

दक्षिण्य.। त्रि। दक्षिणार्हे ॥ दक्षिणामर्हति । कडङ्करदक्षिणाच्छचेति यत् ॥

दगार्गलम्। न। निर्जलदेशे जलोपलब्धिसाने॥ तन्निरूपयति वराहमिहिर.। तत्रादौ प्रयोजनप्रदर्शनार्थमाह। धर्म्यं यशस्यञ्चवदाम्यतोऽहं दगार्गलं येन जलोपलब्धि । पुंसां यथाङ्गेषु सिरास्तथैवक्षितावपिप्रोन्नतनिम्नसंस्था. ॥ एकेन वर्णेन रसेन चाम्भश्च्युत नभसो वसुधा विशेषात् । नानारसत्व बहुवर्णता च गत परीक्ष्यं क्षितितुल्यमेवम् ॥ २ ॥ सिरानामानि ॥ पुरुहूतानलयमनिऋतिवरुणपवनेन्दुशङ्करा देवा । विज्ञातव्या क्रमश प्राच्याद्यानां दिशापतय ॥ दिकपति सञ्ज्ञाचशिरा नवमीमध्ये महासिरानाम्नी । एताभ्योन्या शतशो विनिसृताना मभि प्रथिता ॥ पातालादूर्द्ध्वसिरा शुभा चतुर्दिक्षु संस्थितायाश्च । कोणदिगुत्थानशुभा सिरा निमित्ता न्यथोवक्ष्ये ॥ ५ ॥ * ॥ यदिवेतसो ऽम्बुरहिते देशे हस्तैस्त्रिभि स्ततपश्चात् । सार्द्धपुरुषे तोय वहति सिरा पश्चिमातश्च ॥ चिह्नमपार्द्धपुरुषे मण्डूक पाण्डुरोऽथमृत्पीता। पुटभेदकश्चतस्मिन् पाषाणो भवतितोयमत ॥ ७ ॥ जम्ब्वोदग्घस्तैस्त्रिभि सिराऽधोनरद्वये पूर्वा। मृल्लोहगन्धिकापाण्डुराचपुरुषेत्र तोऽत्रमण्डूक ॥ ८ ॥ जम्बूवृक्षस्य प्राग् वल्मीकोयदिभवेत् समीपस्थ । तस्माद्दक्षिणपार्श्वेसलिलं पुरुषद्वये स्वादु ॥ अर्द्धपुरुषेच मत्स्य पारावतसन्निभश्च पाषाण। मृद्भवतिचात्रनीला दीर्घंकालञ्चबहुतोयम् ॥ १० ॥ पश्चादुदुम्बरस्यत्रिभिरेवकरै र्नरद्वयेसार्द्धे । पुरु

षेसितोऽहिरध्याञ्जनोपमोऽध सि
राशुजला॥ ११ ॥ उदगर्जुनस्यदृश्यो
वल्मीको यदि ततोऽर्जुनाद्धस्तै ।
स्त्रिभि रम्बु भवति पुरुषै स्त्रिभि रर्द्धस
मन्विते. पश्चात् ॥ श्वेतागोधार्द्धन
रे पुरुषे मृद्धूसरा तत कृष्णा । पी
ता सिता ससिकता ततो जल नि
र्दिशेदमितम् ॥ १३ ॥ वल्मीकोप
चितायां निर्गुण्ड्यां दक्षिणेन कथित
करैः । पुरुषद्वये सपादे स्वादुजल
भवति चाशोष्यम् ॥ रोहितमत्स्यो
र्द्धनरे मृत्कपिलापाण्डुरा तत पर
त' । सिकता सशर्करेटा क्रमेणप
रतो भवत्यम्भ' ॥ १५ ॥ पूर्वेणयदि
वदर्या वल्मीकोदृश्यते जलंपश्चात्
। पुरुषैस्त्रिभिरा देश्यं श्वेतागृहगो
धिकाऽर्द्धनरे ॥ १६ ॥ सपलाशावद
री वेद्दिश्यपरस्यां ततोजलं भवति
। पुरुषत्रये सपादे पुरुषेऽत्रचडुण्डु
भश्चिह्नम् ॥ १७॥ विल्वोदुम्बरयोगे
विहायहस्तत्रयन्तुयाम्येन । पुरुषैस्त्रि
भिरम्बुभवेत् कृष्णोऽर्द्धनरेचमण्डूक
॥ १८ ॥ काकोदुम्बरिकायां वल्मी
कोदृश्यते सिरातस्मिन् । पुरुषत्रये
सपादे पश्चिमदिक्स्थावहति सा
च ॥ आपाण्डुपीतिकामृद्गौरसव
र्णो भवतिपाषाण । पुरुषेर्द्ध कुमु
दनिभो दृष्टिपथ मूषिको याति ॥
२० ॥ जलपरिहीनेदेशे वृक्ष का
म्पिल्यको यदादृश्य । प्राच्यांहस्त
त्रितयेवहतिसिरा दक्षिणा प्रथमम्
॥ मृन्नीलोत्पलवर्णा कापोतादृ
श्यते ततस्तस्मिन् । हस्तेजगन्ध
को मत्स्योजलमल्पञ्च सचारम् ॥
२२ ॥ श्योनाकतरो रपरोत्तरेसिरा
द्वौकरावतिक्रम्य । कुमुदानामसिरा
सा पुरुषत्रयवाहिनी भवति ॥२३॥
आसन्नोवल्मीको दक्षिणपार्श्वे विभी
तकस्य यदि । अध्यर्द्धेभवतिसिरा पु
रुषे ज्ञेया दिशि प्राच्याम् ॥ २ ॥ त
स्यैवपश्चिमायांदिशिवल्मीको यदा
भवेद्धस्ते । तत्रोदग्भवतिसिरा चतु
र्भिरर्धाधिकै पुरुषै ॥ श्वेतोविश्व
म्भरक प्रथमेपुरुषेतु कुङ्कुमाभो
श्मा । अपरस्यां दिशिचसिरानश्य
तिवर्षत्रयेतीते॥२६॥सकुश सितए
शायां वल्मीको यत्रकोविदारस्य ।
मध्येतयोर्नरैरर्धं पञ्चभिस्तोय मक्षो
भ्यम् ॥ प्रथमेभुजग कमलोदरस
न्निभो महीरक्ता । कुरुविन्द पाषा
ण श्चिह्नान्येतानि वाच्यानि ॥२८॥
यदिभवति सप्तपर्णो वल्मीकवृत
स्तदुत्तरेतोयम् । वाच्यं पुरुषै पञ्च
भि रत्रापि भवन्ति चिह्नानि ॥ पुरु

षार्द्धेनतुहरितो दर्दुरोहरिताश्मस
न्निभाभूश्च। पाषाणोभ्रनिकाश वै।
म्याचसिरा शुभाम्बुवहा॥३०॥सर्वे-
षाश्चाखामध स्थितोदर्दुरोयदादृ
श्य।तस्माद्धस्तेतोय चतुर्भिरर्द्धाधि
कै'पुरुषै ॥पुरुषेतुभवति नकुलो।
नीलाम्रत् पीतिकातत'श्वेता। दर्दु
रसमानरूप पाषाणोदृश्यते तत्र
॥३२॥ यद्यहिनिलयोदृश्यो दक्षि
णात' सस्थित करञ्जस्य। हस्तद्वयेतु
याम्ये पुरुषत्रितये सिरासार्द्धे॥उद
गन्धा स्वादुजला हरितोश्माधस्तत
स्तोयम्। पुरुषार्द्धे कच्छपक. प्रथम
पूर्वा सिरोद्भियते तत्र॥ उत्तरत
श्च मधूका दहिनिलय पश्चिमेतत
स्तोयम्।परिहृत्य पञ्चहस्तान् नव
चाष्टौ पौरुषान् प्रथमम् ॥ अहि
राज पुरुषेऽधोधूम्राधात्री कुलत्थ
वर्णोश्मा। माहेन्द्रे भवति सिरा वह
तिसफेन सदातोयम्॥३६।वल्मी
क स्निग्धो दक्षिणे सकुभदूर्वस्येत् ति
लकस्य। पुरुषै'पञ्चभिरम्भोदिशि
वारुण्यासिरापूर्वा॥३७॥ सर्पावा
स.पश्चाद्वल्मीका दक्षिणे कदम्बस्य।
परतोहस्तत्रितयात् षड्भि पुरुषै स्तु
रीयोनैः॥ कौवेरीचात्रसिरा वह
तिजलं लोहगन्धिचाक्षोभ्यम्।कन

कनिभोमण्डूकोनरमात्रेमृत्तिकापी
ता॥३९॥ वल्मीकसहतोयदि
तालोथाभवति नारिकेलोवा। पश्चा
त् षड्भिर्हस्तैर्नरैश्च तुर्भि सिराया
म्या॥४०॥याम्येनकपित्थस्याहिस
श्रयश्चे दुदग्जल वाच्यम्। सप्तपरि
हृत्यकरान् खात्वापुरुषान् कर्बुरा
पुटभिद्॥अश्मन्तकस्यवामे बदरीवा
दृश्यतेहिनिलयोवा। षड्भिरुदग
स्यकरै सार्द्धपुरुषत्रये तोयम्॥
कूर्म प्रथमे पुरुषे पाषाणोधूसर'
ससिकताम्रत्। आदौचसिरायाम्या
पूर्वोत्तरतो द्वितीयाच॥४३॥वा
मेनहारिद्रतरो वल्मीकश्चेज्जलं
भवतिपूर्वे। हस्तत्रितयेसत्र्यंशैः पु-
म्भि पञ्चभिर्भवति॥ नीलोभुजगो
दृश्योम्रत्पीतामरकतोपमश्चाश्मा
। कृष्णाभू.प्रथम वारुणीसिरादक्षि
णेनान्या॥४४॥ जलपरिरक्षितेदे
शेऽनूपजानिदृश्यन्ते निमित्तानि।
वीरणदूर्वाम्रदवो यत्रतु तत्रजलं
पुरुषे॥ भार्गीत्रिवृतादन्ती सूकर
पादीच लक्ष्मणाचैव। नवमालिका
च हस्तद्वयेऽम्बुयाम्येत्रिभि. पुरुषै.
॥४६॥ स्निग्धा. प्रलम्बशाखावाम
नविकटद्रुमा:समीपजला। सुषि
राजर्जरपत्राहृक्षाश्चजलेनसन्त्यक्ता:

॥ ४७ ॥ तिलकाम्रातकवरुणकभल्लातकबिल्वतिन्दुकाङ्कोला । पिण्डारशिरीषकाञ्जनपरूषकावञ्जुलातिबला ॥ एतेयदिसुस्निग्धैर्वल्मीकैःपरिवृतास्ततस्तोयम् । हस्तैस्त्रिभिरुत्तरतश्चतुर्भिरर्द्धेनचरणेन ॥ ४९ ॥ अतृणेसतृणायस्मिन्सतृणेतृणवर्जिता मही यत्र । तस्मिन्सिरा प्रदिष्टा वक्तव्यं वाधनंवाऽस्मिन् ॥ ५० ॥ कण्टक्यकण्टकानां व्यत्यासेऽम्भस्त्रिभिःकरैःपश्चात् । खात्वापुरुषत्रितयं त्रिभागयुक्तंधनंवास्यात् ॥ ५१ नदतिमहीगम्भीरं यस्मिंश्चरणाहतात्रजलं तस्मिन् । सार्द्धैस्त्रिभिर्मनुष्यैः कौबेरीतत्र च सिराऽस्यात् ॥ ५२ ॥ वृक्षस्यैकाशाखा यदिविनताभवति पाण्डुरावास्यात् । विज्ञातव्यं शाखातले जलं त्रिपुरुषंखात्वा ॥ ५३ ॥ फलकुसुमविकारोयस्यतस्यपूर्वेसिरास्त्रिभिर्हस्तैः । भवति पुरुषैश्चतुर्भिः पाषाणोऽधःक्षितिः पीता ॥ ५४ ॥ यदिकण्टकारिकाऽकण्टकैर्विनादृश्यतेसितैः कुसुमैः । तस्यास्तलेऽम्बुवाच्य त्रिभिर्नरैरर्द्धपुरुषैश्च ॥ ५५ ॥ खर्जूरो द्विशिरस्कायत्रभवेज्जलविवर्जिते देशे । तस्याः पश्चिमभागे निर्देश्य त्रिपुरुषैर्वारि ॥ ॥ ५६ ॥ यदिभवतिकर्णिकारःसितकुसुम स्यात्पलाशवृक्षोवा । सव्येन तत्रहस्तद्वयेऽम्बु पुरुषद्वये भवति ॥ ५७ ॥ यस्यामूष्माधात्र्यां धूमोवातत्र वारिनरयुगले । निर्देष्टव्याचसिरामहतातोयप्रवाहेण ॥ ५८ ॥ यस्मिन्क्षेत्रोद्देशेजातसस्यं विनाशमुपयाति । स्निग्धमतिपाण्डुरं वा महासिरा नरयुगेऽत्र ॥ ५९ ॥ * ॥ इतिजाङ्गलानूपयोर्जलपरिज्ञानम् ॥ * ॥ अथमरुभूमौ सिराविज्ञानम् ॥ मरुदेशे भवतिशिरायथातथाऽतःप्रप्रवक्ष्यामि । ग्रीवाकरभाणामिव भूतलसंस्थाःसिरायान्ति ॥ ६० ॥ पूर्वोत्तरेणपीलोर्यदि वल्मीको जलं भवतिपश्चात् । उत्तरगमनाचसिरा विज्ञेयापञ्चभिः पुरुषैः ॥ चिह्नंदर्दुरमादौ मत्स्यकपिलातत्परं भवेत्सरिता । भवतिचपुरुषे ऽधोऽश्मातस्यतलेऽम्भो विनिर्देश्यम् ॥ ६२ ॥ पीलोरेव प्राच्यां वल्मीको ऽतोऽर्द्धपञ्चमैर्हस्तैः । दक्षिणयाम्यायां तोयं वक्तव्यं सप्तभिः पुरुषैः ॥ प्रथमेपुरुषे भुजगः सितासितो हस्तमात्रमूर्त्तिश्च । दक्षिणतोवहतिसिरा सक्षार भूमिपानीयम् ॥ ६४ ॥ उत्तरतश्च करीरस्याहिगर्हदृश्येजलं स्वादु । दशभिः पुरुषैः क्षेयंपुरुषे पीतो ऽश्मजण्डूकः

॥ ६५ ॥ रोहीतकस्य पश्चाद्दहिवास्य त्रिभि करैर्याम्ये । द्वादशपुरुषान् खात्वा सवारापश्चिमेन सिरा ॥ ६६ ॥ इन्द्रतरोर्वल्मीक प्राग्दृश्य. पश्चिमेसिराहस्ते । खात्वाचतुर्दशनरान् कपिलागोधानरे प्रथमे ॥ ६७ ॥ यदिवासुवर्णनाम्नस्तरोर्भवेद्वाम ते भुजङ्गगृहम् । हस्तद्वयेतुयाम्ये पञ्चदशनरावसाने ऽम्बु ॥ क्षार प योऽत्र नकुलोर्द्धमानवे ताम्रसन्नि-भश्चाश्मा । रक्ताच भवतिवसुधा व हतिसिरा दक्षिणातश्च ॥ ६८ ॥ बद रीरोहितवृक्षौ सम्पृक्तौचेद्विनापिव ल्मीकम् । हस्तत्रये ऽम्बु पश्चात् षो डशभिर्मानवै र्भवति ॥ सुरस जल मादौदक्षिणासिरा वहति चोत्तरे णान्या । पिष्टनिभ. पाषाणो मत्के ता वृश्चिकोर्द्धनरे ॥ ६९ ॥ सकरीरा चे बदरी त्रिभि.करै पश्चिमेन त त्राम्भ' । अष्टादशभि. पुरुषै रैशा नीवहुजलाचसिरा ॥ ७० ॥ पीलु समेतावदरी हस्तत्रयसम्मिते दिशि प्राच्याम् । विंशत्या पुरुषाणामशो ष्यमम्भो ऽत्रसक्षारम् ॥ ७१ ॥ ककु भकरीरावेकत्र संयुतौ यत्रककुभ विल्वौ वा । सार्द्धद्वयेम्बु पश्चान् न रैर्भवेत् पञ्चविंशत्या ॥ ७२ ॥ व

ल्मीकमूर्द्धनि यदा दूर्वाश्च कुशाश्च पाण्डुराः सन्ति । कूपोमध्येदेयो ज लमत्रनरैक विंशत्या ॥ ७३ ॥ भूमि कदम्बकयुता वल्मीकोयत्रदृश्यते दू र्वा । हस्तद्वयेनयाम्ये नरैर्जलं पञ्च विंशत्या ॥ ७४ ॥ वल्मीकत्रयमध्ये रोहीतकपादपो यदाभवति । नाना वृक्षै सहित स्त्रिभिर्जलतत्रवक्तव्यम् ॥ हस्तचतुष्के मध्या च्छोडशभिश्चा ङ्गुलैरुदग्वारि । चत्वारिंशत् पुरुषा न् खात्वाश्माथ. सिराभवति ॥ ७६ ॥ ग्रन्थिप्रचुरायस्मिन् शमीभवेदुत्त रेणवल्मीक. । पश्चात् पञ्चकरान्ते शतार्द्धसङ्ख्यैर्नरैः सलिलम् ॥ ७७ ॥ एकस्था. पञ्चयदा वल्मीका म ध्यमो भवेच्छ्वेत । तस्मिन् सिराप्र दिष्टा नरषष्ठ्या पञ्चवर्जितया ॥ ७८ ॥ सपलाशायत्रशमी पश्चिमभा गेम्बुमानवै. षष्ट्या । अर्द्धनरेहि प्रथम सशालुकापीतमृत् परतः ॥ ७९ ॥ वल्मीकेन परिवृत श्वेतोरो हीतको भवेद्यस्मिन् । पूर्वेणहस्तमा त्रे सप्तत्यामानवैरम्बु ॥ ८० ॥ श्वे ताकण्टकबहुला यत्रशमी दक्षिणे नतत्रपय. । नरपञ्चकसंयुतया सप्त त्याहिनैरार्द्धेच ॥ ८१ ॥ * ॥ अथ विशेषः ॥ मरुदेशेयच्चिह्नं न जाङ्ग

लेतैर्जलं विनिर्देश्यम् । जम्बूवेतस
पूर्वे येपुरुषा स्ते मत्स्यैर्द्विगुणा ॥
८२ ॥ जम्बूत्रिवृतमौर्वीशिशुमारी
शारिवाशिवाश्यामा । वीरुधयो वा
राहीज्योतिष्मतीगरुडवेगाच ॥ सू
करिकामाषपर्णीव्याघ्रपदाचेतियद्य
हेर्निलये । वल्मीकादुत्तरतस्त्रि-
भि. करैस्त्रिपुरुषेतोयम् ॥ एतदनू
पेवाच्यजाङ्गलभूमौतु पञ्चभि पुरु
षे. । एतैरेवनिमित्तै मंरुदेशे सप्त
भि कथयेत् ॥ ८५ ॥ एकनिभायत्र
मही तृणतरुवल्मीकपरिहीना ।
तस्यां यत्रविकारोभवति धरित्र्या ज
लं तत्र ॥ ८६ ॥ यत्रस्निग्धा निम्ना स
वालुका सानुनादिनी वास्यात् । त
त्रार्द्ध पञ्चकै र्वारि मानवै. पञ्चभि
र्यदिवा ॥ ८७ ॥ स्निग्धातरूणांयाम्ये
नरै श्चतुर्भि र्जल प्रभूतञ्च । तरुग
हने अपिविकृतो यस्तस्मात् तद्वदे
व वदेत् ॥ ८८ ॥ नमतेयत्रधरित्री
सार्द्धे पुरुषेम्बु जाङ्गलानूपे । कीटा
वायत्रविनालयेनबहवोम्बु तत्रापि॥
८९ ॥ उष्णाशीताच मही शीतोष्णा
म्भस्त्रिभिर्नरैः सार्द्धैः । इन्द्रधनुर्म्म
त्स्योवावल्मीकोवाचतुर्हस्तात् ॥ ९०
॥ वल्मीकानांपङ्क्त्या यद्येकोभ्यु
च्छितसिरा तदध. । शुष्यति नरो

त्ते वा सस्यं यस्याश्चतत्राम्भ ॥ ९१
॥ एतज्जाङ्गलानूपे ॥ * ॥ न्यग्रोध
पलाशोदुम्बरैः समेतैस्त्रिभिर्जलं त
दध' । वटपिप्पलसमवाये तद्वत्वा
च्यं सिराचोदक् ॥ ९२ ॥ * ॥ अथ
कूपलक्षणम् ॥ आग्नेयेयदिकोणे ग्रा
मस्यपुरस्य वाभवेत् कूप. । नित्य
सकरोतिभय दाहञ्च समानुषं प्रायः
॥ नैर्ऋतकोणे वालक्षयञ्च वनिताभ
यञ्चवायव्ये । दिक्त्रयमेतत् त्यक्त्वा
शेषाशुभावहाः कूपाः ॥ ९४ ॥ *
॥ सारस्वतेनमुनिना दगार्गलं यत्
कृतं तदवलोक्य । आर्याभिः कृतमे
तद् वृत्तैरपिमानवं वक्ष्ये ॥ ९५ ॥
स्निग्धा यत' पादपगुल्मवल्ल्यो नि-
श्छिद्रपत्रा श्च तत.सिरास्ति । पद्म
क्षुरोशीरकुला' सगुन्द्रा काशा कु
शावा नलिका नलोवा ॥ खर्ज्जूरज
म्ब्वर्जुनवेतसा स्यु क्षीरान्विताबा
द्रुमगुल्मवल्ल्य' । छत्रेभनागा. शतप
त्रनीपा. स्युर्नक्तमालाश्च ससिन्धुवा
राः ॥ विभीतकोवा मदयन्तिकावा
यत्रास्ति तस्मिन् पुरुषत्रये ऽम्भः ।
स्यात् पर्वतस्योपरिपर्वतोन्य स्तत्रा-
स्ति मूलेपुरुषत्रयेम्भः ॥ ९८ ॥ या
मौञ्जीयै' काशकुशैश्चयुक्ता नीला-
च मृद्यत्रसशर्कराच । तस्मा प्रभूत

सुरसञ्चतोय कृष्णावरक्ताव तथैव मवे ॥ ९९ ॥ * ॥ अथभूगुणाः ॥ स शर्करा ताम्रमृत्तीकषाय चार धरित्रीकपिला करोति। आपाण्डुरायां लवणं प्रदिष्ट मिष्टपयोनीलवसुन्धरायाम् ॥ १०० ॥ शाकाश्वकर्णार्जुन विल्वसर्जा श्रीपर्ण्यरिष्टाधवशिंशपाश्च। छिद्रैश्च पर्णैर्मगुल्मवल्योरूक्षा श्चदूरेम्बुनिवेदयन्ति॥ १ ॥ सूर्याग्निभस्मोष्ट्रखराऽनुवर्णा या निर्जला सा वसुधा प्रदिष्टा। रक्ताङ्कुरा क्षीरयुता करीरा रक्ताधराचेज्जलमश्मनोध. ॥ २ ॥ वैदूर्यमुद्गाम्बुदमेचकाभा पातोन्मुखोदुम्बरसन्निभावा। भृङ्गाञ्जनाभा कपिलाथवा या ज्ञेया शिलाभूरिसमीपतोया॥ ३ ॥ पारावतक्षौद्रघृतोपमाया क्षौमस्य वल्कस्य च तुल्यवर्णा। यासोमवल्याश्च समानरूपा साप्याशुतोय कुरुतेऽक्षयञ्च॥ ४ ॥ ताम्रैःसमेता पृषतैर्विचित्रै रापाण्डुभस्मोष्ट्रखरानुरूपा। भृङ्गोपमाङ्गुष्ठिकपुष्पिकाच सूर्याग्निवर्णा च शिलावितोया॥ ५ ॥ चन्द्रातप स्फटिकमौक्तिकहेमरूपा याश्चेन्द्र नीलमणिहिङ्गुलकाञ्जनाभाः । सूर्योदयांशुहरितालनिभाश्चयाः सुस्ता. शोभनामुनिवचोपचवृत्तमेत

त् ॥ ६ ॥ एता ह्यभेद्यास्त्र शिला. शिवाश्च यक्षैश्चनागैश्च सदाभिजुष्टा। येषाश्चराष्ट्रेषु भवन्तिरांसां तेषा मदष्ठिनैभवेत्कदाचित् ॥ ७ ॥ * ॥ शिलानां विदारणोपायमाह॥ भेद यदानैति शिला तदानीं पला शकाष्ठै सह तिन्दुकानाम् । प्रज्वालयित्वानलमग्निवर्णा सुधाम्बुसिक्ताप्रविदारमेति ॥ ८ ॥ तोय श्रितं मोक्षकभस्मनावा यत्सप्तकृत्वः परिषेचनंतत् ॥ कार्यंशरक्षारयुतं शिलायाः प्रस्फोटनं वह्निवितापिताया. ॥ ९ ॥ तक्रकाञ्जिकसुराः सकुलत्था योजितानि वदराणिचतञ्च । सप्तराचमुषितान्यभितप्तां दारयन्ति हि शिलां परिषेकै ॥ १० ॥ नैम्बंपत्र त्वक्तनाल तिलानां सापामार्गं तिन्दुकं स्याद्गुडूची । गोमूत्रेण स्त्रावित क्षारएषां षट्कृत्वोऽत स्तापितोभिद्यतेश्मा ॥ ११ ॥ * ॥ शस्त्रपानम्॥ आर्कम्पयोहुडुविषाणम सीसमेतं पारावताखुशकृताचयुत प्रलेप । टङ्कस्यतैलमथितस्य ततो स्य पानं पश्चाच्छितस्य न शिलासु भवेद्विघात. ॥ १२ ॥ क्षारं कदल्या मथितेनयुक्तं दिनोषितं पायितपायसंयत् । सम्यक्छितं चाश्मनिनैति

भङ्गं न चान्यतोऽप्यपि तस्य कोष्ठ-
म् ॥ १३ ॥ * ॥ वापीलक्षणम् ॥ वा
पी प्रागपरायताऽम्बुसुषिरं यत्नेन
याम्योत्तरा कल्लोलैरवदारमेति
महता साप्राय प्रेरितैः । तां चे
दिच्छति सारदारुभिरपां सम्पात
मावारयेत् पाषाणादिभिरेव वा प्र
तिचयं क्षुद्रद्विपाश्वादिभिः ॥ १४ ॥
ककुभवटाम्रप्लक्षकदम्बैः सनिचुलजा
म्बूवेतसनीपैः । कुरवकतालाऽशो
कमधूकैर्बकुलविमिश्रैश्चावृततीरा
म् ॥ १५ ॥ * ॥ नैर्वाहिकद्वारलक्ष
णम् ॥ द्वारञ्च नैर्वाहिकमेकदेशे
कार्यं शिलासञ्चितवारिमार्गम् । को
शस्थितं निर्विवरं कपाटं कृत्वा ततः
पांसुभिरावपेत्तम् ॥ १६ ॥ * ॥
कूपयोगमाह ॥ अञ्जनमुस्तोशीरैः
सराजकोशातकामलकचूर्णैः । कत
कफलसमायुक्तैर्योगः कूपे प्रदातव्यः
॥ १७ ॥ * ॥ जलगुणानाह ॥ कलुषं
कटुकं लवणं विरसं सलिलं यदि वा
ऽशुभगन्धि भवेत् । तदनेन भवत्य
मलं सुरसं सुरगन्धिगुणैरपरैश्च युतम्
॥ १८ ॥ * ॥ नक्षत्राणि ॥ हस्तो म
घानुराधापुष्यधनिष्ठोत्तराशिरोहि-
ण्यः । शतभिषगित्यारम्भे कूपानां
शस्यते भगणः ॥ १९ ॥ * ॥ प्रतिष्ठा
विधानम् ॥ कृत्वा वरुणस्य बलिं वट
वेतसकीलकं सिरास्थाने । कुसुमै
र्गन्धैर्धूपैः सम्पूज्य निधापयेत् प्रथम
म् ॥ १२० ॥ इति वाराह्यां द्विपञ्चाश
त्तमोऽध्यायः ॥ ५२ ॥

दग्धः । त्रि । भस्मीकृते । पुष्टे । प्लुष्टे ॥ अग्निस्पृष्टे ॥ सन्तप्ते ॥ दह्यते स्म । दह भस्मीकरणे । क्तः ॥ न । कत्तृणे ॥

दग्धकाकः । पुं । द्रोणकाके ॥

दग्धभम् । न । रव्यादिवारेषु भरण्यादिसप्तनक्षत्रेषु ॥ यथा । याम्यं त्वाष्ट्रं वैश्वदेवं धनिष्ठार्यम्णं ज्येष्ठान्त्यं रवे र्दग्धभं स्यात् ॥ दग्धनक्षत्रम् ॥

दग्धरथः । पुं । चित्ररथगन्धर्वे ॥

दग्धरुहः । पुं । तिलकवृक्षे ॥

दग्धरुहा । स्त्री । दग्धारुहे । भस्मरोहायाम् ॥

दग्धलग्नम् । न । शून्यलग्ने ॥ यथा । मृगसिंहौ तृतीयायां प्रथमायां तुलामृगौ । पञ्चम्यां वृषराशीशौ सप्तम्यां चापचन्द्रभे ॥ नवम्यां सिंहकीटाख्यौ वेकादश्यां गृहोऽङ्गने । झषकीनौ त्रयोदश्यां दग्धसञ्ज्ञाः समीरिताः ॥ दग्धलग्ने यत् कर्म कृतं सर्वं विनश्यति ॥

दग्धा । स्त्री । त्यक्तार्कदिशि ॥ तिथिविशेषे ॥ यथा । द्वादश्येकादशी चैव

दण्ड:

दशमीचविषष्ठिका। द्वितीयासप्तमीचैवदग्धा. सूर्यादिवारतः॥ प्रकारान्तरमपि। एकादशीचेन्दुवारे द्वादशीचार्कवासरे। षष्ठीवृहस्पतेर्वारे। तृतीयाबुधवासरे। अष्टमी शुक्रवारेच नवमीशनिवासरे॥पञ्चमीभौमवारेच दग्धयोगा. प्रकीर्त्तिताः॥ मासदग्धा यथा। तृतीयामीनधनुषो चतुर्थी वृषकुम्भयोः। मेषकर्कटयोः. षष्ठी कन्यामिथुनयोष्टमी॥ दशमी वृश्चिकेसिंहे द्वादशीमकरेतुले। एभिर्जातोनजीवेत यदिशक्रसमोभवेदितिदीपिका॥ कुरुड इति गौडप्रसिद्धे वृक्षे। खलेरुकायाम्। कर्णमद्गायाम्। दग्धरुहाम्॥दहेःक्तान्तात् टाप्॥

दग्धिका। स्त्री। दग्धभक्ते। भिक्षाटायाम्। जलाभात इति भाषा॥ कुत्सितादग्धा दग्धिका। कुत्सिते इति कन्॥ दग्धाख्ये॥

दग्धेष्टका। स्त्री। झामके। झांमा इति भाषा॥

दण्ड.। पु। न। लगुडे। लट्ठ छडिया इति भाषा॥ पु। व्यूहप्रभेदे॥ प्रकाण्डे॥ अश्वे॥ कोपे॥ मन्थाने॥ सैन्ये॥ दाम्यते दम्यतोऽनेन। दम०। अमन्तात् ड.॥ काले। घडी इति भाषा

दण्डक.

॥ यथा। दमगुर्वंचरोन्नादकाश्च' प्रा या.षडात्मके.। तै पद्य स्मातुत्तत्पर्य्याद्दण्डइत्यभिधीयते॥ मानभेदे। काठा इति गौडभाषा॥ चतुर्हस्तपरिमिते मानकाष्ठादौ॥ चण्डांशोः पार्श्वपाश्र्विके। अकौनुचरे॥ दमे॥ यमे॥ अभिमाने॥ ग्रहभेदे॥ अर्थोपकारादिरूपेराज्ञांचतुर्थोपाये॥ यथा। दण्ड शास्ति प्रजा सर्वा दण्डएवाभिरक्षति। दण्ड सुप्तेषु जागर्त्ति दण्डं धर्मं विदुर्बुधाः॥ यत्रश्यामो लोहिताक्षो दण्डश्चरति पापहा। प्रजा स्तत्र न मुह्यन्ति नेता चेत्साधु पश्यति॥ सर्वोदण्डजितोलोको दुर्लभोहिशुचिर्नर'। दण्डस्यहि भयात् सर्वं जगद्भोगायकल्पते॥ * ॥ व्यपेयादेःपक्षान्यप्राग्धने॥ उत्पथप्रवृत्तौ निग्रहहेतुर्दण्डोभगवद्भिभूति.॥ माथामाथे॥ धनुर्द्वयपरिमिते मानकाष्ठादौ॥ इक्ष्वाकुराजपुत्रे॥ दण्डोस्त्यस्ति। अर्शआदच्॥ दण्डयति दण्ड्यते ऽनेनवा। दण्डदण्डनिपातने। पचाद्यच्। पुंसीतिघोवा॥ दमनम्वा। दमुउपशमे। अमन्तात्ड॥ राज्ञांदण्डभृत्स्वपदातिषु॥

दण्डक:। पु। न। चरणरहितप्रस्तारादि छन्दःप्रभेदे॥ लघुलगुडे। सोटा

सोठी छड़ी इत्यादि भाषा ॥ ह्रस्वो दण्ड.। ह्रस्वे इतिकन् ॥

दण्डकन्दक.। पु। धरणीकन्दे ॥

दण्डका। स्त्री। दण्डकारण्ये। जन स्थाने ॥

दण्डकाक। पु। द्रोणकाके ॥

दण्डकारण्यम्। न। रावणाश्रयजनि वेशस्थाने। जनस्थाने ॥ दण्डकनाम्ना राज्ञापरिपालितोदेश.। सचशुक्र शापादरण्यमभूत् ॥ तीर्थविशेषे ॥

दण्डढक्का। स्त्री। वाद्यविशेषे। याम घोषे। यामनाल्याम्। दमामा न गारा नौवत इत्यादिभाषा ॥

दण्डताम्री। स्त्री। ताम्रीवाद्ये ॥

दण्डधर। पु। काले। यमे। अन्तके॥ दण्डस्यधर' ॥ नृपे ॥ कुम्भकारे ॥ चि। दण्डहस्ते॥ दुष्टनिग्रहकर्त्तरि॥

दण्डधार। पु। पृथ्वीपतौ। राज्ञि ॥ यमे। समवर्त्तिनि ॥ त्रि। दण्डहस्ते ॥ दण्ड धरति। धृञ्०। कर्मण्यण् ॥

दण्डनायक। पुं। सेनान्याम्। चतुरङ्ग बलाध्यक्षे ॥

दण्डनीति.। स्त्री। अर्थशास्त्रे। शुक्र नीत्यादुक्तनीतिशास्त्रे ॥ दम्यतेऽने न। दम०। अमन्ताड्डः। दण्डोनीय ते बोध्यतेऽनया इति दण्डनीति। क्तिन् ॥ दण्डेन नीयतेचेदं दण्डनय तिवापुन। दण्डनीतिरितिख्याताणी लोकानतिवर्त्तते ॥ विंशेयोमहाभा रतेराजधर्मेद्रष्टव्य. ॥ दुर्गायाम् ॥ यथा। नयानयगता लोके विकल्प निश्चयाऽमला। दण्डनाद्दमनाद् वापि दण्डनीतिरितिस्मृतेति देवी पुराणम् ॥

दण्डनीय। चि। दण्ड्ये ॥

दण्डपति:। पु। दण्डधरे ॥ दण्डना यके ॥

दण्डपांशुल.। पु। मर्वाटे। द्वारपाले ॥

दण्डपाणि:। पुं। भैरवविशेषे। काशी स्थे शिवगणविशेषे ॥ यमे ॥ दण्ड: पाणौयस्य. ॥

दण्डपारुष्यम्। न। ताडनादौ। अष्टा दशविवादान्तर्गतविवादविशेषे॥ रा ज्ञांसप्तव्यसनान्तर्गतव्यसनविशेषे ॥

दण्डपाल:। पु। अर्द्धशफरमत्स्ये। दां डिका इति गौडभाषा ॥

दण्डपालक'। पु। शकुलमत्स्ये ॥

दण्डभृत्। पु। यमे ॥ कुम्भकारे ॥ त्रि। दण्डधारके ॥ दण्डविभर्त्ति। डुभृञ्०। क्विप् ॥

दण्डमत्स्य। पुं। दण्डारी इति प्रसिद्धे मत्स्ये ॥ दण्डमत्स्योरसेतिक्त' पित्त रक्तं कफ हरेत्। वातसाधारण प्रो क्त:शुक्रलोवलवर्द्धन: ॥

दण्डमाथ । पु । दण्डाकारेपथि ॥

दण्डयात्रा । स्त्री । दिग्विजये ॥ युद्धाय गमने ॥ सयाने ॥ वरयात्रायाम् ॥ इति मेदिनीहेमचन्द्रौ ॥ दण्डाययात्रा ॥

दण्डयाम । पु । कीनाशे ॥ दिवसे ॥ कुम्भसम्भवे । अगस्त्यमुनौ ॥ इति मेदिनी ॥

दण्डरी । स्त्री । डङ्गरीफले इति राजनिर्घण्टः ॥

दण्डवान् । त्रि । दण्डिनि ॥ मतुप् ॥

दण्डवादी । पु । द्वर्वेटे । द्वारपाले ॥ त्रि । दण्डवक्तरि ॥

दण्डवालधि । पु । हस्तिनि । इभे ॥ दण्डइववालधिर्यस्य ॥

दण्डवासी । पु । द्वारपाले ॥ इतित्रिकाण्डशेषः ॥ एकग्रामाधिकृतेजने । चौधरीइतिभाषा ॥ इतिजटाधरः ॥

दण्डविष्कम्भ । पु । कुठरे । मन्थवन्धनकाष्ठे । गर्गरीमुखस्थमन्थदण्डधारककाष्ठे ॥ दण्ड विष्कभ्नाति । स्कम्भुरोधने वीन्' । कर्मण्यण् । वे स्कभ्नातेर्नित्यमितिषत्वम् ॥

दण्डहस्तक । पु । सुह्याम् ॥

दण्डव्यूह । पु । दण्डाकृतिव्यूहरचनाविशेषे ॥ यत्राग्रेबलाध्यक्षो मध्येराजा पश्चात् सेनापतिः पार्श्वयोर्हस्तिनस्तत्समीपेघोटकास्ततःपदातय इत्थंसंकृतरचनोदीर्घःसर्वतसमविन्यासोदण्डव्यूहउच्यते । तेन यातव्यमार्गेसर्वतोभयेसतियायात् ॥

दण्डस्थानम् । न । दशसुस्थानविशेषेषु ॥ यथा । दशस्थानानि दण्डस्य मनु स्वायम्भुवोऽब्रवीत् । त्रिषु वर्णेषु यानिस्यु रक्षतो ब्राह्मणोव्रजेत ॥ उपस्थ मुदरं जिह्वा हस्तौ पादौचपञ्चमम् । चक्षु र्नासा च कर्णौ च धन देह स्तथैव च ॥ अनुबन्ध परिज्ञाय देशकालौ च तत्त्वतः । सारापराधौचालोक्य दण्ड दण्ड्येषुपातयेदितिमनुः ॥

दण्डहस्तम् । न । तगरपुष्पे ॥

दण्डाजिनम् । न । दम्भे ॥ शाठ्ये ॥

दण्डाजिनिक त्रि । मायाविनि ॥

दण्डादण्डि । अ । दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तमित्यर्थे ॥ अन्ये° दीर्घं । इच्कर्मव्यतिहारे ॥

दण्डार । पु । वाहने ॥ मत्तवारणे ॥ शरयन्त्रे ॥ कुम्भकारस्यचक्रे ॥

दण्डाहतम् । न । घोले । गोरसे ॥ दण्डेन मथा आहतम् विलोडितम् । कर्तृकरणेकृतावहुलमिति समासः ॥ त्रि । दण्डेन ताडिते ॥

दण्डिक । पुं । दण्डिनि ॥ दण्डोस्यास्ति । अतइनिठनाविति ठन् ॥ दण्डधारके

। कुड़िया इतिभाषा ॥ डानिकला-
लाच इतिगौड़भाषाप्रसिद्धे मत्स्ये ॥

दण्डिका । स्त्री । हारविशेषे ॥

दण्डितः । त्रि । राजादापित्ते । कृतद-
ण्डे ॥ दण्ड. सञ्जाते ऽस्य । तारका
दित्वादितच् ॥

दण्डी । पु । यमे ॥ द्वाःस्थे । द्वारपाले
॥ मञ्जुघोषे ॥ रवे पार्श्वगविशेषे ॥
जिनविशेषे ॥ दमनकवृक्षे ॥ चतु-
र्थाश्रमिणि ॥ कविविशेषे ॥ यथा । जा
ते जगति वाल्मीके कविरित्यभिधी
यते । कवीइति ततो व्यासे कवयस्त्व
यि दण्डिनीति कालिदासः ॥ त्रि । द
ण्डयुक्ते ॥ दण्डोऽस्यास्ति । अत
इनिठनावितीनिः ॥

दण्डिनी । स्त्री । दण्डवत्याम् ॥ ऋन्ने
भ्यो ङीप् ॥

दण्डिमा । पु । दण्डत्वे ॥ दण्डस्य भावः
। इमनिच् ॥

दण्डोत्पलम् । न । डानिपोला इति
डानकुनि इतिच गौड़भाषाप्रसिद्धे
क्षुपविशेषे ॥ तत्तु पीतरक्तश्वेत
पुष्पभेदात् त्रिविधम् । पीतस्य पर्या
याः । गोलङ्गनी । गन्धवल्ली । सहदे
वी । दण्डा । इति ॥ रक्तस्य पर्याय.
। विश्वदेवा । इति ॥ श्वेतस्य । दण्डो
त्पलेतिरत्नमाला ॥

दण्डोत्पला । स्त्री । श्वेतपुष्पे दण्डो
त्पले ॥

दण्ड्यः । त्रि । दण्डनीये । दण्डार्हे ॥ द
ण्डमर्हति । दण्डादिभ्यो यत् ॥

दत् । पु । दन्ते ॥ दतौ । दत. ॥ इ० श० चं ॥

दत्तः । पुं । दत्तात्रेये ॥ अग्निसिंहनन्द
नेनृपविशेषे ॥ वैश्योपपदे ॥ यथा
। शर्मा देवश्च विप्रस्य वर्मा त्राता च भू
भुजः । भूतिर्दत्तश्च वैश्यस्य दासः शू
द्रस्य कारयेदितिस्मृतिः ॥ दत्रिमपुत्रे
॥ त्रि । कृतदाने । विसृष्टे । विश्रा
णिते ॥ अर्पिते ॥ न । शरणागतर
क्षणादौ ॥ यथा । शरणागतसन्त्राणं
भूतानाञ्चाप्यहिंसनम् । बहिर्वे
दि च यद्दानं दत्तमित्यभिधीयते ॥
डुदाञ् । क्त. । दो दद्घोः ॥

दत्तकः । पुं । द्वादशपुत्रान्तर्गतपुत्रविशे
षे । दत्रिमे ॥ यथा । दद्यान्माता
पिता वा यं स पुत्रो दत्तको भवेदिति
याज्ञवल्क्यः ॥

दत्तात्मा । पु । पुत्रविशेषे ॥ यथा । द
त्तात्मा तु स्वयन्दत्त इति कात्यायनः ।
अस्यार्थः । दत्तात्मा तु पुत्रो यो माता
पितृविहीनः ताभ्यां त्यक्तो वा तवाहं
पुत्रो भवामीति स्वयं दत्त उपनीत
इति ॥

दत्तात्रेयः । पु । विष्णोरंशे ऽत्रिमुने यो

णीश्वरे परमावधूते ॥ विष्णुना सा
त्मसदृशमपश्यता ऽऽत्मैवार्पयेद्दत्तः
। दत्तश्चासावात्रेयश्च ॥

दत्तानपकर्म्म । न । दत्ताप्रदानिके ॥

दत्ताप्रदानिकम् । न । अष्टादशविवाद
पदान्तर्गतविवादपदविशेषे ॥ यथा
मनारद । दत्वाद्रव्यं असम्यगुय पु
नराहातुमिच्छति । दत्ताप्रदानिकं
नामव्यवहारपदंहितदिति ॥ असम्य
क्दत्तंविहितमार्गेण । दत्तस्य पुनराह
रणं वाञ्छन् विवादपदे तत् ॥

दत्ति. । स्त्री । प्रतिपादने । दाने ॥

दत्तेयः । पु । इन्द्रे ॥ इतिचिकाण्डशेषः ॥

दत्त्रिम । पु । पुत्रविशेषे । दत्तके ॥ मा
ता पिता वा दद्यातां यमद्भिः पुत्रमा
पदि । सदृशं प्रीतिसंयुक्तं स ज्ञेयो
दत्त्रिम'सुतः ॥

ददत् । त्रि । प्रयच्छति ॥ ददाति । डु
दाञ्० । लट. शत्रादेश. । शप श्लु
। श्लाविति द्वित्वम् । अभ्यासस्य ह्रस्व
। श्नाभ्यस्तयोरित्यालोप । स्वाद्यु-
त्पत्तिः । उगित्वात् प्राप्तोनुम् अभ्य
स्तत्वान्नभवति ॥

ददनम् । न । प्रतिपादने । दाने ।

दद्रु' । पुं । न । दाद इतिप्रसिद्धे रो
गे । दद्रूणाम् ॥ तल्लक्षणं यथा ।
सकण्डुरागपिडकं दद्रुमण्डलमुद्गत-

मिति ॥ तच्चिकित्सायथा । कुष्ठकृमि
शदद्रुघ्ननिशासैन्धवसर्षपा । अम्लपि
ष्टा. प्रलेपोऽय दद्रुकुष्ठनिसूदन इति
॥ अपिच । दूर्वाभयासैन्धवचक्रमर्द
कुठेरका काञ्जिकतक्रपिष्टा । त्रि-
भि प्रलेपैरपिबद्धमूलं दद्रुश्चकुष्ठ
ञ्चविनाशमेतीति ॥ कच्छपे ॥

दद्रुक' । पु । दद्रुरोगे ॥

दद्रुघ्न. । पु । चक्रमर्दके । चकवंड इति
कसौंदी इतिचभाषा । दद्रुहन्ति ।
हन० । हनो द्ऽ मनुष्यकर्तृकेचे
ति टक् । अत्पूर्वस्येतिनियमान्नणा
त्वम् ॥

दद्रुघ्नपत्रम् । न । पद्माटशाके । पवाँड
शाकाकइति चकवंडकीभाजी इति
चभाषा ॥ दद्रुघ्नपत्र दोषघ्नमम्लवात
कफापहम् । कण्डूकासकृमिश्वासद
द्रुकुष्ठप्रशान्तिषु ॥

दद्रुणा । त्रि । दद्रुरोगिणि ॥ दद्रुरस्याऽ
स्ति । पा०न । शाकीपलालीदद्र्वाह्र
स्वत्वञ्च ॥

दद्रुनाशिनी । स्त्री । तैलिनीकीटे ॥

दद्रुरोगी । त्रि । दद्रुणे ॥

दद्रूः । पुं । त्वग्रोगविशेषे । कुष्ठभेदे ॥
दरिद्रत्यनेनाङ्गम् । दरिद्रातेर्डुर्गौ
तो । दरिद्रातेर्यालोपश्चेत्यू' । रिश्च
स्याचेतिसमस्तोववींर्या ॥

दधान । त्रि । बिभ्राणे । धारयति ॥ दधाते कर्त्तरि शानच् ॥

दधि । न । क्षीरोत्तरावस्थापन्ने दधि इति प्रसिद्धे गोरसे । क्षीरजे । मङ्गल्ये । शिरजे । पयस्ये ॥ अस्य गुणाः । दह्युष्ण दीपन स्निग्ध कषायानुरस गुरु । पाके ऽम्लं ग्राहि पित्तास्रशोथमेद कफप्रदम् ॥ मूत्रकृच्छ्रे प्रतिश्याये शीतगे विषमज्वरे । अतीसारे ऽरुचौ कार्श्ये शस्यते बलशुक्रकृत् ॥ तद्भेदाः पञ्च सम्प्रोक्ता लक्षणैस्तान् वदाम्यहम् । आदौ मन्दं ततः स्वादु स्वाद्वम्लञ्च ततः परम् ॥ अम्लं चतुर्थं मत्यम्लं पञ्चमं दधि पञ्चधा । मन्दं दुग्धवदव्यक्तरसं किञ्चिद्घनं भवेत् ॥ मन्दन्तु स्रष्टविण्मूत्रं दोषत्रयविदाहकृत् । यत् सम्यग्घनतां यातं व्यक्तस्वादुरसं भवेत् ॥ अव्यक्ताम्लरसन्तु स्वादुविज्ञैः बदाहृतम् । स्वादुस्यादत्यभिष्यन्दि वृष्यं मेदकफावहम् ॥ वातघ्नं मधुरं पाके रक्तपित्तप्रसादनम् । स्वाद्वम्लं सान्द्र मधुरं कषायानुरसं भवेत् ॥ स्वाद्वम्लगुणा ज्ञेयाः सामान्यदधिवज्जनैः ॥ यत्तिरोहितमाधुर्यं व्यक्ताम्लञ्च तदम्लकम् । अम्लन्तु दीपनं पित्तरक्तश्लेष्मविवर्द्धनम् ॥ तदत्यम्लं दन्तहर्षकण्ठादिदाहकृत् । अत्यम्लं दीपनं रक्तपित्तदुष्टिकरं परम् ॥ * ॥ गव्यं दधि विशेषेण स्वादु बल्यं रुचिप्रदम् । पवित्रं दीपनं स्निग्धं पुष्टिकृत् पवनापहम् ॥ उक्तं दध्नामशेषाणां मध्ये गव्यं गुणाधिकम् ॥ * ॥ माहिषं दधि सुस्निग्धं श्लेष्मलं वातपित्तनुत् । स्वादुपाकमभिष्यन्दि वृष्यं गुर्वस्रदूषकम् ॥ * ॥ आजं दध्युत्तमं ग्राहि लघु दोषत्रयापहम् । शस्यते श्वासकासार्शःक्षयकार्श्येषु दीपनम् ॥ * ॥ पक्वदुग्धभवं हृद्यं दधि स्निग्धं गुणोत्तरम् । पित्तानिलापहं सर्वधात्वग्निबलवर्द्धनम् ॥ * ॥ अथ निःसारदुग्धस्य दध्नो ह्येते गुणाः स्मृताः । असारं दधि सङ्ग्राहि शीतलं वातलं लघु । विष्टम्भि दीपनं रुच्यं ग्रहणीरोगनाशनम् ॥ * ॥ गालितं दधि सुस्निग्धं वातघ्नं कफकृद्गुरु । बलपुष्टिकरं रुच्यं मधुरं नातिपित्तकृत् ॥ * ॥ सशर्करं दधि श्रेष्ठं तृष्णापित्तास्रदाहजित् । सगुडं वातनुद्धृष्यं बृंहणं तर्पणं गुरु ॥ * ॥ न नक्तं दधि भुञ्जीत न चाप्यघृतशर्करम् । नामुद्गसूपं नाक्षौद्रं नोष्णं नामलकैर्विना ॥ * ॥ शस्यते दधिनो रात्रौ शस्तञ्चाम्बुघृतान्वितम् ।

रक्तपित्तकफोत्थेषु विकारेषु तु तच्च न ॥ * ॥ हेमन्ते शिशिरे चापि वर्षासु दधिशस्यते । शरद्ग्रीष्मवसन्तेषु प्रायश स्तद्विगर्हितम् ॥ * ॥ ज्वरासृक् पित्तवीसर्पकुष्ठपाण्डामय भ्रमान् । प्राप्नुयात् कामलाञ्चोग्रां विधिं हित्वा दधिप्रिय ॥ श्रीवासे ॥ सर्जे ॥ वासे ॥ त्रि । धारके ॥ इति मुग्धबोधम् ॥

दधिकूर्च्चिका । स्त्री । दध्नासहपक्वदुग्धे ॥ दध्नासह पय पक्व यत् तत्स्याद् दधिकूर्चिके त्युक्ते ॥ अर्ह्मोदकोष्णा दुग्धे दध्यम्लसयोगात् जातेतिके चित् ॥ उष्णदुग्धे दध्यम्लसंयोगात् जाते त्यन्ये । छाना छेना इति राजाराधाकान्त ॥

दधिचार. । पु । मन्थामदण्डे । वैशाखे । तक्राटे । करधर्षणे । रयी इति भाषा ॥

दधिजम् । न । नवनीते ॥

दधित्थः । पु । कपित्थे ॥ दधिवर्णोऽस्य स्तिष्ठत्यस्मिन् । ष्ठा० । सुपिस्थ इति क. । पृषोदरादि. ॥

दधित्थाख्य. । पु । सरलद्रवे । लोवान् इति भाषा ॥ इति रत्नमाला ॥

दधिधेनु' । स्त्री । दानार्थं दध्यादिनिर्मितायां धेनौ ॥

दधिपुष्पिका । स्त्री । अपराजितायाम् ॥

दधिपुष्पी । स्त्री । कोलशिम्ब्याम् ॥

दधिपूप' । पु । अपूपप्रभेदे ॥ शालिपिष्ट युत दध्ना मर्दयित्वा घृते पचेत् । वेष्टयेत् पक्वखण्डेन सुदृत्त दधिपूपकम् ॥ दधिपूपो गुरुर्वृष्यो हृद्यो निलपित्तहा । रुच्योग्निजनन श्चैव विशेषाद्रक्तविकारक ॥

दधिफल । पु । कपित्थवृक्षे ॥ दधिफलेऽस्य ॥

दधिमण्ड । पु । मस्तुनि ॥

दधिमण्डोद । पु । दधिसमुद्रे ॥

दधिमुख । पु । रामायणप्रसिद्धे वानर विशेषे । सुग्रीवस्य श्वशुरे ॥

दधिशोण । पु । वानरे ॥

दधिसक्तव' । पु । करम्भे ॥ दधिसक्तुश ब्दो नित्यं बहुवचनान्त ॥ दध्नोप सिक्ता' सक्तवः । अन्नेनव्यञ्जनमिति समासः ॥

दधिसारम् । न । नवनीते ॥

दधिस्नेह । पु । दधिसरे । दध्युत्तरगे ॥

दधिस्वेद. । पु । घोले ॥

दधीच । पु । दधीचिमुनौ ॥ इतिशब्दभेदप्रकाश ॥

दधीचतीर्थम् । न । तीर्थविशेषे ॥

दधीचास्थि । न । वज्रे ॥ हीरके ॥

दधीचिः । पु । मुनिविशेषे ॥ अथर्वमुनेरौरसात् कर्दमकन्यायां शान्तिनाम्न्यां जाते ॥ वृत्रासुरवधाय देवैरस्यास्था वज्रं निर्मितम् ॥

दधीच्यस्थि । न । हीरके ॥ वज्रे ॥

दधृक् । त्रि । धृष्टे ॥ धृष्णोति । ञिधृषाप्रागल्भ्ये । अस्मात् ऋत्विगादिना क्विन् द्वित्वमन्तोदात्तत्वञ्च निपात्यते । कुत्वात् पूर्वजश्त्वेनड ग. क ॥

दघ्नः । पु । यमे ॥ इतिशब्दरत्नावली ॥

दध्यङ् । पु । आथर्वणे मुनिविशेषे ॥

दध्याकरः । पु । दधिसमुद्रे ॥

दध्याली । स्त्री । आवणायाम् ॥ सुदर्शनायाम् । सुदर्शनगुणच इतिगौड भाषा ॥

दध्युत्तरम् । न । कद्वरे । दधिस्नेहे ॥

दध्युत्तरगम् । न । दधिस्नेहे ॥

दध्युद । पु । दधिसमुद्रे ॥ दधिउदकं यस्य । उत्तरपदस्य चेत्युदकस्योदादेश ॥

दनु । पु । दनुवंशजत्वात कवन्धाख्ये असुरे ॥

दनुः । स्त्री । दानवमातरि । दक्षकन्यायाम् । कश्यपपत्न्याम् ॥

दनुजः । पुं । असुरे । दैत्ये ॥ दनौ दनोर्वा जात । सप्तम्यांजनेर्डः । प

श्याममजातौ ॥

दनुजदलिनी । स्त्री । दुर्गायाम् ॥

दनुजद्विट् । पु । देवे ॥

दनुसूनु । पु । असुरे ॥ दनो सूनु ॥

दन्त । पु । अद्रिकटके ॥ कुञ्जे ॥ सानुनि ॥ चर्वणसाधनास्थनि । दशने । रदने । रदे । द्विजे ॥ दाधिशतसङ्ख्यायाम् ॥ पञ्चमात्रप्रभेदे (ISS) ॥ दाम्यति । दमु० । अन्तर्भावितण्यर्थात् वाहुलकात्तन् । हसिमृग्रिण्वितिवा तन् ॥

दन्तक । पु । नागदन्ते । खूटी इति भाषा ॥ गिरे प्रदेशात् तिर्यग्वहिर्निर्गते पाषाणे ॥ दन्तेषु प्रसिते ॥ स्वाङ्गेभ्य प्रसिते इतिकन् ॥ दन्ते ॥ स्वार्थेकन् ॥

दन्तकर्षण । पु । जम्बीरे ॥

दन्तकाष्ठम् । न । विकङ्कततरुणे ॥ दन्तधावनार्थकाष्ठे ॥ यथा । दन्तकाष्ठस्य वक्ष्यामि समासेन प्रशस्तताम् । सर्वेकण्टकिन पुण्या. क्षीरिणश्चयशस्विन. ॥ ॥ तिक्तं कषायं कटुकं सुगन्धि कण्टकान्वितम् । क्षीरिणो वृक्षगुल्माद्या भक्षये द्दन्तधावनम् ॥ इतिमहाभारतम् । परिमाण माह विष्णु. । कनिष्ठाग्रसम स्थूलं सकूर्चं द्वादशाङ्गुलम् । प्रातर्भुक्त्वाच यतवाक् भक्षये

दन्तधावनम् ॥ विशेषमाह मरीचि । द्वादशाङ्गुलन्तु विप्राणां क्षत्रियाणांनवाङ्गुलम् । अष्टाङ्गुलञ्च वैश्यानां शूद्राणान्तु षडङ्गुलम् ॥ चतुरङ्गुलमानेन नारीणां विधिरुच्यते । अन्तरप्रभवानाञ्च षडङ्गुलमुदाहृतमिति ॥ अथास्य लक्षणम् । तत्प्रयोजनप्रदर्शनम् । वल्लीलतागुल्मतरुप्रभेदै स्तु दन्तकाष्ठानि सहस्रशोयै । फलानिवाच्यान्यथ तत् प्रसङ्गो मा भूदतो वच्म्यथकामिकानि ॥ १ ॥ परिभाषार्थमाह । अज्ञातपूर्वाणि न दन्तकाष्ठान्यशाखपर्णैस्स समन्वितानि । नयुग्मपर्वाणि न पाटितानि नचोर्द्धशुष्काणि विना त्वचा च ॥ २ ॥ प्रविभागेन फलानि ॥ वैकङ्कत श्रीफलकाश्मरीषु ब्राह्मीद्युतिः च श्मतरौ सुदारा । वृद्धिर्वटे र्के प्रचुरञ्चतेज पुन्नागधूके सगुणा प्रियत्वम् ॥ लक्ष्मी शिरीषेच तथाकरञ्जेप्लक्षे ऽर्थसिद्धि समभीप्सिता स्यात् । मान्यत्व माप्नोति जनस्य याम्या प्राधान्य मश्वत्थतरौ वदन्ति ॥ आरोग्य मायु र्वदरीवृहत्यो रैश्वर्यवृद्धिः खदिरे सबिल्वे । द्रव्याणिचेष्टान्यतिमुक्तकेषु प्राप्नोति तान्येव पुनःकदम्बे ॥ नीपे ऽर्थासिः करवीरेऽन्नाप्ति र्भाण्डीरे शादवमेवं प्रभूतम् । शत्याशत्रून् शेषपङ्क्त्यर्जुने च श्यामायाञ्च द्विषता मेव नाश ॥ साले ऽश्वकर्णेच वदन्तिगौरव स भद्रदारावपिचाटरूषके । वाञ्छ्यमायाति जनस्य सर्वत प्रियङ्गुमपामार्गसजम्बुदाडिमै ॥ * ॥ अथविधानम् ॥ उदङ्मुख प्राङ्मुखएववा ऽब्दं काम यथेष्ट हृदये निवेश्य । अद्यादनिन्द्यंच सुखोपविष्ट प्रक्षाल्यजह्याच्च शुचौ प्रदेशे ॥ ८ ॥ * ॥त्यक्तस्य लक्षणम् । अभिमुखपतित प्रशान्तदिकस्थ शुभमतिशोभन मूर्द्ध संस्थित यत् ॥ अशुभकर मतोन्यथा प्रदिष्ट स्थितपतितञ्च करोतिमिष्टमन्नम् ॥ इति ॥

दन्तकाष्ठकम् । न । आहुल्यवृक्षे ॥

दन्तच्छद । पुं । रदनच्छदे । उत्तराधरोष्ठमात्रे ॥ दन्ताञ्छादयत्यनेन । छदसवरणे । चु० । पुसीतिघ । छादेर्घेद्र्व्युपसर्गस्य इति ह्रस्व ॥

दन्तच्छदोपमा । स्त्री । बिम्ब्याम् ॥

दन्तधावन । पु । खदिरद्रुमे ॥ दन्तान् धावति । धावुगतिशुद्ध्यो । ल्युट् ॥ गुच्छकरञ्जे ॥ वकुले ॥ न । दन्तशुद्धौ ॥ तद्विधि । प्रातर्भुक्त्वाच मृद्वग्र कषायकटुतिक्तकम् । भक्षयेद् दन्तप

वनं दन्तमांसान्यबाधयन् ॥ * ॥ द
न्तानूर्द्ध्वमधोदृष्ट्वा प्रात सिञ्चेज्जलो
चने। तोयपूर्णमुख स्नेनदृष्टि राग्यु
प्रसीदति ॥*॥ अर्द्दिती कर्णशूलीच
दन्तरोगी नवज्वरी। शोषी कासी
च मूर्च्छार्त्तो दन्तकाष्ठ विवर्जयेत् ॥
* ॥ उपवासदिने विप्र पितृश्राद्धदि
ने तथा। नचतत् फलमाप्नोति
दन्तधावनकृन्नर ॥ प्रभातेमार्ज्ज
येद् दन्तान् वाससा रसनां तथा।
कुर्यात् द्वादशविप्रेन्द्र कवलानि ज
लैर्बुध ॥ उपवासे पितृश्राद्धे विधि
मानेन जैमिने। दन्तधावनकृन्मर्त्य.
सम्पूर्णं लभतेफलमिति॥ * ॥ स्मृ
त्याद् दक्षिणास्येन पश्चिमास्येनचा
मय.। पूर्वास्ये नोत्तरास्येन सम्यद्दो
दन्तधावनादिति विशेष ॥ अपिच
। मध्यमानामिकाभ्याञ्च वृद्धाङ्गुष्ठेन
चद्विज:। दन्तानांधावनं कुर्यात् तर्ज्ज
न्यानकदाचन ॥ निष्फक्रियाफलंप्र
भुस्वरया दन्तधावनम्। प्रभाते कु
रुते प्राज्ञ. सूर्योदयविवर्जिते। सू
र्योदयेद्विजश्रेष्ठय कुर्याद् दन्तधाव
नम्। निष्फक्रियाफल तस्य सर्वमेव
विनश्यति ॥ य'स्नानसमये कुर्यात्
जैमिने दन्तधावनम्। निराशा'पित
रोयान्ति तस्यदेवा:सुरर्षय:॥ दन्तस्य
धावनकुर्याद् योमध्याह्नापराह्णयो
। तस्यपुष्प न गृह्णन्ति देवता पि
तरोजलम् ॥ स्नानकाले पुष्करिण्यां
य कुर्याद्दन्तधावनम्। तावज्ज्ञेय
सचण्डालो यावद्गङ्गा न पश्यति॥
भगवत्युदिते सूर्येय कुर्याद् दन्तधा
वनम्। तद्दन्तकाष्ठीं पितराभुङ्क्त्वा
गच्छन्तिदु खिन ॥ इति पाद्मे क्रि
यायोगसार ॥

दन्तपत्रम्। न। कुण्डले ॥

दन्तपत्रकम्। न। कुन्दपुष्पे ॥

दन्तपर्य्याय। पु। पत्त्रमात्रप्रभेदे (155)॥

दन्तपुप्पुटक। पु। दन्तरोगविशेषे ॥
अस्यनिदान यथा। दन्तयो स्त्रिपु वा
यस्य श्वयथु र्जायते महान्। दन्तपु
प्पुटको नाम स व्याधि. कफरक्तज
इति ॥

दन्तपुष्पम्। न। कतकफले॥ कुन्दे॥

दन्तफलम्। न।कतके ॥ पु। कपि
त्थे॥

दन्तफला। स्त्री। पिप्पल्याम् ॥

दन्तभाग। पु। इभाग्रभागे। गजस्य
मुखत स्कन्धपर्यन्तेऽग्रभागे ॥ दन्त
स्यभाग। दन्तसम्बन्धीभागोवा। शा
कपार्थिवादि' ॥

दन्तमलकम्। न। पुष्प्रिमायाम्। दन्त
मलकेदे ॥

दन्तमूलम् । न । दन्तार्बुदाभिधेरोगे॥
दन्तमूलिका । स्त्री । दन्तीवृक्षे ॥
दन्तरोग । पु । रदनामये ॥
दन्तरोगी । त्रि । रदनामयविशिष्टे ॥
फलान्यम्लानि शीताम्बु रूक्षान्नं दन्तधावनम्। तथा तिकठिनभक्ष्यं दन्तरोगीविवर्ज्जयेत् ॥
दन्तवक्र । पु । भारतादिप्रसिद्धे नृपविशेषे ॥
दन्तवस्त्रम् । न । ओष्ठे ॥
दन्तवास । न । ओष्ठे । अधरौष्ठयो ॥
दन्तवीजक । पु । दाडिमे ॥
दन्तवेष्ट । पु । दन्तरोगविशेषे ॥ यथा । स्रवन्ति पूयरुधिरं चलादन्ता भवन्ति च । दन्तवेष्ट स विज्ञेयो दुष्टशोणितसम्भव ॥
दन्तशठ । पु । जम्बीरे ॥ कपित्थे॥ कर्म्मरङ्गके॥ नागरङ्गे॥ शठति । शठ कैतवेच । चात् हिंसासङ्क्लेशनयो । पचाद्यच् ॥अम्लरसे ॥ दन्तानांशठइवापकारित्वात् ॥
दन्तशठा । स्त्री । चाङ्गेर्याम् ॥ चुद्राम्लिकायाम् ॥ दन्तानां शठेवापकारित्वात् ॥
दन्तशर्क्करा । स्त्री । कफवायुशोषितदन्तगतमले ॥ यथा । मलो दन्तगतो यस्तु कफमारुतशोषितः । शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा ॥
दन्तशाणम् । न । निम्बुक्षुपे । मिस्सी इति भाषाप्रसिद्धे दन्तघर्षणचूर्णे ॥ इति त्रिकाण्डशेष' ॥
दन्तशिरा । स्त्री । मांस्याम् ॥
दन्तशूल । पु । रदनवेदनायाम् ॥ अस्यौषध यथा । त्रिफलानिम्बयष्ट्याह्व कटुकारग्वधै. शृतम् । पाययेन्मधुनामिश्र दन्तशूलोपशान्तये॥
दन्तशोफ । पु । दन्तार्बुदे ॥
दन्तहर्ष । पु । दन्तरोगविशेषे ॥ यथा। शीतरूक्षप्रवाताम्लस्पर्शाना मसहा द्विजा' । पित्तमारुतकोपेन दन्तहर्षः सनामत ॥
दन्तहर्षक । पुं । जम्बीरे॥ इतिजटाधरः॥
दन्तहर्षण. । पु । जम्बीरे ॥ इ०त्रि० ॥
दन्ताघात । पु । निम्बूके ॥ रतिक्रीडायां दशनाघाते ॥ तस्यस्थानानि यथा । स्तनयो र्गण्डयो श्चैव ओष्ठे चैव तथाधरे । दन्ताघात प्रकर्त्तव्य कामिनीनां सुखावह. ॥ इतिकामशास्त्रम् ॥
दन्तायुध । पु । शूकरे ॥ दन्तावायुधौ अस्य ॥
दन्तार्बुद. । पु । न । दन्तरोगप्रभेदे । दन्तशोफे । द्विजव्रणे ॥
दन्तालिका । स्त्री । वल्गायाम् । लगाम

इतिभाषा॥

दन्तावल । पु । हस्तिनि । गजे ॥ अति शयितौ दन्तावस्य । दन्तशिखात स चायामितिवलच् । वले इतिदीर्घः॥

दन्तिका । स्त्री । दन्त्योषधौ । मुकूल के ॥ दाम्यति दाम्यते वा । दमुउप शमे । हसिमृग्रिणवाऽमिदमीत्या दिना तन् । स्वार्थे कन् ॥

दन्तिजा । स्त्री । दन्तिकायाम् ॥

दन्ती । पु । दन्तावले ॥ अतिशयितौद न्तावस्य । इनि. ॥

दन्तिनी । स्त्री । दन्तीवृक्षे ॥

दन्तिमद' । पु । हस्तिमदे ॥

दन्तिमूलिका । स्त्री । दन्त्योषधौ ॥

दन्ती । स्त्री । उदुम्बरपर्ण्योमोषधौ । प्रत्यक्‌पर्णीम् ॥ दाम्यति दाम्यते वा । दमु० । तन् । गौ० ङीष् ॥ ल घुदीर्घ प्रभेदेन प्रोक्ता दन्तीद्वय वु धै । दन्तीद्वय सरं पाके रसेच क टु दीपनम् ॥ गुदाङ्कुराश्मशूला स्रकण्डुकुष्ठविदाहनुत् । तीक्ष्णो ष्णहन्ति पित्तास्रकफशोथोदरकृ मीन् ॥

दन्तीबीजम् । न । जयपाले ॥

दन्तुरः । त्रि । उन्नतरदे ॥ उन्नताद न्ता' सन्त्यस्य । दन्तउन्नत उरच् ॥ उ न्नतनते । विषमे ॥ कदाचिद्दन्तुरो मूर्खः कदाचिल्लोमश'सुखी । क दाचित् तुन्दिलोदु.खीकदाचिन्न- र्धनासतीति सामुद्रकम् ॥ स्त्री । दन्तुरा ॥

दन्तुरच्छद । पु । बीजपूरे ॥

दन्तोलूखलिकः । पु । } तापसे । वान प्रस्थविशेषे ॥
दन्तोलूखली । पु । }
योब्रीह्यादीन् दन्तै खण्डयित्वा भ क्षयति स. ॥

दन्त्य । त्रि । दन्तोद्भवेवर्णविशेषे ॥ द न्तेषुभव । शरीरावयवाच्चेति यत् ॥ दन्तहिते ॥ दन्तेभ्योहित । शरीरा वयवाद्यत् ॥

दन्दशूकः । पु । राक्षसे ॥ सरीसृपे । फणिनि ॥ गर्हितं दशति । लुपसदे ति यङ् । यजजपेत्यूक. । जपजभ दहेत्यभ्यासस्यनुक् ॥ नरकविशेषे॥

दन्द्रम्यमाण. । त्रि । अत्यर्थं कुटिला- मनेकरूपांगतिमिच्छति ॥

दभ्रम् । न । अल्पे ॥ दभ्यते । दम्भुद- म्भने । स्फायितञ्चीति रक् ॥ पु । समुद्रे ॥

दम् । अ । कथने । पत्न्याम् ॥

दम । पु । दमथे॥ वाह्येन्द्रियनैश्चल्ये । वाह्येन्द्रियाणां श्रवणादिभ्यतिरिक्त विषयेभ्यो निवर्त्तने। वहिरिन्द्रियाणा मुच्छृङ्खलव्यापारनिरोधे। वाह्येन्द्रि

यसंयमे ॥ निग्रहोबाह्यवृत्तीनां द
मइत्यभिधीयते ॥ ऋतुकालातिरि
रिक्तकालेमैथुनाद्यभावे ॥ उपशमे
। विकारहेतुविषयसन्निधानेपि म
नसोऽविक्रियत्वे ॥ कुत्सितात्कर्म
णो विप्र यच्चचित्तनिवारणम् । स
कीर्त्तितो दम प्राज्ञै समस्ततत्त्वद
र्शिभि ॥ दण्डे ॥ दण्डकार्ये ॥ क
र्द्दमे ॥ दमने ॥ दमनम् । दमु उप
शमे । भावे घञ् । नोदात्तोपदेश
तिवृद्ध्यभाव ॥

दमक । चि । शासके । दमनकर्त्तरि
॥ दाम्यति । दमु० । ण्वुल् । नोदा-
त्तोपदेशस्येति न वृद्धि ॥

दमघोष. । पु । चन्द्रवंशीयेक्षत्रियवि
शेषे । शिशुपालपितरि ॥

दमघोषसुत । पु । शिशुपाले ॥

दमथ । पु । दण्डे ॥ दमे । तप क्लेश
सहे ॥ दमनम् । दमु० । शमादि
भ्योऽथच् ॥ दाम्यति वा । बाहुल
कादथप्रत्यय ॥

दमथु. । पु । दण्डे ॥ दमे ॥

दमनम् । न । दण्डे ॥ यथा । अन्यु-
च्छ्रितस्य दमनमुचितञ्च श्रुतैाश्रुत
म् ॥ पु । दोना इतिप्रसिद्धे पुष्पे । पु
ष्पचामरे ॥ दमनस्तुवरस्तिक्तो ह
णो दष्य: सुगन्धिक । ग्रहणीविष

कुष्ठास्रक्लेदकण्डूत्रिदोषजित् ॥ वी
रे ॥ कुन्दवृक्षे ॥ दाम्यति । दमु०
। न० ल्यु ॥

दमनक । पु । दमने । गन्धोत्कटे ।
दोना इतिप्रसिद्धे पुष्पवृक्षे ॥ दमन
एव । स्वा०क. ॥ न । वर्णवृत्तान्तरे
॥ यथा । द्विगुणनगण मिह वितनु
हि । दमनकमिति गदतिशुचिह्नि ॥
यथा । सरभसमिहदृशमुपनय । सु
मुखिमदनजमयनयेति ॥ त्रिष्टुप्
छन्दोभेदेपि ॥ यथा । द्विजवरगणयु
ग ममल तदनु च कलयकरतलम्
। फणिपतिवरपरिगदित दमनक
मिदमतिललितम् ॥ यथा । प्रणम
त मधुरिपुचरणं भवजलनिधिपरि
तरणम् । अभिनवकिसलयरुचिर
सुरपतिसकलभयहरम ॥

दमनी । स्त्री । अग्निदमनीवृक्षे ॥

दमयन्ती । स्त्री । नलनृपतेर्भार्याया
म् । विदर्भदेशीयभीमराजकन्याया
म् । भैम्याम् ॥ दमयन्तीनलाभ्याञ्च
नमस्कार करोम्यहम् । अविवादो
भवत्त्वत्र कश्चिद्दोषप्रणाशकृद् ॥ भ
द्रमल्लिकायाम् ॥

दमित । त्रि । दान्ते ॥ कृतदमने वृषा
दैा । भारादिसहे ॥ दम्यतेस्म । द
मु० । क्त । वादान्तेत्यादिना पक्षे

साधुः ॥

दमी । चि । दमविशिष्टे ॥

दमुना४ । पु । चित्रभानौ । अग्नौ ॥ दाम्यति । दमु० । अन्तर्भावितण्यर्थोदमेरुनसि । दमुनसौ दमुनस इत्यादि ॥ शुक्राचार्ये ॥

दमूना३ । पु । त्रिभावसौ । वह्नौ । पावके ॥ दाम्यति । दमु० दमेरुनसि । अन्येषामपिदृश्यतइति पचेदीर्घः । जुष्टोदमुनाः । दमूनसगृहपतिवरेण्यम् । दशपादान्तु द्रूपएवदीर्घ. पठ्यते । तन्मते ह्रस्वोवाहुलकाद्बोध्य ॥

दम्पती । पु । सहोक्त्या जायापत्योः । जम्पत्यो ॥ जायाचपतिश्च । राजदन्तादिगणेपाठाज्जायाया दम्भावो वा निपात्यते । यत्रानुकूल्य दम्पत्यो स्त्रिवर्ग स्तत्र वर्द्धते ॥

दम्भ । पु । कैतवे ॥ धर्मध्वजित्वे । धार्मिकतयात्मन ख्यापने । अधार्मिकत्वेपि धार्मिकत्वख्यापने । कपटेन धार्मिकत्वादिना स्वोत्कर्षख्यापनेच्छायाम् ॥ लोकवञ्चनाय विहितकर्मानुष्ठाने ॥ दभ्यतेऽनेन । दम्भु दम्भने । घञ् ॥

दम्भनम् । न । दम्भे ॥

दम्भित्वम् । न । लाभपूजाख्यात्यर्थंस्व

धर्मप्रकटीकरणे ॥

दम्भोलिः । पु । वज्रे ॥ दम्भु रोधने । असुन् । दम्भसि रोधने अलि.समर्थ. । अलभूषणपर्याप्तिवारणेषु । इन् दम्भोति खेदयति । दम्भु० । औणादिकओलिर्वा ॥

दम्य । पु । प्राप्तदमावस्थेवत्से । वत्सतरे ॥ अनडुहि ॥ चि । दमनीये । शास्ये ॥ दमनार्हे । दमुशमने । अर्हेकृत्यतृचश्चेत्यर्थे पोरदुपधादिति यत् ॥

दय । पुं । करुणायाम् । दयायाम् ॥ इति शब्दरत्नावली ॥

दयमान । त्रि । दयाकर्त्तरि ॥ दयते । दय० । लट शानच् मुक् ॥

दया । स्त्री । कृपायाम् । दुःखितेषु भूतेष्वनुकम्पायाम् । परदुःखासहने ॥ लक्षणयथा । यत्नादपिपरक्लेश हर्त्तुं या हृदिजायते । इच्छा भूमिसुरश्रेष्ठ सा दया परिकीर्त्तितेति ॥ आत्मवत् सर्वभूतेषु यो हिताय शुभायच । वर्त्तते सततं हृष्ट क्रियाह्येषादयास्मृता ॥ प्राणा यथात्मनोभीष्टा भूतानामपि ते तथा । आत्मौपम्येन सर्वत्र दया कुर्वन्ति साधवः ॥ धर्मस्य पत्नी । यथा । मोहपत्नी दया सा स्त्री पूजिताच जगत्प्रिया । सर्वलो

काम्यसर्वेच निष्फलाभ्यथयाबिना ॥ यन्नमो होस्तितन्नदयाया सत्त्वाद्दया मोक्षपत्नीति देवीभागवते ९ स्कन्धे १ ऽध्याय ॥ अहिंसापरमोधर्मो वि प्राणानामसशय । दया सर्वेष कर्त्त व्या ब्राह्मणेन विजानता ॥ यस्माद न्यत्र विप्रेन्द्र न हिंसायाज्ञिकीमते ति देवीभागवतम् ॥ यस्मादन्यत्र द याकर्त्तव्या यन्नेतु हिंसैवकर्त्तव्या न सा याज्ञिकी हिंसा हिंसाभवति । अहिंसन् सर्वभूतान्यन्यच तीर्थेभ्य इति श्रुते ॥ या वेदविहिता हिंसानि यतास्मिंस्सराचरे। अहिंसा मेव तां विद्याद्वेदाद् धर्मोहि निर्वभाविति मनुस्मृतेश्च॥ इयंवाप्यविधानेन च्छे दयेन्नकदाचने तिकुलार्णवोक्तेश्च॥ रसान्तरे॥ दयते रचच्यनया। दय दानगतिहिंसारक्षणेषु । भिदाद्य ङ्॥ टाप्॥

दयाकूर्च्च । पु । बुद्धे ॥ इति हेमचन्द्र ॥

दयालु । त्रि । स्नूरते । कारुणिके । दयायुक्ते । परदुःखप्रहाणपरे ॥ अ हो बकीय स्तनकालकूट जिघांसया ऽपायि यदप्यसाध्वी। लेभेगति धात्यु चितां ततोऽन्यकंवा दयालु शरणं ब्र जेम ॥ दयते । दय० । स्पृहिगृही त्यालुच् ॥ दयालोरसमर्थस्यदु खा

वैवदयालुता ॥

दयालुक । त्रि । सदये ॥

दयावान् । त्रि । परदुःखहरणेच्छौ ॥

दयित । पु । पत्यौ ॥ त्रि । प्रिये ॥ दय्यतेस्म । दय० । क्त ॥

दयिता । स्त्री । भर्यायाम् ॥ प्रियायाम् ॥ रामस्य दयिता भार्यानित्यं प्राण समाहिता ॥ टाप् ॥

दर । अ । मनागर्थे । ईषदर्थे॥ यथा। दरदलितनीलोत्पलदचेति ॥

दर । पु । न । साध्वसे । भये । डर इति भाषा ॥ गर्त्ते । गढा इतिभाषा ॥ शङ्खे ॥ यथा । स उच्चकाशे धव लोदरो दरो ध्युरुक्रमस्याधरशोण शोणिमेति ॥ दीर्यन्त्यस्मात् । दृ भ ये । ऋदोरप् ॥ दरणम् दीर्यतेवा । दृभये । दृविदारणे वा । अप् । श्र दृदृरित्यप् वा ॥

दरक. । त्रि । भीरौ । दरपोक इति भाषा ॥ दृ० । कृञादिभ्यो वुन् ॥

दरकण्टिका । स्त्री । शतावर्य्याम् ॥

दरणि । पु । कूलभङ्गे । कूलखण्डे ॥

दरत्-द। स्त्री। प्रपाते ॥ भये ॥ पर्वते ॥ म्लेच्छजातौ ॥ हृदये ॥ कूले । तीरे ॥ दरणम् दीर्यते वा । दृ० । शृदृभसोऽदि ॥

दरद । पु । देशविशेषे ॥ भये ॥ म्ले

च्छजातिविशेषे । दरददेशोद्भवे आदौ क्षत्रिये पुनर्विच्छिन्नक्रियालोपादिना शूद्रतामापन्ने दस्युपदवाच्ये ॥ त्रि । भयप्रदे ॥ पु । न । हिङ्गुले ॥ दरद स्त्रिविध प्रोक्तश्चर्मार शुकतुण्डक । हंसपादस्तृतीय स्याद्गुणवानुत्तरोत्तर ॥ चर्मार शुक्लवर्णः स्यात् सपीत शुकतुण्डक । जपाकुसुमसङ्काशो हंसपादो महोत्तम.॥ तिक्तं कषायं कटु हिङ्गुलं स्यान्नेत्रामयघ्नं कफपित्तहारि । हृल्लासकुष्ठज्वरकामलाश्च प्लीहामवातौ च गरं निहन्ति ॥ अङ्घ्रिपातनयुक्त्यातु उमर्कयन्त्रपाचितम् । हिङ्गुलं तस्य सूतन्तु शुद्धमेव नशोधयेत् ॥

दरवर । पुं । भगवत. श्रीकृष्णस्यमुखे ॥ दरेषुवर ॥

दरि । स्त्री । दर्य्याम् ॥

दरित: । त्रि । भीते । डरा इति भाषा ॥ दर:सञ्जातोस्य । ता० इतच् ॥

दरिद्र: । दीने । निस्वे । निर्धने ॥ अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च । अदत्वा हेम धेनूश्च दरिद्रो जायते नर. ॥ दरिद्राति । दरिद्रा दुर्गतौ । पचाद्यच् ॥ दरिद्रोयस्त्वसन्तुष्ट कृपणोयो ऽजितेन्द्रिय ॥

दरिद्रित. । त्रि । दुर्गते । दारिद्र्ययुक्ते ॥ दरिद्राते.कर्त्तरिक्त. ॥

दरी । स्त्री । कन्दरायाम् । कृषिमगर्त्ताकारे गिरिविवरे ॥ दृणाति । दृ विदारणे । पचादौ दरडिति पाठात् टिड्ढेतिङीप् ॥

दर्दर । पु । पर्वते ॥ त्रि । ईषद्भग्नभाजने ॥

दर्दराम्र । पु । मीनाम्रौषे । साम्रमीनव्यञ्जने ॥ इति शब्दमाला ॥

दर्दरीकम् । न । वाद्यप्रभेदे ॥ दीर्यते । दृ०। पर्फरीकादयश्चेतीकन् धातोर्द्वित्वमभ्यासस्यरुक्च ॥

दर्दुर. । पु । तोयदे ॥ भेके ॥ वाद्यभाण्डविशेषे ॥ अद्रिविशेषे ॥ रुत्पान्नविशेषे ॥ न । ग्रामजाले ॥ द्र०मे०॥ दृणातिशब्दे करणे । दृ०।मकुरदर्दुराविति निपातित ॥

दर्दुरा । स्त्री । चण्डिकायाम् । उमायाम् ॥ दृणात्यसुरान् । दृ०। मकुरदर्दुराविप्युरच्धातोर्द्वित्वमभ्यासस्य रुक् टिलोपश्च । टाप् ॥

दर्दू । स्त्री । कुष्ठप्रभेदे । दद्रुरोगे ॥ दरिद्रयते ऽनयाऽङ्गम् । दरिद्रा० । दरिद्रा तेर्यलोपश्चेत्यूः । रश्चदूश्च आश्च यः । तेषांलोपः । अन्यथाचे ऽन्त्यसदेशस्येति द्वितीयरेफलोप. ॥

दर्दू. । पु । दद्रुरोगे ॥ दरिद्रयते । दरि

द्रा० । मृगव्याद्यश्चेति कु ॥

दद्रुघ्न । पु । चक्रमर्द्दे ॥ दद्रुं हन्ति । ह न० । हन्ते रमनुष्येतिटक् ॥

दद्रुणा । त्रि । दद्रुरोगिणि ॥ दद्रूरस्यास्ति । शाकीपलालीदद्रूणाह्रस्वत्वञ्चेति पामादिषु पाठान्न ॥

दद्रुरोगी । त्रि । दद्रुणे ॥ दद्रूश्चासौ रोगश्च । इकोह्रस्वोऽङ्यो इतिह्रस्व । दद्रुरोगोऽस्यास्ति । द्वन्द्वोपतापे तीनि ॥

दद्रू. । पु । दद्रौ ॥ दरिद्राति । दरिद्रा० । दरिद्रातेर्यालोपश्चेति दुकाराका रलोप ऊप्रत्ययश्च ॥

दद्रूणा । त्रि । दद्रुणे ॥

दद्रूरोगी । त्रि । दद्रूरोगिणि ॥

दर्प्प । पु । कस्तूर्याम् । मृगमदे ॥ अहङ्कृतौ । गर्व्वे ॥ परावधीरणाह्वयो गुरून्टपाद्यतिक्रमकारणश्चित्तदोषविशेषो दर्प्पः ॥ अहङ्कारश्च सर्व्वेषां पापबीजममङ्गलम् । ब्रह्माण्डेषु चसर्व्वेषां दर्पपर्य्यन्तमुन्नति ॥ धर्म्मातिक्रमकारणे । हर्षजन्यमदे ॥ हृष्टोदृप्यति दृप्तो धर्म्ममतिक्रामति ॥ धर्म्मध्वजित्वेन दम्भ एवदर्प्पः । दर्प्पति । दृपउत्क्लेशे । पचाद्यच् ॥

दर्प्पक । पु । कामदेवे । पञ्चशरे ॥ दर्पयति । दृपहर्षमोहनयोः । ण्वुल् ॥ त्रि । अहङ्कारकारके ॥

दर्प्पण । पु । मुकुरे । आदर्शे । रूपदर्शनाधारे ॥ दर्पयति । दृपण्यन्त । दृपसन्दीपने । चु०वा । न०ल्यु ॥ न । अक्षिण ॥ पर्व्वतविशेषे ॥ नदीविशेषे ॥ यथा । तत पूर्व्वं महाराज दर्प्पणो नामपर्व्वत । कुबेरो यत्रवसति धनपालैः समसदेति ॥ यस्मिन्नास्ते मध्यभागेरोहिणी रोहिता कृति । यस्मि ल्लोहादिक स्पृष्ट स्वर्णता याति तत्क्षणात् ॥ तस्मात्दूर स्रवतिदर्पणोनामवैनद । हिमाद्रिप्रभवो नित्य लौहित्यसदृश फले ॥ समुत्पन्नहिलौहित्य सर्व्वैर्देवगणैर्हरि । सर्व्वतीर्थोदकै सम्यक्स्नापयामासत सुतम् ॥ तस्यस्नानसमुद्भूत पापदर्पस्यपाटन । तेनाय दर्पणो नामपुरा देवगणै कृत ॥ तस्मिन् स्नात्वा नदवरेयोऽर्चयेद्दर्पणाचले । कुबेर प्रतिपत्तिथ्याकार्त्तिके शुक्लपक्षत ॥ सयाति ब्रह्मसदनमिहभूतिशतैर्युतइतिकालिकापुराणे ८१ अध्याय ॥

दर्प्पारम्भ । पु । अहङ्कारारम्भे । मटस्फटौ ॥ इतिजटाधर ॥

दर्भ । पु । कुशे ॥ काशादिषट्सु ॥ यथा । काशा कुशा वल्वजाश्च तथाऽन्ये तीक्ष्णरोमशाः । मौञ्जाश्च शाद्व

शास्त्रैव षड्दर्भाः परिकीर्त्तिताः ॥ दृभ्यते । दृभीग्रन्थे । घञ् ॥ यद्वा । दृणाति । दृ० । दृदलिभ्यांभ. ॥

दर्भट. । पु । न । निभृतगृहे ॥ इति त्रिकाण्डशेष ॥

दर्भपत्र. । पु । काशे ॥ इतिराजनि० ॥

दर्भमूली । स्त्री । ओषधीभेदे ॥ पाककर्णेतिङीष् ॥

दर्भाह्वय. । पु । मुञ्जे ॥ इति राज०॥

दर्व' । पु । राक्षसे ॥ दृणाति सर्वान् । दृ० । श्रृगृशृदृभ्योव' ॥ ॥

दर्वट । पु । दण्डवादिनि ॥

दर्वि । स्त्री । खजाकायाम् । दर्व्याम् ॥ दृणाति । दृ० । दृदृभ्यांविन् ॥ उक्षमुकदर्विहोमिन इतिविवर्णा ॥

दर्विक. । पु । दर्व्याम् । व्यञ्जनादिदारके । कौँचा इतिभाषा ॥

दर्विका । स्त्री । दर्व्याम् । खजाकायाम् ॥ गोजिह्वायाम् । दार्विकायाम् ॥

दर्विहोम । पुं । अप्रकृतिविकृतिहोमे ॥ येनकस्यचित् प्रकृतित्वेन विकृतित्वेन वा वर्त्तते स दर्विहोम इतिव्याख्यातार ॥

दर्वी । स्त्री । कथ्याम् । खजाकायाम् । कर्छी इतिभाषा ॥ दृणाति । दृ० । वृदृभ्यांविन् । कृदिकारादक्तिनइति ङीष् ॥

दर्वीकर. । पु । उरगे । दीर्घपृष्ठे । सर्पे ॥ रथाङ्गलाङ्गलच्छत्रस्वस्तिकाङ्कुशधारिण. । ज्ञेया दर्वीकरा सर्पा. फणिन. शीघ्रगामिनः ॥ दर्व्याकार फणएवकरो यस्य प्रहारसाधनत्वात् । दर्वीं फणां करोति । कृञोहेत्विति ट. ॥

दर्वीसङ्क्रमणम् । न । तीर्थविशेषे ॥

दर्श । पु । अमावस्यायाम् । सूर्येन्दुसङ्गमे ॥ अवलोकने । दर्शने ॥ अमावास्यायागे ॥ दर्शे अमावास्यायां क्रियमाणत्वात् उपचारादर्शशब्देनोच्यते । सयागत्रयात्मक । यथा । आग्नेयाष्टाकपालैन्द्रदध्यैन्द्रपयोयागा- स्त्रयो ऽमावास्यायां सत्रयावज्जीव कर्त्तव्य. कौण्डपायिकर्त्तव्यो मासमाध्यश्चेति ॥ दृश्यते शास्त्रेण । पुंसिसज्ञायांघ ॥

दर्शक. । त्रि । द्वारपाले । प्रतीहारे ॥ दर्शयितरि ॥ प्रवीणे । निपुणे ॥ पश्यति । दृशिर्० । ण्वुल् ॥

दर्शत. । पु । सोमे ॥ सूर्ये ॥ पश्यति । दृशिर्० । भृमृदृशियजीत्यादिना ऽतच् ॥

दर्शनम् । न । नयने ॥ स्वप्ने ॥ बुद्धौ ॥ ॥ धर्मे ॥ उपलब्धौ ॥ शास्त्रे ॥ दर्पणे ॥ ईक्षणे ॥ षट्दर्शनेषु । वैशेषिकन्या

यमीमांसासांख्यपातञ्जलवेदान्तरूपेषु ॥ एतानि तत्त्वज्ञानार्थं वेदान्विचार्य कणादगोतमजैमिनिकपिलपतञ्जलिवेदव्यासाख्यैर्मुनिषट्कैः कृतानि ॥ अथागमकुलार्णवेऽपि सदाशिव । षड्दर्शनानि मेऽङ्गानि पादौ कुक्षि करौ शिर । तेषु भेदन्तु य कुर्यान्मदङ्गच्छेदकोहि स ॥ एतान्येव कुलस्यापि षडङ्गानि भवन्तिहि । तस्मान्मदात्मकं कौलमहं कौलात्मकप्रिये इति ॥ देव्याः पूजायामुक्तानि षड्दर्शनानि यथा । शैवशाक्तवैष्णवगाणेशवैष्णवनास्तिकमतप्रतिपादकानि षड्दर्शनानीति ॥ इज्यायाम् ॥ वर्णे ॥ अनुसन्धाने ॥ ज्ञानैकस्वरूपे ॥ रूपे ॥ दृश्यतेऽनेन अस्मिन् वा । दृशिर्० । करणे अधिकरणे वा ल्युट् ॥

दर्शनीय । त्रि । मनोज्ञे ॥ दर्शनयोग्ये ॥

दर्शयामिनी । स्त्री । तमिस्रायाम् ॥

दर्शयिता । पु । द्वारपाले । प्रतीहारे ॥ त्रि । दर्शके ॥

दर्शविपत् द् । पु । चन्द्रे ॥ इतिहारावली ॥

दर्शित । त्रि । आविष्कृते । प्रकाशिते । दर्शनङ्कारिते ॥

दलम् । न । उत्सेधे ॥ खण्डे ॥ शस्त्रीछदे ॥ अपद्रव्ये ॥ पत्रे । पर्णे ॥ तमालपत्रे ॥ पत्रे ॥ अर्द्धे ॥ पु । खण्डने ॥ उत्सेधवद्वस्तुनि ॥ दलति । दलवि दारणे । पचाद्यच् ॥

दलकोष । पु । माघ्ये । कुन्दपुष्पवृक्षे ॥

दलत् । त्रि । विकसिते ॥

दलनिर्मोक । पु । भूर्जपत्रवृक्षे ॥

दलनी । स्त्री । लोष्टे । ढीम इतिढेल इतिच भाषाप्रसिद्धे ॥ त्रि । भेदकर्त्तरि ॥

दलप । पु । स्वर्णे ॥ शास्त्रे ॥ प्रहरणे ॥ दलति दल्यते ऽनेनवा । दल० । उपिकुटिदलिकचिखजिभ्य कपन् ॥

दलपति । पु । दलाध्यक्षे ॥

दलपुष्पा । स्त्री । केतक्याम् ॥

दलसारिणी । स्त्री । केमुके ॥

दलसूचि । पु । कण्टके ॥

दलसा । स्त्री । पत्रशिरायाम् । माक्याम् ॥

दलाढक । पु । अरण्यतिले । स्वयजाततिले ॥ पृश्निग्राम् ॥ गैरिके ॥ फेने ॥ स्नातके ॥ नागकेशरे ॥ मरुत्तरे ॥ कुन्दे ॥ करिकर्णे ॥ शिरीषे ॥ वात्यायाम् ॥

दलाढ्य । पु । पङ्ककर्वटे । रूंवणइति दल् दल् इतिच भाषा ॥ इति त्रिकाण्डशेष ॥

दलामलम् । न । मरुवकवृक्षे ॥ दम

नवृच्चे ॥ मदनवृक्षे ॥

दवाग्नम् । न । चुल्ले ॥

दलि । पु । स्त्री । लोष्टे । ढीम् इति ढेल इति च भाषा ॥ स्त्री । दलितेश मीधान्ये । दालिइति दालिइतिच भाषा ॥

दलिकम् । न । काष्ठे । दली इति पर्वतीयभाषा ॥ इतिहेमचन्द्र. ॥

दलितः । त्रि । प्रफुल्ले ॥ खण्डिते ॥ यथा । दलितकुचभराङ्कमङ्कपालिं रचय ममाङ्कमुपेत्य पीवरोरु इति॥

दलेगन्धि । पु । सप्तपर्णवृक्षे ॥

दल्भ. । पु । ऋषिविशेषे ॥ चक्रे ॥ प्रतारणायाम् ॥ पापे ॥ दलति । दल० । इदलिभ्यांभ ॥

दल्मि । पु । इन्द्रे ॥ वज्रे ॥ दलति । दल० । बाहुलकान्मि' ॥

दल्मिमान् । पु । इन्द्रे ॥ दल्मिरस्यास्य । मतुप् । यवादित्वान्नवत्वम् ॥

दव. । पु । वनानले ॥ वने ॥ उपतापे ॥ दवति । दुगतौ । पचाद्यच ॥

दवथु । पु । परितापे ॥ नेत्रादिदाहे ॥ दवन दूयते ऽनेनवा । टुदुउपतापे । द्वितो ऽथुच् ॥

दवाग्नि' । पु । दावानले ॥

दविष्ठ. । त्रि । अतिदूरे । सुदूरे ॥ इद मेषा मतिशयेन दूरम् । इष्ठन् । स्थूलदूरेतिसाधु. ॥

दवीयान् । त्रि । दविष्ठे ॥ इदमनयोरतिशयेनदूरम् । ईयसुन् । स्थूलदूरयुवह्रस्वेत्यादिना साधु ॥

दशा. । पुभूम्नि । वस्त्रान्ते । वसनाञ्चले ॥ दशानाभौ प्रयोजयेदितिस्मृति ॥ अधोंशुकस्येत्यर्थ. ॥ दश्यते । दश० । भि० अङ् ॥

दशक । पु । दशति ॥ दशपरिमाणमस्य । सङ्ख्याया इतिकन् ॥

दशकण्ठः । पु । रावणे ॥ दश कण्ठा यस्य स ॥

दशकण्ठजित् । पु । श्रीरामचन्द्रे ॥ दशकण्ठ जयति । जि० । क्विप् तुक् ॥

दशकन्धर । पु । रावणे ॥ दश कन्धरा. ग्रीवा अस्य ॥

दशग्रीव । पु । रावणे ॥ दश ग्रीवा यस्य स ॥ गरुडपुराणे सप्तार्णीत्यध्यायोक्ते एकादशमन्वन्तरीयदृषनाम केन्द्रशत्रुविशेषे ॥

दशत् । पु । दशके । वर्गे ॥ दशपरिमाणमस्य । पञ्चद्दशतौ वर्गेवेति निपातनादति प्रत्यय ॥

दशति । स्त्री । शते ॥ इतिमहाभारते दानधर्मे ॥

दशधा । अ । दशप्रकारे ॥ सङ्ख्याया विधार्थेधा ॥

दश । चि । सङ्ख्याविशेषे । द्विगुणित पञ्चसु ॥ तत्सङ्ख्या विशिष्टे ॥ दशन्ति दश्यन्ते वा । दश दशने । बाहुलकात् कनिन् ॥

दशन । पु । शिखरे ॥ दन्ते ॥ न । कवचे ॥ दंष्ट्राव्यापारे ॥ दश्यते ऽनेन । दश॰ । करणेति ल्युट् । दंशदशेतिनिर्देशात् क्वचिदकिन्त्यपिनलोप' ॥ यद्वा । कर्त्तरि ल्युट् ॥

दशनवासः । न । ओष्ठे । उत्तराधरोष्ठमात्रे ॥ दशनाना वाससीइव आवरकत्वात् ॥

दशनाङ्क । पु । दन्तक्षते ॥

दशनाख्या । स्त्री । चुञ्चिकायाम् । व्याङ्गेशम् ॥

दशनोच्छिष्ट । पु । निश्वासे ॥ अधरे ॥ चुम्बने ॥ चि । दन्तक्षते ॥

दशपारमिताध्वर. । पु । बुद्धे ॥

दशपुरम् । न । कुटन्नटे । कैवर्त्तीमुस्तके ॥ मालवदेशैकखण्डे ॥ पुरविशेषे ॥ दशपिपर्त्ति । पृपालनपूरणयो. । मू॰क । उत्तम् ॥ दशपुरोऽस्यवा । ऋक्पूरित्य समासान्त ॥

दशपूरम् । न । वानेये । कैवर्त्तीमुस्तके ॥ दशपूरयति । पूरपूर्त्तौ । कर्मण्यण् ॥

दशबल. । पुं । बुद्धमुनौ ॥ दशबलान्यस्य । यदाहु । दानशीलक्षमावीर्य्यध्यानप्रज्ञाबलानिच । उपाय प्रणिधिर्ज्ञान दश बुद्धबलानि वै ॥

दशभुजा । स्त्री । दुर्गायाम ॥ यथा । इतिदत्तं पुराकल्पे मनो' स्वायम्भुवेन्तरे । प्रादुर्भूता दशभुजादेवी देवहितायवै ॥ इतिकालिकापुराणम् ॥

दशभूमिग । पु । बुद्धे ॥

दशभूमीश । पु । बुद्धे ॥

दशम । चि । दशानाम् पूरणे । दसवाँ इतिभाषा ॥ तस्यपूरणेडट् । नान्तादसङ्ख्यादेर्मट् ॥

दशमी । चि । वर्षीयसि । अतिवृद्धे ॥ नवतेरूर्द्ध्वं दशमी ऽवस्थाविशेषो ऽस्यास्ति । वयसि पूरणादितीनि ॥

दशमी । स्त्री । नवत्यधिकावस्थायाम ॥ शताब्दाना दशधाविभागे कृते दशम्यवस्था नवत्यधिका भवति ॥ तिथिविशेषे ॥ साचन्द्रस्य दशमकलाक्रियारूपा तदुपलक्षितकालपरावा ॥ तत्रजातस्य फलम् । यथा । विद्याविनोदी धनपुत्रयुक्त प्रलम्बकण्ठो मदनाधिकश्री । उदारचित्त सुमना दयालु प्रसूतिकाले दशमी यदि स्यादिति ॥ ङीप् ॥

दशमीस्थ । चि । नष्टवीर्य्ये । क्षीणरागे ॥ स्मृताशने ॥ नवत्यधिकवयसि

। स्थविरे ॥ स्मृतिहीने ॥ कामव
शान्मरणावस्थां प्राप्ते कामिनि ॥ न
यनप्रीति प्रथम चित्तासङ्ग स्ततोऽ
थसङ्कल्प । निद्राछेद स्तनुता विष
यनिवृत्ति स्त्रपानाश । उन्मादो
मूर्छामृतिरित्येता स्मरदशादशैव
स्यु ॥ दशम्यां कामावस्थायां तिष्ठति
। ष्ठा॰ । सुपिस्थ इति क ॥

दशमुख । पु । रावणे ॥ दशमुखान्यस्य ॥
लिङ्गात्मनि ॥ दश इन्द्रियाणि मुखा
नि भोगद्वाराणि यस्य स ॥

दशमुखान्तक । पु । रामे ॥ दशमुख
स्यान्तक ॥

दशमूत्रकम् । न । हस्तिमहिषोष्ट्रगवाऽ
जमेषाश्वगर्दभमानुषमानुषीणांमू-
त्रे ॥ इति राजनिर्घण्ट' ॥ दशानामू
त्राणां समाहार ॥

दशमूलम् । न । पाचनविशेषे । पञ्चमू
लद्वये ॥ यथा । विल्वश्योनाकगम्भा
रीपाटलागणिकारिका । शालप
र्णी पृश्निपर्णी वृहतीद्वयगोक्षुरम् ॥
उभाभ्यां पञ्चमूलाभ्यां दशमूलमुदा
हृतम् ॥ दशमूल त्रिदोषघ्न श्वास
कासशिरोरुज । तन्द्राशोथज्वराना
हपार्श्वपीडारुचीर्हरेत् ॥ वातपित्त
हर वृष्यं कनीय पञ्चमूलकम् ॥ उ
भय दशमूलन्तु सन्निपातज्वरापहम् ।
कासे श्वासे चतन्द्रायां पार्श्वशूले च श
स्यते ॥ पिप्पलीचूर्णसयुक्त कण्ठहृ
द्ग्रहनाशनमिति ॥

दशयोगभङ्ग । पु । सस्कारकर्मणि न
क्षत्रवेधविशेषे । खर्जूरवेधे ॥

दशरथ । पु । रामताते ॥

दशरथप्रभव । पु । रामे ॥ रामादि
षु ॥ दशरथ प्रभवो यस्य येषां वा ॥

दशरूपभृत् । पु । विष्णौ ॥

दशवदन । पु । रावणे ॥ दशवदनानि
यस्य स ॥

दशवाजी । पु । चन्द्रे ॥ दश वाजिनो
रथे यस्य स ॥

दशशतलोचन. । पु । इन्द्रे ॥ दशशता
नि सङ्ख्यायेषु तानि लोचनानि
यस्य ॥

दशहरा । स्त्री । गङ्गाजन्मदिने ॥ यथा
। ज्येष्ठमासि क्षितिसुतदिने शुक्लप
क्षे दशम्यां हस्ते शैलान्निरगमदियं
जाह्नवी मर्त्यलोकम् । पापान्यस्यां
हरति च तिथौ सा दशेत्याहुरार्या.
पुण्यदद्यादपि शतगुण वाजिमेधायुत
स्येति शङ्ख ॥ अपि च । अदत्ता
नामुपादान हिंसा चैवाविधानत. ।
परदारोपसेवा च कायिक त्रिविध-
स्मृतम् ॥ पारुष्यमनृत चैव पैशुन्य
ञ्चापि सर्वश' । असम्बद्ध प्रलापश्च वा

ड्भय स्याच्चतुर्विधम् ॥ परद्रव्येष्व
भिध्यानं मनसानिष्टचिन्तनम् । वित
थाभिनिवेशश्चमानसं त्रिविधं स्मृत
म् ॥ एतानि दशपापानि हरत्त्वं म
मजाह्नवि । दशपापहरायस्मात्त
स्माद्दशहरास्मृता ॥ ज्येष्ठेमासिसि
तेपक्षेदशम्यांबुधहस्तयोः । गरानन्दे
व्यतीपातेकन्याचन्द्रेवृषेरवौ । दश
योगेनरः स्नात्वासर्वपापैः प्रमुच्यते
इति स्कन्दपुराणे काशीखण्डे ॥
अत्रकुजबुधयोः कल्पभेदेन व्यवस्था
ज्ञेया ॥ सेतुबन्धरामेश्वरयोः प्रति
ष्ठादिने ॥ यथोक्तं स्कान्दे सेतुमा
हात्म्ये ॥ ज्येष्ठेमासि सितेपक्षेदश
म्यांबुधहस्तयोः । गरानन्देव्यतीपा
ते कन्याचन्द्रेवृषेरवौ ॥ दशयोगे
सेतुमध्ये लिङ्गरूपधरंहरम् । रामो
वैस्थापयामास शिवलिङ्गं मनुत्तम
मिति । अतोऽस्यांतुविशेषेण पूजा
कार्याहिताथिभिः ॥ * ॥ अत्रसङ्कल्पउ
क्तं स्नानायणकाण्डे २१५ अध्याये ।
यथा । अद्यहस्तेतु नक्षत्रे दशम्यां ज्ये
ष्ठकेसिते । दशपापहरायाश्चमदत्ता
द्दानकल्मषम् ॥ विरुद्धाचरणं हिंसा
परदारोपसेवनम् । पारुष्यानृतपैशु
न्यमसम्बद्धञ्च भाषणम् ॥ परद्रव्या
भिध्यानञ्च मनसानिष्टचिन्तनम् ।

एतद्दशाघघाताय गङ्गास्नानं करोम्य
हमिति ॥

दशा । स्त्री । अवस्थायाम् ॥ दीपवर्त्त्या
म् ॥ चेतसि ॥ दशति । दंशदशने ।
भू०क । पचाद्यचित् जपजभदहद
शेतिनिर्देशात्किञ्च्यपिनलोपः ॥ य
द्वा । दश्यते गुरोश्चेत्यङ् ॥ कलौ
न्वर्षायषोक्तायुष ऊर्धायश्चदशदभो
ग्यादृभागविशेषे ॥ इति दैवज्ञा
॥ शरीरस्थदशदशा यथा । गर्भवास.
१ । जन्म २ । बाल्यम् ३ । कौमारम्
४ । पौगण्डम् ५ । यौवनम् ६ । स्था
विर्यम् ७ । जरा ८ । प्राणरोधः ९ ।
नाश १० इति ॥ * ॥ कामजदश
दशा यथा । चक्षूराग स्तदनु मनस स
ङ्गतिर्भावनाच व्यावृत्तिः स्यात् तद
नुविषयग्रामतश्चेतसोपि । निद्राच्छे
दस्तदनुतनुता निस्त्रपत्वं ततोनून्मा
दोमूर्च्छातदनुमरणं स्युर्दशा ग्रन्थ-
मेणेति ॥

दशाकर्ष । पु । प्रदीपे ॥

दशाकर्षी । पु । प्रदीपे ॥

दशाङ्गधूप । पु । त्रिदोषघ्ने अवग्रहपि
शाचकादिनाशके धूपविशेषे ॥ यथा
। वासयेद्दादशाङ्गेन त्रिदोषघ्नेन चा
र्चकम् । नश्यन्तियस्यधूपेन अवग्रह
पिशाचकाः ॥ पञ्चांशागन्धपाषाणा

त् तावन्महिषगुग्गुलु: । चतुरंशच-न्दनञ्च जटामांसीच तावती ॥ त्रिभाग सर्ज्जक.सार स्तावदेवहिराक्षकम् । उशीरन्तु द्विभागंस्यात् हतभृष्ट नखं समम् ॥ कर्पूरो मृगनाभिश्च एकभागौप्रकीर्त्तितौ । एकोदशाङ्ग धूपस्तु वद्रस्यापि मनोहरेदिति ॥ पुष्पदानोत्तरदेवायदीयमाने धूमविशेषे ॥ यथा । मधुमुस्त घृत गन्धोगुग्गुल्वगुवशैलजम् । सरल सिह्लसिद्धार्थं दशाङ्गोधूपउच्यतइति ॥ अन्यश्च । कर्पूरं कुष्ठमगुरु गुग्गुलुमैचयोद्भवम् । केशरं वालक पचत्वक् चालीकोषमुत्तमम् ॥ सर्वमेतद्घृतयुत दशाङ्गोधूपईरित इति ॥

दशाङ्गुलम् । न । खर्बूजे ॥ चि । दशाङ्गुलमिते ॥

दशानन । पु । रावणे ॥

दशानिक: । पु । दन्तीवृक्षे ॥

दशानीकिनी । स्त्री । सेनाविशेषे ॥

दशापवित्रम् । न । वास खण्डे ॥

दशाकर्षा । स्त्री । कैवर्त्तिकायाम् ॥

दशार्ण. । पु । देशविशेषे ॥ सविन्ध्यस्यपूर्वदक्षिणस्या दिशि वर्त्तते ॥ इतिराधाकान्त. ॥

दशार्णा । स्त्री । नदीविशेषे ॥

दशार्ह. । पु । खसमे । बुद्धे ॥ यदुदेशे ॥

दशार्हा । पुभूम्नि । दशार्हदेशस्थे ॥

दशावतार. । पु । विष्णौ ॥ दशअवतारायस्य स । तेयथा । शेते स चिन्तशयने मम मीनकूर्मकोलो ऽभनवहरिवामनजामदग्न्य । यो ऽभूद्भूवभरताग्रजकृष्णबुद्ध कल्की सताम्भविता प्रहरिष्यते ऽरीनिति वोपदेश. ॥

दशाश्व । पु । चन्द्रे ॥ दशअश्वारथे यस्य स. । रथस्त्रिचक्र सोमस्य कुन्दाभास्तचवाजिन । वामदक्षिणतोयुक्ता-दश तेन चरत्यसौ ॥

दशाश्वमेधिक' । पु । तीर्थविशेषे ॥

दशास्थिति । स्त्री । अवस्थायाम् ॥

दशास्य. । पु । दशानने ॥ दश आस्यानि यस्य स ॥

दशास्यजित् । पु । श्रीरामचन्द्रे ॥ दशास्य जयति । जि० क्विप् तुक् ॥

दशाह । पु । दशदिनसमुदाये ॥ दशानामह्नां समाहार । तद्धितार्थेति समास । समाहारस्यैकत्वादेकवचनम् । राजाह सखिभ्यष्टच् । रात्राह्नाहा पुंसि ॥

दशेन्धन । पु । प्रदीपे ॥ दशाइन्धन यस्य ॥

दशेर. । पु । हिंस्रे ॥ दशति । दश० । पति कठिकुठिगडिगुडिदंशिभ्यएरक् । कनिदित्वाभिति नलोप. ॥

दशेरक । पु । मरुदेशे ॥ पु भूम्नि । तद्देशस्थे ॥ इति हेमचन्द्र ॥

दशेरुक । पु । मरुदेशे ॥ पु भूम्नि । तद्देशस्थे ॥ इतिभूरिप्रयोग ॥

दशैकादशिक । पु । वार्द्धुषिके ॥ एकादशार्थत्वादेकादश वस्तुतोदश ये दशदत्ता एकादश भविष्यन्ति ते दशैकादशा' । निपातनात् समासान्तोऽकार' । दशैकादशान् प्रयच्छति । कुसीददशैकादशात् ष्ठन्ष्ठचा विति ष्ठच् ॥ स्त्री । ङीषि दशैकादशिकी ॥

दष्ट । त्रि । दंशिते । दंशयुक्ते ॥ दशे क्त ॥

दस्म । पु । यजमाने ॥ चैारे ॥ हुताशने ॥ खले ॥ दस्यति । दसु उपक्षये । इषियुधीधि दसिश्याधूसूभ्योमक ॥ दर्शनीये ॥

दस्यु' । पु । मलिम्लुचे । चैारे ॥ रिपै ॥ महासाहसिके ॥ दस्यति । दसु० । यजिमनिशुन्धिदसिजनिभ्योयुच् । वा० अनादेशाभाव । अनुनासिकयोरित्युक्तत्वाद्वा नानादेश. ॥ पैाण्ड्रकाश्चौड्रद्रविडा काम्बोजाजवनाशका. । पारदा. पह्लवा श्चीना.किराता दरदा.खशा ॥ मुखबाहूरुपज्जानां यालोके जातयोबहि: । म्लेच्छवाचश्चार्यवाच सर्वेते दस्यव स्मृता. ॥ ब्राह्मणक्षत्रियवैश्यशूद्राणां क्रियालोपादिना या पैाण्ड्रकाश्चौड्रद्रविडाइत्यादिनोक्ताजातयो वाह्या जाता' म्लेच्छभाषायुक्ता आर्यभाषोपेता या तेदस्यव. सर्वेस्मृताइत्यर्थ. ॥

दस्र । पु । खरे ॥ अश्विनीसुते ॥

दस्रौ । पु । द्विवचनान्त । नासत्ययो । अश्विनीसुतयो । स्वर्वैद्ययो ॥ दस्यत क्षिपतोरोगान् । दसु० । स्फायितञ्चीतिरक् ॥

दस्रदेवता । स्त्री । अश्विनीनक्षत्रे ॥ दस्रौदेवते यस्या ॥

दस्रसू. । स्त्री । सूर्ययोषिति । संज्ञायाम् ॥

दहन । पु । चित्रके ॥ भल्लातके ॥ अग्नौ ॥ कपोते ॥ चतुष्कभप्रभेदे (ऽ।) ॥ न । दाहे । भस्मीकरणे ॥ त्रि । दुष्टचेष्टिते ॥ दहति दह्यते वा । दहभस्मीकरणे । ल्यु, ल्युट् वा ॥

दहनकेतन. । पु । धूमे ॥ दहन केतन यस्य ॥

दहनप्रिया । स्त्री । स्वाहायाम् ॥ दहनस्याग्ने. प्रिया ॥

दहनागुरु । न । दाहागुरुणि ॥

दहनाराति. । पु । जले ॥

दहनीय: । त्रि । दहनार्हे । दाह्ये ॥

दहनोपम. । पु । } सूर्यकान्तमणौ ॥
दहनोपल । पु । }

दहनोल्का । स्त्री । अग्निकुक्कुटे ॥

दहर । पु । मूषिकायाम् ॥ स्वल्पे । सूक्ष्मे ॥ भ्रातरि ॥ बालके ॥ हृदयाकाशे ॥ ब्रह्मणि ॥

दहराकाश । पु । चिदाकाशे ॥ ईश्वरे ॥ दहरश्चासावाकाशश्च ॥

दह्रः । पु । दावानले ॥ वह्नौ ॥ दहति । दह° । स्फायितञ्चीति रक् ॥ हृदयाकाशे ॥ जठरे ॥

दा । स्त्री । शोधने ॥ दाने ॥ छदे ॥ उपतापे ॥ रक्षायाम् ॥ दानम् । डुदाञ्° । सम्पदादित्वात् क्विप् ॥

दाक । पुं । यजमाने ॥ दातरि ॥ ददाति । डुदाञ्° । कृदाधारेतिक ॥

दाक्षः । त्रि । दक्षसम्बन्धिनि ॥ दक्षस्यायम् । अण् ॥

दाक्षायणयज्ञ । पुं । आदक्षायुक्ते दर्शपूर्णमासात्मके यज्ञे ॥ दक्षस्येमे दाक्षा । तेषा मयन मावृत्तिरिति तन्निर्वचनम् ॥

दाक्षायणी । स्त्री । अपर्णायाम् । उमायाम् । सत्याम् ॥ अश्विन्यादिसप्तविंशतिभेषु ॥ रोहिण्याम् ॥ दन्तीवृक्षे ॥ मानवे दक्षहसमीठाधिष्ठाचिदेव्याम् ॥ दक्षस्यापत्यम् । वाना मधेयस्येति दक्षस्यायाम् उदीचां वृद्धादगोत्रादिति फिञ् । गौरादित्वात् ङीष् ॥

दाक्षायणीपति । पु । एणतिलके । चन्द्रे ॥ शिवे ॥ दाक्षायण्या पति. ॥

दाक्षायणीरमण । पु । चन्द्रे ॥

दाक्षाय्य । पुं । गृध्रे ॥ दक्षते । दक्षदृशीभ्यामर्थेच । शुदक्षिस्पृहिगृहिभ्य आय्यः । दक्षाय्यस्यायम् । तस्येदमित्यण् ॥

दाक्षि' । पुं । दक्षस्यापत्ये ॥ अतइञ् ॥

दाक्षिणम् । न । दक्षिणानां समूहे ॥ भिक्षादिभ्योऽण् ॥

दाक्षिणात्य' । पु । नारिकेले ॥ त्रि । दक्षिणादिग्भवे ॥ दक्षिणाभव । दक्षिणापश्चात्पुरसस्त्यक् ॥

दाक्षिणिक. । पु । बन्धविशेषे ॥ सम्येष्टापूर्त्तेन भवति । पुरुषतत्त्वानभिज्ञोऽपि इष्टापूर्त्तकारी कामोपहतमना बध्यते ॥

दाक्षिण्यम् । न । आनुकूल्ये ॥ चि । दक्षिणार्हे ॥

दाक्षी । स्त्री । पाणिनिमुनेर्मातरि ॥ दक्षस्यगोत्रापत्य स्त्री । अतइञ् । इतोमनुष्यजातेरिति ङीष् ॥

दाक्षीपुत्रः । पु । पाणिनिमुनौ ॥ दाक्ष्या' पुत्रः ॥

दाचेयः। पु। पाणिनिमुनौ ॥ दाच्या अपत्यम्। स्त्रीभ्योढक् ॥

दाच्यम्। न। कौशले। दच्चतायाम्॥ सहसा प्रत्युत्पन्नेषु कार्येषु अव्यामोहेन प्रवृत्तौ ॥ दचस्य कर्म भावो वा। ष्यञ् ॥

दाघ। पु। दाहे॥ दह्यतेऽनेन। दह भस्मीकरणे। हलश्चेतिघञ्। न्यङ्क्वादित्वात् कुत्वम् ॥

दाडक। पु। दन्ते॥ इति शब्दार्थकल्पतरु ॥

दाडिम। चि। एलायाम्॥ पु। करके। वृत्तफले। शुकवल्लभे॥ समौकरकदाडिमाविन्त्यमर ॥ तत्फलं चिविध स्वादु स्वादम्लं केवलाम्लकम्। तत्स्वादुचिदोषघ्नतृट्दाहज्वरनाशनम्॥ हृत्कण्ठमुखरोगघ्नं तर्पणं शुक्रलं लघु। कषायानुरसग्राहि स्निग्धं मेधाबलावहम् ॥ स्वादम्लं दीपनं रुच्यकिञ्चित् पित्तकरलघु। अम्लन्तु पित्तजनकमुष्णं वातकफापहमिति भावप्रकाश ॥*॥ तापहारिमधुरलघुपथ्यमिति राजनिर्घण्ट.॥ दलनं दाल'। दलविशरणे। घञ्। दालेन निर्वृत्तः। भावप्रत्ययान्तादिमप्। डलयोरेकत्वम् ॥

दाडिमपुष्प.। पु। रोहितकद्रुमे॥ दाडिमस्य पुष्पमिव पुष्पमस्य॥ न। करकपुष्पे ॥

दाडिमपुष्पक'। पु। रोहितकवृक्षे ॥ दाडिमइव पुष्पाणि यस्य ॥

दाडिमप्रियः। पु। शुकखगे ॥

दाडिमभक्षण। पु। कीरे ॥

दाडिमादिचूर्णम्। न। चूर्णविशेषे। द्विपलंदाडिमादष्टौ खण्डाद्व्योष पलत्रयम्। त्रिसुगन्धिपलञ्चैकं चूर्णमेकत्रकारयेत्॥ तच्चूर्णमाचयाभुक्तमरोचकहरं परम्। दीपनं पाचनञ्चशात् पीनसज्वरकासजित् ॥

दाडिमी। स्त्री। दाडिमे ॥

दाडिमीरस। पु। व्यञ्जनोपस्करान्तरे ॥ दाडिम घृतसन्तप्ते तत्रपात्रे विनिक्षिपेत्। तत पक्व पटेपूत इति स्याद्दाडिमीरस.॥

दाडिमीसार। पु। दाडिमे॥ इति राजनिर्घण्ट.॥

दाडिम्ब। पु। दाडिमे॥ इतिचिकाण्डशेष.॥

दाढा। स्त्री। दंष्ट्रायाम्॥ अभिलाषायाम्॥ समूहे॥ इतिशब्दार्थकल्पतरु ॥

दाढिका। स्त्री। दंष्ट्रिकायाम्॥

दाण्डपाता। स्त्री। तिथिविशेषे॥ दण्डपातोस्यां वर्त्तते। घञ्. सास्मिन्

येतिञ् ॥

दाण्डमाथिक । त्रि । दण्डमाथं धावति । माथोत्तरपदेतिठक् ॥

दाण्डा । स्त्री । क्रीडाविशेषे । पटा इतिभाषा ॥ दण्ड प्रहरणमस्यां क्रीडायाम् । तदस्या प्रहरणमितिण ॥

दाण्डाजिनिक । पु । मायाजीविनि । सदम्भे ॥ दण्डाजिनेन दम्भेनार्थानन्विच्छति । अयःशूलदण्डाजिनाभ्यामितिठञ् ॥

दाण्डिनायन । पुं । दण्डिनेर्गोत्रापत्ये ॥ नडा० फक् । दाण्डिनायनहास्तिनायनेत्यादिना टिलोपाभाव ॥

दात । त्रि । लूने । छिन्ने ॥ दायते स्म । दाप् लवने । क्त ॥ शुद्धे ॥ दायति । दैप् शोधने । कर्त्तरि क्त ॥

दाता । त्रि । दानशीले । सुचिरे । दानकर्त्तरि ॥ ददाति । डुदाञ्० । तृच् ॥

दात्यूह । पुं । कालकण्ठके खगे ॥ चातके ॥ जलकाके ॥ मेघे ॥ दाति । दाप्० । क्तिन् । दातिं भागं मूहते । ऊह० । अण् ॥ यद्वा । दित्यौहोयम् । अण् । देविकाशिंशपेत्यात्त्वे वाहऊठ् शकन्ध्वादि ॥

दात्यौह । पुं । दात्यूहे ॥ दित्यौहोऽयम् । अण् । देविकाशिंशपेत्यादि नात्त्वे सम्प्रसारणम् । वृद्धिः ॥

दात्रम् । न । छेदनशस्त्रे । लवित्रे ॥ दात्यनेन । दाप्० । दाम्नीत्यादिना ष्ट्रन् ॥ दादिभ्यश्छन्दसीतित्नन्वा ॥

दात्री । स्त्री । दानशीलायाम् ॥ तृजन्तात् ङीप् ॥

दात्व । पु । दातरि ॥ ददाति । डुदाञ्० । अनिदेत्यादिना ददातेस्त्वन् ॥

दाद । पु । दाने ॥ दद्यते । दददाने । कर्मणि घञ् ॥

दाधिकम् । त्रि । दधिसंस्कृतद्रव्ये ॥ दधिसंस्कृतम् । दध्नष्ठक् ॥ दध्ना संस्कृतं वा । प्राग्वहतीयष्ठक् । दध्नाचरति । चरतीतिठक् । दध्ना संसृष्टं वा । संसृष्टेठक् । दध्नोपसिक्तं वा । व्यञ्जनैरुपसिक्ते इतिठक् ॥

दानम् । न । गजमदे ॥ पालने । रक्षणे ॥ छेदे ॥ शुद्धौ ॥ विश्राणने । त्यागे । परस्वत्वापत्तिपर्यन्तं स्वत्वत्यागे । देशेकालेश्रद्धया यथाशक्त्यान्यायार्जितार्थानां सत्पात्रे समर्पणे । स्वस्वत्वास्पदानामन्नादीनां यथाशक्ति शास्त्रोक्तसविभागे । असङ्कोचेनवित्तेषु स्वस्वत्वपरित्यागेन परस्वत्वापादने । समप्रदानस्वत्वापादकद्रव्यत्यागे ॥ * ॥ अर्थानामुचिते पात्रेश्रद्धया प्रतिपादनम् । दानमित्यभिनिर्दिष्टव्याख्या

नतस्यवच्यते ॥ दाता प्रतिग्रहीताच श्रद्धा देयञ्च धर्मयुक् । देशकालौच दानाना मङ्गान्येतानि षड्विदु ॥ मनसा पात्रमुद्दिश्य भूमौ तोय विनिक्षिपेत् । विद्यते सागरस्यान्तो दानस्यान्तो न विद्यते ॥ परोक्षे कल्पितं दान पात्राभावे कथ भवेत् । गोत्रजेभ्यस्तथा दद्यात् तदभावे ऽस्यबन्धुषु ॥ यदातु न सकुल्य स्यान्नच सम्बन्धिबान्धवा । दद्यात् स्वजातिशिष्येभ्य स्तदभावेप्सुनि क्षिपेत् ॥ स्नात्वाशुद्धेसमे देशे गोमयेनोपलेपिते । वसित्वा वसनशुद्ध दान दद्यात् सदक्षिणम् ॥ दान चतुर्विध प्रोक्त मृषिभिर्धर्मकोविदैः । नित्य नैमित्तिकं काम्य विमल दानमीरितम् ॥ अहन्यहनि यत्किञ्चिद् दीयते ऽनुपकारिणे । अनुद्दिश्यफल तस्मात् ब्राह्मणायतु नित्यकम् ॥ यत्तुपापोपशान्त्यैच दीयते विदुषांकरे । नैमित्तिक तदुद्दिष्टंदान सद्भिरनुष्ठितम् ॥ अपत्यविजयैश्वर्यस्वर्गार्थंयत् प्रदीयते । दान तत काम्यमाख्यात मृषिभिर्धर्मचिन्तकैः ॥ ईश्वरप्रीणनार्थाय ब्रह्मवित्सु प्रदीयते । चेतसा सत्त्वयुक्तेन दानं तद्विमलं स्मृतम् ॥ * ॥ गङ्गायद् दीयतेदान भ

क्यापात्रेविधानत । तदनन्तफल वृद्धिमद्स्या चितयेन्नृप ॥ * ॥ तच्च सात्त्विकादि भेदात् त्रिविधम् । यथा । दातव्य मिति यद्दान दीयते ऽनुपकारिणे । देशेकालेच पात्रेच तद्दानं सात्त्विक स्मृतम् ॥ यत्तुप्रत्युपकारार्थं फलमुद्दिश्यवापुन. । दीयत च परिक्लिष्ट तद्दानं राजस स्मृतम् ॥ अदेशकालेयद्दान मपात्रेभ्यश्च दीयते । असत्कृत मवज्ञात तत् तामस मुदाहृतम् ॥ * ॥ यदेवहिममेदमितिविशेषजानान परस्वत्वापत्तयेस्वामी त्यजति परस्वविशेषेणेदममेतिस्वत्वध्वस्येतीति व्यवहारे ॥ * ॥ अस्यविधिर्यथा । स्नानसन्ध्याचमनानिकृत्वा नारायणनवग्रहगुरून् सम्पूज्य देयद्रव्य वामहस्तेन धृत्वा दक्षिणहस्तेन त्रिरभ्यर्च्य तद्द्रव्याधिपतिदेवता सम्प्रदानञ्चार्चयित्वा सङ्कल्प्यकुशतिलजलत्यागपूर्वकदद्यादिति ॥ विवेकज्ञानशुद्धौ ॥ दैपुंशो धनद्रव्यस्माद्धातोर्ह्ञानपद व्युत्पद्यते । यदाहपतञ्जलि । विवेकख्यातिरविप्लवाद्ध्वनयस्यहानोपाय इति । अविप्लवा शुद्धि । साचसवासन संशयविपर्यासानापरिहारेण विवेकसाक्षात्कारस्य स्वच्छप्रवाहे ऽवस्थानम् । साच न वि

नादरनैरन्तर्य्यदीर्घकालसेविताभ्या सपरिपाकाङ्क्षवतीति । दानेनविवे कख्यात्युपकार्य्याङ्गेन सोपिसङ्कृची त. । सेय पञ्चमीसिद्धि सदा मुदितमित्युच्यते । दानञ्च सि- द्धिहेतु । धनादिदानेनाराधितोज्ञा नी ज्ञान प्रयच्छति ॥ इति अनेन । दोअवखण्डने । ल्युट् ॥ डुदाञो भावे दीयते इति कर्म्मणि वा ल्युट् ॥ स्वधनस्यपरेभ्य. प्रतिपादने राज्ञा मुपायविशेषे । उपप्रदाने ॥

दानकम् । न । कुत्सितदाने ॥ दानकु त्सितेइतियावादिषुपाठात्कन् ॥

दानकर्म । न । दानक्रियायाम् ॥

दानतोयम् । न । मदोदके ॥

दानधर्मः । पु । दानस्यफले ॥

दानपति. । पुं । सदाप्रदे । सततदात रि ॥ अक्रूरे ॥

दानपात्रम् । न । विद्यादियुक्ते ॥ विद्या युक्तो धर्मशील. प्रशान्त. क्षान्तो दा न्त. सत्यवादी कृतज्ञ । वृत्तिग्ला नो गोहितो गोशरण्यो दाता यज्वा ब्राह्मण पात्रमाहु. ॥ दानस्यपात्रम् ॥

दानव । पु । असुरे । दनुजे । दक्षक न्याया दनो गर्भे कश्यपाज्जाते ॥ दनो रपत्यम् । तस्यापत्यमित्यण् ॥

दानयज्ञ. । पुं । वैश्ये ॥ इति पुराणम् ॥

दानवारिः । पुं । सुरे । देवतायाम् ॥ दानवाना मरि । दानवो ऽरिर्य स्य वा ॥

दानशील. । त्रि । वदान्ये । दातरि ॥

दानशौण्ड । त्रि । वदान्ये । बहुप्रदे ॥ दानेशौण्डः । सप्तमीशौण्डैरितिस मासः ॥

दानायोग्य । त्रि । अपात्रे ॥ अव्रताना ममन्त्राणां जातिमात्रोपजीविनाम् । नैषां प्रतिग्रहो देयो न शिलाता रयेच्छिलाम ॥

दानीय. । त्रि । सम्प्रदाने । दानपात्रे ॥ दीयतेऽस्मै । डुदाञ्० । कृत्यल्यु टोबहुलमिति सम्प्रदानेऽनीयर् ॥

दानु' । त्रि । दातरि ॥ विक्रान्ते ॥ द दाति । डुदाञ्० । दाभाभ्यांनु ॥

दान्त. । त्रि । तपःक्लेशसहे । जिते न्द्रिये । बहिरिन्द्रियनिग्रहकर्त्तरि ॥ दाम्यतिस्म । दमेर्गत्यर्थेतिक्तः । यस्यविभाषेतिनेट् । अनुनासिकस्ये तिदीर्घः ॥ दमिते । शिक्षितवृषे ॥ दान्तोयबलीवर्द्द युगाशकटवा हनयोग्य कृतइतिगम्यते इतिभाग- ती ॥ दम्यतेस्म । दमुउपशमे । णि जन्त । क्त । वादान्तशान्तेतिसाधु. ॥ पुं । दमनकवृक्षे ॥

दान्ति' । स्त्री । तपःक्लेशसहिष्णुतायाम् ॥

। दमथे । दमे ॥ दमनम् । दमु० । ङियांक्लिन् । अनुनासिकस्येतिदीर्घ ॥

दापित' । त्रि । साधिते ॥ दापयतेस्म ण्यन्ताद्दाप क्त ॥ दण्डिते ॥

दाप्य । त्रि । दापनीये ॥

दाम । न । स्त्री । देहनकाले पशुपा दश्बन्धनरज्जौ । सन्दाने ॥ द्यति । दो अवखण्डने । दीयते वा । दीङ् क्षये । मनिन् ॥ मालायाम् ॥ रज्जौ ॥

दाममर्पं । न । दमनभञ्जनतिथौ । चैत्रशुक्लचतुर्दश्याम् ॥

दामनी । स्त्री । तन्त्याम् । पशुबन्धनरज्ज्वाम् ॥ दामैव । प्र० अण् । अनितिप्रकृतिभाव । टिड्ढेतिङीप् ॥

दामलिप्तम् । न । तमोलुकइति प्रसिद्धे तमोलिप्तदेशे ॥

दामा । स्त्री । दामनि ॥ दोअवखण्डने । दीङ् क्षये वा । मनिन् । मन इति नङीप् । दामानौ दामान इत्यादि । डाबुभाभ्यामन्यतरस्याम् इति डापितु । दामा दामे दामा, इत्यादि बोध्यम् ॥

दामाञ्चनम् । न । अश्वादे. पादबन्धनरज्जौ । पिछाडी इतिभाषा ॥ इति हेमचन्द्र ॥

दामाञ्चलम् । न । एकमफाङ्घिबन्धे । दामाञ्चने ॥ दामाञ्चल पादपाशे

इति वैजयन्ती ॥

दामिनी । स्त्री । विद्युति ॥ दामविद्यते ऽस्या । सत्तायां मत्वाभ्यामिनीनि ॥

दामोदर । पु । श्रीकृष्णे ॥ बाल्येचापल्यनिषेधाय यशोदयादामोदरे बद्धत्वात् दाम उदरे यस्येति समम्यन्तस्य वैयधिकरण्येपिसमास । सप्तमीविशेषणे बहुव्रीहाविति लिङ्गात् ॥ तर्वोमध्यगत बद्धं दाम्ना गाढ तथोदरे । ततश्च दामोदरतां स ययौ दामबन्धनात् ॥ दामानि लोकनामानि तानि यस्योदरान्तरे । तेन दामोदरो देव श्रीधरश्च रमाश्रित इतिव्यास ॥ दमादिसाधनेन उदारा उत्कृष्टा या गति धूमादिगत्यपेक्षया ऽर्चिरादिरूपयागम्यते इति वा ॥ दमाद्दामोदरं विदुरिति भारतोक्ते ॥ भूतार्कविशेषे ॥ नदविशेषे ॥

दाम्भिक । त्रि । छद्मनाधर्मकारिणि । बैडालव्रतिकादौ ॥ दम्भयुक्ते । धर्मध्वजिनि ॥ पु । बकपक्षिणि ॥ दम्भेनचरति । ठक् ॥

दाय । पु । सोल्लुण्ठभाषणे ॥ विभक्तव्यपितृद्रव्ये ॥ दाने ॥ हरणे । यौतुकादिधने । कन्यादानकाले आमाचादिभ्यो व्रतभिक्षादौ ब्राह्मणादिभ्यश्च यद्द्रव्य दीयते तदिति भरत. ॥ याव

तसम्बन्धिधने ॥ क्षये ॥ स्थाने ॥ ख
ण्डने ॥ ददाति । डुदाञ्० । श्याद्य
धेति ण । आतोयुक् ॥ यद्वा । दीय
ते ऽसौ । दोङ् क्षये ।। अकर्त्तरि-
चेति चकारस्य सत्त्वाव्यभिचारार्थत्वा
त् घञ् ॥

दायक । त्रि । दातरि ॥ ददाति । डु
दाञ्० । ण्वुल् । आतोयुक् ॥

दायबन्धु. । पु । भ्रातरि ॥

दायभाग । पु । दायविभागे । सम्ब
न्धिमात्रेण सम्बन्धिधनस्यविभागे । पू
र्वद्रव्यस्वामिसम्बन्धाधीन तत्स्वाम्यु
परमे यत्रद्रव्येस्वत्त्व तत्रनिरूढोदाय
शब्दस्तस्यविभागे ॥ एकदेशगतस्यैव
भूहिरण्यादावुत्पन्नस्यस्वत्वस्य विनि
गमनाप्रमाणाभावेन वैशेषिकव्यवहा
रानर्हतया ऽव्यवस्थितस्यगुटिकापा
तादिना व्यञ्जने ॥ अथवा विशेषेण
भजन स्वत्वज्ञापन वा । यत्रचैकंदा
सीगवादिक बहुसाधारणं तत्रापित
त्कालविशेषवहनदोहनफलेन स्व
त्वव्यज्यते ॥ विभागोर्थस्यपित्र्यस्य पु
त्रै र्यत्प्रकल्प्यते । दायभागइतिप्रो
क्तं तद्विवादपदंबुधै ॥ दायस्य भाग ॥

दायविभाग. । पु । दायभागे ॥ श्री
सदाशिवउवाच ॥ भूयस्तेकथयाम्या
हं व्यवहारान्सनातनान् । यान्रच्च

न् प्रविदन्राजास्वच्छन्दपालयेत् प्र
जा ॥ नियमेनविनाराज्ञोमानवाधन
लोलुपा । मिथस्तेविवदिष्यन्तिगुरुस्व
जनबन्धुभि ॥ व्यतिघ्नतितदादेवि
स्वार्थिनोवित्तहेतवे । पापाश्रयाभवि
ष्यतिहिसयाचजिघांसया ॥ अतस्ते
षाहितार्थायनियमोधर्मसम्मत ।
नियोज्यतेयमाश्रित्यनश्यन्त्येयु शुभा
न्नरा ॥ दण्डयेत् पापिनोराजायथा
पापापनुत्तये । तथैवविभजेद्दायान्
न्नृणांसम्बन्धभेदत ॥ सम्बन्धोद्वि-
विधोज्ञेयोवैवाह्याज्जन्मनस्तथा । स
म्बौवाहिकसम्बन्धादपरोबलवत्तर ॥
दायेतूर्द्धतनाज्ज्यायान् सम्बन्धोऽध
स्तन शिवे । अधऊर्द्धक्रमादत्रपुमान्
मुख्यतर स्मृत ॥ तत्रापिसन्निकर्षे
णसम्बन्धीदायमर्हति । अनेनविधि
नाधीराविभजेयु क्रमाद्धनम् ॥ मृत
स्यपुत्रपौत्रेषुकन्यासुपितरिस्थिते । भा
र्यायामपिदायार्ह' पुत्रएवनचापर
॥ बहवस्तनयायत्रसर्वेतत्रसमांशिन.
। ज्येष्ठेराज्याधिकारित्वतत्तुवंशानुसा
रत. ॥ स्थापयत्पैतृकंतत्रशोधयेत्पैतृ
कैर्धनै. ॥ तस्मिन् स्थितेविभागार्हं
नभवेत्पैतृकवसु ॥ विभज्ययदिगृह्णी
यु विभवंपैतृकनरा. । तेभ्यस्तद्धनमा
हृत्यपितृणांदापयेन्नृप' ॥ यथास्वकृत

पापेननिरययान्तिमानवा । ऋणेना
पितयावद्व स्वयमेवनचापर ॥ साधा
रणधनयच्चस्थावरस्थावरेतरत् । अभि
न.प्राप्नुमर्हन्तिस्वस्वम शविभागत ॥
अभिन्नांसम्मतावेवविभाग परिसिद्ध्य
ति । तेषामसम्मतौराजासमदृष्ट्या
शमाचरेत् ॥ स्थावरस्यचरस्यापिवि
भागानर्हवस्तुन । मूल्य वा तद्रुपस्व
त्व मभिन्नां विभजेन्नृप ॥ विभक्तेपि
धनेयस्तु स्वीयांश प्रतपादयेत् । पु
नर्विभज्यतद्द्रव्यम प्राप्तायायदाप
येत् ॥ कृतेविभागेद्रव्याणा मभिन्ना
सम्मतौ भवे । पुनर्विवादय स्तचशा
स्योभवतिभूभृत ॥ स्थितेप्रेतस्यपौत्रे
चभार्य्यायांचपितर्य्यपि । पौत्रएवध
नार्ह. स्यादधस्ताज्जन्मगौरवात् ॥
अपुत्रस्यास्थतेतातेसेदरेच पिताम
हे । जन्मन सन्निकर्षेण पितैवास्यध
नम्हरेत् ॥ विद्यमानासुकन्यासुस
न्निकृष्टास्वपिप्रिये । मृतस्यपौत्रोध
नभाक् यतोमुख्यतर'पुमान् ॥ धन
मृतेन पुत्रेणपौत्रं यातिपितामहात्
। अतोचगीयतेलोकै पुत्ररूप स्वय
पिता ॥ औद्वादिकेपिसम्बन्धे ब्राह्मी
भार्य्यावरीयसी । अपुत्रस्यहरेद्दृक्-
थं मतुर्दैवाद्वैचारिणी ॥ पतिपुत्र
विहीनातुसम्प्राप्य स्वामिनोधन । नै

वदातु नविक्रेतु समर्थास्वधन विना
॥ पितृभि श्वशुरैर्वापिदत्त यद्धर्मसम्म
त । स्वकृत्योपार्जित यच्चस्त्रीधनतत्
प्रकीर्त्तित ॥ तस्यांमृताया रिक्थ त
त्पुन.स्वामिपद व्रजेत् । तदासन्न त
रोरिक्थमधजर्द्धक्रमाद्धरेत् ॥ मृते
पत्न्यास्वधर्मेण पतिबन्धुवशेस्थिता ।
तदभावेपितृबन्धोस्तिष्ठतीदायमर्ह
ति ॥ शकितव्यभिचारापिनपत्न्युर्दा
यभागिनी । लभतेजीवनमात्रभर्त्तु
र्विभववारिणा ॥ वहूव्यश्चेद्वनिता-
स्तस्यस्वर्यातुधर्मतत्परा । भजेरन्स्वा
मिनोवित्त समाशेनशुचिस्मिते ॥ प
त्यु धनहरायास्य मृतौभर्त्तृसुतास्थि-
तौ । पुन स्वामिपदं गत्वाधन दुहि
तर व्रजेत् ॥ एवस्थिताया कन्याया
मृक्थ पुत्रवधूगत । तन्मृतेस्वामिन
प्राप्य श्वशुरातत्सुतामियात् ॥ तथा
पितामहेसत्वेवित्त मातृगत भवे ।
तस्यांमृताया पुत्रेणभर्त्तश्वशुरगम्भ-
वेत् ॥ मृतस्योर्द्धगत वित्त यथा प्रा
प्नोति तत् पिता । जनन्यपितथाप्नो
ति पतिहीना भवेद्यदि ॥ अत स-
त्यांजनन्यांतु विमातानधन हरेत् ।
मृतेजनन्यास्त प्राप्यपिमागच्छेद्विमा
तर ॥ अधस्तनानांविरहाद्यदारिक्
थनयात्यध । येनैवाधस्तन प्राप्तते

नैवोर्द्धं तदाव्रजेत् ॥ अत स्थितौपि
तृव्यस्यधन स्वस्त्रगतं चसत् । पत्यौ
स्थितेऽनपत्यायाम्तौपितृव्यमाश्र
येत् ॥ ऊर्द्धाच्छिस्तमध प्राप्यपुमांस
मवलम्बते । अत सत्यासोदरायांवै
मात्रेयोधन हरेत् ॥ स्थितायां सोद
रायांचविमातु पुत्रसततौ । वैमात्रे
यगत वित्त वैमात्रेयान्वयोभजेत् ॥
मृतश्चसोदरोभ्राता वैमात्रेयस्तथा ।
भिवे। धन पितृगतत्वेन विभजेतां
समाभिनौ॥ कन्यायां जीवितायांच
तदपत्य नदायभाक् । यच्चयस्याधित
वित्ततन्मृतावपर व्रजेत् ॥ विभजेयु
र्दुहितर पुत्राभावेपितुर्वसु । उद्वाह
य त्योऽनूढान्तुपितु साधारणेधने. ।
कसतच्यामृतायाश्च स्त्रीधन स्वामिन
भजेत् । अन्यस्तुद्रविणं यस्मादास
तत्पदमाश्रयेत् ॥ मेतस्याश्रयनैर्भा
रीविदध्या दात्मपोषण । पुत्रयन्तु
तदुप स्वत्वेनैयक्ता दानविक्रये॥ पि
तामहस्नुषा चाश्च सत्यांतातविभातरि
। पितामहगतंरिक्थततपुत्रेणस्नुषा
व्रजेत् ॥ पितामहपितृव्येचतथाभ्रा
तरिजीवति । अधोभवानांमुख्यत्वा
त्भ्रातैवधनभाग्भवेत् ॥ पितृव्यात्
सन्निकर्षेत्तुल्यौ भ्रातृपितामहौ ।
धर्मपितृपदंगत्वा मयातुभ्रातर व्रजे

त् ॥ स्थितेप्यपत्येदुहितुः प्रेतस्यपि
तरिस्थिते । दुहितृपत्यधनभाक् धनं
यस्मादधोमुख ॥ स्व प्रशातु स्थिते-
ता नेतथामातरिकाखिके । पुत्रोमु
ख्यतत्वेनधनहारी भवेत् पिता ॥
स्थितः स्वपितृसापिण्डोवर्त्तमानेपि
मातुले । प्रेतस्यधनहारीस्यात् पितुः
सम्बन्धगौरवात् ॥ अधस्तादूगमना
भावेधनमूर्द्धमथंगतं । तथापिपुंसांमु
ख्यत्वादित पितृकुलंश्रिवे ॥ अतोच
सन्निकृष्टोपिमातुलोनामुयाद्धनं । अ
जीवत् पितृकः पौत्रः पितृव्यैःसहपा
वति ॥ पितामहस्यद्रविणात् स्वपितु
र्दायमर्हति । भ्रातृहीनातथापौत्री
पितृव्यैः समभागिनी ॥ पितामह-
धनसौम्याहरेच्चेन्मृतमातृका । सत्यां
पौत्र्या. पितामह्यांपौत्र्या. पितृस्व
सर्य्यपि ॥ वित्तेपितृगतेद्विपौत्री-
तत्राधिकारिणी । अधोगामिषु वित्ते
षु पुमान् ज्यायानधस्तन ॥ ऊर्द्धगा
मिधनेश्रेष्ठः पुमानूर्द्धाङ्गवोभवेत् ॥
अतः स्नुषायां पौत्र्याश्चसत्यादुहित
रिम्रिये । प्रेतस्यविभवंहर्त्तुंनैवशक्नो
तिततपिता ॥ यदापितृकुलेनस्या-
न्मृतस्यधनभाजनं । पूर्वोक्तविधिनारि
क्थमातामहकुलभजेत् ॥ मातामह
गतंवित्तंमातुलैस्तत्सुतादिभिः । अ

धस्त्वंक्रमेणैवपुमांसस्त्रियमाश्रयेत् ॥ भ्रातृसन्तानेविद्यमानेपिचो सापि यदि नेष्यिते। मृतस्यैवीतनयोनपि तुर्दायभाग्भवेत्॥ अवैपत्नीपतत् पुत्राश्चभेरन्धनभागिनः। ग्रासमा प्ताद्दनंभद्रेस्व प्रथातुर्यथाधनं॥ अवे दायं प्रकुर्वन्ती अवभर्तैवपालयेत्। वैम्या स्वेत्राधिकारोस्या पित्रादीनां धनेप्रिये ॥ अत सत्कुलजांकन्यांअ वैवदापयन् पिता। क्रोधाद्वालोभतो वापिसभवेल्लोकगर्हितः॥ अवीतद न्वयाभावेसोदकोबन्धुदोन्वयः। इतरे यु क्रमतोविप्सुतस्यश्रियवशासनात् ॥ पिण्डदातृसप्तपुरुषाः सपिण्डाः क थिताः प्रिये। सोदकादप्रमांता सु स्त्त कैवल्गोचजा ॥ विभक्तद्रविण यश्चसंसृष्टस्वेच्छयातुचेत्। अविभ क्तविधानेनभजेरंस्तद्धनं पुनः॥ अविभ क्तविभक्तवायस्ययादृग्विभागिता। मृ तेपितस्यदायादाश्तादृग्विभवभागि नः॥ येयस्यधनहर्त्तारोभवेयुर्जीवना वधि। इयु.पिण्डतएवास्यअवैभार्य्या सुतविना॥ इतिश्रीमहानिर्वाणतन्त्रे दायभागोल्लासे सनातनव्यवहारकथ नम्॥

दायादः। पु। सपिण्डे॥ तनये। सुते ॥ दायमर्हति। अर्हभक्षणे। कर्मण्य

ण्॥ यद्वा। आदत्ते। उदाञ्०। आ तोनुपसर्गे इतिकः। दायस्यादः। स्वामीश्वराधिपतिदायादसाक्षिप्रति- भूप्रसूतैश्चेतिसूत्रएवनिपातनात्सो पसर्गोदप्यादन्तात्कः॥

दायितः। त्रि। खण्डिते। साधिते॥ दयतेर्यन्तात् कर्त्तरिक्तः॥

दाराः। पुभूम्नि। भार्य्यायाम्॥ दारय न्ति भ्रातॄन्। दृ० णिजन्तः। दारजा रौकर्त्तरिणिलुक् चेतिघञ्॥

दारकः। पु। बालके। पुत्रे॥ ग्राम्यशू करे॥ त्रि। भेदके॥ दारयति। दृ०। ण्वुल्॥

दारकर्म्म। न। विवाहे॥

दारणम्। न। विदारणे॥ कतके॥ दार्य्यतेऽनेन। दृ०। णयन्ताल्ल्युट्॥

दारदः। पु। विषभेदे॥ पारदे॥ हिङ्गुले॥ समुद्रे॥ दरदि देशविशे षेभवः। अण्॥

दारवल्लिभुक्। पु। बकपक्षिणि॥

दारा। स्त्री। भार्य्यायाम्॥ इतिभरतः॥

दारिः। स्त्री। विदारके॥

दारिका। स्त्री। बालिकायाम्॥

दारितः। त्रि। भिन्ने। भेदिते। कृत दारणे॥ दार्य्यतेस्म। दृ०। णयन्ता त्क्तः॥

दारिद्र्यम्। न। दरिद्रत्वे। निर्द्धनत्वे

॥ भावे ष्यञ् ॥

दारी । स्त्री । क्षुद्ररोगविशेषे । विपादिकायाम् । बिवाई इति भाषा ॥ परिक्रमणशीलस्य वायुरत्यर्थरूक्षयोः । पादयोः कुरुते दारीं सरुजां तलसंश्रिताम् ॥ अस्याश्चिकित्साभावप्रकाशे द्रष्टव्या ॥

दारु । न । पित्तले ॥ काष्ठे ॥ देवदारौ ॥ त्रि । शिल्पिनि ॥ दातरि ॥ दारके ॥ दीर्यते । दृ० । दृसनिजनीति ञुण् ॥ यद्वा । ददाति । डुदाञ्० । यति । दो० । द्यते वा । देङ् रक्षणे । तच्छीलादि । दाधेट्सिशदसदोरुरिति रुः ॥

दारुक । पुं । श्रीकृष्णसारथौ ॥ न । देवदारुणि ॥

दारुकदली । स्त्री । वनकदल्याम् ॥

दारुका । स्त्री । पुत्रिकायाम् । कुरूव्याम् । शालभञ्ज्याम् । कठपूतली इति भाषा ॥

दारुगन्धा । स्त्री । चीडानामगन्धद्रव्ये ॥

दारुगर्भा । स्त्री । दारुकायाम् ॥

दारुचीनी । स्त्री । स्वनाम्ना प्रसिद्धद्रव्ये ॥

दारुचीर्णकम् । न । गुडत्वचि ॥

दारुज । पु । मर्द्दले ॥ त्रि । दारुजाते ॥

दारुण । पु । चित्रके ॥ रौद्ररसे । भयानकरसे ॥ न । तीव्रासंशमकनरकेषु ॥ त्रि । भयावहे । दुःसहे । भीषणे । भयहेतौ ॥ दारयति चित्तम् । दृ भये । कृदृदारिभ्य उनन् ॥

दारुणकम् । न । रूसीतिख्याते मस्तकस्थे रोगे ॥ तल्लक्षणं यथा । दारुणा कण्डुरा रूक्षा केशभूमौ प्रजायते । मारुतश्लेष्मकोपेन विद्याद्दारुणकन्तु तत् ॥ दारुणाकर्कशा ॥

दारुणा । स्त्री । रात्रिविशेषे ॥ ॥ यथा । तृतीयाऽव्ययसञ्ज्ञाया दारुणा सा प्रकीर्त्तितेति ॥ नर्मदश्चेद्दतीयौ षष्ठ्यादिष्याम् ॥

दारुनिशा । स्त्री । दारुहरिद्रायाम् ॥

दारुपत्री । स्त्री । हिङ्गुपत्र्याम् ॥

दारुपीता । स्त्री । दारुहरिद्रायाम् ॥

दारुपुत्रिका । स्त्री । दारुकायाम् ॥

दारुमुखाह्वया । स्त्री । } गोधायाम्-

दारुमुखाह्वा । स्त्री । } । निहाकायाम् ॥

दारुमूषा । स्त्री । दारुमूसीतिप्रसिद्धौषधौ ॥

दारुसारम् । न । चन्दने ॥ दारूणां दारुषु वा सारश्रेष्ठम् ॥

दारुसिता । स्त्री । त्वक्स्वाद्याम् । दरुचीनीतिख्यातायाम् ॥ उक्ता दारुसिता स्वाद्वी तिक्ता चानिलपित्तहृत् । सुरभि शुक्रला वर्ण्या मुखशोषतृषा

पक्षा ॥

दारुस्त्री । स्त्री । दारुपुत्रिकायाम् ॥

दारुहरिद्रा । स्त्री । पचम्पचायाम् । पर्जन्याम् । कस्मल इतिपर्वतीयभाषाप्रसिद्धायाम् ॥ दारुचासौहरिद्रा च ॥

दारुहस्तक । पु । तर्दाम् । डोई इति भाषा ॥ हस्त इव प्रतिकृति । इवेप्रतिकृताविति कन् । दारुणो हस्तक ॥

दार्ढ्यम् । न । दृढतायाम् ॥ भावे ष्यञ् ॥

दार्त्तेय । त्रि । दृतिस्थे ॥ दृतौ भवम् । दृतिकुक्षीतिढञ् ॥

दार्दुरम् । न । दक्षिणावर्त्तशङ्खे ॥ दर्दुरधर्मे ॥

दार्दुरिक । पु । कुलाले ॥ दर्दुरो मृत्पात्रविशेष । तत्करोति । शब्द दर्दुरं करोतीति ठक् ॥

दार्वटम् । न । मन्त्रवेश्मनि । चित्रागृहे ॥

दार्वण्ड । पुं । मयूरे ॥

दार्वाघाट । पु । काष्ठकुट्टखगे । शतपत्रके । खुटकबढ़ध्या इति भाषा ॥ दारु आहन्तीति विग्रहे दारावाहनो ऽ त्यस्य चट संज्ञायामिति दारुशब्दे उपपदे आङ् पूर्वाद्धन्तेरण् प्रत्ययः टश्चान्तादेश ॥

दार्वाघात । पु । दार्वाघाटे ॥ श० मा०॥

दार्विका । स्त्री । दारुहरिद्राक्वाथतुल्ये काथोद्भवतुत्थे ॥ गोजिह्वौषधौ ॥

दारयति । दृ० । उक्त्वादित्त्वात्साधु । दार्वी दारुहरिद्रा तद्विकारोपिदार्वी अभेदोपचारात् । स्वार्थेकन् ॥

दार्विपत्रिका । स्त्री । गोजिह्वायाम् ॥

दार्वी । स्त्री । देवदारुणि ॥ हरिद्रायाम् ॥ गोजिह्विकौषधौ ॥ दारुहरिद्रायाम् ॥ दार्वी निम्बगुणा किन्तु नेत्रकर्णास्यरोगनुत् ॥ दीर्यते । दृ० । दृसनिजनीतिञुण् । वोतद्दति गौरादित्वाद् ङीष् ॥

दार्वीक्वाथोद्भवम् । न । रसाञ्जने ॥

दार्षद । त्रि । दृषदिपिष्टे चूर्णादौ ॥ दृषदो भवाद्यर्थेपि शेषइत्यण् ॥

दाल । पु । कोद्रवे ॥ न । मधुविशेषे ॥ सम्मुच्य पतितं पुष्पात् यत्तु पत्रे परिस्थितम् । मधुराम्लकषायञ्च तद्दालं मधुकीर्त्तितम् ॥ दाल मधु लघु प्रोक्तं दीपनीयं कफापहम् । कषायानुरसं रूक्षं रुच्य छर्दिप्रमेहजित् ॥ अधिकं मधुरं स्निग्धं वृंहण गुरुभारिकम् ॥ लघुपाके । गुरुभारिक तु स्मृतम् ॥ इन्द्रनीलदलाकारवृक्षामक्षिकोत्पन्न दृक्षकोटरामन्भव मक्षिकाराजनिर्यास ॥

दालन । पु । दन्तरोगविशेषे ॥ दन्तम्

लगतानाख्य. पञ्चमेया यथेरिता'। दीर्घमाघेष्विवरुजा यस्य दन्तेषु जायते। दालनो नाम सध्याधि सदागति निमित्तज. ॥ १२ ॥

दालव: । पु । स्थावरविषभेदे ॥

दाला । स्त्री । महाकाले । किम्पाके ॥

दालि: । स्त्री । दलितेशमीधान्ये। दाल इति भाषा ॥

दालिका। स्त्री । महाकाललतायाम्। किम्पाके ॥

दालिम । पु । दाडिमे ॥ इतिभरत' ॥

दाली । स्त्री । दलिते शमीधान्ये। दाल इतिभाषा॥ देवदालीलतायाम् ॥

दाल्भ्य. । पु । मुनिविशेषे ॥ चैकितायने ॥ बकाख्यर्षौ ॥ दल्भस्यगोत्रापत्यम्। गर्गादिभ्योयञ् ॥

दाल्मी। पुं । इन्द्रे॥ इति त्रिकाण्डशेष'॥

दाव: । पु । वनानले ॥ वने ॥ उपतापे ॥ दुनोति । टुदुउपतापे । दुन्योरनुपसर्गे इतिण. ॥

दावाग्नि । पुं । वनवह्नौ । दावे ॥ दावस्यवनस्याग्नि. ॥

दावानल' । पु । दवाग्नौ ॥

दाविक. । त्रि । देविकानदीभवे॥ देविकायां भव. । तत्रभवइत्यण् । देविकाशिंशपेत्याद्यचामादेरात्वम् । स्त्रियां टिड्ढेतिङीपि दाविकी ॥

दाश. । पु । धीवरे ॥ दशति मत्स्यान् । दंशदशने । दंशेष्टञ्नलोपश्च । दशेश्च ॥ यद्वा । दाश्यते मूल्यमस्मै । दाशृदाने । घञ् ॥

दाशतयी । स्त्री । ऋक्संहितायाम् ॥ दशमण्डलानि अवयवा यस्या' । सङ्ख्याया अवयवेतयप् । ङीप् ॥

दाशपुरम् । न । कैवर्तीमुस्तके । दशपुरे । मोथा इति भाषा ॥ दाशान् कैवर्तान् पिपर्त्ति । पृपालनपूरणयो. । मू०क: । उदोष्ठ्यपूर्वस्येत्युत्वम् ॥

दाशपूरम् । न । दाशपुरे ॥

दाशफली । स्त्री । ओषधिविशेषे ॥ पाककर्णेतिङीष् ॥

दाशरथ. । पु । श्रीरामचन्द्रे ॥ दशरथस्यायम् । तस्येदमितिसम्बन्धाऽर्थेऽण् ।सम्बन्धश्चात्र पितापुत्रत्वरूप.॥ पुरा भरतस्त्वथमारीचिसन्निभान् नवाशपुखान्सुदृढान्नृपात्मज । सृजत्यमोघान् विशिखान् वधायते प्रदीयतांदाशरथायमैथिली ॥

दाशरथि. । पु । श्रीरामे ॥ दशरथस्यापत्यम् । अतइञ् ॥

दाशार्ह: । पु । विष्णौ ॥ यादवे ॥ दाश्यते इति दाशो दानम् । तदर्हति । अर्हपूजायाम् । अण् ॥ दशार्ह...